November *1916.*

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 227.

वैयाकरणसिद्धान्तलघुमञ्जूषा

महामहोपाध्याय-श्रीनागेशभट्टविरचिता ।
श्रीमद्दुर्बलाचार्य-बालम्भट्टाभ्यां विरचित-
कुञ्जिकाकलाह्वटीकाद्वयसंवलिता ।
गुरुवरपण्डितश्रीनित्यानन्दपर्वतीयानां शासनमवलम्बमानेन
शेण्डे इत्युपाह्वेन सीतारामशास्त्रिणा
संशोधिता ।

VAIYÂKARANA SIDDHÂNTA LAGHU-
MANJUSHA

BY

MAHAMAHOPADHYAYA ŜRÎ NÂGEŜA BHATTA,
With Two Commentaries, *i. e.* Kunjikâ of
Durbalâchârya and Kalâ of Bâlam Bhatta.
Edited by Pandit Sitarama Sastri Shende.

FASCICULUS VII-७

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS:—
OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO., BOCKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES.
Price Rupee one.

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२२७

१ अस्यां चौखम्बा- संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रे... एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्रयते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्र... एवाऽत्र सुपरिष्कृत्य मुद्रयन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वा... एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आन...

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ "

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्रयमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १०

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः २

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २

(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २

(८) ब्रह्मसूत्रभाष्यम्- बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्ण । (वेदान्तः)

(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा

(१०) सिद्धित्रयम्-विशिष्टाद्वैतब्रह्मनिरूपणपर... श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीया... नमुनिभिर्विरचितम् । सम्पूर्ण(वेदान्तः)

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टार... काचार्यसंगृहीतः । आचार्यचित्सुखमुनि... विरचितव्याख्योपेतः (वेदान्तः)

(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादि... सप्तविभक्तिविस्तृतविचाररूपः म० म... श्रीगिरिधरोपाध्यायविरचितः सम्पूर्ण... (न्यायः) ... ...

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् सम्पूर्णम् (मीमांसा) ... ...

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १...

(क० टी०) वस्तुतो ऽस्यायुक्तत्वात्सिद्धान्तमतेनाह *परेत्विति। औपाधिकइत्यस्य व्याख्या *मायेति।*तत्र–नानात्मसु । *एकस्यैव–वाक्यस्फोटस्यैव।*तत्पक्षेऽपि–प्रागुक्तसिद्धान्तपक्षेऽपि। अत्र नाधिकं किञ्चित् कल्प्यमित्याह *परमिति। केवलमित्यर्थः। *तेषाम्–सिद्धान्तिनाम्।एतेनातिरिक्तजातिकल्पने किं स्फोटकल्पनयेत्यपास्तम्। तद् ध्वनयन्नाह *पूर्वेति। आविद्यकधर्मविशेष इत्यर्थः। सकलजीर्णोक्तिं खण्डयति *यत्त्विति। आदिनोपाधिः । *तत्त्वकल्पने इति । आविद्यकत्वकल्पने इत्यर्थः । इदमेव पूर्वं किञ्चेतिवार्त्तिके तद्व्याख्यानावसरे, द्वितीयमाविद्यकावयवसंस्थानविषयं न जातिविषयमिति ध्वनयन्नाह *आकृतेरिति ।भाष्ये इति भावः । *तच्चोपेति । अनुपदमेवेति भावः ॥ ४६ ॥

इतिवाच्यादिनिर्णयव्याख्यानम् ।

वाक्यसमयग्राहिका चाकाङ्क्षा । सा चैकपदार्थज्ञाने तदर्थान्वययोग्यस्यार्थस्य यज्ज्ञानं तद्विषयेच्छा 'अस्यान्वय्यर्थः क' इत्येवंरूपा पुरुषनिष्ठैव । तथापि तस्या आकाङ्क्षाविषये अर्थे आरोपः। एतदेवाभिधानापर्यवसानमित्युच्यते । 'अयमर्थो ऽर्थान्तरसाकाङ्क्ष' इति व्यवहारात्। पदे तु नारोपः। मानाभावात्। अर्थबोधोत्तरमेव जिज्ञासोदयाच्च। 'पदं साकाङ्क्षम्'इति तु साकाङ्क्षार्थबोधकमित्यर्थकम्।

तदुक्तं समर्थसूत्रे भाष्ये–"परस्परव्यपेक्षां सामर्थ्यमेके। का पुनः शब्दयोर्व्यपेक्षा। न ब्रूमः शब्दयोरिति। किं तर्हि? अर्थयोः। इह राजा पुरुषमपेक्षते–'ममायम्'इति। पुरुषोराजानमपेक्षते 'अहमस्य'इति"इति। ईदृशाजिज्ञासोत्थापकं चैकपदार्थे ऽपरपदार्थव्यतिरेकप्रयुक्तस्यान्वयबोधाजनकत्वस्य ज्ञानमिति तद्विषये तादृशान्वयबोधाजनकत्वे ऽपि 'आकाङ्क्षा'इति व्यवहारः।

एतज्ज्ञानस्य बोधहेतुत्वादेकवारमन्वयबोधे जाते तदजनकत्वज्ञानाभावान्न पुनरन्वयबोधः । कार्यसहवर्तित्वेनैव तस्य हेतुत्वान्न सर्वत्र बोधद्वयम् । अन्यथा प्रथमबोधहेतोस्तज्ज्ञानस्य द्वितीयबोधात्पूर्वमपि सत्त्वेन तत् दुर्वारं स्यात् ।

अन्वयबोधश्च तदाकाङ्क्षितसकलक्रियाकारकादिविषयो विवक्षितः ।

एतेन तस्य हेतुत्वे खण्डवाक्यार्थबोधोत्तरं महावाक्यार्थबोधो न स्यादित्यपास्तम् ।

खण्डबोधस्य क्रियातद्विशेषणकारकतद्विशेषणैतदन्यतरमात्रविषयकत्वात् । अतएव "सुरतक्रीडापिकीनां रवः" "कङ्कणक्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वन"इत्यादौ समाप्तपुनरात्तस्य दोषतोक्ता ऽऽलङ्कारिकैः । क्रियाकारकभावेनान्वयबोधकसकलपदोक्त्यनन्तरं तद्धटकयत्किञ्चिदन्वयिविशेषणोपादानं हि समाप्तपुनरात्तत्वम् ॥ ४७ ॥

(कुं.टी.)*साचैकेति । यथा घटादिपदार्थज्ञानानन्तरं तदन्वयिन आनयनादेर्जिज्ञासा भवति । यद्यपि 'घटमानय'इतिवाक्ये द्वयोरपि पदार्थयोरवगतत्वान्नास्ति जिज्ञासा,तथापि एकपदार्थज्ञानमात्रे इत्यर्थः । *तद्विषयेच्छेति । ज्ञानाविषयिणी इच्छेत्यर्थः । *पुरुषनिष्ठैवेति । इच्छारूपायास्तस्यास्तत्रैवौचित्यात् । *अर्थे-आरोप इति । विषयतासम्बन्धेनाकाङ्क्षाया अर्थे ऽपि सत्त्वात् । *एतदेवेति । अभिधानस्य बोधकत्वस्यापर्यवसानमित्यर्थः । नन्वाकाङ्क्षायाः शाब्दबोधहेतुत्वात्पदनिष्ठत्वमेव यु-

क्षमत आह *एकपदार्थे इति । भवतिचानयपदार्थाभावे घट-पदार्थे ऽन्वयबोधाजनकत्वम् । पदार्थोपस्थित्यनन्तरमेवान्वय-बोधोत्पत्तेरर्थस्यैव जनकत्वमिति भावः । *अपरपदार्थव्य-तिरेकः-अपरपदार्थज्ञानाभावः । तेन घटस्य सत्ता नास्तीत्य-त्र नाव्याप्तिः । मौनिश्लोके ऽव्याप्तिवारणाय पदज्ञानस्य हेतुत्वावश्यकतया पदार्थनिष्ठैवाकाङ्क्षेति तात्पर्यम् । *तद्विष-ये-बोधाजनकत्वज्ञानविषये । नन्वाकाङ्क्षायोग्यतयोः को भेद इति चेद् । इत्थम् । योग्यता यावद्वस्तुस्थायिनी जाते ऽपि बो-धेऽस्त्येव, आकाङ्क्षा तु नास्तीति तयोर्भेदः । नन्वन्वयबोधे जाते पुनरप्यन्वयबोधापत्तिरत आह *तदजनकत्वेति । अत-एवाजनितान्वयबोधजनकत्वमाकाङ्क्षेति परे । नन्वाकाङ्क्षा-निश्चयस्य निश्चयत्वघटिततया लाघवादनाकाङ्क्षाज्ञानाभावस्यैव हेतुत्वमस्त्विति चेन्न । तत्राप्रामाण्यनिर्णयस्योत्तेजकत्वे गौरवात् । आकाङ्क्षानिश्चयस्य हेतुत्वेतु अप्रामाण्यज्ञानस्यैवोत्तेजकत्वमिति लाघवम् । *कार्यसहेति । बोधात्पूर्वं बोधाजनकत्वज्ञाने सत्यपि बोधे सति बोधाजनकत्वज्ञानाभावान्न पुनर्बोध इत्यर्थः । *तज्ज्ञा-नस्य-बोधाजनकत्वज्ञानस्य । *द्वितीयबोधादिति।प्रथमबोधकाले आपादनीयादित्यादिः । *तत्-बोधद्वयम् । ननु अवान्तरवा-क्यार्थबोधानन्तरं महावाक्यार्थबोधानापत्तिरत आह *सकल-क्रियेति । अत एव तात्पर्यविषयान्वयबोधाजनकत्वमाकाङ्क्षे-ति परे । *क्रियाकारकेति । क्वचित्क्रियातद्विशेषणयोः क्वचि-त्कारकतद्विशेषणयोः प्रथममन्वय इत्यर्थः । *सुरतक्रीडेति । तन्व्याः कङ्कणक्वाणः वः प्रेम तनोतु । स कीदृशः सुरतक्रीडायां याः पिकयः कोकिलाः तासां शब्दः।पुनः कीदृशः,नववयोनृत्यार्थं वेणुस्वनः । अत्र वाक्यार्थे समाप्ते वेणुस्वन इति विशेषणोपा-

दानात्समाप्तपुनरात्तत्वम् । *तद्घटकेति । तद्घटको यः कश्चित्तदन्वयिनो विशेषणस्येत्यर्थः ॥ ४७ ॥

(क० टी०) अथ तद्धेतुत्वादाकाङ्क्षादिनिरूपणमित्याह *वाक्येति । ऐश्वरेत्यर्थः । नन्वाकाङ्क्षा सामान्यत इच्छा कोशादिप्रसिद्धेति कथं तस्यास्तद्ग्राहकत्वमतः प्रकृतोपयोगिविशेषरूपां तामाह *साचेति । ज्ञाने सति यज्ज्ञानं भवति तद्विषयेच्छेति । ज्ञानविषयविषयेच्छेत्यर्थः । तदेवाह *अस्येति । इयमपि न प्रकृतोपयोगिनी इत्याह *पुरुषेति । यद्यपीत्यादिः । विषयतासम्बन्धस्य विशिष्टबुद्ध्यनियामकत्वस्योपक्रमे एवोक्तत्वादाह *आरोपइति । *एतदेवेति । आरोपितार्थनिष्ठाकाङ्क्षारूपमेवेत्यर्थः । अभिधानापर्यवसानमाकाङ्क्षेति वृद्धोक्तेरिति भावः । बोधापूर्त्तिरिति तदर्थः । उक्तहेतोरेवारोपे बीजत्वमाह *अयमर्थइति । एवव्यवच्छेद्यं ध्वनयन्नाह *पदेत्विति । *मानेति । तथा यवहाराभावादित्यर्थः । अर्थविषयकत्वमेव तस्यां न पदविषयकत्वमिति अत्यसम्बन्धादपि नारोप इत्याह *अर्थेति । नन्विदं पदमितरपदसाकाङ्क्षमिति व्यवहारो बीजमस्त्येव तत्रापत्यित आह *पदमित । 'प्रविशपिण्डीम्' इतिन्यायेनाह *साकाङ्क्षार्थेति । अन्यथा भाष्यविरोधोऽपीति सूचयन्नाह *तदुक्तमिति । एवेन यत्पदस्य यत्पदव्यतिरेकप्रयुक्तान्वयबोधाजनकत्वं तत्पदे तत्पदवत्त्वमाकाङ्क्षा, तज्ज्ञानं तत्र हेतुरित्येवं पदनिष्ठां तां तद्रूपां वर्णयन्तो ऽन्ये सर्वेऽपि परास्ताः । तदेतद् ध्वनयन्ननयाऽपि कथं प्रकृतासिद्धिरिति शङ्कानिरासायाह *ईदशेति । अस्या उपयोगमाह *एतदिति । तद्रूपाकाङ्क्षाज्ञानस्येत्यर्थः । एवं सति प्राप्तदोषं परिहरति *कार्येति । *तस्य–एतज्ज्ञानस्य । एवेन पूर्ववर्त्तित्वव्यवच्छेदः । संस्कारे क्लृप्तमिदमिति भावः । *अन्यथा–तेनैव तत्त्वानङ्गीकारे–पूर्ववर्त्तित्वमात्रेण तदङ्गीकारे । *तद्–बोधद्वयम्, सार्वत्रिकम् । दोषान्तराभावायाह *अन्वयेति । किंतद्विवक्षाफलम्, तदाह* एतेनेति । अस्यार्थमाह *खण्डेति । खण्डवाक्यार्थेत्यर्थः । *मात्रं कैवल्ये । *अतएव–खण्डवाक्यार्थबोधोत्तरामिष्टमहावाक्यार्थबोधे दोषाभा-

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता१

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरात्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भगवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः-प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित १

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमाविरचितः । स्वकृतटीकाविभूषितश्च । १

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य-

व्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ३

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता । रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्ययातथासोमनाथकृतया मयुखमालिकया च व्याख्यया समलङ्कृता । ३

(४६) वैयाकरणसिद्धान्तमञ्जूषा । श्रीमदुपाध्यायोपनामक श्रीनागेशभट्टविरचिता श्रीमद्दुर्बलाचार्यविरचितकुञ्जिकाटीका-श्रीमद्बालम्भट्टविरचितकलाटीका—इ[...] टीकाद्वयसंवलिता । ...

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय[...] विश्वेश्वरसूरिविरचितः ।

(४८) विरमित्रोदयः । लक्षणप्रकाशः ।

महामहोपाध्यायश्रीमित्रमिश्रविरचितः ।

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसं[...] ग्रहाख्यया टीकया समलंकृतः ।

पत्त्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी ।

वस्येष्टत्वेनेदृशान्वयबोधस्याभिप्रेतत्वादेवेत्यर्थः। अन्यथा सर्वत्र तथा सत्त्वेन तदसङ्गतिः स्पष्टैव। *सुरतेति। क्रेङ्कारः स्मरकार्मुकस्येत्यादिः। *कङ्कणेति। 'झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः। तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलादित्यादिः। *आदिना प्रागप्राप्तेत्यादि। अत्र तनोतु व इति समाप्तमेव वाक्यं नववयइत्यादिविशेषणान्वयायोपात्तम्। अतएवेत्यस्यार्थं सूचयन् फलितमाह *क्रियेति। वाक्यस्य पुनरुपादानं स्वघटकद्वारेत्याह *तद्घटकेति। विशेष्यभूतक्वाणेत्यर्थः। शाब्दस्तु "समाप्तं जनितविवक्षितान्वयबोधकं वाक्यं सद्यत् पुनरुपात्तं तद्घटकान्वयिशब्दोपादानेन तद्घटकद्वारा पुनरनुसन्धानविषय" इति॥ ४७॥

यद्यपि सति तात्पर्ये आवृत्त्या बोधद्वयमिष्टमेव। तथापि सैवात्र दूषकताबीजम्। एतन्मूलिकैव 'सकृदुच्चरितः शब्दः सकृदर्थं गमयति' इति व्युत्पत्तिः। किञ्च उक्तस्यान्वयबोधाजनकत्वज्ञानस्य वक्ष्यमाणसमभिव्याहारकारणताज्ञानमूलकत्वात्साऽप्याकाङ्क्षा। अतः स स समभिव्याहारस्तादृशतादृशान्वयबोधजनक इति ज्ञानं कारणम्। तदजानतामबोधाच्च। अत एव यस्य यादृशसमभिव्याहारे यादृशान्वयबोधकत्वग्रहस्तस्य तादृशान्वयबोध इत्यनुभवसिद्धम्। स स समभिव्याहारस्तत्तदन्वयबोधजनक इत्ययमेव वाक्यविषये ऐश्वरः समयः। तत्परिपालिका च मीमांसा। अत एव घटः कर्मत्वमानयनं कृतिरित्यतो विपरीतव्युत्पन्नस्य बोधः, सद्व्युत्पन्नस्य चाबोध उपपद्यते। सद्व्युत्पन्नत्वं च व्याकरणशास्त्रोक्तप्रकृतिप्रत्ययविभागतत्तदर्थविभागतत्तदन्वयबोधविषयज्ञानवत्त्वम्। अन्वयानुभवश्च स्वरूपसन् तत्तत्समभिव्याहारजन्यान्वय-

बोधान्तरे प्रतिबन्धकः। तन्मूलकमन्वयबोधाजनकत्वज्ञानमपि वा हेतुरिति तन्मूलिकैव 'सकृदुच्चरित' इति व्युत्पत्तिः। तादृशबोधेच्छयोच्चरितत्वरूपतात्पर्यज्ञाने सत्यपि तत्समभिव्याहारे तज्जनकत्वज्ञानाभावे बोधादर्शनान्न तात्पर्येणास्या अन्यथासिद्धिः। सत्यप्यस्य तात्पर्ये अबोधकमिति व्यवहाराच्च। तत्र अयं व्युत्पन्नस्य क्रियाकारकादिपदघटितः सामान्यत एवेत्युक्तम्। व्युत्पन्नस्याश्रुतवाक्यादपि बोधदर्शनाद् प्रतिवाक्यं तथाग्रहस्यासम्भवाच्च ॥ ४८ ॥

(कुं० टी०) ननु उभयतात्पर्येण प्रयुक्ते 'अयमेति पुत्रो राज्ञः पुरुषो ऽपसार्यताम्' इति वाक्ये पुत्रेणान्वयबोधे जाते पुरुषेणान्वयबोधो न स्यादत आह *आवृत्त्येति । तथाच द्वितीयवाक्यं बोधाजनकमेवेति भावः। *सैव–आवृत्तिरेव। *अत्र–पुनर्बोधे। *दूषकताबीजमिति।

अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः,

अयमुदयति निद्राभञ्जनः पद्मिनीनामित्यादौ तु पूर्ववाक्यार्थोपपादकत्वेनाकाङ्क्षाया अनिवृत्तत्वान्न समाप्तपुनरात्तत्वम्। *एतन्मूलिकैवेति। जनितान्वयबोधकत्वेन निराकाङ्क्षत्वादिति भावः। *वक्ष्यमाणेति। तेन घटः कर्मत्वमित्यादौ न बोधः। *स स समभिव्याहार इति।

यत्तु समभिव्याहृतपदे व्यतिरेकप्रयुक्तेति, तेन घटो भवतीति वाक्यं न रक्तसाकाङ्क्षं रक्तपदसमभिव्याहाराभावादिति।

तन्न। आसत्त्यभावात्तात्पर्याभावाद्वा बोधाप्रसक्तेः। *अत

एव–समभिव्याहारस्य हेतुत्वादेव । *विपरीतव्युत्पन्नस्य–भ्रान्तस्य। *स्वरूपसन्निति।स्वरूपसत्यैवोक्ताऽऽकाङ्क्षा हेतुः। तावतैव जनितान्वयबोधे ऽतिप्रसङ्गाभावादिति भावः। नन्वाकाङ्क्षायाः प्रागभावरूपत्वाद् 'अहो विमलं जलं नद्याः कच्छे महिषाश्चरन्ति' इत्यत्र नदीजलयोरन्वयबोधानन्तरमपि कालान्तरीयनदीकच्छान्वयप्रागभावसत्त्वान्नदीकच्छान्वयबोधापत्तिः। तात्पर्याभावान्न तदापत्तिरित्युक्तौ तु आकाङ्क्षाविरहान्न बोध इति प्रवादविरोध इत्यत आह *अन्वयबोधान्तरे प्रतिबन्धक इति । नन्वयमेतीत्यादौ राजपुत्रयोरन्वयबोधानन्तरं तात्पर्यभ्रमात्पुरुषान्वयस्यापि दर्शनात् प्रतिबन्धकत्वासम्भव इत्यत आह *ज्ञानमपीति। 'अयमेति पुत्रो राज्ञः पुरुषो ऽपसार्यताम्' इत्यादौ तात्पर्यभ्रमेण पुरुषे ऽन्वये पश्चात्पुत्रान्वये तात्पर्यग्रहे ऽप्यन्वयानापत्तिरतः तात्पर्यविषयान्वयाजनकत्वमेव विवक्षितमिति भावः। ननु तात्पर्यविरहादेवान्वयबोधाभावे किमाकाङ्क्षयेत्यत आह *तादृशेति। इदं वाक्यमेतदर्थबोधकं नेति जानतः इदं वाक्यमेतदर्थबोधेच्छया उच्चरितमिति तात्पर्यग्रहे सत्यप्यर्थाबोधादित्यर्थः। *अस्याः–आकाङ्क्षायाः। *अयम्–समभिव्याहारः। *सामान्यत इति। नतु विशिष्य तत्तत्पदघटितः। *अश्रुतवाक्यादपीति। तत्तत्पदघटितवाक्यस्यापूर्वश्रवणे ऽपीति भावः॥ ४८॥

(क० टी०) अस्य नित्यदोषत्वमाह *यद्यपीत्यादि । ननु सकृदुच्चरित इतिव्युत्पत्तिसत्त्वेनेष्टबोधद्वयस्यैवाभावेन कथं तस्या एव तद्बीजत्वमत आह *एतदिति। आवृत्तेर्दुष्टत्वमूलिकैवेत्यर्थः। एतेन स्वातन्त्र्यव्यवच्छेदः।

यत्तु–यत्पदं यदर्थेन सह तात्पर्यविषयीभूतयादृशार्थान्वयबोधकं

तत्पदे तस्य पूर्ववर्त्तित्वोत्तरवर्त्तित्वादिरूपः समभिव्याहारस्तादृशबोधे आकाङ्क्षा तज्ज्ञानं कारणमिति ।

तन्न । सद्व्युत्पन्नासद्व्युत्पन्नविभागोच्छेदापत्तेः । यदि तत्परिहाराय तादृशबोधे यत्समभिव्याहारः कारणं तादृशबोधे तत्कारणत्वज्ञानमपि तथेत्युच्यते तर्ह्यावश्यकत्वात्सैवाकाङ्क्षाऽस्तु ।

यदपि तत्तत्समभिव्याहारे तत्तद्बोधाजनकत्वनिश्चयः प्रतिबन्धक इति ।

तदपि न । घटमानयेत्यादौ तत्तत्पदे घटाम्पदादौ प्रत्येकं गृहीतशक्तिकस्य तादृशानुपूर्वीज्ञानवतोऽकारणत्वनिश्चयाभाववतो विपरीतव्युत्पन्नस्य ततो बोधापत्तेर्गौरवाच्च । तदेतद् ध्वनयन्नाह *किञ्चेत्यादिवत्त्वमित्यन्तेन । *सापि–समभिव्याहारनिष्ठान्वयबोधजनकताऽपि । *अपिः पूर्वसमुच्चये । *अतः–तद्भिना तदसम्भवात् । अन्वयमुक्त्वा व्यतिरेकमाह *तदजानतामिति । *अतएव–तस्य तथा तत्कारणत्वादेव । एवमग्रेऽपि । *इत्ययमेवेति । ज्ञानरूप एव । शास्त्रोक्तत्वं बोधान्तत्रितयान्वयि । तदुक्तत्रितयविषयकज्ञानवत्त्वमिति तदर्थः । नन्वेवं प्रोक्तकारणाभावात्सर्वत्र बोधद्वयं दुर्वारमिति प्रोक्तदोषापत्तिरतः । प्राचां मतेनाह *अन्वयेति । आवश्यकत्वाल्लाघवाच्च सिद्धान्तमतेनाह *तन्मूलकमिति । समभिव्याहारकारणताज्ञानमूलकमित्यर्थः । *तन्मूलिकेति । अन्यतरमूलिकेत्यर्थः । अत एव जनितान्वयबोधे नैराकाङ्क्ष्यमिति व्यवहारः । ननु तात्पर्येणान्यथासिद्धतया नैतदाकाङ्क्षाज्ञानमपि हेतुरत आह *तादृशेति। *अस्याः–उक्ताकाङ्क्षायाः। *तत्र–उक्ताकाङ्क्षायाः कारणत्वस्वीकारे। *अयम्–आकाङ्क्षाकार्यकारणभावग्रहः। सामान्यत इत्यस्य व्याख्या *क्रियेति । एवेन विशिष्य तत्तत्पदघटितव्यवच्छेदः । *उक्तम्–वाक्यशक्तिग्रहकथनावसरे । *अश्रुतेति । अपूर्वश्रुतेत्यर्थः । तदुक्तं वाचस्पतिमिश्रैः साङ्ख्यतत्त्वकौमुद्याम् "नच वाक्यं वाक्यार्थे बोधयत्सम्बन्धग्रहणमपेक्षते अभिनवकविरचितस्य वाक्यस्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वाद्" इति । इदमपि तत्सम्भवमभ्युपेत्य । वस्तुतः स एव नेत्याह *प्रतीति ॥ ४८ ॥

'पदभेदेन व्युत्पत्तिभेद' इत्यस्य च नामपदद्वयना-

माख्याताख्यातनिपातनिपातनामादिभेदेन तत्तत्पद-
समुदाये व्युत्पत्तिभेद इत्येवार्थः । सचाग्रे तत्र तत्र
वक्ष्यते । उत्थापकताविषयताऽन्यतरसम्बन्धेनोभयसं-
बन्धेन वा जिज्ञासाविशिष्टः साकाङ्क्ष इत्युच्यते । त-
त्रान्त्यं-पचति तण्डुलं देवदत्त इति । क्रियाकारकयो-
र्द्वयोरपि परस्परं तदुत्थापकत्वात्तद्विषयत्वाच्च । आद्यं-
पश्य मृगो धावतीति । अत्र पश्यार्थस्य कारकधावना-
ऽऽकाङ्क्षोत्थापकत्वं धावनं तु तद्विषय एव । ईदृशस्थले
क्रियाकारकसम्बन्धो वाक्यशक्य एव । अत एव "वि-
भाषा साकाङ्क्षे" इति सूत्रे भाष्ये "अस्त्यस्मिन्नाकाङ्क्षेति
च साकाङ्क्षम्" इत्युक्तम् । अस्मिन्निति विषयसप्तमी-
त्यलम् ॥ ४९ ॥

(कुं० टी०) ननु क्रियाकारकादिपदसमभिव्याहारस्या-
र्थविशेषे नियतत्वात् एकस्य पदस्य वाक्यान्तरे कथं भिन्ना-
र्थत्वमत आह *पदभेदेनेति । ननु जनितान्वयबोधे तात्प-
र्यविरहात्पुनर्बोधाप्रसक्तौ किमाकाङ्क्षाज्ञानहेतुतयेति चेद् ।

अत्राहुः-सैन्धवपदादतात्पर्यविषयतुरगबोधे तात्पर्यविष-
यान्वयाजनकत्वसत्त्वादाकाङ्क्षाऽस्त्येव किंतु तात्पर्याभावादेव
न तुरगबोध इति ।

*अन्त्यम्-उभयसम्बन्धेन । *आद्यम्-अन्यतरसम्बन्धे-
न । *कारकधावनेति कर्मधारयः ॥ ४९ ॥

(क० टी०) ननु सामान्यत एव तदङ्गीकारे पदभेदेन
व्युत्पत्तिभेद इति प्रवादासङ्गत्यापत्तिरत आह *पदभेदेने-
ति । ननु विशिष्य तत्तत्पदघटितत्वं तस्य तत्तात्पर्यभूतमि-
ति भावः । ननु साकाङ्क्षत्वव्यवहारे न समवायो नियामकः तथा-

सति पुरुषतदारोपविषयार्थान्यत्रेष्टतद्व्यवहारानापत्तेः, अत एव न विषयताऽपि, इत्यत आह *उत्थापकतेति । हेतुगर्भं विशेषणमाह—*कारकेति । *उत्थापकत्वम्—उत्थापकत्वमेव । ननु 'पश्य मृगो धावति' इत्यादौ विशेषणविशेष्यभावस्य वाक्यशक्यत्वेन ततः प्रतीतावपि कथं क्रियाकारकभावसम्बन्धावगतिः, तस्य विभक्तिशक्यत्वेन न वाक्यशक्यत्वमित्यस्योक्तत्वेन वक्ष्यमाणत्वेन च विभक्तेरत्राभावात् अत आह *ईदृशस्थले इति। *सम्बन्धः—सोऽपि । वाक्यशक्य एवेति एवेन विभक्तिव्यवच्छेदः । तस्या एवासत्त्वेनान्यथानुपपत्त्येति भावः। ननूत्थापकतासम्बन्धेन तद्विशिष्टस्यैव साकाङ्क्षत्वं स्वरससिद्धं न विषयतयेति कथं धावनस्य तत्त्वेनैव साकाङ्क्षत्वमत आह *अत एवेति । विषयतासम्बन्धस्यापि निवेशादेवेत्यर्थः। चेन तथा द्वितीयसमुच्चयः । अत्रेव तत्रापि द्वितीयस्य तथा साकाङ्क्षत्वेऽप्याद्यस्याभावादेवमुक्तम् । तदाह *अस्मिन्निति ति । आकाङ्क्षात्वेनानुगमादेक एव कार्यकारणभावः । समभिव्याहारस्य कारणत्वं च सम्बन्धं विनाऽनुपपन्नमित्येतत्कार्यकारणभावबलादेव वाक्यशक्तिसिद्धिः, अन्यथा पदशक्तिरपि न सिध्येदित्युक्तम् । तदाह *अलमिति ॥ ४९ ॥

यत्तु अर्थनिष्ठा योग्यताऽपि शाब्दबोधे कारणम् । सा च तात्पर्यविषयीभूतसंसर्गवृत्तिधर्मे संसर्गतावच्छेदकाख्ये सम्बन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावः । तेन विशिष्टाभावादिकमादाय न दोषः । तज्ज्ञानं कारणम् । संसर्गज्ञानं तु तात्पर्यविषयतया ऽऽकाङ्क्षाज्ञानविषयतया वा सुलभम् । यद्वा प्रतियोगितावच्छेदकत्वरूपायोग्यतानिश्चयो बोधप्रतिबन्धक इति ।

तन्न । शब्दप्रयोज्ये बोधे बाधज्ञानस्याप्रतिबन्धकत्वात् । तदभावज्ञानस्याकारणत्वाच्च । सत्यपि बाधनिश्चये 'अस्य क्षोणिपतेः परार्द्धपरया लक्षीकृताः

सङ्ख्यया,' 'एष वन्ध्यासुतो याति' इत्यादितो बोधदर्शनात् ।

किञ्चैवं 'वह्निना सिञ्चति' इत्यतो बोधाभावे तद्वाक्यप्रयोक्तुः 'अद्रवेण वह्निना कथं सेकं ब्रवीषि' इत्युपहासः श्रोतृभिः क्रियमाणो ऽसंगतः स्यात् । एतदर्थकद्रविडभाषाश्रवणोत्तरं पाश्चात्त्यस्येव मूकता तस्य स्यात् ।

किञ्चैवं सति वादे प्रतिवादिशब्दस्याबोधकत्वे तत्खण्डनकथोच्छेदः ।

नचैतादृशेषु नान्वयबोधः किंतु पदार्थबोधमात्रमिति वाच्यम् । सर्वत्रैवमेवापत्तेः ।

नच प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानुरोधेन शाब्दविशिष्टज्ञानासिद्धिरिति वाच्यम् । दुःखद्वेषेच्छासुखादावपि तुल्यरीत्या तद्धेतुत्वेन सत्यपि बाधनिश्चये मिथ्याभिशापगालिदानरूपकादिकाव्यजदुःखद्वेषेच्छासुखाद्यनुरोधेन तत्रापि तदावश्यकत्वात् । अन्यथा व्युत्पन्नानां मुखत्वमाश्रयश्चन्द्रत्वमाश्रय इत्यतो ऽपि मुखं चन्द्र इत्यादित इव चमत्कारापत्तिः। विभक्त्यर्थस्यैवान्वयतया तद्बोधो नेत्यस्यात्यन्तमसङ्गतत्वाच्च । दैववशसम्पन्नात्कलहादिसदृशशब्दात्तु न दुःखम्, तादृशवक्तृतात्पर्याभावज्ञानात् । 'नेदं रजतम्' इति भ्रमवतस्ततो निवृत्तावाप्तेन 'इदं रजतमेव' इति प्रयुक्ते बाधज्ञानकाल एव ततो बोधात्प्रवृत्तिदर्शनाच्च ।

एतेनासंसर्गाग्रहमात्रेण तत्सिद्धिरित्यपास्तम् ॥५०॥

(कुं० टी०) *साचीति। यथा "वन्हिना सिञ्चति" इत्यत्र सेककरणत्वे वान्हिसंसर्गो नास्तीति सेककरणत्वनिष्ठो यो वह्निसंसर्गाभावस्तत्प्रतियोगितावच्छेदकमेव वह्निसंसर्गत्वमिति अयोग्यत्वान्न बोधः । प्रतियोगिता च तदभावग्रहप्रतिबन्धकग्रहाविषयत्वम् । अन्योन्याभावस्थले प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिप्रकारकज्ञानस्याभावधीविरोधित्वान्नाव्याप्तिः । संसर्गे प्रतियोगित्वाभावमनिवेश्य संसर्गतावच्छेदके प्रतियोगितानवच्छेदकत्वनिवेशस्य फलमाह *तेनेति । घटमानयेत्यादौ घटसंसर्गपटत्वोभयाभावसत्त्वे ऽपि नायोग्यत्वापत्तिरित्यर्थः । ननु वृत्तिविरहात्संसर्गस्य कथं ज्ञानमत आह *संसर्गज्ञानं त्विति । *यद्वेति । योग्यताज्ञानहेतुतायां तत्र प्रामाण्यनिश्चयस्योत्तेजकत्वं कल्प्यम् । अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु संशयनिश्चयसाधारणप्रामाण्यज्ञानस्यैवोत्तेजकत्वे लाघवमिति भावः । *बोधप्रतिबन्धक इति ।

इदं तु बोध्यम्—बाधस्य संसर्गाग्रहरूपतया तदभावस्य विशिष्टबुद्धिं प्रति हेतुतायाः क्लृप्तत्वादयोग्यतानिश्चयानन्तरं न शाब्दबोधापत्तिः सम्भवति । अत एव बाधनिश्चयानन्तरं योग्यताभ्रमादेव बोधः । योग्यताभ्रमश्चाहार्यारोपो ऽपि । योग्यताज्ञानस्य पृथक् कारणत्वे तु यत्र स्वरूपसद्बाधावतारो योग्यतासंशयश्च तत्रापि बोधापत्तिः । नच तदुभयमेकत्र न भवत्येवेति वाच्यम् । नहि ग्राह्यपदार्थ एव योग्यता येन ग्राह्याभावनिश्चये सति तत्संशयो न स्यात् । किन्तु ग्राह्यव्याप्या सा । एवं च व्याप्यनिश्चयदशायां तदुभयमविरुद्धमेव। *बाधज्ञानस्येति । बाधनिश्चयस्येत्यर्थः । संशयानन्तरं विशेषदर्शने सति तद्वत्ताबुद्धेरुदयात् ।

केचित्तु संशयसाधारणं बाधज्ञानमेव प्रतिबन्धकं विशेषदर्शनं तूत्तेजकमित्याहुः ।

तन्न । योग्यतासंशयानन्तरं शाब्दबोधोदयेन बाधनिश्चयस्यैव प्रतिबन्धकत्वात् ।

यत्तु बाधकाले ऽपि आहार्यप्रत्यक्षोदयात्प्रत्यक्षान्यज्ञानत्वमेव प्रतिबध्यतावच्छेदकं वाच्यम् । तस्य चार्थापत्तिसाधारणत्वेन प्रतिबध्यतावच्छेदकत्वासम्भवादनुमितित्वादिकमेव प्रतिबध्यतावच्छेदकमिति शाब्दबोधे तस्याक्लृप्तत्वाद्योग्यताज्ञानं पृथगेव हेतुरिति । तद् दूषयति *अप्रतिबन्धकत्वादिति । बाधकाले ऽप्याहार्यप्रत्यक्षोदयादिच्छाया उत्तेजकत्वानुरोधेन प्रत्यक्षत्वस्यैव प्रतिबध्यतावच्छेदकत्वात् उपनीतभानसाधारणप्रतिबध्यतायाः शाब्दबोधावृत्तित्वाद्बाधकाले ऽप्याहार्यः शाब्दबोधो भवत्येवेति भावः ।

वस्तुतस्तु सत्यपि बाधनिश्चये कामलादिदोषवशाद्यथा 'पीतः शङ्ख' इति धीस्तथा पदार्थोपस्थितिवशाच्छाब्दबोधो दुरपह्नव एवेत्याह ।

*अस्यक्षोणिपतेरिति । अस्य राज्ञः कीर्तयः परार्धाधिकसंख्यया लक्ष्या इत्यर्थः । अत्र परार्धाधिकत्वस्य बाधे ऽपि बोधः । *वादेइति । तत्त्वबुभुत्सोः कथायामित्यर्थः ।

केचित्तु शाब्दप्रमायामेव योग्यताज्ञानं हेतुः । आहार्यबोधस्तु भ्रमभेद इत्याहुः ।

*नचेति । योग्यवाक्ये एव विशिष्टबुद्धिः स्वीक्रियत इत्यर्थः । *सर्वत्रेति । योग्यवाक्ये ऽपि विशिष्टबुद्ध्युच्छेदापत्तिरित्यर्थः । *दुःखेति । दुःखादिकं प्रत्यपि विशिष्टज्ञानस्य हेतु-

तया गालिप्रदानादौ विशिष्टज्ञानाभावे दुःखादिकं न स्यादित्यर्थः ।

यत्तु बाधस्य संसर्गाग्रहरूपतया तदभावस्य विशिष्टबुद्धिमात्रे हेतुत्वावश्यकत्वादयोग्यतानिश्चयानन्तरं न शाब्दबोध इति, तन्निराकरोति *मिथ्याभिशापेति । *रूपकादीति । उपमानोपमेययोरभेदवर्णनं रूपकम् । पदार्थोपस्थितिमात्रस्वीकारे दोषमाह *अन्यथेति । मुखत्वचन्द्रत्वाश्रयत्वानां विशकलितानामुपस्थानेऽपि चमत्कारापत्तिरित्यर्थः । *विभक्त्यर्थस्यैवेति । 'अग्निना सिञ्चति' इत्यादावित्यादिः । *असंसर्गाग्रहेति । रजतत्वप्रकारकप्रवृत्तौ रजतत्वप्रकारकज्ञानस्य हेतुतायाः क्लृप्तत्वाद्रङ्गादिगोचररजतभ्रमोत्तरं प्रवृत्तावपि रजतत्वासंसर्गाग्रह एव हेतुरस्त्विति भावः ।

यत्तु अयोग्यतानिश्चयाभावस्यासंसर्गाग्रहत्वेन प्रत्यक्षस्थले हेतुतायाः क्लृप्तत्वादिहापि तत्त्वमस्तु, नतु योग्यताज्ञानस्येति । तन्न । प्रत्यक्षासंसर्गाग्रहस्यैव तत्र प्रतिबन्धकतया असंसर्गग्रहसामान्याभावस्य पृथग् हेतुताया अक्लृप्तत्वात् । अत एव वक्ष्यति अभावरूपस्यासंसर्गाग्रहस्येतीति भावः ।

*तत्सिद्धिः–प्रवृत्तिसिद्धिः । *अपास्तमिति । प्रत्यक्षासंसर्गाग्रहस्यैव तत्र प्रतिबन्धकतया तदभावस्य कारणतायास्तत्र क्लृप्तत्वे ऽपि असंसर्गग्रहसामान्याभावस्य पृथग्हेतुताया अक्लृप्तत्वादिति भावः ॥ ८० ॥

(क० टी०)आकाङ्क्षेत्युक्तिमात्रसूचितमाह *यत्त्विति । प्राग्वदियमपि पदनिष्ठा नैवेत्याशयेनाह *अर्थनिष्ठेति । अन्यनिरासायाह *तात्पर्येति । *अवच्छेदकाख्ये–विशेषणविशेष्यभावत्वादौ । ननु तादृशसंसर्गे सम्बन्धिनिष्ठात्यन्ताभावप्रतियोगित्वाभाव इत्येव कु-

तो नोक्तमत आह *तेनेति । तद्वृत्तिधर्मादिनिवेशेनेत्यर्थः । *आदिना–धर्माभयाभावः । अन्यथा तमादाय तत्प्रतियोगित्वस्यैव सत्त्वमिति योग्येऽप्ययोग्यतापत्तिः । एवं निवेशे तु तदभावे ऽपि तत्त्वस्य तत्र सत्त्वं नतु तादृशधर्म इति न दोष इति भावः । इयमपि ज्ञाता कारणं न स्वरूपसतीत्याह *तज्ज्ञानमिति । ननु संसर्गज्ञानमेवादौ कथं येनैतत्स्याद्, अत आह *संसर्गेति । तत्रादौ परमतेनाह *तात्पर्यज्ञानेति । सिद्धान्तमतेनाह *आकाङ्क्षेति । मतान्तरमाह *यद्वेति । व्युत्क्रमेणादौ द्वितीये दोषमाह *बाधेति । आद्ये आह *तदभावेति । उभयत्र हेतुमाह *सत्यपीति । *संख्ययेत्यस्य "प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः । गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरान्मूकानां प्रवरेण कूर्मरमणीदुग्धोदधे रोधसि" इति शेषः । *यातीत्यस्य "खपुष्पकृतशेखरः । मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः" इति शेषः । तत्र दोषान्तरमाह *किञ्चैवमिति । तदन्यतरस्य तदन्यतरत्वे इत्यर्थः । एवमग्रेऽपि । भावे सति किं तत्रोचितमत आह *एतदिति । लेशतोऽपि ज्ञानशून्यत्वायाह *पाश्चात्त्येति । *एतादृशेषु–'वह्निना सिञ्चति' इत्यादिषु । *सर्वत्रेति । 'घटमानय' इत्यादावन्यत्रापीत्यर्थः । तथाच शब्दप्रामाण्योच्छेदप्रसङ्ग इति भावः । वैषम्यादन्यत्र दोषमुद्धरति *नचेति । घटः कर्मत्वमित्यादौ ॥ ५० ॥

किञ्चासंसर्गाग्रहो नाम संसर्गाभावग्रहाभावः । तथा सति बाधज्ञानाभावेन विशिष्टबुद्धेरापत्त्या न्यायनये[1] एवं वक्तुमनौचित्यात् । गुरुमते ऽपि न, येन दोषेण विद्यमानस्यासंसर्गस्याग्रहस्तेनाविद्यमानसंसर्गग्रहस्यैव वक्तुं शक्यत्वात् ।

किञ्च विशिष्टज्ञानस्य कारणत्वे सम्भवति अभावरूपस्यासंसर्गाग्रहस्य तत्कारणत्वकल्पने गौरवम् ।

---

१ न्यायनये, गुरु-ऽपिन, किञ्चेति, इति पाठा न सन्ति केवलमूलपुस्तकद्वितये ।

यत्र तु काव्यादौ विभावादीनां सहृदयतासहकृतव्यञ्जनया संबन्धिविशेषीयत्वेनाप्रतीतौ प्रतीतिरूपा साधारण्येन प्रतीतिस्तत्र विशिष्टज्ञानस्यानुभवविरुद्धतया स्वीयत्वासंसर्गाग्रहमात्रेण स्वीयत्वसंसर्गग्रहप्रयोजनं स्वनिष्ठस्थाय्यभिव्यक्तिरित्यन्यत् । नच 'वह्निना सिञ्च' इत्यादितः प्रवृत्तिरपि स्यात् । बाधज्ञानेन जायमानज्ञाने ऽप्रामाण्यशङ्काया जननात्तच्छून्यज्ञानस्यैव प्रवृत्त्युपयोगित्वेनाक्षतेः । बौद्धस्यैव सर्वत्र बोधविषयत्वेन बाधस्यैवाभावाच्च ।

तदुक्तम्—

अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि । इति ।

वस्तुतो बाधज्ञानं न क्वापि ज्ञाने प्रतिबन्धकम् । तत्काले ऽपि सत्यां सामग्र्यां जायत एव ज्ञानम् । तत्र स्वस्वसामग्रीवशात् द्वयोरपि ज्ञानयोर्जातयोर्यत्र ज्ञाने सदोषसामग्रीजन्यत्वग्रहस्तत्राप्रामाण्यग्रह इत्येव मर्यादा ज्यायसी । यथा 'गेहे घटोऽस्ति' 'गेहे घटो नास्ति' इति परस्परविरुद्धे द्वाभ्यां प्रयुक्ते ।

किञ्च आशुसंचारादलातचक्रं प्रत्यक्षेण दृश्यते । अनेकदिक्कस्य रूपसहचारिणः स्पर्शस्य युगपद्ग्रहणात् हेतोः, अनुमानाद्गम्यते—'नैतदस्ति इति' । अनन्यथासिद्धानुमानाच्च तदभावज्ञाने तेन पूर्वज्ञानस्य भ्रमत्वं कल्प्यत इति "लटः शतृ" इति सूत्रे भाष्यकैयटयोरुक्तम् । एवं च बाधज्ञानकाले ऽप्यनुमितिः स्वीकृता । अत्र दृश्यते गम्यते इति वर्तमाननिर्देशा-

भ्यामुभयोरेककालिकता सूचिता। अनेकदिक्स्पर्शस्य युगपद्ग्रहणरूपहेतोर्भ्रम इत्येव तस्मिन् सम्भवाच्च। प्रत्यक्षस्य प्रबलत्वे त्वनुमितौ भ्रमत्वकल्पनम् । एवं च बाधस्य हेत्वाभासत्वमप्युपपन्नम्। अनुमितौ तेनाप्रामाण्यग्रहस्य जननात्। एवमन्यत्राप्यूह्यम् ॥५१॥

(कुं० टी०) *बाधज्ञानाभावेति । विषयाबाधो योग्यता, सा च यत्संसर्गो यत्र येन सम्बन्धेन गृह्यते तेन सम्बन्धेन तत्र तद्वत्त्वम् । तज्ज्ञानं च संशयनिश्चयसाधारणं भवत्येव। अन्यथा यस्य न गेहे घटसंसर्गज्ञानं किन्त्वज्ञानमात्रं तस्य 'गेहे घटोऽस्ति' इतिवाक्याद्बोधानापत्तिरिति भावः। *विशिष्टेति। विशिष्टबुद्धिरेव स्यादिति पदार्थोपस्थितिमात्रोक्तिरयुक्तेत्यर्थः। *अभावरूपस्येति। अत एवानिष्टसाधनत्वाभावादीनां न हेतुत्वम् ।

नन्वेवं यत्र पदार्थस्मरणानन्तरं योग्यतासंशयात्मकमानसादिज्ञानं ततः अयोग्यतानिश्चयः तत्रापि बोधापत्तिरिति चेत्। सत्यम्। अयोग्यतानिश्चयकाले आपाद्यते तदुत्तरं वा । नाद्यः । विरोधिनिश्चयसामग्र्याः प्रतिबन्धकत्वस्य सर्वसिद्धत्वात्। नान्त्यः। पदार्थस्मरणस्य नाशात्।

*विभावादीनामिति । रत्यादेश्चित्तवृत्तिविशेषस्य लोके यानि कारणानि प्रमदादीनि तानि चेत्तदनुकरणेन काव्यनाटकयोरुपनिबद्धानि तदा तानि विभावाः । एतैर्व्यक्तः स्थायी रत्यादिको भावो रस इत्युच्यते । *सह-

---

१ किञ्च आशु—जननात् अयं पाठः कुञ्चिकायुतमूलपुस्तके नोपलभ्यते।

दयतेति । काव्यवासनापरिपक्वबुद्धिः सहृदयः । *सम्बन्धिविशेषीयत्वेनेति । 'ममैवैते' 'तटस्थस्यैवैते' इतिसम्बन्धिविशेषस्वीकारपरिहारादिति भावः । *स्वीयत्वेति । साधारणोपायबलात्साधारण्येनैव तदभिव्यक्तेः । *नचेति । अत्रापि विशिष्टबुद्धिस्वीकारे इति शेषः । समाधत्ते *बाधज्ञानेनेति । *वस्तुतइति । सत्यपि पीतत्वाभावनिश्चये कामलादिवशात् 'शङ्खः पीतः'इति प्रतीत्युदयादिति भावः । किञ्च योग्यताज्ञानस्य हेतुत्वे संशयसाधारणमेव तद् वाच्यं, तथाच यस्य न गेहे घटसंसर्गज्ञानं किन्त्वज्ञानमात्रं तस्य 'गेहे घट' इति वाक्याद् बोधानापत्तिः । *न क्वापि ज्ञाने इति। अयं भावः—यत्र तदभाववभासकसामग्री, तत्कोटिभासकसामग्रीच, तत्र संशय एवोत्पद्यते। यत्र तदभावभासकसामग्रीमात्रं तत्र सामग्र्यभावादेव तत्कोटिभानासम्भवः। अथोपनायकज्ञानात्पूर्वं बाधाभावस्य सत्त्वात् 'भूतलङ्घटवद्' इति लौकिकप्रत्यक्षसामग्रीकाले ऽपि 'भूतलं घटाभाववद्'इत्याकारकोपनीतभानसामग्र्यस्त्येवेति चेन्न। एककोटिलौकिकप्रत्यक्षसामग्र्या अपरकोटिभानप्रतिबन्धकत्वात् । बाधदशायां लौकिकसंनिकर्षजन्यसंशयवारणाय तादृशप्रतिबन्धकत्वस्यावश्यकत्वात् । *यथा गेहे घट इति । संशयात्मकयोग्यताज्ञानस्योभयत्र सत्त्वादुभयविधो ऽपि बोधो भवत्येवेति भावः ।

यत्तु तत्र संशय एव, तदुत्तरं विशेषदर्शने सति निश्चय इति । तन्न । बोधं विना संशयस्यैवासम्भवात् । किन्तु विशेषदर्शनेनान्यतरकोटावप्रामाण्यग्रह एव । *किञ्चाशुसंश्चारादिति । तथा च गौतमसूत्रम्—"अलातचक्रदर्शनमनुपलब्धेराशु संचाराद्" इति। "क्रमिके ऽपि यौगपद्योपलब्धिराशु सञ्चारात् ।

शीघ्रसञ्चारात्मकाद्दोषात् । यथा वेगातिशयेन भ्राम्यमाणे अलाते क्रियासन्तानस्य भेदानुपलब्धिः" इति तदर्थः । आनुमानिकबाधनिश्चयदशायामपि इन्द्रियसन्निकर्षेण तद्वत्ताबुद्धिजननाल्लौकिकसंनिकर्षाजन्यज्ञानमेव प्रतिबध्यमिति न युक्तं, किन्तु दोषविशेषाजन्यमेव, इत्याह *अलातचक्रमिति । आशु संचारात्तत्र चक्रभ्रान्तिरुत्पद्यत इत्यर्थः । *रूपसहचारिणइति । शुक्लभास्वररूपव्यापकस्येत्यर्थः । अनेकदिक्स्पर्शस्य युगपद्ग्रहणाभावादनुमानेन प्रत्यक्षं बाध्यत इत्यर्थः । स्पर्शस्येत्यत्रोद्भूतस्येति शेषः । तेन दीपप्रभायां स्पर्शाग्रहे ऽपि अनेकदिग्रूपस्य युगपद्ग्रहणमित्याशङ्का ऽपास्ता । *अन्यथासिद्धेति । लोकादिसिद्धेत्यर्थः । *तदभावज्ञानेइति । जाते सतीतिशेषः । *वर्तमानेति । "अलातचक्रं प्रत्यक्षं दृश्यते, अनुमानाच्च गम्यते—नैतदस्ति इति" भाष्योक्तावित्यर्थः। *तस्मिन्निति । अलातचक्रे भ्रमति सतीत्यर्थः । *बाधस्य—पक्षे साध्याभावनिश्चयस्य । *हेत्वाभासत्वमिति । 'ह्रदो वह्न्यभाववान्' इति निश्चये 'ह्रदो वह्निमान्' इत्यनुमितेरनुदयात् । ननु ह्रदे धूमस्यासत्त्वात् 'ह्रदो वह्न्यभाववान् धूमाद्' इत्ययं स्वरूपासिद्ध एवेति चेन्न । यत्र 'वह्निव्याप्यधूमवान् ह्रद' इति भ्रमात्मकः परामर्शो जातस्तत्र बाधस्यैव दूषकत्वात् । ननु तद्व्याप्यवतो ज्ञानकाले कथन्तदभाववतो ज्ञानम् । सत्यम् । अलौकिकतद्व्याप्यवतो ज्ञानस्यैव विरोधितया आनुमानिकवह्निव्याप्यवत्ताज्ञानकाले ऽपि प्रात्यक्षिकवह्न्यभाववत्ताज्ञानोदये बाधकाभावात् ॥ ५१ ॥

(क० टी) अनतिप्रसङ्गायाह *वि[1]शिष्टेति ॥ ५१ ॥

---

१ अत्र ग्रन्थस्त्रुटितो भाति । आदर्शपुस्तकैक्येन च ज्ञातुं न पार्यते स कीदृश इति ।

वस्तुतः–साध्यबाधो न हेत्वाभासः, सर्वसाधारणबाधबुद्धिप्रतिबन्धकतयैव निर्वाहेण तस्य विशिष्य हेत्वाभासेषु ग्रहणानौचित्यात्, किन्तु हेतुबाधस्यैव तत्त्वमुचितम् । उक्तं च न्यायभाष्यवार्तिककाराभ्यां तथैव ।

किञ्च 'इदं रजतम्' इतिभ्रमोत्तरं जायमानस्य 'नेदं रजतम्' इति बाधज्ञानस्य रजतज्ञाननिष्ठाप्रामाण्यज्ञानं प्रति कारणता ऽवश्यं वाच्या । एवं स्फटिके रक्तत्वाभावज्ञानस्य सोपाधिकतद्रक्तत्वज्ञाने तत्कारणता वाच्या । एवं च सर्वत्र तथैवास्तु किं द्वयकल्पनेन ।

यत्र तु लोकप्रसिद्ध्याऽर्थस्य बाधितत्वज्ञानं तत्र तेनैव जायमानज्ञाने ऽप्रामाण्यग्रहः, यथा–'वह्निना सिञ्चति' इत्यादौ ।

नच गालिदानादिस्थलेऽपि बाधज्ञानेन तत्राप्रामाण्यग्रहे दुःखानुपपत्तिरिति वाच्यम् । ततो दुःखाभावेऽपि व्यञ्जनया जायमानेन तद्दुष्टत्वज्ञानेन तदुपपत्तेः । व्यञ्जनाजन्यज्ञाने तु न बाधज्ञानेनाप्रामाण्यज्ञानमिति स्पष्टं काव्यप्रकाशादौ ।

यद्वा तत्र तमउद्रेकेण प्राथमिकबोधे ऽपि नाप्रामाण्यग्रहः ।

एवं च योग्यताज्ञानं प्रवृत्त्याद्युपयोगियोग्यतासंदेहादिप्रसक्ताप्रामाण्यज्ञानाभावविशिष्टबोधजनकं विशेषणीभूताभावप्रतियोगिप्रतिबन्धकतयेति बोध्यम् । लक्षणामूलमपि शक्यार्थबोधे विषयबाध-

ज्ञानजन्यमप्रामाण्यज्ञानमेवेत्यलम् ॥ ५२ ॥

(कुं० टी०) *नहेत्वाभासइति । न हेत्वसाधारणदोष इत्यर्थः। एतदेवोपपादयति *सर्वसाधारणेति । तद्वत्तानिश्चयस्य सामान्यत एव तदभाववत्तानिश्चयप्रतिबन्धकत्वात् ।

यत्तु संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितौ कारणम्, तथाचानुमितिकारणीभूतसाध्यसंसृष्टत्वज्ञानविरोधितया बाधस्य हेत्वाभासत्वमिति । तन्न । साध्यसंशयं विनाऽप्यनुमित्युत्पत्तेः ।

*किंत्विति। ननु बाधस्थले पक्षे हेत्वभावे स्वरूपासिद्धिरेवेति कथं तस्य बाधत्वमिति चेत्। सत्यम् । यत्रोत्पत्तिक्षणावच्छिन्नघटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र 'उत्पत्तिकालिको घटो गन्धवान्' इत्यनुमितिं प्रति बाधस्यैव प्रतिबन्धकत्वं वाच्यम् । *हेतुबाधज्ञानस्यैवेति । पक्षे हेत्वभावज्ञानस्यैवेति भावः । एतस्य पक्षधर्मताविघटकतया प्रतिबन्धकत्वम् । *तेनैवेति । जायमानज्ञाने बाधज्ञानेनाप्रामाण्यग्रहो भवतीत्यर्थः । *तमउद्रेकेणतमोगुणस्य दृढतरसंस्कारजनकत्वेन । *योग्यतासन्देहेति । योग्यतासन्देहेन प्रसक्तं यदप्रामाण्यज्ञानं तदभावविशिष्टबोधे प्रवृत्तिजनके विशेषणीभूतो योऽप्रामाण्यग्रहाभावः तस्य प्रतियोगी योऽप्रामाण्यग्रहस्तस्य प्रतिबन्धकतया योग्यताज्ञानं प्रवृत्त्याद्युपयोगि इत्यन्वयेनेत्यर्थः । *लक्षणामूलमिति । शक्यार्थे बाधज्ञानमेव लक्षणामूलमित्यर्थः ॥ ५२ ॥

(क०टी०)*सर्वेति । प्रत्यक्षादीत्यर्थः। *तस्य-साध्यबाधस्य । *तत्त्वम्-हेत्वाभासत्वम्। उक्तरीत्या ऽनिर्वाहात्। अत्र तन्मूलसंमतिमाह *उक्तं चेति। एतेन तस्य तत्त्वमाधुनिकनैयायिकोक्तमपास्तम् ।

परस्यापि क्वचिन्मदुक्तप्रकारं विना न गतिरित्याह *किञ्चेदमिति। विशेषणभेदेनाह *एवमिति। तद्वदित्यर्थः। *ज्ञानस्येति । पूर्वजा-

तस्य परजातस्य वेत्यर्थः । तथैवानुभवादिति भावः, तदाह *सोपाधिकेति । *तत्कारणतेति । तज्ज्ञाननिष्ठाप्रामाण्यग्रहजनकतेत्यर्थः । तथा सति गौरवमाह *एवं चेति । तत्र तदावश्यकत्वे चेत्यर्थः । *द्वयेति । क्वचित् ज्ञानप्रतिबन्धकत्वं, क्वचिदप्रामाण्यग्राहकत्वमिति द्वयेत्यर्थः । प्रागुक्ते बाधज्ञानांशे विशेषं सिद्धान्ते आह *यत्रत्विति । *प्रसिद्ध्या-तयैव । सिद्धान्ते दोषं परिहरति *नचेति । *तत्र-ज्ञाने । *अनुपपत्तिरिति । प्रवृत्ताविव तत्रापि तदनास्कन्दिततादृशज्ञानस्यैव हेतुत्वादिति भावः । फलबलकल्प्यमाह *तत इति । ननु तत्रापि तेनैव कुतो नाप्रामाण्यग्रह इत्यत आह *व्यञ्जनेति । *स्पष्टमिति । तत्र हि-'सारोपसाध्यवसानयोर्गौणभेदयोर्भेदेऽभेदावगमः, सर्वथैवाभेदप्रतीतिश्च फलमिति । किं बहुना बाधित एव पावनत्वादिविशेषस्तटादौ प्रतीयते, अत एव सूत्रितं "योगः फलेन नो" इति' इत्युक्तम् । *आदिना प्रदीपादौ । बाधितार्थबोधकतयैव तस्या धर्मिग्राहकमानासिद्धत्वमिति भावः । नन्वेवं सिद्धान्ते प्रयत्नविशेषे गौरवमेव, अत आह *यद्वेति । उत्तेजकमाह *तम इति । सत्त्वरजसोरभिभवपूर्वकाविर्भावेणेत्यर्थः । *अपिरेवार्थे । एवं योग्यताज्ञानादेस्तत्र कारणत्ववादिनैयायिकमते खण्डितेऽपि आद्यं प्रवादं कथंचित्तेषामुपपादयन् तदुपयोगमाह *एवं चेति । बाधनिश्चयस्य सर्वथा प्रतिबन्धकत्वाभावे चेत्यर्थः । *उपयोगीति बोधविशेषणम् । प्रवृत्त्यादीत्यादिना दुःखादि । संदेहादिप्रसक्तेति पाठः । *सन्देहादीत्यादिना ऽयोग्यतानिश्चयः । व्यस्तपाठे तु तत्[1] एकदेशबोधविशेषणमेतद्वदिति बोध्यम् । प्रसक्तत्वमप्रामाण्यज्ञानविशेषणम् । *प्रतिबन्धकतयेति । न योग्यतानिश्चयस्य साक्षाच्छाब्दबोधजनकत्वं, किन्तु अप्रामाण्यज्ञानाभावविशिष्टबोधस्यैव प्रवृत्त्याद्युपयोगितया विशिष्टशाब्दबुद्धिं प्रति प्रयोजकत्वम् । तच्च तत्र विशेषणीभूताभाव-प्रतियोगि—प्रतिबन्धकतया तत्रैतन्निश्चयप्रयोज्यत्वेन । एतावतैव शाब्दबोधकारणत्वोक्तिः

१ तत्-उपयोगीति योग्यतया संदेहपदार्थैकदेशे बोधे विशेषणम् प्रसक्तपदार्थैकदेशे प्रसङ्गे योग्यतासन्देहादिना इत्येतद्वत् इत्यर्थः प्रतिभाति ।

प्राचामित्यर्थः । नन्वेवमपि लक्षणास्थले बाधनिश्चयस्य बोधप्रतिबन्धकत्वमावश्यकमेवात आह *लक्षणेति । तस्या मूलमपीत्यर्थः । एवेन शक्यार्थबोधाभावव्यवच्छेदः । यथाचैतत्तथोक्तं प्राक् । एवं च सर्वत्रैकवाक्यता सिद्धेति बोध्यम् । तदाह *अलमिति ॥ ५२ ॥

परेतु अन्वयप्रयोजकसमभिव्याहृतकार्यशक्तिमत्त्वं योग्यता । साच शाब्दबोधे भासते । अत एव 'घटेन जलमाहर' इत्यादौ सच्छिद्रेतरस्यैव जलाहरणशक्तिमत्त्वेन सच्छिद्रेतरत्वप्रकारको बोधः । अत एव प्रतिनिधेः श्रौतत्वोपपत्तिः । यथा—"खादिरे बध्नाति" इत्यादावस्वातन्त्र्यफलकसंयोगविशेषरूपबन्धनसमर्थखादिरालाभे ऽन्यः प्रतिनिधिः उपादीयते । अतस्तादृशबन्धनसामर्थ्यवत्त्वेन खादिरबोधो ऽवश्यमभ्युपेयः । एवं च खादिरबाधे ऽपि तत्सामर्थ्यत्यागे मानाभावात्तदुपपत्तिः । अन्यथा खादिरस्यासामर्थ्ये बन्धनलोप एव स्यात् । सर्वत्र प्रवृत्तिनिमित्तं स्वाश्रयसमभिव्याहृतकार्यशक्तेरप्युपलक्षणमिति तस्या अपि प्रवृत्तिनिमित्तसामानाधिकरण्येन बोधे भानम् । एवं चोपलक्षकजात्यवच्छिन्नस्याशक्ततया त्यागे ऽपि उपलक्ष्यशक्तित्यागानौचित्याद् अन्यगता सा गृह्यते । सादृश्येन तत्रापि तत्त्वबुद्धेः । किञ्च घटत्वेन सच्छिद्रेतरव्यक्तिविशेषस्यैव भानमित्यङ्गीकारे लक्षणापत्तिः । सामान्यरूपेण विशेषबोधे ऽपि लक्षणेत्यर्थस्य 'त्वामस्मि वच्मि' इत्युदाहरणे काव्यप्रकाशकृता स्पष्टमुक्तत्वात् ।

तदुक्तं हरिणा—

केषांचित्साहचर्येण जातिः शक्त्युपलक्षणम् ।
खादिरादिष्वशक्तेषु जातिः प्रतिनिधीयते ॥
अस्वातन्त्र्यफलो बन्धः प्रमाणादौ च शिष्यते ।
अतो जात्यभिधानेऽपि शक्तिहीनं न गृह्यते॥इति ।

केषाञ्चित्, जातिशक्तिवादिनाम् । प्रमाणं हिंसा । शुद्धव्यक्तिशक्तिवादेऽपि वस्तुगत्या जातिशक्तिविशिष्टा केवला व्यक्तिः शक्येति न दोष इति बोध्यमित्याहुः ॥ ५३ ॥

इति योग्यताविचारः ।

(कुं० टी०) *परेत्विति । घटादावानयनानुकूलतैव योग्यतेत्यर्थः । *तदुपपत्तिः-प्रतिनिधेः श्रौतत्वोपपत्तिः । *अन्यः प्रतिनिधिरिति । बन्धनस्य तु न बाधः, प्रधानत्वात् । कथं तर्हि "स्रुचः संमार्ष्टि" इत्यत्र द्वितीयाश्रुत्या स्रुचां प्राधान्यमिति सिद्धान्त इति चेद् । द्रव्यसंस्कारककर्मत्वं गुणत्वमिति सिद्धान्तात् । एतेन दृष्टोपकारजनकत्वाभावात्संमार्जनस्याप्राधान्यमित्यपास्तम् । *स्वाश्रयेति । प्रवृत्तिनिमित्तसमानाधिकरणशक्तेरपि भानमित्यर्थः । उपलक्षकजातिः-खदिरत्वादिः । *अशक्ततया-असमर्थतया । *तत्रापि-कदरादावपि । *तत्त्वबुद्धेः-खदिरत्वबुद्धेः । ननु जातिशक्तिवादिमते जातौ कथं बन्धनादिक्रियान्वयः-सामर्थ्याद्व्यक्तिराक्षिप्यत इति चेत्, कथं प्रतिनिधेर्ग्रहणमित्याशङ्क्याह *केषाञ्चित्साहचर्येणेति । केषाञ्चिज्जातिशक्तिवादिनां मते एकार्थसमवायेन क्रियान्वये "खादिरे बध्नाति" इत्यादौ खादिरत्वादिजातिः स्वसमानाधिकरणबन्धनयोग्यतारूपशक्तेरुपलक्षणम्, अन्यथा असमर्थखदिरेऽपि बन्धनप्रसङ्गात् ।

तथाच क्वचिद् गुणीभूतखदिरत्वस्य बाधेऽपि प्रधानबन्धनक्रियानुकूलशक्तेर्न बाधः । काकादिपदे दध्युपघातकादेरिवात्रापि जातेः शक्त्युपलक्षणत्वान्नान्तरीयकमुपादानम् । नचैवं गवादिचोदनासु महिषादेरपि ग्रहणप्रसङ्गः । चोदितप्रतिनिधिविषये एव एतन्न्यायस्येष्टत्वात् ।

यत्तूक्तङ्कुसुमाञ्जलौ—

"संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः" । इति ।

व्रीहिप्रोक्षणादिना पुरुषे एवादृष्टमुत्पद्यते तादृशादृष्टं प्रति च प्रोक्षितव्रीहेः कारणत्वमिति तदर्थ इति ।

तन्न । शक्त्यस्वीकारे प्रतिनिधिग्रहणानापत्तेः ।

ननु येषां जातिवादिनां तात्पर्येण जातिरभिधेया तेषां कथं प्रतिनिध्युपपत्तिरत आह *अस्वातन्त्र्यफलइति ।

अयं भावः—मा भूज्जातिः शक्त्युपलक्षणम्, एवमपि प्रातिपदिकार्थभूताया जातेर्गुणत्वात्प्रधानबन्धनक्रियानुकूलत्वात्प्रतिनिधिरेवोपादेयः । तथाहि सति प्रमाणस्य हिंसावदानादेरनुपपत्तिः, अन्यथा यागस्यैवासम्पत्तिरिति । *जातिशक्तिविशिष्टा—एतदुभयविशिष्टा ॥ ८३ ॥

(कं० टी०) प्राभाकरमतसंवादिहर्यादिसंमतसिद्धान्तमाह *परेत्वित्यादिना । तत्स्वरूपमाह *समभीति । तज्जननत्वावच्छिशक्तीत्यर्थः । एतज्ज्ञानं शाब्दबोधे कारणमिति गुरूक्तिर्विषयतया तस्य कारणत्वं पदार्थोपस्थितिवन्न त्वाकाङ्क्षाज्ञानवदित्याशयेनेति ध्वनयन्नाह *साचेति । तत्र शक्तिस्वरूपमाह *सच्छिद्रेतरस्वेति । अत एवान्वयितावच्छेदकत्वनियमः शाब्दबोधे इति भावः । अस्यावश्यकत्वमाह *अतएवेति । तस्यास्तत्र भानादेवेत्यर्थः । तत्त्वमुपपादयति *यथेति । *अन्यः—बर्बुरः । यत इत्यादिः । उपस्थितत्वादाह *तत्सामर्थ्येति । *तत्—श्रौतत्वम् । अन्वयेनोक्तं व्य-

तिरेकमुखेन द्रढयति *अन्यथेति । विपक्षे इत्यर्थः । तथाचाक्ष्वै-गुण्यापत्तिरिति भावः । प्रत्येकमुक्तत्वात् द्वितीयमाद्यैकवाक्यतया संवलनोक्त्या विशदयति *सर्वत्रेति । तदवच्छेदेनाभानादाह *साद्दश्येनेति । वर्णादिना प्रतिनिधावपि खादिरत्वादिबुद्धेरित्यर्थः । ननु सामान्यरूपेण विशेषबोधेन निर्वाहे किमिति तत्र तद्भानं, प्रतिनिधेः श्रौतत्वमपि तत्र तस्यापूर्वसाधने लक्षणेत्यादिप्रागुक्तप्रकारेणोपपन्नमत आह *किंचेति । ननु शक्तिरेव तत्राप्यत आह *सामान्येति । अपिना विशेषरूपेण विशेषबोधसमुच्चयः । *त्वामस्मीति । लक्षणामूलगूढव्यङ्ग्यप्राधान्यस्य ध्वनेर्भेदद्वयादाद्यभेदस्यार्थान्तरसंक्रमितवाच्यस्येदमुदाहरणम् । तत्र वच्मीत्यादेरुपदेशादौ लक्षणादित्याद्युक्तम् । *तदुक्तमिति । एतन्मतोक्तं सर्वमित्यर्थः । *प्रतिनिधीति । अप्रतिनिधिः प्रतिनिधिर्भवतीत्यर्थः । *प्रमाणादाविति विषयसप्तमी । आदिना उत्सर्गः । 'मीञ् हिंसायाम्' इत्यस्य रूपमित्याह *प्रमाणं हिंसेति । हरिणा मतत्रये निर्वाहे उक्तेऽपि तुर्यमते तदनुक्त्या न्यूनतां निराचष्टे *शुद्धेति । *जातीति । जातिशक्त्युभयविशिष्टेत्यर्थः ॥ ५३ ॥

आसत्तिरपि मन्दस्याविलम्बेन शाब्दबोधे कारणम् । साचान्वयप्रतियोगिपदार्थानां तद्बोधकपदानां चाव्यवधानजप्राथमिकोपस्थितिरूपा । काव्ये ऽन्यत्र च सर्वान्प्रति प्रायेण तादृशबुद्धेरेव वक्तुरुद्देश्यत्वात् । अनासन्नस्थले योजनावाक्यान्मन्दस्य बोधेऽपि विलम्बो ऽस्त्येव । नच 'अस्मात्पदादयमर्थो बुद्ध' इत्यनुभवो विरुध्येतेति वाच्यम् । योजनावाक्यसंपादनद्वारा तस्यापि बोधे उपयोगेनादोषात् । अमन्दस्य तु आसत्त्यभावे ऽपि पदार्थोपस्थितौ आकाङ्क्षाज्ञानवतो बोधो ऽविलम्बेनैव भवतीति न तद्बोधे तस्याः कारणत्वम् । ध्वनितं चेदं "नपदान्त-" इतिसूत्रे भाष्ये ।

वस्तुतो योजनावाक्यकल्पना व्यर्था तत्कल्पकाकाङ्क्षादिना अर्थयोजनाकल्पनस्यैवौचित्यात् । परं तु मन्दस्य सा विलम्बेन, अमन्दस्य तु सा शीघ्रमित्येवोचितम् ॥ ५४ ॥

इत्यासत्तिविचारः ।

(कुं०टी०)*आसत्तिरपीति। मन्दस्य अविलम्बेन बोधे आसत्तिरपि कारणम्,अमन्दस्य तु आसत्त्यभावे ऽपि बोधो भवतीत्यर्थः। एवंचानासन्नस्थले योजनावाक्याद्विलम्बेन बोध इत्येतावतैवानासन्नत्वव्यवहार इति भावः। *साचेति। अन्वयिपदार्थानां पदानां च अव्यवधानेनोपस्थितिरासत्तिरित्यर्थः । *ननु कथं गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावासत्तिभ्रमाच्छाब्दबोध इति प्रवादः, गिर्यग्निमत्पदयोरव्यवधानदशायां तस्यैवासत्तित्वादित्यत आह *प्राथमिकेति । एवं च प्राथमिकबोधाभावेनैवानासन्नत्वप्रवाद इति भावः। *तादृशबुद्धेरेव–प्राथमिकबुद्धेरेव। ननु अनासन्नस्थले कथं योजनावाक्याद्बोध इत्यत आह *विलम्बोऽस्त्येवेति । *विरुध्येतेति। तत्र योजनावाक्यस्यैव बोधकत्वात्। *तद्बोधे–अमन्दानां बोधे।।५४।।

आसत्तिविचारः ।

(क० टी०) इयमपि सर्वबोधे न कारणमित्याह *मन्दस्येति । तत्रापि विशेषमाह *अविलम्बेनेति। द्वितीयोपस्थितेरनासत्तित्वायाह *प्राथमिकेति। अविलम्बनिवेशे बीजमाह *काव्ये इति। कचित् कूटादौ तदभावादाह *प्रायेणेति । तन्निवेशफलमाह *अनासन्नेति । तस्य तत्र तथा बोधे दोषं परिहरति *नचेति। पञ्चम्यर्थः साक्षाज्जनकत्वमिति शङ्काऽऽशयः । प्रयोजकत्वं स इति समाधत्ते *योजनेति। मन्दत्वनिवेशे फलमाह *अमन्देति। अत एव तुः। योग्यताज्ञानस्य तत्त्वस्य खण्डितत्वादाह *आ-

काङ्क्षाज्ञानेति । *तस्याः-तादृश्याः शक्तेः । *ध्वनितमिति । तत्रहि-"स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद्" इति आनुपूर्व्येण संनिविष्टानां यथेष्टं सम्बन्धः शक्यते कर्त्तु नचैतान्यानुपूर्व्येण संनिविष्टानि । अनानुपूर्व्येणापि संनिविष्टानां यथेष्टं सम्बन्धो भवति । तद्यथा-अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरिति'इत्युक्तम् । 'प्रकृतः-प्रस्तुतः । पदान्तरेणाव्यवधानरूपाऽऽसत्तिरानुपूर्व्यम्, तत्र पदार्थानां समन्वयावगमात्पाठक्रमादार्थक्रमो बलीयानिति यथेष्टमत्राभिसम्बन्ध' इति कैयटः । 'यथेष्टं सम्बन्धः इष्टवाक्यार्थबोधजनकत्वरूपः । आर्थक्रमो नाम राजपुरप्रवेशन्यायेन स्वस्वाकाङ्क्षितार्थान्वयक्रमः । एवं चासत्त्यभावेऽपि पदार्थोपस्थितौ आकाङ्क्षावशाद् बुद्ध्युत्पत्त्यनुसारेणान्वयबोध इति भावः । साचीनं तिर्यग्गच्छन्तम्' इत्युद्द्योतश्च । अनासन्नस्थले ऽभ्युपेत्यवादेन प्रागुक्तम् नतु तात्त्विकमित्याह *वस्तुतइति । आकाङ्क्षादिनेत्यादिना-तात्पर्यम् । *सा-अर्थयोजना ॥ ५४ ॥

(आसत्तिविचारः ।)

यत्तु तत्र तत्र वाक्ये 'घटमानय'इत्यादौ घटकर्मकानयनबोधेच्छयोच्चरितत्वाभावज्ञाने,अन्यबोधेच्छयोच्चरितत्वज्ञाने वा तथाबोधानुदयात्तयोः प्रतिबन्धकत्वकल्पने गौरवेण लाघवात्तथाबोधे 'इदं वाक्यमेतदर्थप्रतीतीच्छया वक्त्रोच्चारितम्' इत्याकारकतात्पर्यग्रहो हेतुः । नानार्थपदस्थले पदविषयोऽपि स तथा । तद्ग्राहकं च प्रकरणादिकम् । अत एव प्रकरणादिज्ञानाभावे 'इदं पदमेतदर्थकमेतदर्थकं वा' इति संदिह्यते । मौनिलिखितवाक्यस्थलेऽपि तस्य सूक्ष्ममुच्चारणमस्त्येवेति ।

तन्न । शुकादिवाक्याद्, देवताप्रसादेन पूर्वजन्मसंस्कारेण वा मूर्खबालककृतोत्तमकाव्याद्वक्तृतात्पर्य-

व्यतिरेकनिश्चयेऽपि बोधोदयेन तस्य बोधे हेतुत्वासम्भवात् । तद्व्यतिरेकनिश्चयश्च वक्तुस्ततस्तदर्थाबोधात् ।

नन्वैश्वरं तत्र तात्पर्यम् । अत एव वेदवाक्यतो ऽर्थबोध इति चेन्न । तस्य फलैकोन्नेयत्वेन प्राक् दुर्ज्ञेयत्वात् । लाघवादिन्यायगृहीततत्तदर्थबोधकत्वज्ञानस्य वेदजन्यबोधे तद्गतप्रामाण्यनिश्चये वा हेतुत्वान्मीमांसोपयोगः । किञ्च 'अस्मादर्थद्वयविषयको बोधो जायते तात्पर्यं तु क्वेति न जानीम' इति सर्वजनानुभवविरोधान्न तस्य हेतुत्वम् । अत एव 'पय आनय' इत्युक्ते अप्रकरणज्ञस्य दुग्धं जलं वाऽऽनेयमिति प्रश्नः संगच्छते । स्पष्टं चेदं सर्वं संख्यासंज्ञासूत्रे भाष्ये ।

तत्र पदार्थोपस्थितिरेवेत्यादि उक्तरीत्या खण्डनीयम् ।

तात्पर्यनिर्णयोपयोगस्तु तज्ज्ञाने प्रामाण्यनिश्चयद्वारा प्रवृत्तौ, क्वचिदनेकपदार्थस्यान्वययोग्यत्वे कस्याध्याहार इत्यत्र चेति बोध्यम् । नचाश्वतात्पर्यकत्वेन निर्णीताद् 'गेहे सैन्धवमस्ति' इति वाक्याद् 'गेहे लवणमस्ति नवा' इतिसंशयोच्छेदापत्तिरिति वाच्यम् । एकतरविषयकज्ञाने प्रामाण्यनिश्चये तदितरविषयकज्ञाने ऽप्रामाण्यबुद्ध्युदयेन तदनुच्छेदात् । तत्परत्वाभावज्ञान-तदन्यपरत्वज्ञानयोरपि तद्बोधेऽप्रामाण्यग्रहजनकतैव । तथा तत्तद्वाक्यार्थे प्रामाण्यग्रहे तत्तद्वाक्ये आप्तोक्तत्वज्ञानं हेतुः । आप्तत्वं च भ्रमप्रमादविप्रलिप्साशून्यत्वम् । तज्ज्ञानं च 'अयं प्रकृत-

विषये ईदृशाप्तत्ववान्, आप्तत्वधर्मविरोधिधर्मानाधिकरणत्वाद्' इत्यनुमानेन । तत्र भ्रमो वाक्यार्थभ्रमः । प्रमादोऽन्यार्थकशब्दभ्रमः । विप्रलिप्सा प्रतारणा–प्रतीतविपरीतप्रतिपिपादयिषा । वेदस्याकर्तृकत्वे तु अनाप्तोक्तत्वाभावज्ञानं हेतुः । तच्चाप्तोक्तत्वज्ञानादनुक्तत्वनिर्णयाद्वेत्यन्यत् ।

वस्तुतः सर्वः शब्दः प्रमाणमेव । अनाप्तोक्तत्वज्ञानं तु तज्जन्यज्ञाने अप्रामाण्यग्राहकमित्यग्रे निरूपयिष्यामः । अत्र श्रौततावत्पदार्थज्ञानानामाकाङ्क्षादिज्ञानानां च नष्टत्वे ऽपि तेषां समूहालम्बनस्मरणात्तत्संस्काराद्वा ऽन्वयबोधः । अयमेव खलेकपोतन्यायेन बोधः । यदा तु क्रमेणैवोद्बोधकसमवधानात् तत्तत्खण्डवाक्यार्थबोधोत्तरं पूर्वपूर्वस्मरणात्तत्संस्काराद्वा महावाक्यार्थबोधस्तदा राजपुरप्रवेशन्यायेन बोध इत्यन्यत्र विस्तरः ॥ ५५ ॥

इति तात्पर्यविचारः ।

(कुं.टी.)*तयोः–पूर्वोक्तज्ञानयोः। *स–तात्पर्यग्रहः। *तथा–हेतुः। एकार्थपदे तात्पर्यस्यानुपयोगात्सैन्धवादिपदे तात्पर्यमपि हेतुरित्यर्थः। *तद्ग्राहकम्–तात्पर्यग्राहकम्। *इदं पदम्–सैन्धवादिपदम्। शुकादिवाक्ये शिक्षकव्यापारस्यैव सत्त्वादाह *मूर्खेति। तत्र वक्तृतात्पर्याभावे ऽपि बोधदर्शनान्न तस्य हेतुत्वमितिभावः। *फलैकेति। शाब्दबोधमात्रानुमेयत्वेनेत्यर्थः। *दुर्ज्ञेयत्वादिति। ईश्वरतात्पर्यस्य प्रथमतो ग्रहीतुमशक्यत्वादित्यर्थः। *लाघवादीति। निषादस्थपत्यादौ कर्मधारया-

घ्यर्थनिर्णयवत् । *अतएवेति । प्रकरणतात्पर्यनिर्णये प्रकरणस्यैव हेतुत्वमस्त्विवतिभावः । नन्वीदृशस्थले पदार्थोपस्थितिमात्रं भवति नतु विशिष्टवाक्यार्थबोध इत्यत आह *उक्तरीत्या खण्डनीयमिति । योग्यताज्ञानहेतुतानिराकरणावसरे खण्डितमेतदिति भावः । *प्रवृत्ताविति । उपयोग इतिपूर्वेणान्वयः । *अकर्तृकत्वे इति । जैमिनीया हि वेदाध्ययनं प्रति गुरुशिष्यपरम्परामविच्छिन्नां मन्यमाना वेदमनादिमित्याचक्षते । वैयासिकमते तु सृष्टिप्रलययोः श्रुतिसिद्धत्वात् पूर्वपूर्वसर्गानुसारेण तादृशानुपूर्वीविरचनमेव । अवान्तरवाक्यार्थबोधकाले पदार्थस्मरणस्य नष्टत्वान्महावाक्यार्थबोधो न स्यादत आह *संस्काराद्वेति । *खलेकपोतेति । तदाहुः—

वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति॥इति।

*राजपुरेति । तत्पक्षे हि पदार्थानामवान्तरार्थबोधे विशिष्टस्य वैशिष्ट्यमितिन्यायेन महावाक्यार्थबोधः । पदजन्यविशेषणतावच्छेदकप्रकारकानिश्चयात्मकावान्तरवाक्यार्थबोधं विना विशिष्टवैशिष्ट्यात्मकमहावाक्यार्थज्ञानासम्भव इति भावः ॥ ५५ ॥

इति श्रीमद्देवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्यकृतायां मञ्जूषाकुञ्चिकायामाकाङ्क्षादिविचारः ।

(क० टी०) अथ तात्पर्यज्ञानस्य शाब्दबुद्धिसामान्ये हेतुत्वं नैयायिकाद्युक्तं खण्डयति *यत्त्विति । वाक्ये इत्यस्यैव व्याख्या *घटमिति । विषयसप्तमी । *हेतुरिति । अन्यथाऽनेकसंसर्गकबोधजनकत्वेन गृहीतवाक्याद् बोधनियमो न स्यादिति भावः । *स तथेति । 'इदं पदमेतदर्थप्रतीतीच्छया वक्त्रोच्चारितम्' इत्याकारस्तात्पर्यग्रहो हेतुरित्यर्थः । *तदिति । तात्पर्येत्यर्थः । *अतएव–तस्य तद्-

ग्राहकत्वादेव । तदपि स्वरूपसन्न ग्राहकमित्याह *ज्ञानेति । यत्तु मौनिलिखितवाक्ये दोषाभावायानुसंहितं वेत्यपि वाच्यमिति तत् खण्डयति *मौनीति । जपादिवदिति भावः । व्यतिरेकव्यभिचारमाह *शुकादीति । *काव्यात्-काव्याच्च । *तस्य-तात्पर्यज्ञानस्य । *बोधे-शाब्दबोधसामान्ये । *तद्व्यतिरेकेति।वक्तृतात्पर्याभावेत्यर्थः। *वक्तुः-शुकादेः। अस्यावश्यकत्वमाह *अतएवेति । तत्र वक्तृशब्दस्येश्वरसाधारण्यादेवेत्यर्थः। अध्यापकतात्पर्यं तत्र नियामकमिति तु न युक्तं, मूर्खाध्यापकोक्ते तदसम्भवादिति भावः । *तस्येति । अतएवेश्वराप्तत्वानिश्चयवतां बोधो मीमांसकादीनाम्।ननु तस्य तत्राहेतुत्वे तद्ग्राहकप्रकरणादिप्रतिपादकमीमांसोच्छेदापत्तिरत आह *लाघवादिति । आदिना गौरवम् । प्राचां मतेनाह *वेदेति । वक्ष्यमाणसिद्धान्तमतेनाह *तद्वतेति । नचैवं विज्ञवक्तृकवाक्यजन्यबोधे तात्पर्यधियो हेतुत्वमिति शुकवाक्यादिजन्यबोधे न दोषस्तस्यातथात्वात्,तत्र तु बोधकत्वज्ञानमेव हेतुः, वेदजबोधेऽपि न्यायावगततत्तदर्थबोधकत्वज्ञानं हेतुरिति वाच्यम् । विज्ञत्वस्यानियतत्वात् । सर्वत्र बोधकत्वज्ञानहेतुतयैव सिद्धेश्च । दोषान्तरमाह *किञ्चेति । *तात्पर्यन्त्विति। प्रकरणाद्यनुगृहीतवक्तृतात्पर्यं त्वित्यर्थः।*अतएव-तस्य बोधाहेतुत्वेनोभयज्ञानादेव । अन्यथा ज्ञानस्य प्रश्नादिहेतुत्वेन तदभावे तदसङ्गतिः स्पष्टैव । *स्पष्टं चेदमिति । तस्य तत्त्वखण्डनभूतं सर्वमित्यर्थः। तत्रहि-"इहार्थमुत्तरार्थं चोद्देश्यकोटौ संख्याग्रहणं कर्त्तव्यमितरथा ह्यसम्प्रत्ययोऽकृत्रिमत्वाद्यथा लोके" इत्युक्त्वा "आद्यफलार्थं न कर्त्तव्यम् । अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति-अर्थो वाऽस्यैवंसंज्ञकेन भवति, प्रकृतं वा तत्र भवति इदमेवंसंज्ञकेन कर्त्तव्यमिति । आ तश्चार्थात्प्रकरणाद्वा । अङ्ग हि भवान् ग्राम्यं पांसुलपादमप्रकरणज्ञमागतं ब्रवीतु गोपालकमानय कटजकमानयेति, उभयगतिस्तस्य भवति साधीयो वा यष्टिहस्तङ्गमिष्यति" इत्याद्युक्तम् । नच तत्र पदार्थोपस्थितिरेव न शाब्दबोध इति वाच्यम् । पयः कर्मत्वमानयनं प्रेरणेति वाक्यजन्यपदार्थोपस्थितावपि तदापत्तेः । सर्वत्रैवमेवापत्तौ शाब्दबोधोच्छेदापत्तेश्च । एतेन तत्र मानस एव बोध इति, उपस्थितपदार्थानामसंसर्गाग्रहमात्रेण प्रश्नादिसिद्धिरिति च परास्तम् । शाब्द-

जन्यमानसबोधस्यैव शाब्दबुद्धित्वात् । शाब्दयामीत्यनुव्यवसायाच्च । तदेतदभिप्रेत्याह *तत्रेति । सिद्धान्तमाह *तात्पर्येति । सिद्धान्ते दोषमुद्धरति *नचेति । तस्य बोधहेतुत्वेऽइवतात्पर्ये तद्बोधे ऽपि लवणाबोधेन तदनिश्चयात्प्रतिबन्धकाभावात्संशयस्य तच्छ्रवणोत्तरमुपपत्तिः । सिद्धान्ते तु तस्य तदहेतुत्वेनोभयबोधे तन्निश्चयद्वयप्रतिबन्धकसत्त्वात्तदुच्छेदापत्तिरित्यर्थः । *निश्चये-सति । आर्थिकमाह *तदितरेति । *बुद्ध्युदयेनेति । तदनिश्चयेन प्रतिबन्धकाभावेनेति शेषः । यत्तु तत्परत्वाभावज्ञान–तदन्यपरत्वज्ञानयोः सत्त्वे तदर्थविषयकबोधाननुभवेन फलबलात्तयोः प्रतिबन्धकत्वमेव, एवमपि प्रामाणिकगौरवस्यादोषत्वादिति, तत् खण्डयति *तत्परत्वेति । एवेन प्रतिबन्धकत्वव्यवच्छेदः । एवञ्चैकरूपताऽत्रापीति भावः । विशेषान्तरमाह *तथेति । तत्र तस्यैवेत्यर्थः । *प्रामाण्येति । अबाधितत्वरूपेत्यर्थः । *ईदृशेति । भ्रमादिशून्यत्वरूपेत्यर्थः । *आप्तत्वेति । इदमुपरञ्जकं नतु हेतुकुक्षिनिविष्टम् । भ्रमादिरूपविरुद्धधर्मानधिकरणत्वादित्यर्थः । अन्वयव्यतिरेकादम् । अतएव विशेषदृष्टान्तानुक्तिः । अपौनरुक्त्याय प्रकृतोपयोग्यर्थमाह *तत्रेति । आप्तलक्षणघटकानां मध्ये इत्यर्थः । *अन्यार्थकशब्देति । अन्यार्थत्वेति पाठान्तरम् । विप्रलिप्साव्याख्या *प्रतारणेति । तद्व्याख्या *प्रतीतेति । *ज्ञानं–ज्ञानमेव । तुना सूचितं तस्येश्वरकर्तृकत्वे भ्रमादिरहितरूपाप्तोक्तत्वं वेदे ऽप्यस्त्येवेति । इदमपि प्राचां मतेन नतु तत्त्वत इत्याह *वस्तुतइति । *इत्यग्रेइति ? । विशेषमाह *अत्रेति । शाब्दबोधविषये इत्यर्थः । *ज्ञानानाम्–उपस्थितीनाम् । आदिपदं पररीत्या योग्यताज्ञानादिसंग्राहकं तद्धेतोरेवेतिन्यायेन । लाघवादाह *तत्संस्काराद्वेति । एवमग्रेऽपि । *राजपुरेति । एतत्स्वरूपं प्रागुक्तम् । एतेन विशिष्टस्य वैशिष्ट्यमितिरीत्या बोधे खण्डवाक्यार्थबोधोत्तरमेव महावाक्यार्थबोध इति तादृशस्थले राजपुरप्रवेशन्यायेन बोधः । तत्र हि खण्डवाक्यार्थबोधे तावद्विषये ज्ञाते ततश्चरमपदार्थज्ञानेन समूहालम्बनविधया खण्डवाक्यार्थविषयिण्या महावाक्यार्थबोध इति कैश्चिदुक्तम्, शब्दजन्यतादृशबोधे विशेषणतावच्छेदकप्रकारकनिश्चयो न कारणमिति सर्वत्र खलेकपोतन्यायेनैव बोध-

इत्यन्यैरुक्तम्, शब्दजन्यताद्दशबोधे विशेषणतावच्छेदकप्रकारकनिश्चयो न कारणं विशेषणविशेष्यादिसन्निकर्षेणैव तदुपपत्तेरिति परैरुक्तं च परास्तम् । उक्तयुक्तेः । अन्त्ये दोषस्य प्रागुक्तत्वाच्चेति दिक् । तदाह *इत्यन्यत्रेति । गुरुमञ्जूषायामित्यर्थः ॥ २६ ॥

इति तात्पर्यनिर्णयः ।

धात्वर्थनिरूपणम् ।

अथ सकलशब्दमूलभूतधात्वर्थो निरूप्यते । तत्र फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः इति सिद्धान्तः ।

यत्तु फलं धात्वर्थो व्यापारः प्रत्ययार्थः इति ।

तन्न । "लः कर्मणिच" इत्यादिसूत्रविरोधात् । न हि तेन व्यापारस्य प्रत्ययार्थता लभ्यते । किञ्च पचति पक्ष्यति पक्ववानित्यादौ फूत्कारादीनां प्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षया एकस्य धातोरेव शक्तिकल्पनोचिता । किञ्च फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादावपि तत्प्रतीतिवारणाय तद्बोधे पचादिसमभिव्याहारस्यापि कारणत्वकल्पने गौरवम् । किञ्च सकर्मकाकर्मकव्यवहारोच्छेदः ।

नच प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम् तत्समानाधिकरणफलवाचकत्वं चाकर्मकत्वम् । जानातावपि व्यापारतावच्छेदकसमवायसम्बन्धेन व्यापारानधिकरणवृत्तित्वरूपवैयधिकरण्यस्य विषयतया फले सत्त्वेन न क्षतिः । अन्यथा यत्किञ्चित्सम्बन्धेन सर्वेषामेव व्यापारसमा-

नाधिकरणफलवाचित्वेन बहूपप्लवापत्तिः । प्रत्ययार्थव्यापाराश्रयत्वं च कर्तृत्वम् । घटं भावयतीत्यादौ णिजर्थव्यापारव्यधिकरणफलाश्रयत्वेन घटादेः कर्तृत्वमिति वाच्यम् । अभिधानानभिधानव्यवस्थोच्छेदापत्तेः ।

नच व्यापारेण स्वाश्रयस्याक्षेपात्कर्त्तुरभिधानं कर्माख्याते प्रधानेन फलेन स्वाश्रयाक्षेपात् कर्मणोऽभिधानमिति वाच्यम् । जात्याक्षिप्तव्यक्तेरिवाश्रयस्य प्राधान्यापत्तौ "क्रियाप्रधानमाख्यातम्" इतियास्कविरोधापत्तेः ।

किञ्च फलस्य धातुना तदाश्रयस्याक्षेपेणैव लाभसम्भवेन "लः कर्मणि" इत्यस्य वैयर्थ्यापत्तिः । कर्मकर्तृकृतां भावनाकारकोभयवाचकत्वे गौरवाच्च ।

किञ्च भावविहितघञादीनां व्यापारावाचकत्वे ग्रामो गमनवानित्याद्यापत्तिः । तद्वाचकत्वे तेनापि स्वाश्रयाक्षेपे कर्त्तुराभिधानापत्तिः ।

किञ्च गुरुः शिष्याभ्यां पाचयतीत्यादौ "हेतुमतिच" इति सूत्रबलात्प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार आख्यातार्थो वाच्यः, एवञ्च संख्यायां स्ववाचकाख्यातार्थव्यापारे ऽन्वयिन्येवान्वयाच्छिष्याभ्यामिति द्विवचनानापत्तिः । पाचयतीत्येकवचनानापत्तिश्च । गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेश्च । शिष्यशब्दात्तदापत्तेश्चेत्यन्यत्र विस्तरः ॥ १ ॥

धात्वर्थनिरूपणम् ।

(कुं० टी०) *यत्नसहित इति । तेनाग्निसंयोगाधीनव्यापारसत्त्वे अयं न पचतीति प्रयोगो भवत्येव । तत्र यत्नाभावात् । आमवातजडीकृतकलेवरस्य च यत्नसत्त्वे ऽपि यत्नस्योत्थानानुकूलत्वाभावान्नोत्तिष्ठतीति प्रयोग इति भावः ।

अत्र मण्डनमिश्राः-फलमात्रं धात्वर्थः व्यापारः प्रत्ययार्थः । पाक इत्यत्रापि घञर्थ एव व्यापारः । कर्त्तृत्वमपि प्रत्ययार्थव्यापाराश्रयत्वात् । प्रत्ययार्थव्यापारव्यधिकरणफलाश्रयत्वमेव च कर्मत्वम् । देवदत्तेन पाक इत्यत्र तृतीयार्थ एव व्यापारः । णिजन्ते तु व्यापारस्याख्यातार्थत्वादुभयोः कर्त्तृता । फलरूपक्रियावाचकत्वादेवच धातुत्वमिति वदन्ति ।

तान्निराकरोति *यत्त्विति । ननु भावनाया धात्वर्थत्वे "वाजपेयेन स्वाराज्यकामो यजेत" इत्यत्र वाजपेयेन यागं यागेन स्वाराज्यमिति उभाभ्यां सम्बन्धसम्भवाद् गुणविधित्वापत्तौ नामधेयत्वप्रतिपादकवाजपेयाधिकरणासङ्गतिरिति चेन्न । गुणं प्रति अनुवाद्यत्वं फलं प्रतिच विधेयत्वमिति विरुद्धद्वयासम्भवात् । तस्मात्सामानाधिकरण्यान्नामधेयत्वम् । ननु कर्त्तरि इत्यस्य कर्त्तृत्वे इत्यर्थाद् व्यापारलाभ इत्यत आह *किञ्चेति । ननु अनेकधातूनां व्यापारे शक्तिकल्पने तवापि गौरवमत आह *किञ्च फूत्कारेति । ननु व्यापारविशेषबोधार्थं तत्तद्धातुसमभिव्याहारस्य हेतुत्वं सर्वेषामावश्यकमत आह *किञ्चेति । *जानातावपीति । अत्र समवायेन ज्ञानं व्यापारः, विषयतया ज्ञानं च फलम् । *अन्यथेति । कालिकसम्बन्धेन सर्वेषां समानाधिकरणत्वात् । *धातुनेति । फलस्य धात्वर्थतया

फलेन चाश्रयस्याक्षेपाल्लाभे लकाराः कर्म्मणि इत्यस्य वैयर्थ्यापत्तिरित्यर्थः । *कर्मकर्त्रीति । पाचक इत्यत्र व्यापारकर्त्तारौ प्रत्ययवाच्यावित्यर्थः । भावघञादीनां व्यापारवाचित्वमस्ति नवेति विकल्प्य दूषयति *किञ्चेति । *स्ववाचकेति । संख्यावाचकस्याख्यातस्यार्थो यो व्यापारस्तस्य प्रयोज्येऽन्वयात्प्रयोज्ये द्विवचनं न स्यादित्यर्थः ॥ १ ॥

धात्वर्थनिरूपणम् ।

(कं०टी०) अवसरसङ्गत्या पूर्वानन्तरम्, उपजीव्यत्वादग्रिमात्पूर्वं धात्वर्थनिरूपणमित्याह *अथेति । *तत्र-निरूपणीयधात्वर्थविषये ।

अत्र प्रभाकरानुयायिनः—फलमेव धात्वर्थो भावना तु वाच्यैव न, तद्विषयकशाब्दबोधस्य सर्वत्राननुभवात् । किन्तु लिङ्ग्यैव । परं सा आख्यातवाच्येति ।

तन्न । "कर्त्तरि कृद्" इत्यत एव कर्तृग्रहणस्य "लः कर्मणि" इत्यत्रानुवृत्त्या तिङ्कृतोर्वैषम्यस्य दुरुपपादत्वात् । यत्नातिरिक्तः फलानुकूलो व्यापारो धात्वर्थो यत्न आख्यातार्थः, धात्वर्थे कारकान्वय इति गुरुमतं "तत्तु समन्वयाद्" इतिसूत्रस्थवाचस्पत्यादिग्रन्थेभ्यो लभ्यमानं भूषणकारोक्तयत्नाख्यातार्थत्ववादिनैयायिकमतदूषणग्रस्तं, तदेतत् ध्वनयन्नाह *यत्नेति । अनेन सर्वत्र यत्नोऽर्थ इति सूचितम् । मण्डनमिश्रानुयायिमतं खण्डयति *यत्त्विति । ननु कर्त्तृपदस्य धर्मपरत्वेन तल्लाभो ऽत आह *किञ्चपचतीति । यत इति शेषः । एवमग्रे सर्वत्र यथासम्भवम् । नन्वियं सिद्धान्ते ऽपि तुल्येत्यत आह *किञ्चफूत्कारेति । इष्टापत्तौ आह *किञ्च सङ्केतेति । इमं दोषमुद्धरति *नचेति । वाच्यमित्यत्रान्वयः । नन्वेवं जानातेः सकर्मकत्वानापत्तिः, धात्वर्थज्ञानव्याधिकरणव्यापारस्य देवदत्तादावननुभवादित्यत आह *जानातावपीति । *विषयतया फले-तत्सम्बन्धावच्छिन्नफले । *अन्यथा—व्यापारतावच्छेदकसम्बन्धानिवेशे । *सम्बन्धेन—कालिकादिना । *सर्वेषामेव-धातूनाम् । *कर्तृत्वमिति । अतएव घटम्भाव-

यतीत्यादौ कर्मणोऽपि घटस्य घटो भवतीत्यादौ कर्तृत्वमेव। तत्राख्यातस्य धात्वर्थसमानाधिकरणकर्तृव्यापारमात्रार्थकत्वात् । कर्मत्वमपि प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थाश्रयत्वमेवेति सूचयन्नाह *घटमिति । *णिजर्थेति। प्रयोजकव्यापारेत्यर्थः । अन्तर्भावितण्यर्थे ऽपि प्रत्ययस्यैव णिजर्थलक्षणेति न दोष इति भावः। इममपि दोषमुद्धरति *नचेति । अत्र व्यापारस्यानाक्षेपकत्वायाह *प्रधानेनेति । एतेन तत्रापि वैपरीत्यं निरस्तम्। ननु यास्कः अनाक्षेपबोधाशयको मतान्तरपरो वा ऽत आह *किञ्चेति । *इत्यस्य-इत्यंशस्य । ननूक्तरीत्या लाभे ऽपि प्राधान्याय पुनः शास्त्रेण प्रत्ययार्थबोधनं, द्वावित्यादिवच्च न बोधावृत्तिः, भाववत्तदनुवादकत्वं वा, तत्फलं प्राधान्यमेव, अत आह *कर्मेति । कर्मणि कृताम्, कर्मकर्त्तरि कृतां चेत्यर्थः। अत एव सामानाधिकरण्यम् ओदनस्य पक्तेत्यादौ कारकान्वयश्च । इष्टापत्तावाह *किञ्चेति । दोषान्तरमाह *किञ्च गुरुरिति । *अनापत्तिरिति। तदभावापत्तिरित्यर्थः । एवमग्रेऽपि । नचात्र फलं धात्वर्थो व्यापारानुकूलप्रयोजकव्यापारो ण्यर्थः, तत्र फलस्यानुकूलतयाऽऽद्यव्यापारे ऽन्वयः, तिङस्तु कालसंख्ये प्रयोजकव्यापारश्चार्थः, द्वावित्यादिवन्न बोधावृत्तिः, प्रधानत्वाल्लः कर्मणीत्यादिसौत्रानुवादबलाच्च प्रयोजकव्यापारेणैव धर्मिण आक्षेपः । "अनभिहित" इत्यादेश्च शक्त्याक्षेपे साधारणाबोधित इत्येवार्थ इति न दोष इति वाच्यम्। "हेतुमति च" इति सूत्रेण तथाऽलाभात्। अस्मद्रीत्याऽक्लेशेनैव सकलसामञ्जस्ये क्लिष्टकल्पनानुपयोगादुक्तदोषग्रासाच्चेति दिक्। तदाह *इत्यन्यत्रेति। गुरुमञ्जूषायामित्यर्थः॥१॥

यदपि-धातोः केवलव्यापारे एव शक्तिः फलं तु कर्मप्रत्ययार्थ इति ।

तन्न। ग्रामं गच्छतीत्यत्र विभागस्य, त्यजतीत्यत्र संयोगस्य बोधापत्तेः । संयोगबोधे गमादिसमभिव्याहारस्य, विभागबोधे त्यजादिसमभिव्याहारादेः कारणत्वकल्पने तु गौरवम् । त्यागो गमनमित्या-

पत्तेश्च । तत्र फलावच्छिन्नव्यापारवाचित्वे सर्वत्र तथैवोचितम् ।

किञ्च गत्यर्थकर्मणि द्वितीयाचतुर्थ्योर्ल्यब्लोपे कर्मणि पञ्चम्याः, क्तस्येन्विषयस्य कर्मणि सप्तम्या विधानेनानेकेषां सुपां तिङां च फले शक्तिकल्पनापेक्षया फलविशेषबोधे तत्तद्धातुसमभिव्याहारस्य कारणत्वकल्पनापेक्षया च धातोरेव फलेऽपि शक्तिकल्पनोचिता । कर्मकर्तृप्रयोगे फलस्य तवापि धातुवाच्यत्वावश्यकत्वाच्च । त्यजतिगच्छत्योः पर्यायताभ्रमदशायां ताभ्यामविलक्षणबोधोत्पत्त्या तत्तत्समभिव्याहारस्य फलविशेषबोधनियामकत्वासम्भवाच्च । कार्यतावच्छेदककोटौ पुरुषविशेषीयत्वनिवेशे तु गौरवम् ।

यत्त्वीदृशविषये सामग्रीप्रतिबन्ध्यप्रतिबन्धकभावे लाघवगौरवविचारकरणम्, तत्तु तादृशसामग्रीप्रतिबन्धकताज्ञानस्यानुपयोगेनानुमितिपरामर्शकार्यकारणभावादिलाघवगौरवविचारकरणवत् काकदन्तविचारकरणम् ।

किञ्च शाब्दानुमितिसामग्र्योर्ज्ञानघटितत्वेन युगपज्ज्ञानानुत्पत्तेर्मनोलिङ्गतया च तयोराश्रयेनानुभवसिद्धः समावेश एव दुर्घट इति बोध्यम् ।

किञ्च त्वया कर्मत्वं धात्वर्थान्वितप्रत्ययार्थफलवत्त्वम्, प्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं वाच्यम् । तच्च भावयत्येधयत्यादिण्यन्तसकर्मकेषु तत्कर्मणि चाव्याप्तम् । तत्र फलस्य

धात्वर्थत्वेनान्यलभ्यतया प्रत्ययार्थत्वासम्भवादित्यन्यत्र विस्तरः ॥ २ ॥

(कुं०टी०) नव्यनैयायिकमतं निराचष्टे *यदपीति । *फलं-त्विति । कर्म्मणीत्यस्य कर्मत्वे इत्यर्थात् । कर्मत्वं च फलाश्रयत्व फलमेवेति भावः । *त्यागइति । अत्र पर्यायतापत्तिरित्यर्थः । नन्वत्र तत्फलावच्छिन्नव्यापारोऽर्थ इति चेत्तत्राह *सर्वत्र तथैवेति । ननु शाब्दिकमतेऽपि तत्तत्फलबोधे तत्तद्धातुसमभिव्याहारस्य नियामकत्वमावश्यकमत आह *किञ्चेति । फले विभक्तीनां शक्तिः कल्पनीया, फलविशेषबोधे धातुविशेषसमभिव्याहारस्य नियामकत्वं कल्पनीयमिति गौरवमित्यर्थः । *कर्मकार्त्रीति । पच्यते तण्डुलः स्वयमेवेत्यादौ । फलस्य धात्वर्थत्वे समानविषयकानुमितिं प्रति शाब्दसामग्रीप्रतिबन्धकतायां फलप्रकारतानिरूपिता या व्यापारविशेष्यता अथवा व्यापारविशेष्यतानिरूपिता या फलप्रकारता तच्छालिधातुजन्योपस्थितित्वनिवेश इत्यत्र विनिगमनाविरहात् प्रतिबन्धकताबाहुल्यमिति दूषणमुद्धरति *यत्त्विति । *अनुमितिपरामर्शेति ।

केचिद्-वन्हिव्याप्यधूमवान्पर्वत इतिपरामर्शस्य कारणतां वदन्ति । अन्ये वन्हिव्याप्यधूमवान्पर्वतो वन्हिमानित्यनुमितिमिच्छन्ति ।

*काकदन्तेति । अयं भावः-देवदत्ताभिन्नाश्रयकः पाक इत्याकारकशाब्दबोधसामग्र्यास्तत्समानाकारानुमितिं प्रति प्रतिबन्धकता वाच्या । सा च न सम्भवति । शाब्दबोधे पाकस्य विशेष्यत्वात् अनुमितौ च पाकं पक्षीकृत्य देवदत्ताभिन्नाश्रयकत्वसाधने विषयभेदात् । अनुगतस्य व्याप्यस्यासम्भ-

वाच्च । या हि धूमादिदर्शनेन सम्भावना सापि संशय एव नतु-निश्चयात्मिकाऽनुमितिः ।

परे तु धातोः फलावच्छिन्नव्यापारे द्वितीयायाश्चाश्रयत्वे शक्तिभ्रमवतो लाक्षणिकत्वग्रहवतश्च ग्रामं गच्छतीत्यादिशाब्द-सामग्र्यां तादृशानुमित्यनुदयेन तदनुरोधात्तादृशप्रतिबध्यप्रति-बन्धकभावस्तवाप्यावश्यक इत्याहुः ।

*ज्ञानघटितत्वेनेति । शाब्दसामग्री पदपदार्थज्ञानादि-रूपा । अनुमितिसामग्री च परामर्शादिरूपा । तयो-श्च युगपत्सामञ्जस्येनावस्थानं न सम्भवतीत्यर्थः । *मनो-लिङ्गतयेति । नानेन्द्रियाणां विषयसंयोगे ऽपि यद्वशादे-केन्द्रियजन्यमेव ज्ञानं भवति तन्मनसो लिङ्गं लक्षणम् । तथाच गौतमसूत्रम्—"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" । एवं ज्ञानद्वययौगपद्यं न सम्भवतीति भावः । दीर्घशष्कुली-भक्षणादौ ज्ञानद्वययौगपद्यस्वीकारात् उक्तम् *आञ्जस्येने-ति । *कर्मत्वमिति । फलवत्त्वं वाच्यमित्यत्रान्वयः । *तच्चे-ति । तत्र उत्पत्त्यादिरूपं फलं भूप्रभृतीनामेवार्थ इति प्रत्ययार्थ-त्वाभावात् सकर्मकत्वानापत्तिरिति । ननु तत्रोत्पत्तिर्व्यापार एव न तत्फलमत आह *अन्यलभ्यतयेति । उत्पत्तेर्धात्वर्थत्वे प्रत्ययार्थः फलं किमित्यर्थः ॥ २ ॥

(क०टी०)प्राचीननैयायिकोक्तिं खण्डयति *यदपीति । *कर्मेति । कर्मप्रत्ययापेक्षया बहूनां धातूनां फले शक्तिकल्पनस्य गुरुत्वा-त् । किञ्च धातोः फलबोधकत्वे नामार्थधात्वर्थयोराश्रयता-सम्बन्धेन साक्षादन्वयासंभवेन फलाश्रयत्वस्य प्रत्ययार्थत्वे च वृत्तित्वं सम्बन्ध इति लाघवमिति भावः । आदिनोभयभिन्ने-ऽन्यसमभिव्याहारसंग्रहः । *त्याग इति । एकस्या एव संयोगावि-भागजनकत्वादिति भावः । तत्र तत्र लक्षणायां सैव दोषो ऽत

आह *तत्रेति । चतुर्थ्योरित्यादेर्विधाने ऽन्वयः । *कर्मेति । पच्यते तण्डुलः स्वयमेवेत्यादावित्यर्थः । समभिव्याहारस्य कारणत्वमपि दुर्वचमित्याह *त्यजतीति । ननु तत्पुरुषीयत्वनिवेशे नायं दोषोऽत आह *कार्यतेति । नैयायिकोक्तिं खण्डयति *यत्त्विति । फलावच्छिन्नव्यापारवाचित्वे ग्रामङ्गच्छतीतिवाक्यज्ञानघटितसामग्र्याः समानविषयकानुमितिप्रतिबन्धकतायां फलावच्छिन्नव्यापारविषयकधातुजन्योपस्थितेर्निवेश्यतया तस्याः फलनिष्ठप्रकारतानिरूपितव्यापारविशेष्यताशालित्वेन व्यापारनिष्ठविशेष्यतानिरूपितफलप्रकारताशालित्वेन वा निवेश इत्यत्र विनिगमनाविरहात्सामग्रीप्रतिबन्धकताधिक्यमवच्छेदकगौरवं च । मम मते द्वितीयाजन्यफलोपस्थितेः सामग्र्यन्तर्निवेशो भवन्मतसिद्धतज्जन्योपस्थितिस्थानीय इति लाघवमित्यर्थः । यद्यपि धातोः फलावच्छिन्नव्यापारे द्वितीयायाश्चाश्रयत्वे शक्तिभ्रमवतो लाक्षणिकत्वग्रहवतश्च ग्रामं गच्छतीत्यादिशाब्दसामग्र्यां सत्यां तादृशानुमित्यनुदयेन तदनुरोधात्तादृशप्रतिबध्यप्रतिबन्धकभावस्य तवाप्यावश्यकत्वं तथापि वास्तवमेव समाधिमाह *तत्तु तादृशेति । बाधकबुद्धेर्बोधसामान्ये प्रतिबन्धकत्वाभावस्य व्यवस्थापितत्वादिति भावः । प्रासङ्गिकमाह *अनुमितीति । तयोः कार्यकारण भाव एव न, तं विनाऽपि तदुदयेन तस्य कारणताऽनुपयोगात् । यथा चानुमितिप्रक्रिया तथा प्रागेवोपपादिता । आदिना व्याप्तिज्ञानादि । *काकेति ।

काकस्य कति वा दन्ता मेषस्याण्डं कियत्पलम् ।

इत्यादिनेति भावः । इदमप्यभ्युपेत्योक्तम् । वस्तुतोऽसम्भव एवेत्याह *किञ्चेति । परमते मनसो ऽणुरूपत्वादाह *मनोलिङ्गेति । परमतावलम्बनं विनाऽसम्भवादाह *आश्रयेनेति । सर्वथा ऽसत्त्वं वारयति *अनुभवेति । तथाच पररीत्येदं दूषणम् । एवं यत्त्विति मतं संखण्ड्य बोध्यमित्यन्ते प्रक्रान्तमते दोषान्तरमाह *किञ्चत्वयेति । *प्रत्ययार्थेति । तदन्वितेत्यादिः । अकर्मकत्वं च तदभाव एवेति भावः । *धात्वर्थत्वेनेति । अन्वयव्यतिरेकाभ्यामित्यादिः । *लभ्यतयेति । गौरवेण चेत्यपि बोध्यम् । किञ्च विष्णुं यजते, विष्णुर्यष्टव्य इत्यादौ चतुर्थ्यर्थविहित-

द्वितीयादेरुद्देश्यत्वेनैवान्वयबोधकत्वाद्यतिवद्यजेरप्यकर्मकत्वापत्तिः। विष्णोर्धात्वर्थकर्मत्वाभावेन तस्मिन्कर्मणि लतव्यादेरभावापत्तिश्च । उद्देश्यताख्यविषयतया विष्णुर्यागविषय इति चेद्भोजनमभि यत्यर्थस्यापि सकर्मकत्वापत्तिः । नचाकर्मकभिन्नत्वं सकर्मकत्वं तत्र च प्रयोगानुरोधात्कृञ्ज्ञानात्यादिभेदो न निवेश्य इति वाच्यम् । सकर्मकाणामप्यर्थान्तरे ऽकर्मकत्वेनासम्भवापत्तेः । तुल्ययुक्त्याऽकर्मकत्वमपि सकर्मकान्यत्वमेव वाच्यम्, अन्यादृशस्य तस्य दुर्वचत्वात् । एवञ्चान्योन्याश्रयापत्त्या "लः कर्मणि" इत्यादेरबोधकत्वापत्तिश्चेति दिक् । तदाह *इत्यन्यत्रेति । उक्तोऽर्थः ॥ २ ॥

अत्र फलव्यापारयोः पृथक् शक्तिः । एकपदोपस्थाप्ययोरपि परस्परमन्वयो व्युत्पत्तिवैचित्र्यात् परेषां कृतीष्टसाधनत्वयोरिव । अन्यथा कर्मप्रत्ययसमभिव्याहारे व्यापारावच्छिन्नफलबोधेन तथाशक्तेरप्यावश्यकत्वेन गुरुशक्यतावच्छेदककशक्तिद्वयकल्पनापत्तिः ।

तत्र फलव्यापारावन्तरङ्गत्वात्परस्परविशेषणतामनुभूयैवार्थान्तरान्वयिनौ । अत एव गमनं न व्यापार इति न । फलांश उत्सर्गतो व्यापारविशेषणम् । जन्यजनकभावः संसर्गः । क्वचित्तु विषयत्वं संसर्गः । यथा आस्यादेस्तत्पूर्वकाध्यवसायादौ वृत्तौ । पत्ये शेते आस्ते इत्यादौ पत्युद्देश्यकं शयनाद्यध्यवस्यतीत्यर्थः । फलत्वं च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम् । जन्यता च आरोपिताऽनारोपिता-वेत्यन्यदेतद् । विभागजन्यसंयोगादिरूपे पतत्यादिधात्वर्थे विभागसंयोगयोः फलत्ववारणायोभयम् ।

कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यता ॥ ३ ॥

(कु० टी०) *पृथक्शक्तिरिति । फलावच्छिन्नव्यापारस्य धात्वर्थत्वे विशेष्यविशेषणभावे विनिगमनाविरहादवच्छेदकगौरवमेकदेशान्वयापत्तिश्चेति भावः । ननु पदद्वयघटिताकाङ्क्षाविरहात् फलव्यापारयोरन्वयबोधानापत्तिरत आह *व्युत्पत्तिवैचित्र्यादिति । अत एव तार्किकमते ऽपि एवकारार्थयोरन्ययोगव्यवच्छेदयोः परस्परमन्वयः । नच तत्राप्यन्ययोगप्रतियोगिकाभावरूपः समुदित एवार्थः । उभयाभावमादायातिव्याप्तेः । अन्ययोगत्वावच्छिन्नप्रतियोगिताको व्यवच्छेदो ऽर्थ इत्युक्तौ तु 'पार्थ एव धनुर्धर' इत्यत्र पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्य प्रतीतिर्न स्यात् । पदभेदेन भिन्नत्वात् । तथाच प्रकृते एकपदोपस्थाप्यत्वमेवाकाङ्क्षेति भावः । *परेषामिति । तार्किकाणां लिङर्थकृतौ लिङर्थेष्टसाधनत्वान्वयवादित्यर्थः । ननु इष्टसाधनत्वस्य पाकादावेवान्वय इत्यरुचेर्दोषान्तरमाह *अन्यथेति । फलावच्छिन्नव्यापारे शक्तौ पच्यत इत्यत्र व्यापारप्रकारकबोधो भवदभिमतो न स्यादित्यर्थः । *तथाशक्तेरपीति । फलावच्छिन्नव्यापारत्वं व्यापारावच्छिन्नफलत्वं च शक्यतावच्छेदकं वाच्यमित्यर्थः । *इति नेति । इत्याकारकः प्रत्ययो नेत्यर्थः । फलव्यापारयोः पृथगुपस्थितौ तयोर्व्यापाररूपत्वाभावादुक्तप्रत्ययः स्यादेवेत्यर्थः । कर्मप्रत्ययसमभिव्याहारे फलस्य विशेष्यत्वस्वीकारादाह *उत्सर्गतइति । *आस्यादेः-आस्ते इत्यादेः । एतदेवोपपादयति *पत्ये शेते इति । पत्युद्देश्यकं यत् शयनं तदध्यवस्यतीति । अत्र शयनविषयकाध्यवसाये पर्यवसानात् । कर्मप्रत्यये फलस्य विशेष्यत्वादाह *कर्तृप्रत्य-

येति । *आरोपितेति । ईश्वरस्तिष्ठतीत्यादौ स्थितौ जन्यताया आरोपात् । *विभागेति । विभागजन्यः संयोगः पतधात्वर्थः । तत्र संयोगस्य प्रकारत्वाभावात् । विभागस्य धात्वर्थजन्यत्वाभावाद् वारणमित्यर्थः । *उभयम्—विशेष्यविशेषणद्वयम् । क्वचिद्-कर्मकधातौ व्यापारमात्रम् धात्वर्थ इति वक्ष्यमाणमतेनेदम् ॥ ३॥

(क० टी०) विशेषमाह *अत्रेति । धातुविषये इत्यर्थः । तत्रादौ प्राचां दीक्षितादीनां मतमाह *पृथगिति । नन्वेवं तयोरन्वयो न स्यात् भिन्नपदोपस्थितेस्तत्र तन्त्रत्वादत आह *एकेति । तथाच तत् धातुभिन्नविषयमिति भावः । इदम्परसंमतमपीत्याह *परेषामिति । ननु द्वितीयार्थाश्रयान्वयस्यैकदेशे फले ऽन्वयानुपपत्त्या न पृथक्शक्तिस्वीकारः, "कर्मणि द्वितीया" इत्यनुशासनाद् व्युत्पत्तिवैचित्र्याच्च तस्य सौलभ्यादत आह *अन्यथेति । पृथक्शक्त्यनङ्गीकारे इत्यर्थः । *तथा—तेन रूपेण । शक्तिद्वयकृततुल्यत्वेऽप्याह *गुर्विति । नन्वेवमपि फलाशयेन गमनं न व्यापार इति प्रतीत्यापत्तिरत आह *तत्रेति । पृथक्शक्तिपक्षे इत्यर्थः । अन्वयानां मध्ये इत्यर्थो वा । कर्मप्रत्ययतदन्यप्रत्ययभेदेनाह *फलेति । अन्तरङ्गत्वं प्रथमोपस्थितत्वरूपम् । *अतएव—फलस्य स्वातन्त्र्येणानुपस्थितेरेव । नन्वेवमपि व्यापारविशेषणकफलाशयेन तथाप्रयोगापत्तिरेवात आह *फलांश इति । फलरूपोंऽश इत्यर्थः । *उत्सर्गतः—कर्मप्रत्ययभिन्नस्थले । तथा च गमनपदतो व्यापारस्यैव तादृशस्य विशेष्यतया प्रतीतिर्न विपरीतस्येति न तदापत्तिरिति भावः । औत्सर्गिकमिदमिति सूचयितुमाह *क्वचित्त्विति । अप्रसिद्धत्वादस्य विषयमाह *यथेति । प्रसङ्गादत्रैव सिद्धान्तमतेन फलपदार्थमाह *फलत्वञ्चेति । प्रागुक्ते पत्ये शेते इत्यादौ वस्तुतो ऽजन्यत्वादाह *जन्यताचेति । पर्णं पततीत्यादौ विभागजन्यसंयोगस्यैव धात्वर्थत्वे विभागे विशेष्यवत्त्वेऽपि न सत्यन्तम्, संयोगे तत्त्वे ऽपि न विशेष्यमित्युभयोपादानमित्याह *विभागेति । *विभागसंयोगयोरिति । मिथ इति शेषः । कर्त्तृप्रत्यये त्यस्य फलमाह *कर्मेति ॥ ३ ॥

परेतु तयोः पृथक्शक्तौ फलव्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तिः । पृथगुपस्थितयोस्तथाऽन्वयस्यौत्सर्गिकत्वात् । तथाऽन्वये धातुजतत्तद्बोधस्य प्रतिबन्धकत्वकल्पने गौरवम् । तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः । कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः । गौरवंच प्रामाणिकत्वान्न दोषावहम् । किञ्चैकपदे व्युत्पत्तिद्वयकल्पने गौरवम् । तथाहि-फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमितिकार्यकारणभावद्वयकल्पनम्, धातोरर्थद्वये शक्तिकल्पनम्, बोधजनकत्वस्य विषयासम्बद्धे ऽनुपपन्न्या तत्तत्समभिव्याहारविशिष्टधातौ विशिष्टानिरूपितसम्बन्धद्वयकल्पना चेत्यतिगौरवम् । अन्यथा पदशक्तेरुच्छेदः । एवमन्यत्रापि पृथक्शक्तिकल्पना निरसनीयेत्याहुः ॥ ४ ॥

(कुं० टी०) *तथाऽन्वयस्य—उद्देश्यविधेयभावेनान्वयस्य । अन्येतु पृथगुपस्थितयोस्तयोर्विशिष्टबोधो न स्यात् । हरिपदादुपस्थितयोरश्वसूर्ययोः परस्परमाधाराधेयभावेनान्वयाभावात्पृथगवस्थितयोः पृथगेवान्वयो भवतीत्याहुः । *फलावच्छिन्ने इति । कर्तृप्रत्यये इति शेषः । कर्मप्रत्ययेऽप्याह *व्यापारावच्छिन्ने इति । *एकपदे-एकधातुपदे । *व्युत्पत्तिद्वयेति । कर्मकर्तृप्रत्ययसमभिव्याहारे फलस्य विशेष्यत्वविशेषणत्वयोः

स्वीकारे इत्यर्थः । *विषयासम्बद्धे इति । बोधविषयेणार्थेन धातुर्यदि सम्बद्धो न स्यात्तत्र बोधजनकत्वं न स्यादतो धातोस्तत्र सम्बन्धो वाच्य इत्यर्थः । *तत्तत्समभिव्याहारविशिष्टेति । कर्मकर्तृप्रत्ययसमभिव्याहारभेदेनार्थद्वयकल्पनमित्यर्थः । *अन्यथा—समभिव्याहारस्यैव नियामकत्वे । *उच्छेदइति । तत्रापि समभिव्याहारविशिष्टस्य विशिष्टे शक्तिसम्भवात् । *अन्यत्रापीति । अन्ययोगव्यवच्छेद एवकारार्थः । नतु अन्ययोगो व्यवच्छेदश्च पृथगर्थ इत्यर्थः ॥ ४ ॥

(क० टी०) सिद्धान्तमाह *परेत्विति । परमतेनैवाह *पृथगिति । तन्मते तत्र तस्यास्तन्त्रत्वादिति भावः । राज्ञः पुरुष इत्यादौ तदभावादाह *औत्सर्गिकेति । *तत्तद्बोधस्य—फलव्यापारोपस्थितेः । अव्यवस्थां निराचष्टे *कर्त्तृकर्मेति । ननु गुरुशक्यतावच्छेदकप्रयुक्तगौरवं प्रागुक्तमेव, अत आह *गौरवञ्चेति । इदमप्यभ्युपेत्य । वस्तुतस्तथाऽप्यत्र ततो लाघवमेवेत्याह *किञ्चेति । *अन्यथा—तृतीयकल्पनानङ्गीकारे । *अन्यत्रापि—जातिव्यक्त्यादावपि ॥ ४ ॥

सर्वकारकाणां धात्वर्थे[1]ऽन्वयः । अयमेव च क्रिया ।

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥
गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ इति-

भूवादिसूत्रस्थभावनार्थप्रतिपादकहरिग्रन्थात् । क्रमजन्मनामेषां व्यापाराणां समूहं प्रति गुणभूतै-

---

१ धात्वर्थ एवेत्यर्थः ।

स्तत्तद्रूपेण भासमानैरवयवैर्युक्तः सङ्कलनात्मिकयैकत्वबुद्ध्या प्रकल्पिताभेदरूपः समूहः क्रियेति व्यपदिश्यते इति द्वितीयकारिकार्थः । अत्रावयवाश्रयं पौर्वापर्यं समुदायाश्रयमेकत्वम् ।

एतेन पूर्वापरीभूतक्षणसमूहस्य युगपदसंनिधानादेका क्रियेति भाष्यासङ्गतिरित्यपास्तम् ।

क्षणनश्वराणामवयवानां वस्तुभूतसमुदायाभावाद् बुद्ध्येत्युक्तम् । पचति पक्ष्यतीत्यादावसिद्धम्, अपाक्षीदित्यादौ सिद्धं वा साध्यत्वेन तत्प्रकारेणाभिधीयमानं क्रिया । आश्रितेति योगप्रदर्शनं क्रियते अवयवानां क्रमेणोत्पत्त्या । अत एवाश्रितक्रमरूपा क्रियेत्याद्यार्थः ।

एकैकावयवे ऽपि समूहरूपारोपादधिश्रयणकाले ऽपि पचतीति व्यवहारः । आरोपे च प्रतीतिरेव बलम् । अध्यासगृहीतयैव क्रियया ऽऽख्यातस्य सम्बन्धग्रहो बोध्यः । नचैवं धात्वर्थस्य गौणत्वापत्तिः । तदतिरिक्तमुख्यार्थाप्रसिद्ध्या तस्य गौणत्वाभावात् । यस्य हि मुख्यो ऽन्यो ऽर्थो ऽस्ति तत्रैवेदृशस्य गौणत्वात् ।

यद्वा तादृशानेकव्यक्तिवृत्तिजातिरेव क्रिया । व्यक्तिद्वारकं च तस्याः साध्यत्वम् । स्फोटवदस्याः क्रमवद्भिरपि क्रियाक्षणैराभिव्यक्तिः । फलस्यापि स्वजनकव्यापारगतपौर्वापर्यारोपेण तथैव भानम् । अत एव तन्मात्रवाचकस्य धातुत्वसिद्धिः ॥ ८ ॥

(कुं.टी.)*अयमेवेति। सकलकारकान्वितो धात्वर्थ एवेत्यर्थः। एतच्च स्वरूपकथनं नातो ऽन्योन्याश्रयः। ननु यथा 'किङ्करोति' इति प्रश्ने 'पचति' इत्युत्तरं भवति एवम् 'अस्ति' इत्युत्तराभावादस्त्यादीनां क्रियावाचकत्वं न स्यादत आह *यावदिति।

अस्यार्थः—क्रमरूपं पौर्वापर्यमाश्रित्य साध्यत्वेन विवक्षितो ऽर्थः क्रियेति। 'घटः क्रियते' इत्यत्रापि क्रियाद्वारैव घटस्य साध्यत्वम्। नहि घट इत्येतावन्मात्रात्साध्यत्वं प्रतीयते। क्रियते इत्येतत्तु स्वत एव साध्यत्वं गमयतीति तदेव क्रियावाचकत्वमस्त्यादावपि साधयिष्यतीति। नन्वेका क्रियेति व्यवहारः कथमत आह *गुणभूतैरिति। क्रमिकाणां व्यापाराणां समूहे बुद्धिकल्पितमेकत्वमाश्रित्यैकत्वव्यवहार इत्यर्थः। *तत्तद्रूपेण—फूत्कारत्वादिना। सङ्कलनात्मिकयेत्यस्यावतरणम् *एकत्वबुद्ध्येति। *क्षणसमूहस्येति। 'कालमन्ये क्रियामाहुः' इति मते क्रियायाः कालरूपत्वात्। *वस्तुभूतेति। वास्तविकेत्यर्थः। *अभिधीयमानं क्रियेति। सिद्धमसिद्धं वा वस्तु साध्यस्वरूपेणाभिधीयमानं क्रियेत्यर्थः। *आश्रितेतीति। कारिकायामाश्रितक्रमरूपत्वादित्येतत् क्रियाशब्दार्थकथनमित्यर्थः। तथाच क्रियते इति क्रियेत्यर्थः। ननु व्यापारसमुदायस्य कारणासम्भव इत्यत आह *अवयवानां क्रमेणोत्पत्त्येति। क्रियते इत्यस्य हेतुकथनमेतत्। अवयवद्वारकं समुदायस्योत्पाद्यत्वमिति भावः।

ननु यदि व्यापारसमुदायः क्रिया, तदा ऽधिश्रयणाद्येकैकव्यापारस्य क्रियात्वानापत्तौ 'स्थाली पचति' इतिप्रयोगानापत्तिरत आह *एकैकावयवेऽपीति। तदुक्तं हरिणा—

समूहः स तथाभूतः प्रतिभेदं समूहिषु।
समाप्यते ततो भेदाः कालभेदस्य हेतवः॥ इति।

अयं भावः—अधिश्रयणारम्भ एव फलाभिसन्धेः समस्तक्रियाकलापस्तत्रैवाध्यस्यते । तस्यैव च भूतत्वादिविवक्षायामपाक्षीदित्यादयो ऽपि प्रयोगाः। तथाभूतः गुणभूतः क्रमजन्मा। अयं भावः—न समुदायबुद्ध्या एकत्वम्, नापि—'अयं चायंच' इति समुच्चयबुद्ध्या एकत्वम्, किन्तु पूर्वापरीभूतावयवत्वेनैव। तथाच समुदायस्य प्रत्येकावयवे ऽप्यध्यासात्तत्प्रत्ययोपपत्तिः।

अत एवोक्तं हरिणा—

एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्त्तन्ते तुल्यरूपं समाश्रिताः ॥ इति ।

यद्यपि हिंसार्थको हनधातुर्भिन्नः, गत्यर्थको भिन्नः । सादृश्यात्तु ऐक्यप्रत्ययः, तथाऽपि—

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः । इति—

न्यायेन एक एव हन्धातुरुभयार्थकः। अबाधितैकाकारप्रत्ययात्। अनेकार्थत्वमेव बाधकमिति चेन्न । शक्तिभेदस्यैव न्याय्यत्वात्। यथा एको ऽप्यक्षशब्दो ऽनेकार्थप्रतिपादकशक्तिर्दृष्टस्तथा पच्यादिरपि । तथा हि 'पच्यते तण्डुलः स्वयमेव' इत्यत्र विक्लित्तिरेव पच्यर्थः, 'स्थाली पचति' इत्यत्र तदाश्रयणमेव। तुल्यरूपमित्यस्य तुल्येनाभिन्नेन स्वभावेन युक्ता एते धातवोऽभिन्ना एवेत्यर्थः। नन्वध्यासे किं बीजं तत्राह *प्रतीतिरेवेति। सर्वत्र 'पचति' इतिबुद्धेरनुवर्त्तमानत्वात्प्रत्यवयवमपरिसमाप्तस्य समुदायस्यावयवे अध्यास इत्यर्थः । नन्वधिश्रयणादेरारोपितक्रियात्वे कथं तत्कर्त्तरि लकार इत्यत आह *अध्यासगृहीतयेति । बुद्ध्या विषयीकृतयेत्यर्थः । *मुख्यार्थाप्रसिद्ध्येति । अवयवगतपौर्वापर्यस्य समुदायरूपाक्रियायामारोपाद्गौणत्वमेवेति भावः । जातिप-

क्षस्यैव मुख्यत्वात्तदभिप्रायेणाह *यद्वेति । तदुक्तम्—

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते ।। इति ।

अनुगतप्रतीतिरेव जातिसाधिका । इहापि कर्त्तृकर्मपदादपि पचतीत्येकाकारप्रतीतिदर्शनात्तद्गता जातिरेव धातुवाच्या । अनेकव्यक्तिवर्त्तिनीमित्यनेन जातित्वं दर्शितम् । *स्फोटवदिति । यथा स्फोटस्य क्रमिकवर्णैरभिव्यक्तिस्तद्वत् । *क्रियाक्षणैः तत्क्रियाक्षणैः । *तथैव-क्रियात्वेनैव । *तन्मात्रेति । पच्यते तण्डुलः स्वयमेवेत्यादौ फलस्यापि क्रियात्वमित्यर्थः ।। ५ ।।

(क० टी०) यत्तु कर्मान्यसर्वसाङ्गत्यं तद् ध्वनयन्नाह *सर्वेति । साधुत्वमष्टकस्य क्रिययैवेति प्राचाम्, कारकाणां भावनान्वय इति परेषां च सिद्धान्तो ऽपि धात्वर्थपर एवेत्याह *धात्वर्थे इति । फलावच्छिन्नव्यापारादावित्यर्थः । साक्षात्परंपरया वा यथाकथंचिदिति भावः । धात्वर्थे वक्ष्यमाणस्वरूपे क्रियाशब्दस्य सांकेतिकी शक्तिरित्याह *अयमेव चेति । एवेन मतान्तरव्यवच्छेदः । निर्मूलत्वनिरासायाह *भूवादीति । भाष्यसिद्धान्तार्थेत्यर्थः । तत्र हि-"क्रिया नामेयमत्यन्तापरदृष्टा" इत्याद्युक्तम् । द्वितीयकारिका बुद्धिस्थत्वादिरूपशक्यतावच्छेदकानुगमकबोधिका नतु क्रियास्वरूपबोधिकेति भूषणाद्यसांगत्यं ध्वनयन्नाद्ये धर्मविशेषाद्युक्तावपि तत्स्वरूपानुक्त्या व्युत्क्रमेण व्याचष्टे *क्रमेत्यादि । क्रमेण जन्म येषां तेषाम् । एषां बुद्धिस्थानामधिश्रयणादीनां समूह इत्यत्रान्वयः । प्रत्यासत्त्या आह *समूहं प्रतीति । गुणभूतैरित्यस्याङ्गभूतैरित्यर्थे पौनरुक्त्यापत्तिरतो गुणशब्दो धर्मपरः, भूतशब्दो 'ये प्राप्त्यर्था' इत्युक्तेर्ज्ञानपरो वर्तमानक्तान्त इत्याह *तत्तद्रूपेणेति । प्रकल्पितेत्यत्र कर्मधारयो न तु भूषणाद्युक्तो बहुव्रीहिरित्याह *प्रकल्पिताभेदरूप इति । विरोधं परिहरति *अत्रेति । क्रियालक्षणे इत्यर्थः । अत एव सरूपसूत्रस्थभाष्यविरोधो नेत्याह *एते

नेति । समुदायाश्रितैकत्वेनेत्यर्थः । *बुद्ध्येत्युक्तमिति । समूहेऽपि तस्या अन्वयः । समूहव्यवहारो बुद्धिकृतो विकल्परूप एव न वास्तवः । तथा च पूर्वापरीभूतावयवा साध्यमानावस्था भूतभविष्यद्वर्त्तमानसदसदनेकावयवसमूहरूपैका क्रियेत्यर्थः । मतद्वयसाधारण्येनाह *तत्प्रकारेणेति । प्रकारो भेदः । नन्वेवं प्रत्येकाशयेन पचतीति न स्यादत आह *एकैकेति । तदुक्तम्—

एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः ॥ इति ।

कैयटमतेनाह *समूहेति । अधिश्रयणेत्युपलक्षणम् । वस्तुतस्तु अधिश्रयणादिरपि नैकक्षणात्मकस्तस्यापि हस्तप्रसारणपात्रादानचुल्लीसंयोजनादयो ऽवयवाः सन्त्येवेति सोऽपि समूहरूप एव । यस्तु तेषामप्यवयवः परमाणुप्रख्यः स तु शब्दशक्तिस्वभावान्नैव वाच्यो नापि प्रत्यक्ष इति बोध्यम् । अत एव मतद्वयसाधारण्येनाह *अध्यासेति *एवम्—अध्यस्तस्य धातुवाच्यत्वे । *ईदृशस्य-अध्यस्तस्य । तस्य सम्बन्धिशब्दत्वादिति भावः । एतेन यदनन्तरमव्यवधानेन फलोत्पादः सा क्रिया यथा तण्डुलं पचतीत्यत्र विक्लेदनम् । अधिश्रयणादीनां तज्जनकतया क्रियात्वमौपचारिकम् । तदुक्तम्—

अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः ।
प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्यता ॥ इति

इत्यपास्तम् । तदा तस्य गौणतापत्तेः । आरब्धेऽपि पाके क्रियाया भावित्वेन पक्ष्यतीति प्रयोगापत्तेश्च ।

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते ॥ इति-

हर्युक्तेराह *यद्वेति । पचतीत्यनुगतव्यवहाराच्च तत्सिद्धिः । ननु तदभिव्यञ्जकत्वं प्रागुक्तरीत्या दुर्वचमत आह *स्फोटवदिति । नन्वेवमपि फलस्य कथं तदन्तर्गतस्य क्रियात्वं तथाप्रतीत्यभावादत आह *फलस्यापीति । *तथैव-तादृशसमूहरूपतयैव ॥ ५ ॥

तत्र केचित्-सिद्धत्वं क्रियान्तराकाङ्क्षोत्थापक-

तावच्छेदकं यद्वैजात्यं तद्रूपम् । साध्यत्वं च पूर्वापरीभूतावयवत्वसमानाधिकरणं कारकान्वययोग्यतावच्छेदकं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं च यद्वैजात्यं तद्रूपम् । हिरुगाद्यव्ययानां क्रियाप्रधानत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात् । स्वरादीनां हि स्वःपतिरित्यादौ नामार्थेऽप्यन्वयः । अत एव न हिरुगाद्यर्थे कारकाणामन्वयः । तेषां क्रियान्तराकाङ्क्षत्वात् । तत्र सिद्धत्वं पाक इत्यादौ घञादिबोध्यम्, साध्यत्वं च सर्वत्रैव धातुप्रतिपाद्यम् ।

न च धातुतः क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्येनोपस्थितौ कृष्णं नमेच्चेत्सुखं यायादित्यादौ आकाङ्क्षाऽभावेनान्वयो न स्यादिति वाच्यम् । चेच्छब्दसमभिव्याहारेणाकाङ्क्षोत्थापनादित्याहुः ॥ ६ ॥

(कुं० टी०) *साध्यत्वंचेति । अयं भावः—पचतिशब्देन क्रियावगतौ पुनः क्रियाया आकाङ्क्षा न भवति, अतस्तादृशक्रियागतम् वैजात्यं तद्रूपं साध्यत्वम् । तच्च वैजात्यमतिरिक्तं पचतीत्यादिशब्द एव वेत्यन्यत् । ननु पचत्यादिशब्दोपात्तानामेव क्रियात्वस्य न्याय्यत्वात् हिरुगाद्यव्ययानां कथं क्रियाप्रधानत्वमत आह *हिरुगादीति । अन्यत्र क्रियामात्रविशेषणत्वव्यतिरेकं दर्शयति *स्वरादीनांहीति । *अतएवेति । हिरुगाद्यार्थस्य क्रियात्वाभावान्न कारकान्वयः । क्रियाकाङ्क्षा तु भवत्येवेत्यर्थः । *सर्वत्रैवेति । तिङन्ते कृदन्ते च । *अन्वयो न स्यादिति । नमेदित्यस्य क्रियान्तरानाकाङ्क्षत्वात् । *आहुरिति । तथापि साकाङ्क्षत्वं दुर्वारमित्यस्वरसः ॥ ६ ॥

(क.टी.) *तत्र–क्रियाशरीरघटकसाध्यत्वविषये। तत्रादौ भूषणकारादिमतमाह *केचिदिति। तत्राप्यादौ व्यावर्त्यतया वक्तव्यमाह *सिद्धत्वमिति। *वैजात्यम्–सत्त्वभूतत्वम्। *पूर्वापरीति बहुव्रीहिः। आदिना सम्बोधनान्तादिसप्तकपरिग्रहः। इदमेव परोक्तमित्याह *क्रियान्तरेति। *यद्वैजात्यम–असत्त्वभूतत्वम्। नन्वेवं हिरुगाद्यव्ययानां क्रियाप्रधानत्वव्यवहारस्य "तद्धितश्च" इतिसूत्रे भाष्ये क्रियमाणस्यानुपपत्तिस्तदर्थस्य तत्त्वेनाभानादत आह *हिरुगादीति। *क्रियामात्रेति। क्तान्तादिवदित्यादिः। तथा च गौणस्तत्र व्यवहार इति भावः। मात्रव्यवच्छेद्यमेवाह *स्वरादीनां त्विति। अतएव वैलक्षण्यसूचकस्तुः। अपिना स्वः पश्येत्यादौ क्रियासमुच्चयः। ननूक्तभाष्यात्तदर्थस्य तत्त्वमेवास्त्विति किमर्थं तस्य गौणत्वमत आह *अत एवेति। *तेषाम्–हिरुगाद्यर्थानाम्। आकाङ्क्षा चेतिपाठः। उभयोरुभयं व्यावर्त्यं क्रमेण। तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्येनाभानान्न तस्य तत्त्वमिति भावः। *तत्र–तयोर्मध्ये। अत एवोक्तम—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥ इति।

*चेदिति। भुक्त्वेत्यत्रापि धातुसम्बन्धे विधीयमानक्त्वासमभिव्याहारात् सा। पचति भवतीत्यादौ पचतीत्यादेराकाङ्क्षाया अभावेऽपि भवतीत्यादेः कर्त्राद्यपेक्षत्वाद्योग्यतावशादन्यतराकाङ्क्षयैवान्वयेन न दोष इति बोध्यम्॥ ६॥

वस्तुतः साध्यत्वं निष्पाद्यत्वमेव। तद्रूपेणैव च बोधः। स्पष्टं चेदम् "उपपदमतिङ्" "सुद् कात्पूर्वं" इत्यादौ भाष्ये इति उपसर्गवादे निरूपयिष्यामः।

यद्यपि 'घटं करोति' इत्यादौ घटस्यापि साध्यमानत्वं प्रतीयते, तथापि पदान्तरसमभिव्याहारात्तथा। स्वतस्तु घटादिपदाद् द्रव्यं सिद्धत्वेनैव प्रतीयते। सिद्धत्वं च सूक्ष्मरूपेण बोध्यम्।

यद्यपि क्रियाऽपि तथा, तथाऽपि शक्तिस्वाभाव्यात्स्थूलरूपेण साध्यत्वेनैव तस्याः प्रतीतिः। द्रव्यस्य तु सूक्ष्मरूपेण सिद्धत्वेनैवेति न दोषः। पचति भवति भुङ्क्तेत्यादौ भवति भुङ्क्तेत्यादीनां क्रियाकाङ्क्षादर्शनेन तादृशवैजात्येनाभानात्कारकान्वयानापत्तिर्धातुत्वानापत्तिश्च। एवं कृष्णं नमेच्चेदित्यादौ चेत्पदेनापि तथाऽऽकाङ्क्षायां तद्वैजात्येनाभानाद्दोष एव। हिरुगित्यादेश्च न साध्यत्वेन भानमिति न कारकान्वय इति दिक् ॥ ७ ॥

(कुं० टी०) *वस्तुतइति । तेन कृष्णं नमेच्चेदित्यादौ नाव्याप्तिरिति भावः। *तथापीति। करोत्यादिप्रयोगे एव घटस्य साध्यत्वं प्रतीयते, करोतेस्तु स्वतोऽपीति भावः। ननु सिद्धस्य घटस्य कथं साध्यत्वम्, असिद्धत्वे तु कथं क्रियाजनकत्वमत आह *सूक्ष्मरूपेणेति। कारणे विद्यमानस्यैव बुद्ध्या विषयीकरणादिति भावः। *क्रियापितथेति। सूक्ष्मरूपेण सिद्धेत्यर्थः। क्रियान्तराकाङ्क्षेतिलक्षणं वदतो मते दोषमाह *पचति भवतीति। अत्र भवतीत्यस्य पचतीत्येतत्साकाङ्क्षत्वात् । भवति भुङ्क्तेत्यादौ पाकक्रियाकाङ्क्षादर्शनादव्याप्तिरित्यर्थः। ननु स्वमते क्रियान्तरानाकाङ्क्षात्वस्य नियामकत्वे हिरुगादावतिव्याप्तिरत आह *हिरुगाद्यर्थस्येति ॥ ७ ॥

(क० टी०) सिद्धान्तमाह *वस्तुत इति। यौगिकोऽर्थ इत्याह *निष्पाद्येति। उत्पाद्यमानत्वमेवेत्यर्थः। एवेनोक्तव्यवच्छेदः। सिद्धान्ते "प्रातिपदिकानामपि" इतिभाष्योक्तदोषं "स्वभावसिद्धं तु द्रव्यम्" इतिभाष्योक्त्यैव परिहर्त्तुमाह *यद्यपीति। *स्वतस्तु–तदसमभिव्याहारे तु। ननु स्थूलरूपस्य द्रव्यस्य सिद्धत्वं बाधितमेवात आह

*सिद्धत्वञ्चेति । सत्कार्यवादादाह *यद्यपीति । *तथा-सूक्ष्मरूपेण । *द्रव्यस्यत्विति । एतेनोक्तभाष्यस्य "द्रव्यं स्वभावेन शब्दशक्तिस्वभावेन सिद्धं सूक्ष्मरूपेण सिद्धावस्थमेव शब्दवाच्यम्" इत्यक्षरार्थः सूचितः । तथाच क्रियायास्तत्त्वेऽपि शब्दवाच्यत्वं तथा नेति भेद इति भावः । केचिन्मते दोषमाह *पचतिभवतीति । पचतीत्यस्यानाकाङ्क्षत्वादाह *भवतीति । अत्र क्रियात्वेन तदभावेऽपि कर्त्तृत्वेन साऽस्त्येवेत्याह *क्रियाकाङ्क्षेति । आदिः प्राग्वद् भुक्त्वेत्याद्याशयकः । दोषान्तरमाह *एवमिति । अपिः क्त्वाऽऽदिसमुच्चये । *तथेति । उत्थापितक्रियाऽऽकाङ्क्षायामित्यर्थः । स्वमतेऽत्रापि न दोष इत्याह *हिरुगिति । पञ्चमीयम् । वर्जनादेरितिशेषः । *नेति । तदर्थे इति शेषः ।

एतेन 'नच साध्यत्वेनाभिधाने मानाभावः, पचति पाकः करोति कृतिरित्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वाद्' इत्यपि तदुक्तमपास्तम् ।

"ज्योतिष्टोमेन यजेत" इत्यादौ यथाऽत्र पक्षे न दोषस्तथाऽग्रे स्फुटीभविष्यति तदाह *दिगिति ॥ ७ ॥

तत्र फलानुकूलः फूत्कारादिर्व्यापारः समूहघटकः फूत्कारत्वाधःसंतापनत्वादितत्तद्रूपेणैव वाच्यः । प्रागुक्तहरिकारिकाभ्यां तत्तद्रूपेणैव बोधलाभात् । अत एव 'देवदत्तः पचति' इत्युक्ते 'स फूत्कारादिमान्न वा' इति सन्देहो न । नानार्थत्वमिष्टमेव ।

तत्र यदा यो वक्तृबुद्धिस्थस्तदा स वाच्यः । अत एव 'काष्ठानि पचन्ति' इति सिद्धम् । तद्व्यापारस्य धात्वर्थत्वाविवक्षायां 'काष्ठैः पचति' इति । शक्ततावच्छेदकं तु पचित्वादिकम् । धातुत्वं तु न, अतिप्रसक्तत्वात् । धातुत्वाद्यजानतोऽपि बोधाच्च ।

एतेन धातुत्वेन धातुमात्रस्य क्रियात्ववति शक्तिः,

तत्तद्रूपेण च तत्तद्रूपावच्छिन्नबोधकत्वमित्यपास्तम् । गौरवात् । तादृशशक्तिग्रहस्यादृष्टमात्रार्थत्वाच्च ।

फूत्कारे एव गृहीतशक्तिकस्य व्यजनेन वह्निप्रज्वालनदशायां पचतीति नेष्टमेव । फूत्कारातिरिक्ते विक्लित्त्यनुकूलत्वाग्रहे तवापि तन्नेष्टमेव ।

याग इच्छा ज्ञानं वेति वादिविप्रतिपत्तिरपि तत्तत्पुरुषीयतादृशबोधानुसारादेवोपपन्ना ।

धातूनामनेकार्थत्वात्कदाचित्क्रियात्वेन बोधो ऽपि।

फूत्कारस्यातीतत्वमात्रेणापाक्षीदिति तु न, भूतत्वादेः समुदाये एवान्वयात् ॥ ८ ॥

(कुं० टी०) ननु तत्तद्रूपेण वाच्यत्वे नानार्थत्वापत्तिरत आह *इष्टमेवेति । *अतिप्रसङ्गात्–फूत्काराद्यवाचके ऽपि सत्त्वात् । *तत्तद्रूपेणचेति । पच्यादिविशेषशक्त्या च फूत्कारत्वादिना तत्तद्बोध इत्यर्थः। *गौरवादिति । यद्विशेषयोरिति न्यायस्तु निर्बीज इति भावः । *तादृशशक्तिग्रहस्य–धातुत्वादिना शक्तिग्रहस्य । ननु फूत्कारत्वादिरूपेण वाच्यत्वे व्यजनेन प्रज्वालनदशायां पचतीति प्रयोगानापत्तिरत आह *नेष्टमिति । इदं च तवापि तुल्यमित्याह *फूत्कारेति । *यागइति । देवतोद्देश्यकस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छा यागः, इच्छाविशेषो ज्ञानविशेषो वेति मतभेदो ऽपि स्वस्वव्युत्पत्त्यनुसारादेवेत्यर्थः । ननु तत्तद्रूपेण वाच्यत्वे विक्लित्त्यनुकूलफूत्कारादिरित्येव बोधः स्यादतआह *धातूनामिति । *फूत्कारस्येति । तावन्मात्रस्यापि क्रियात्वे तदापत्तिरिति भावः ॥ ८ ॥

(क० टी०) *तत्र–तयोर्मध्ये । *कारिकाभ्याम्–सर्वानुभवसिद्धार्थप्रदर्शिकाभ्याम् । एवेन सामान्यरूपव्यवच्छेदः । तमेवाह *अ-

तएवेति । अन्यथा सामान्येन बोधेऽपि विशेषरूपेणाबोधेनैकतरकोटिनिश्चयाभावेन सन्देहापत्तिरिति भावः । *इष्टमेवेति ।

एतेन तदादिन्यायेन बुद्धिस्थत्वादेः शक्यतावच्छेदकानामनुगमकस्य सत्वात्तत्त्वं नेति तदुक्तमपास्तम् ।

*तत्र । तेषां व्यापाराणां मध्ये । *यः—व्यापारः । अनेनाव्यवस्था निराकृता । *अतएव—तदैव तदाश्रयस्य कर्तृत्वादेव ।

एतेन काष्ठक्रियाया वाच्यत्वे तृतीया न स्याद्, अवाच्यत्वे प्रथमा न स्यान्नियमतस्तृतीया स्यादित्यपास्तम् ।

धातुत्वतो विशेषे ऽपि ततः सामान्यत्वाद् उक्तवैलक्षण्ये तुः । *धातुत्वादीति । आदिना परस्मैपदित्वादि ।

एतेन कृत्यन्यव्यापारे पचित्वं शक्ततावच्छेदकं कृतेस्तु सर्वधातुष्वनुस्यूततया प्रतीयमानत्वेन तत्र सर्वसाधारणधातुत्वमेव शक्तताऽवच्छेदकमित्यप्यपास्तम् ।

उभयथा दीक्षिताद्युक्तिं खण्डयति *एतेनेति । मात्रं कात्स्न्र्ये । नानार्थत्वाभावायेदमुक्तं तैः । क्रियात्वं धातुवाच्यत्वसमानाधिकरणो जातिविशेषः । स च क्रियापदशक्यतावच्छेदकत्वादिना सिद्धः । जलपदशक्यतावच्छेदकतया जलत्वजातिसिद्धेर्लीलावत्युपाये दर्शनात् । प्रत्यभिज्ञाऽनुगतव्यवहाराभ्यां जातिसिद्धेस्तद्वाच्यतायाश्च सरूपसूत्रे भाष्ये उक्तत्वाच्च । तद्घटकधातुत्वं च जातिविशेषः । तत्परिचायकं च भूवादिसूत्रमिति तात्पर्यम् । सर्वधातुभ्यः सर्वक्रियाबोधापत्तिवारणायाह *तत्तद्रूपेणचेति । तथाच पचतीत्यादिसमभिव्याहारस्य तत्तद्बोधनियामकत्वमिति तात्पर्यम । एतेनेत्यस्यार्थमाह *गौरवादिति । उभयकल्पनात इत्यर्थः । दोषान्तरमाह *तादृशेति । सामान्यरूपेत्यर्थः । *अदृष्टमात्रार्थत्वाच्चेति । तत्त्वापत्तेश्चेत्यर्थः । समभिव्याहारस्य बोधनियामकताया विषयासम्बद्धे बोधकत्वानुपपत्त्या दुर्वचत्वेन तथासम्बन्धकल्पनायास्तवाप्यावश्यकत्वादिति भावः ।

किञ्च तेन रूपेण बोधानुभवात् । किञ्च तत्तद्रूपेण बोधस्यैवानुभवाच्च ।

एतेन सकलसाधारणानुगतैकधर्मान्तरस्य वक्तुमशक्यत्वे ऽपि विक्लित्याद्यनुकूलत्वमेव तथेत्यप्यपास्तम् । अतिप्रसक्तस्य

शक्यतानवच्छेदकत्वाच्च । प्रामाणिकत्वाच्च नानाशक्तिकल्पना न दोषाय । अन्यथा सैन्धवादिपदशक्यतावच्छेदकतयाऽश्वलवणादिवृत्त्येकधर्मकल्पनाऽऽपत्त्या तत्रापि तत्त्वोच्छेदापत्तिः । अश्वत्वादिनैव तत्प्रतीतिरनुभवसिद्धेति चेत् । प्रकृते ऽपि समम् । अत एव विभुपदशक्यतावच्छेदकतया न विभुत्वजातिसिद्धिः । परममहत्परिमाणत्वेनैव सर्वमूर्त्तसंयोगित्वेनैव वा ततो बोधादिति दिक् ।

ननु तत्तद्रूपेण शक्तौ फूत्कारं विना ऽपि चैत्रनिष्ठक्रियान्तरेण सिद्धज्वालया जायमाने ओदने 'चैत्रः पचति' इति प्रयोगो न स्यादत आह *फूत्कारेप्वत्रेति। एवेन तत्रापि तत्त्वे तु तस्येष्टत्वं सूचितम्। इदं तवाप्यावश्यकमित्याह *फूत्कारेति । नन्वेवमपि तथा सति याग इच्छा ज्ञानं वेति वादिविप्रतिपत्तिर्न स्यादन्यतरकोटिनिश्चयसत्त्वादतआह *यागइति । *तत्तत्पुरुषीयेति । स्वीयेति पाठान्तरम् । नह्ययं संशयो येनैकस्य कोटिद्वयज्ञानापेक्षेति भावः । इदं दोषद्वयं मीमांसकनव्योक्तं बोध्यम् । नन्वेवमपि तथा सति सामान्यरूपेण बोधः कादाचित्को न स्यादत आह *धातूनामिति । एतेन लक्षणया स इत्यपास्तम् । नन्वेवमपि फूत्कारस्यातीतत्वमात्रेण व्यापारान्तरवर्त्तमानतादशायामपाक्षीदिति स्यादतआह *फूत्कारेति । *भूतत्वादेरिति । इदमग्रे स्फुटीभविष्यति ॥ ८ ॥

अस्तिभवतिविद्यतीनामर्थः सत्ता । अनेककालस्थायिनीति कालगतपौर्वापर्येण क्रमवतीति तस्याः क्रियात्वम् ।

तदुक्तं हरिणा—

आत्मभूतः क्रमो ऽप्यस्या यत्रेदं कालदर्शनम् ।
पौर्वापर्यादिरूपेण प्रविभक्तमिव स्थितम् ॥ इति ।

'अस्याः क्रियायाः । यत्र क्रियायाम् । कालदर्शनं कालगतपौर्वापर्यस्य तत्रारोप' इति हेलाराजः ।

यद्वा सत्ताविषयव्यापारार्थकत्वेन क्रियावाचकत्वानिबन्धनधातुत्वसिद्धिः ।

सत्ता च आषष्ठाद् भावविकारादनुस्यूतं यद् रूपं 'सद्' इतिप्रत्ययवेद्यं तत् । तद्विषयव्यापारश्चात्मभरणस्वरूपधारणपदाभ्यामुच्यते । आत्मस्वरूपं च सत्तैव । सा चात्र स्थूलरूपात्मिका । म्रियतौ तस्यागानुकूलव्यापारस्येवात्र तद्वैपरीत्येन तद्धारणानुकूलव्यापारस्य प्रतीतेः । स्पष्टं चेदं भूवादिसूत्रे भाष्ये ।

तदुक्तं निरुक्ते–

"षड् भावविकारा भवन्तीति वार्ष्यायणिः–जायते, ऽस्ति, विपरिणमते, वर्धते, ऽपक्षीयते, विनश्यतीति । जायतेइति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधाति, अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्'' इति ।

भावस्य निरुपपदभावशब्दवाच्यस्य जगत्कारणस्य सत्तारूपब्रह्मणो निष्क्रियस्यापि षडेते विकारा इव विकाराः मायासहकारेण क्रियारूपा विवर्त्ताः । अन्यत्र प्रधानादिषु 'प्रधानभाव' इत्यादिरीत्या सोपपदभावशब्दप्रयोगः ।

दृश्यते च महाभारते याज्ञवल्क्यम्प्रति रविवाक्ये प्रयोगः—

कृत्स्नं शतपथं चैवं त्वं प्रणेष्यसि वै द्विज ।
तस्यान्ते च पुनर्भावे बुद्धिस्तव भविष्यति ॥ इति ।

'जायते इति च षड्भावेषु पूर्वस्य जनेः, आदिमित्युपलक्षणम्, उपक्रमप्रभृत्यपवर्गपर्यन्तं जात इति व्यवहारं यावत्, भावमाचष्टे तदाऽपरं भावमस्त्याख्यमसतो

जन्मायोगाद्विद्यमानमपि नाचष्टे । शब्दशक्तिस्वभावात् । नापि प्रतिषेधति । निरालम्बनं जायते इत्यनापत्तेः । अस्तीति चोत्पन्नस्य सत्त्वस्य सत्तावतः तादृशस्थूलरूपस्यावधारणं धारणमाचष्टे' इति तद्भाष्यकृतः ॥ ९ ॥

(कुं० टी०) ननु सर्वशक्त्यात्मभूतस्य ब्रह्मण एवानेकविकारप्रदर्शनफला अविद्याशक्तिः, अव्यतिरिक्ताभिः स्वशक्तिभिर्जन्मादिरूपतया तदेवाविद्यायामवभासते, तच्च ब्रह्म सर्वभावेषु समानरूपं सत्ताऽऽत्मकं सर्वदैव भासते न क्रमेणेति कथं तर्हि क्रमो नाम कश्चित् क्रियाविशेषोऽस्तीत्याशङ्क्याह *आत्मभूत इति ।

अस्यार्थः—योऽयं क्रियमाणः क्रमः सो ऽप्यस्याः सत्तायाः आत्मभूतः, क्रमवद्भ्यो व्यतिरिक्तस्य क्रमस्यासंवेदनात् । यत्र क्रमे इदं कालदर्शनम् । कालो नात्र पदार्थान्तरं पश्यन्ति । अविभक्तो ऽपि कालः क्रियोपाधिवशात्पौर्वापर्येण प्रविभक्त इव । ब्रह्मण एव हि क्रियाऽऽख्या कालशक्तिः जायमानपदार्थेषु जन्मादिक्रियाद्वारा पौर्वापर्येणावभासिका नापरो द्रव्यभूतः कालोस्तीति ।

तदेवं विवर्त्तवादमालम्ब्य क्रियात्वमुपपाद्य लौकिकमपि क्रियात्वमुपपादयति *यद्वेति । *सत्ताविषयेति । सत्तानुकूलो यो व्यापारस्तद्वाचकत्वादित्यर्थः । अस्ति आत्मानं विभर्त्तीत्यर्थादात्मभरणानुकूलव्यापारस्तत्रापि प्रतीयत इति भावः । *आषष्ठादिति । षष्ठो विकारो विनाशस्तत्पूर्वपर्यन्तमनुवर्त्तमानं यद्रूपं सा सत्तेत्यर्थः । *आत्मस्वरूपंचेति । आत्मभरण-

मित्यत्रात्मशब्देन सत्तैवोच्यते, स्वरूपधारणमित्यत्र च स्वरूपशब्देन सत्तैवोच्यते इत्यर्थः । *साचेति । स्थूलं यत्स्वरूपं तदेवात्र सत्तेत्यर्थः । समग्रः क्रियाकलापः सत्ताविवर्त्त एवेति निरुक्तकारमतमाह *तदुक्तमिति । भावस्य विकाराः षडिति वार्ष्यायणिराचार्यो मन्यते । तानाह *जायतइति ।

अयं भावः—यद्यपि द्वितीयादयो ऽपि विकाराः तृतीयाद्यपेक्षया पूर्वास्तथापि पूर्वभावस्यादिं प्रथमं पूर्वभावं जनिशब्दवाच्यं विकारं 'जायते' इत्येवंशब्द आहेति जनिशब्दवाच्यो विकारः पूर्वः तदुत्तरकाले ऽस्तिशब्दवाच्यः । तत्र च जनिशब्दवाच्ये भावविकारे अस्तेरप्यर्थो ऽस्ति विद्यमानता । नह्यविद्यमाने 'जायते' इत्येष शब्दो जन्मैव केवलं ब्रवीति । तस्यामवस्थायामस्तिशब्दवाच्यस्य विकारस्यासंपूर्णत्वात् । तस्माद्विद्यमानमप्यास्तित्वं नाचष्टे ।

नन्वेवमर्थात् प्रतिषेधः सिद्ध इत्यत आह *नप्रतिषेधतीति । आस्तित्ववानेव हि असौ जायते तत्प्रतिषेधे अनात्मक एव स्यात् । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणमाचष्टे न विपरिणाममाचष्टे अपूर्णत्वात् । पूर्वकाले परिपूर्णत्वे सत्येव हि उत्तरकाले ऽवस्थान्तरं भवति । *सत्त्वस्य-सत्तावतः । *अवधारणम्—स्थूलरूपधारणम् । भावस्य कार्यस्य विकाराः षडित्यपव्याख्यानमित्याह *भावस्येति । अत एवोक्तं हरिणा—

सैव भावविकारेषु षडवस्थाः प्रपद्यते । इति ।

शारीरकभाष्यकृता तु जन्मास्थितिलयास्त्रय एव विकारा

१ अत्र 'सत्तावत' इति विवरणान्मूले तत्पाठो नास्तीति भाति ।

उक्तास्तन्मते परिणामवृद्ध्योः उत्पत्तावन्तर्भावः, अपचयस्य नाशे इति । *निरुपपदस्येति । केवलभावशब्दस्येत्यर्थः ।

अयं भावः—

सन्मात्रस्वभावा सत्ता । तच्च सन्मात्ररूपं प्रथमतो ऽस्तिशब्देन नाभिधीयते किन्तु जन्मोत्तरकालभावी अवस्थाविशेषः । तदानीमेव लोके 'अस्ति' इतिव्यवहारात् । तदनन्तरं चास्तीत्यवस्थितस्य विकारापत्तिरिति ।

*विपरिणमते—विपरिणममानं मुहूर्त्तमपि नावतिष्ठते इति । यावद् अनेन वर्धितव्यं तावद्वर्धते ततो ऽपक्षीयते मुहूर्त्तमप्यनवस्थानादेव । एवं च तस्यैव विचित्रप्राप्तयः । येन चित्ररूपेण भासते इति। *भावेति । ब्रह्मात्मकसत्तापर्यायत्वाद् भावो ब्रह्मैवेत्यर्थः । क्रियाद्रव्ययोः सत्तात्मकत्वप्रतिपादनेन तद्व्यतिरिक्तवस्त्वभावात्सर्वं सत्ताऽऽत्मकब्रह्ममयमिति भावः । ननु परिणामवाचिविकारशब्दे अनित्यत्वापत्तिरत आह *विकारा इवेति । *मायासहकारेणेति ।

अयं भावः—नायं विकारशब्दः परिणामवाची अनित्यत्वप्रसङ्गात् किन्तु विवर्त्तपर्यायः । तथाहि सर्वशक्त्यात्मभूतस्य ब्रह्मणो ऽनेकविकारप्रदर्शनफला अविद्याऽऽख्या शक्तिः । तच्छक्तिरेव च जन्मादिरूपतया अविद्यायां भासते । तदेव सद् ब्रह्म सर्वभावेषु समानरूपसत्तात्मकं तद्व्यतिरिक्तस्याभावात् ।

*अन्यथेति । प्रधानभाव इत्याद्याकारको भावशब्दप्रयोगः प्रधानादिषु इत्यन्वयः । *निरालम्बनमिति । एतच्च हेतुगर्भं विशेषणम् । निरालम्बनत्वाज्जायत इति व्यवहारो न स्यादित्यर्थः । यो हि जायत इति व्यव-

ह्रियते स विद्यमान एव विषयो भवति । *अपवर्गः—समाप्तिः । 'जात'इतिव्यवहारपर्यन्तं परं भावं नाचष्टे इत्यन्वयः । *तदेति । असतो जन्मायोगाद्विद्यमानमपि अस्त्याख्यं भावं नाचष्टे इत्यन्वयः । पूर्वस्येत्यस्य विवरणं *जनेरिति । न ह्यविद्यमानं जायते ॥ ९ ॥

(क० टी०) नन्वेवमस्त्यादीनां धातुत्वानापत्तिस्तेषां सत्तामात्रार्थत्वेन व्यापाररूपक्रियावाचकत्वाभावादत आह *अस्तीति । *आत्मेति। क्रियास्वरूपभूत इत्यर्थः । यत्रेदं कालदर्शनमस्या आत्मभूतः क्रमो ऽप्यस्तीत्यन्वयः।तदेवाह *पौर्वेति । आदिना समूहत्वम्। अत्र प्रागुक्तिविरोधादाह *यद्वेति । *आषष्ठादित्याङ् मर्यादायाम् । जननानन्तरमिति बोध्यम् । यद्यप्युत्पत्तिविनाशयोरपि सूक्ष्मरूपेण वस्तुनो भावस्तथापि तद्वारणायाह *सदिति । विशिष्टस्वरूपमाह *तद्विषयेति । स्वस्वरूपेति पाठः । तदेव स्पष्टयति *आत्मेति । सदित्युक्तेः फलमाह *सावेति । आषष्ठादित्युक्तेः फलमाह *म्रियतावेति । *अत्र—चतुर्षु । *स्पष्टं चेदमिति । द्वितीयमतमित्यर्थः । तत्राहि—"कारकाणां प्रवृत्तिविशेषः क्रिया" इति सिद्धान्ते भोजनक्रियाणां मिथो वैलक्षण्याद्यर्थं प्रवृत्तिविशेषरूपत्वं नैवमस्त्यादीनामिति तेषां धातुत्वासिद्धिरिति शङ्कानिरासायोक्तम्, "यद्येवं सिद्धाऽस्त्यादीनां धातुसंज्ञा । अन्यथा हि कारकाण्यस्तौ प्रवर्त्तन्ते अन्यथा हि म्रियतौ"इति । कारककर्त्तृकास्तौ वाच्यत्वेन स्थिता प्रवृत्तिरन्यथेत्यादिरक्षरार्थः। तदुक्तं *म्रियतावेति। तत्र तद्धारणं स्थूलस्वरूपधारणम् । एवं च म्रियत्यपेक्षया प्रवृत्तिविशेषरूपताऽस्त्येवास्त्यर्थस्येति तत्सिद्धिरिति तात्पर्यम् । "षड् भावविकारा इति ह स्माह वार्ष्यायणिर्जायते, ऽस्ति, विपरिणमते, वर्द्धते ऽपक्षीयते, विनश्यतीति" तदग्रिमभाष्यं तु अस्त्यादीनां क्रियावाचकत्वे युक्त्यन्तरबोधनपरमिति ध्वनयन्नाह *तदुक्तमिति । *वार्ष्यायणिः । आहेति शेषः । तद्भाष्यग्रन्थमाह *भावस्येत्यादि । *एते-क्रियाप्रकाराः । निरुपपदेत्यस्य फलमाह *अन्यत्रेति । अस्यैव व्याख्या *प्रधानादिष्विति । आदिना ईश्वरभाव इत्यादि । अतो

न ते केवलभावशब्दवाच्या इत्यर्थः । *भारते—मोक्षधर्मेषु । *कृत्स्नमिति ।

प्रतिष्ठास्यति ते वेदः सोत्तरः सखिलो द्विज ।—

इत्यादिः । *भविष्यतीति ।

प्राप्स्यते व्यपदिष्टं तत्सांख्ययोगेप्सितं पदम् ।—

इत्यन्तः । पूर्वत्वस्य सापेक्षत्वादाह *षडिति । *जनेः-उत्पत्तिरूपभावस्य । *आदिः—प्रारम्भः । तथा सति न्यूनतां निराचष्टे *आदिमित्युपेति । *अपवर्गस्तत्समाप्तिः । तदाह *जात इतीति । अव्यवहितत्वादाह *अस्त्याख्यमिति । ननु तदा तस्यासत्त्वादेव नाख्यानमत आह *असतइति । अन्यथा शशशृङ्गादेरप्युत्पत्त्यापत्तेरिति भावः । नन्वेवं तेन तन्निषेध एवोच्यतामत आह *नापीति । सत्त्वस्येत्यस्य व्याख्या *सत्तावत इति । सूक्ष्मरूपतया तस्याः पूर्वमपि सत्त्वादाह *तादृशेति । उत्पन्नेत्यर्थः । नात्रावधारणं निश्चय इत्याह *धारणमिति । एवं च ब्रह्मसत्तैवानेकक्रियाविवर्त्तात्मिका कारकैः संबन्धादवसीयमानसाध्यस्वरूपा जन्मादिरूपतया भासते इति तस्यापि तत्त्वमिति भावः ॥ ९ ॥

भावनाफलयोरेकनिष्ठत्वाच्च गच्छतीत्यादाविव न स्पष्टप्रतीतिः । आसन्नविनाशं कं चिदुद्दिश्य 'किं करोति' इति प्रश्ने 'अस्ति'इत्युत्तराच्च तस्य व्यापारवाचित्वम् । अन्यत्र तु सुस्थतया निश्चिते 'किङ्करोति' इति प्रश्नः पाकादिगोचर एवेति निर्णयाद् 'अस्ति' इति नोत्तरम् ।

किञ्च व्यत्यनुषते इत्यत्र "कर्त्तरि कर्मव्यतिहारे" इत्यात्मनेपददर्शनात्तस्य क्रियावाचकत्वम् । "कर्मव्यतिहारश्च तत्र क्रियाव्यतिहार" इति "उपसर्गप्रादुर्भ्याम्" इति सूत्रे भाष्ये स्पष्टम् ।

"घटो भवति" इत्यादावुत्पत्त्यनुकूलो व्यापारो-

ऽर्थः । स व्यापारश्च साध्यत्वेनाभिधीयमानाऽऽश्रयतैव । पातञ्जलनये सर्वपदार्थानामवस्थादिरूपेण प्रतिक्षणपरिणामितया तत्तत्परिणामविशिष्टोत्पत्तिनिरूपितानामाश्रयतानामनेकतया पूर्वापरीभूतावयवकत्वाक्षतेः, सत्तायामिव कालगतपौर्वापर्यारोपेण वा।

यद्वा सत्कार्यवादे कारणात्मना सदेव यावत् स्थूलं रूपं न प्रतिपद्यते तावत् 'जायते' इत्युच्यते । तत्प्रतिपत्तौ तु 'अस्ति' इति । तत्र तत्प्रापकव्यापाररूपारोपात्तस्याः क्रियात्वम् ।

अस्तीत्यस्य च सत्तां भावयतीत्यर्थ इति बोध्यम् । 'ज्ञानं ब्रह्म'इत्यादौ जानातेर्भावे ल्युट् ।

नच तस्याखण्डत्वेन नित्यत्वेन च पूर्वापरीभूतावयवकत्वेनाभानात् कथं तत्प्रकृतेर्जानातेर्धातुत्वमिति वाच्यम् ।

वृत्त्यभिव्यक्ते वृत्तिधर्मारोपेण तत्प्रतीत्या ऽत्रापि तदारोपेण तस्योपपत्तेः। ब्रह्मणो निर्विकारत्वनिर्धर्मकत्वादिश्रुतिभिश्च तस्यारोपितत्वमेवोचितम् । शुद्धचित्तस्य तु अन्यत्रेवात्रापि निषेधवाक्यसहकारेणाखण्डार्थबोधः । निषेधवाक्यैरेव वा सः । एवमेव ब्रह्मेत्यादौ नपुंसकत्वाद्युपपात्तिरित्यन्यत्र विस्तरः ॥ १० ॥

(कुं० टी०) नन्वस्तीत्यादावपि भावना स्पष्टं कुतो न प्रतीयते आह *एकनिष्ठत्वाचेति । *आसन्नविनाशम्–मुमूर्षुम् । *व्यत्ययनुषतइति । "श्नसोः" इत्यल्लोपे उपसर्गप्रादुर्भ्यामिति

षः । कर्मव्यतिहारस्य प्रायो बहुविषयत्वाद् बहुवचनोक्तिः । *तत्तत्परिणामेति । परिणामभेदेनाश्रयतानामपि नानात्वमित्यर्थः । *तत्प्रापकेति । आश्रयताप्रापका ये व्यापारास्तदारोपादाश्रयतानां पौर्वापर्यसत्त्वाद्व्यापारत्वमित्यर्थः । *तस्येति । ब्रह्मात्मकज्ञानस्याजन्यत्वादिति भावः । *वृत्तिधर्मेति । वृत्तिनिष्ठजन्यतया ज्ञानस्य जन्यत्ववत् वृत्तिगतपौर्वापर्यारोप इत्यर्थः । *निषेधवाक्येति । "एकमेवाद्वयं ब्रह्म नेह नानास्ति" इत्यादीत्यर्थः । *निषेधवाक्यैरेवेति । अथवा निषेधवाक्यैरेव । *सः–अखण्डार्थबोधः । *नपुंसकत्वेति । गुणानां साम्यावस्था क्लीबत्वम्, ब्रह्मणि च प्राकृतानां गुणानामभावे ऽपि वस्तुमात्रस्य ब्रह्मरूपतयाऽऽरोपेणैव साम्यमिति भावः ॥ १० ॥

(क० टी०) नन्वेवं घटं करोतीत्यादाविव घटोऽस्तीत्यादावपि स्पष्टं कुतो न बुध्यत इति, अत आह *भावनेति । क्रमो जन्यजनकयोरिति तत्क्रमेण पूर्वनिपातः । तथाचास्यास्तत्सामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः । एवं तदर्थस्य क्रियात्वे भाष्याद्युक्तप्रकारेण साधिते सामान्यविशेषतया प्रश्नोत्तरभावेन सामानाधिकरण्यं पचाद्यर्थस्य क्रियात्वसाधकं भाष्याद्युक्तमन्यत्राव्यापकमस्तीत्याह *आसन्नेति । *प्रश्ने–कृते इति शेषः । *उत्तराच्च–उत्तरस्य सर्वसंमतत्वाच्च । एतेनैवं सति किं करोतीति प्रश्ने पचतीत्युत्तरवदस्तीत्युत्तरमपि स्यादित्यपास्तम् । नन्वेवमन्यत्रापि तथा कुतो न, अत आह *अन्यत्रेति । आसन्नविनाशभिन्न इत्यर्थः । वस्तुतस्तद्भिन्ने ऽपि तत्त्वेनाज्ञाते ऽपि तस्येष्टत्वादाह *सुस्थतयेति । इदमपि तत्रैव भाष्ये स्पष्टम् । लौकिकवच्छास्त्रीयमपि अव्यापकं तस्य तत्त्वसाधकमस्तीत्याह *क्रिश्चव्यतीति । षत्वस्य सामर्थ्यादपि सिद्धिरित्याशयेनाह *कर्त्तरीति । तत्र बीजमाह *कर्मेति । चो यत इत्यर्थे । लक्ष्यानुरोधादकृत्रिमस्यैव तस्य तत्र ग्रहणमिति भावः । एवं

लडादिव्यवस्थाऽपि तस्यापि तत्त्वसाधिका भाष्ये ऽप्येवमित्यादिनोक्ता बोध्या । अन्योऽपि तस्यार्थ इत्याह *घटइति । अत्र तु प्रवृत्तिविशेषरूपक्रियात्वं स्पष्टमेव । अत्र मानम्—

रोहितो लोहितादासीद् धुन्धुस्तस्य सुतो भवद् ।

इत्यादि । ननु ततस्तत्त्वेनाभिधाने ऽपि धर्मरूपत्वेनैकत्वात्पूर्वापरभावाभावेन कथं तत्त्वमत आह *पातञ्जलेति । *तत्रेति । स्थूलरूपप्रतिपत्तिरूपसत्तायां तत्प्रतिपत्तिप्रापकचैत्रनिष्ठव्यापारेत्यर्थः । *तस्याः—तत्सत्तायाः । भेदस्यासिद्धान्तत्वादाह *भाव इति । सिद्धावस्थापन्नधात्वर्थ इत्यर्थः । ताश्च—

निष्क्रियं निष्कलं शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परं सेतुः साक्षी चेता केवलो निर्गुणश्च ॥

इत्यादयः ।

कारणं परमेशानो यः शुद्धो ऽप्युपचारतः ।

इत्यादिस्मृतिरप्यनुसन्धेया । *तस्य—भावत्वस्य । प्रागुक्तरीत्या आह *शुद्धेति । *अन्यत्रेव—"तत्त्वमसि" इत्यादाविव । *निषेधेति । "नेह नानाऽस्ति" इत्यादीत्यर्थः । प्रागुक्तमेव द्वितीयमतमाह *निषेधेति । *एवमेव—आरोपेणैव । आदिना सङ्ख्या ॥ १० ॥

सकर्मकत्वं च व्यापारव्यधिकरणफलवाचकत्वम्, तत्समानाधिकरणफलवाचकत्वं चाकर्मकत्वम् ।

यद्वा व्यापारव्यधिकरणफलवाचकत्वाभावो ऽकर्मकत्वम् ।

स च क्वचित्सामानाधिकरण्यात् । यथा—उत्तिष्ठतीत्यादौ । अन्यथोर्ध्वदेशसंयोगस्य विद्यमानत्वे उत्थित इति प्रयोगानापत्तेः । मम तु तत्समानाधिकरणस्य तदनुकूलव्यापारस्यातीतत्वात् तस्य विद्यमानत्वे ऽपि तदुपपत्तिः । अत एव "परिपन्थं च तिष्ठति" इत्यादौ 'क्रियाविशेषणत्वात् कर्मत्वेन

द्वितीयान्तत्वम्' इति सङ्गच्छते ।

क्वचित्फलांशाभावात्तत्त्वम् ।

एवं चास्त्यादौ केवलसत्ताद्येवार्थः । निरुक्ते उत्पन्नस्य सत्त्वस्य द्रव्यस्य स्वरूपधारणारूपां सत्तामाचष्टे इत्यर्थः । तस्या अपि क्रियात्वमुपपादितमेव ।

यद्धातूच्चारणे कर्माकाङ्क्षा नियता स सकर्मक इति तु न युक्तम् । गच्छेत्यादिषु तदाकाङ्क्षाऽभावात् । क्वेत्येव हि तत्राकाङ्क्षा ।

अकर्मकभिन्नत्वं सकर्मकत्वमित्यपि न । सकर्मकाणामर्थान्तरे ऽकर्मकत्वेनासम्भवापत्तेः ।

एतेन सकर्मकधात्वन्यतमत्वं सकर्मकत्वमित्यपास्तम् ॥ ११ ॥

(कुं० टी०) *सामानाधिकरण्यादिति । फलव्यापारयोरिति शेषः । अकर्मकाणां व्यापारमात्रवाचित्वं तार्किका वदन्ति, तान्निराकरोति *अन्यथेति । संयोगमात्रस्य उत्तिष्ठत्यर्थत्वे इत्यर्थः । *अतएव–फलस्य धात्वर्थत्वादेवेत्यर्थः । तथाच व्यापारं · ति फलस्य कर्मत्वात्तद्विशेषणादपि द्वितीयेति भावः । निरुक्तविरोधं परिहरति *निरुक्तेइति । *तस्या अपि–सत्तायाः अपि । *उपपादितमेवेति । कालगतपौर्वापर्यारोपादित्यादिना । व्यापारमात्रं धात्वर्थ इति नव्यतार्किकलक्षणं दूषयति *इतितु न युक्तमिति । *अन्यतमत्वमिति । सकर्मकान्धातूनुपादाय एतदन्यतमत्वमित्यर्थः ॥ ११ ॥

(क०टी०) प्राचामनुरोधेन सिद्धान्ते ऽसत् तावदाह *सकर्मकत्वं

चेति । केवलफलस्य व्यापारस्य वा वाच्यत्वे क्वचिदकर्मकलक्षणाव्याप्तेराह *यद्वेति । एवं चाद्ये एव तात्पर्यं द्वितीयं त्वर्थलब्धमिति भावः । *यथेति । तत्र समानाधिकरणम् उभयं वाच्यमिति तत्र तद्यधिकरणत्वाभावप्रयुक्तस्तदभाव इत्यर्थः । *अन्यथा-व्यापारस्य तत्रावाच्यत्वे फलस्यैव वाच्यत्वे । ऊर्ध्वदेशसंयोगरूपोत्थानस्यैव तत्र धात्वर्थतया तत्रैव भूतत्वेन क्तो वाच्य इति तस्य विद्यमानत्वे तत्त्वाभावात् "गत्यर्थाकर्मक-" इति भूते कर्त्तरि क्तो न स्यात्तदाह *उत्थित इति । *मम तु-तत्रोभयवाचकत्वाङ्गीकर्त्तुः । *तस्य-ऊर्ध्वदेशसंयोगस्य । नन्वेवं व्यापारस्यैव तत्र वाच्यत्वमस्तु न तस्यात आह *अतएवेति। तस्यापि वाच्यत्वादेवेत्यर्थः । एवेन केवलव्यापारवाचकत्वमकर्मकत्वं फलव्यापारोभयवाचकत्वमेव सकर्मकत्वमित्यपास्तम् । लक्षणान्तरकरणफलं प्रतिपादयन्नाह *क्वचिदिति । तदभावप्रयुक्त एव तदभाव इत्यर्थः । अस्य लक्ष्यमाह *एवंचेति । केवलेत्यनेन तस्या व्यापारत्वमेव न फलत्वम्, प्रागुक्तफलत्वस्य तत्र दुर्वचत्वादिति सूचितम् । एवेन प्रागुक्तयद्वेतिमतनिरासः । भाष्यादेस्त्वत्रापि सुयोजत्वेन तदविरोधान्निरुक्तविरोधं परिहरति *निरुक्तइति । सत्तावत इति तद्भाष्योक्तो नार्थ इत्याह *द्रव्यस्येति । एतच्छास्त्रपरिभाषालब्धस्येत्यर्थः । *स्वरूपेति । एतेन भाष्यकैयटार्थो ऽपि सूचितः । *तस्या अपि-सत्ताया अपि । तस्यापीति पाठे सत्तादेरपीत्यर्थः । *उपपादितमिति । यद्वा सत्कार्येत्यादिनेत्यर्थः । अतएव सत्तायामिवेत्यादिनाऽपुनरुक्तिः प्राक् । एवं च फलावच्छिन्नव्यापारो धात्वर्थ इति प्रागुक्तं प्रायिकमिति बोध्यम् ।

साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक् ।
सकर्मकः स धातुः स्यात्पारंपर्ये त्वकर्मकः ॥ इति ।—

भावार्थाधिकरणस्थभट्टोक्तिफलितं जीवत्यादिवारकं मीमांसकमतं खण्डयति *यद्वात्विति । तदर्थस्येति शेषः । तदन्यत्वमकर्मकत्वमिति त्वर्थालब्धम् । सा च समार्थकेष्वपि धातुविशेषोपनिबन्धना यत्रास्ति स सकर्मकः । एवं च कृञो यतेरिव यत्नमात्रार्थकत्वेऽपि न दोषः । कर्मत्वा-

द्विपदोपस्थाप्यस्य क्रियाकाङ्क्षत्वाभावेऽपि द्वितीयोपस्थाप्यस्य तत्साकाङ्क्षत्ववत् कृञुपस्थाप्यस्य यत्नस्य कर्माकाङ्क्षोपपत्तेरिति तद्भावः । अविवक्षितकर्मातिव्याप्तिनिरासाय वक्ष्यमाणविशेषणमप्यत्र बोध्यम् । एवमेकस्यैवार्थभेदेन सकर्मकत्वमकर्मकत्वं चोपपन्नम् । यदर्थेऽविवक्षाभावविशिष्टकर्माकाङ्क्षा यस्य स तत्रार्थे सकर्मक इत्यनुगतस्यैव लक्षणत्वादिति तद्भावः । पचतीत्यादौ सत्त्वेऽपि अन्यत्र नेत्याह *गच्छत्यादीति । सर्वधातूनां यत्किञ्चित् फलादिवाचकत्वेन तत्त्वापत्त्या स्वार्थफलेत्यादिवाच्यमित्यननुगमापत्त्याऽकर्मकभिन्नत्वं तद्वाच्यं तत्र प्रयोगानुरोधाज्ज्ञानात्यादिभेदो न निवेशनीय इति न तेषु व्यवहारभाक्त्वमिति नैयायिकमतं खण्डयति *अकर्मकेति । तान् क्रोडीकृत्यैतदन्यतमत्वमकर्मकत्वं तदन्यत्वं सकर्मकत्वमिति वाच्यमित्यर्थः । स्वस्मिन्स्वभेदासम्भवादाह *असम्भवेति । *सकर्मकेति । स्वरूपनिर्देशपरमिदं न तु लक्षणान्तर्गतम् । तान् क्रोडीकृत्यैतदन्यतमत्वं सकर्मकत्वं तदन्यत्वमकर्मकत्वमिति वाच्यमित्यर्थः । एतेनेत्यस्याद्ये ऽसम्भवेनेत्यर्थोऽन्त्ये ऽव्याप्तिदोषेणेत्यर्थः ॥ ११ ॥

वस्तुतस्त्वेतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्, तदनन्वय्यर्थकत्वमकर्मकत्वम् । तेन 'अध्यासिता भूमयः' इत्यादिसिद्धिः । "अधिशीङ्स्थासाम्" इत्याधारस्य कर्मत्वम् ।

अन्वयश्च पृथग्बुद्धेन संसर्गरूपः । अन्वयपदस्य तत्रैव व्युत्पत्तेः । तेन जीवत्यादिषु न दोषः । तत्र प्राणादिरूपकर्मणो धात्वर्थात्पृथगबोधात् । स्पष्टं चेदं "सुप आत्मनः" इति सूत्रे भाष्ये । पूर्वसकर्मकलक्षणे त्वेतदर्थं फलाश्रयावाचकत्वे सतीति विशेषणदाने गौरवम् ।

अत्र सकर्मकलक्षण एव तात्पर्यम्, अकर्मकलक्षणं त्वर्थलब्धम् ।

यत्तु पूर्वसकर्मकलक्षणे फले अविवक्षाविरहविशिष्टेतिविशेषणादविवक्षितकर्मसु नातिव्याप्तिः । नच तदर्थका भिन्ना एव धातव इति अविवक्षितकर्मसु फलवाचकत्वाभावादेव नातिव्याप्तिरिति वाच्यम् । सकर्मकपदे धातूनामन्यपदार्थत्वेन क्वचिदपि कर्मसम्बन्धदर्शनेन सारूप्यात् 'त एवैते' इति तत्त्वप्रत्ययविषयाणामेकत्वेनाविवक्षितकर्मणां धातूनामकर्मकव्यपदेशासम्भवात् । स्पष्टं चेदं "गतिबुद्धि–"इति सूत्रे कैयटे इति ।

तन्न ।" "मातुः स्मर्यते" इत्यत्राविवक्षितकर्मतया भावे लः" इति "अधीगर्थ–" इतिसूत्रस्थभाष्यविरोधापत्तेः । तत्र फलांशसत्त्वे एव सम्बन्धसामान्येनान्वयो न तु तदविवक्षा ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥इति-

अभियुक्तोक्ताकर्मकसंग्रहकारिकायाम् 'अविवक्षात' इत्यस्य पृथगुपादानवैयर्थ्यापत्तेश्च । भवद्रीत्या फलस्य धात्वर्थत्वाविवक्षायां धातोरर्थान्तरे वृत्तेरेव सम्पत्तेः ।

किञ्च विशेषणदानेऽपि क्वचिदविवक्षाविरहविशिष्टफलवाचकत्वेन तत्त्वप्रत्यभिज्ञयाऽतिव्याप्तिर्दुर्निवारैव । यदि त्वर्थभेदाच्छब्दभेद इति स धातुर्भिन्न एवेत्युच्यते, तदोक्तरीत्या विशेषणदानं व्यर्थमेव ।

किञ्च 'कर्मणा सह' इत्येतदर्थकसकर्मकपदस्य नेदं प्रवृत्तिनिमित्तम् । ततः शब्दमर्यादया ऽलाभात् । ल-

क्षणत्वेऽपि तेन रूपेण "लः कर्मणि" इत्यादौ सकर्मकपदाद्बोधानापत्तिः । शक्त्यग्रहात् । तथाबोधाननुभवेन तत्करणानुपयोगाच्च । तस्माच्छब्दमर्यादया लब्धं मदुक्तमेवोचितम् ॥ १२ ॥

(कुं० टी०) *एतदर्थमिति । जीवत्यादीनां सकर्मकत्वनिवृत्त्यर्थमित्यर्थः । *फलाश्रयावाचकत्वे सतीति । फलाश्रयविशेषस्यावाचकत्वे सतीत्यर्थः । तेन उत्तरदेशादिरूपफलाश्रयवाचकत्वे ऽपि गच्छत्यादेर्नाकर्मता । *अविवक्षाविरहेति । 'तण्डुलं पचति' इत्यत्र फलव्यधिकरणव्यापारवाचकत्वसत्त्वेऽपि 'नेह पच्यते' इत्यत्र फलस्याविवक्षितत्वात् न सकर्मकत्वमित्यर्थः । *तत्रफलांशेति । सम्बन्धसामान्येनान्वयादेव तत्राकर्मकत्वं न तु फलांशाविवक्षयेत्यर्थः । *व्यर्थमेवेति । व्यापारमात्रवाचकतया फलव्यधिकरणव्यापारवाचकत्वाभावादेव सकर्मकत्वाप्राप्तेः । ननु सकर्मकपदस्येदं लक्षणं न तु प्रवृत्तिनिमित्तकथनमत आह *लक्षणत्वेऽपीति । *शक्त्यग्रहादिति । सकर्मकपदाद् योगेन रूढ्या वा तस्यानुपस्थितेः । *तत्करणेति । तादृशलक्षणकरणेत्यर्थः ॥ १२ ॥

(क० टी०) योगार्थानुरोधेन सिद्धान्तमाह *वस्तुतस्त्वित्यादि । प्रत्यासत्तेस्तन्त्रान्तरस्थतद्वारणायाह *एतदिति । पूर्वसकर्मकलक्षणे दोषं सूचयन्नाह *तेनेति । एतदङ्गीकारेणेत्यर्थः । 'मास आस्यते' इत्यस्य तत्रापि सिद्धिराह *अध्यासिता इति । सकर्मकत्वेन कर्मणि भूते "निष्ठा" इति क्तः । तेनासिद्धिं सूचयन्नाह *अत्रेति । नन्वेवं जीवत्यादिषु 'प्राणान्धारयति' इत्याद्यर्थेनातिव्याप्तिरावश्यात आह *अन्वयश्चेति । तथोपस्थितेन यः संसर्गस्तद्रूप इत्यर्थः । आदिना नृत्यादि । प्रकृताशयेनाह *धात्वर्थादिति । *स्पष्टंचेदमिति । तत्र हि-इच्छाक्यजन्ताद्

भावकर्त्रधिकरणादौ प्रत्ययेऽपि न कर्मणि, यतः "अभिहितं तत्कर्मान्तर्भूतं धात्वर्थः सम्पन्नः । नचेदानीमन्यत्कर्मास्ति येन सकर्मकः स्याद्" इत्युक्तम् । जीवत्यादिवदिच्छाक्यजन्तस्याकर्मकत्वात्सः । तत्र पूर्वसकर्मकलक्षणे त्वयमपि दोषः । प्राणधारणगात्रविक्षेपादिफलस्य तत्र सत्त्वात्तस्य व्यापारव्यधिकरणत्वाच्चेति सूचयन् भूषणोक्तवारणप्रकारे दोषमाह *पूर्वेति । *एतदर्थम्-अत्रातिप्रसङ्गवारणार्थम् । *फलम्-प्राणधारणादि । *तदाश्रयः-प्राणादि । प्रागुक्तलाघवमत्रापि, इति न तदभावप्रयुक्तगौरवमित्याह *अत्रेति । अत्रापीत्यर्थः । भूषणादिसिद्धान्तान्तरं खण्डयति *यत्त्विति । यदपीत्यर्थः । प्रसङ्गात्कैयटमपि दूषयितुं तन्मतमुपपादयति *नचेति । अर्थभेदाच्छब्दभेद इति भावः । *दर्शनेन-तत्त्वे सतीति शेषः । प्रत्ययो ज्ञानम् । *स्पष्टं चेदमिति । तत्र हि-"अकर्मकग्रहणे कालादिकर्मकाणामुपसङ्ख्यानम्" इति वार्तिकखण्डकाधिकसंग्राहक-"सिद्धं तु कालकर्मकाणामकर्मकवद्" इत्यतिदेशखण्डक-"अकर्मकाणामित्युच्यते । न च केचिदपि कालभावाध्वभिरकर्मकाः । त एवं विज्ञास्यामः क्वचिद्ये ऽकर्मका इति" इतिभाष्ये अविवक्षितकर्मतया तत्त्वमाशङ्क्य, सर्वथा कर्मशून्यानामेवेह शास्त्रे तेन ग्रहणं न त्वविवक्षितकर्मणामपि अन्यथा पचादेस्तदविवक्षायां भावे लाद्यापत्तिरिति समाधाय, 'अकर्मकशब्दस्य च धातवोऽन्यपदार्थत्वेनाश्रीयन्ते न त्वर्थाः । अर्थाश्रयणे हि कर्माविवक्षायामर्थस्याकर्मकव्यपदेशः स्यात् । धातुषु त्वाश्रीयमाणेषु क्वचिदपि कर्मसम्बन्धदर्शनेन सारूप्यात् 'त एवैते' इति तत्त्वप्रत्ययविषया नाकर्मकत्वेन व्यपदिश्यन्ते । अर्थास्तु कारकादिभेदाद्भिन्ना एवेत्यन्ये सकर्मका अन्ये एवाकर्मका इति स्याद्व्यपदेशः । यदा तु 'अर्थस्यापि स्वतो नास्ति भेद' इतिदर्शनं तदाऽर्थेष्वन्यपदार्थेष्वदोष इति' तदुपपादितं तेन । *मातुरिति । तत्रहि-"कर्मादिष्वकर्मकवद्" इति वार्त्तिकखण्डनायेत्थम् उक्तम् । तमुपपादयति *तत्रहीति । यत इत्यर्थः । दोषान्तरमाह तत्र *धातोरिति । कर्मणइत्यस्य पूर्वैस्त्रिभिः संबन्धः । अनार्षत्वायाह *अभियुक्तेति । अकर्मकेतिबहुव्रीहिः । पृथक्त्वमाद्यापेक्षयेत्याह *भवद्रीत्येति । कैयटरीत्यैव । तत्र दोषान्तरमाह *किञ्चविशेषणेति । नचातिशंकोक्तरीत्या । तद्धातुराशयमाह *यदित्विति । *उक्तेति । शंकोक्तरी-

त्येत्यर्थः । तेषु फलवाचकत्वाभावादेवेति यावत् । कैयटोक्तरीतिस्तु चिन्त्यैव । "लः कर्मणि" इत्यादावेव दुर्वचत्वात् । कृतपूर्वीत्यादौ क्तस्याविवक्षितकर्मतया भावे साधनस्य "कर्तृकर्मणोः" इति भाष्यादौ स्पष्टत्वात् । अकर्मकेत्यादि तदुपपादनमप्ययुक्तम्, कर्मसंज्ञाया अर्थसंज्ञात्वेनार्थानामेवान्यपदार्थत्वस्यौचित्यात् । अर्थस्यापि स्वतो नास्ति भेद इति मतमप्ययुक्तम्, धातूनां नानार्थत्वोच्छेदापत्तेः । भाष्याशयस्त्वनुपदमेव स्फुटीभविष्यतीति बोध्यम् । अथ पूर्वसकर्मकलक्षणसाधारणमत्र दोषान्तरमाह *किञ्चेति । *अलाभात्—तेन रूपेण ततोऽप्रतीतेः । ननु गोः सास्नादिमत्त्ववदिदं तल्लक्षणमत आह *लक्षणत्वेऽपीति । अनुभवोऽपि तथा नेत्याह *तथेति । *तत्करणेति । लक्षणकरणेत्यर्थः । सिद्धान्तमुपसंहरति । *तस्मादिति । योगशक्त्यैव तादृशार्थलाभ इति भावः ॥ १२ ॥

कारिकायामविवक्षा नाम येन रूपेणान्वयविवक्षया यस्य कर्म्मसंज्ञा तेन रूपेणान्वयविवक्षाऽभावः । स च क्वचिद्विशेष्याभावकृतः, यथा—नेह पच्यत इत्यादौ । क्वचिद्विशेषणाभावकृतः, यथा—मातुः स्मर्यते इत्यादौ । कार्योत्पत्तिवेलायामविवक्षा पश्चाद्विवक्षेत्यपि क्वचित्, यथा—कृतपूर्वी कटमित्यादौ । कृतपूर्वीत्यादिवृत्तिविषय एवेदम्, नान्यत्र । धातोरर्थान्तरे वृत्त्या, यथा—'नदी स्यन्दते' इत्यर्थके नदी वहतीत्यादौ । प्रसिद्धेरित्यस्य प्रसिद्ध्या झटित्यध्याहारेण तल्लाभात् तत्प्रयोगाभाव इत्यर्थः । न तत्राकर्म्मकत्वप्रयुक्तं कार्य्यम्, भाष्ये ऽनुक्तत्वात् । शास्त्रे ऽकर्म्मकपदस्थकर्म्मपदेन कालभावाध्वदेशभिन्नानामेव ग्रहणम् । "गतिबुद्धि—" इति सूत्रे सजातीयापेक्षसकर्म्मकविषयनियमेन सिद्धे ऽकर्म्मकग्रहणसामर्थ्यादिति "गतिबुद्धि—काला-

ध्वनोः" इति सूत्रे भाष्ये स्पष्टम् । तेन 'मासमास्यते' इति भावे लादिसिद्धिः ॥ १३ ॥

(कुं० टी०) *विशेष्याभावकृतः–कर्म्माभावकृतः। *नेहपच्यतइति । अत्र तण्डुलादेरविवक्षया ऽकर्म्मकत्वम् । *विशेषणाभावेति । येन रूपेणान्वयेत्यादीत्यर्थः। *कृतपूर्वीति। अत्र कर्म्मणो ऽविवक्षया भावे क्ते पश्चात्कर्म्मयोगः । *सजातीयेति । 'एषामेव धातूनामणौ कर्ता'इत्यत्र सजातीयत्वात्सकर्म्मकाणामेव नियमः स्यादित्यर्थः ॥ १३ ॥

(क० टी०) ननु सिद्धान्ते कथं कारिकास्थतदविवक्षासङ्गतिरत आह *कारिकायामिति । *विशेष्येति । अन्वयेत्यर्थः । तदन्वययोग्यधात्वर्थत्यागादिति भावः । 'नेह पच्यते' इत्यादावित्यादिना भुज्यते इत्यादि । *विशेषणेति । तद्रूपेत्यर्थः । सत्येव तस्मिन्नर्थे कर्मत्वेनान्वयाविवक्षायां सम्बन्धित्वेनान्वयस्य विवक्षणादिति भावः । मातुः स्मर्यते इत्यादावित्यादिना पितुः स्मर्यते इत्यादि । तत्रापि विशेषमाह *कार्येति । कटमित्यादावित्यादिना ऽनुभूतपूर्वीत्यादि । अनतिप्रसङ्गायाह *कृतेति । अनभिधानात् । स्पष्टं चेदं "कर्त्तृकर्मणोः" इति सूत्रे भाष्ये । एतेन गङ्गाधरादौ तथा स्वीकुर्वन्तः परास्ताः। प्रसङ्गात्तदुदाहरणमनुक्तमाह *धातोरिति । 'यक्षानुरूप'–इतिन्यायेन प्राचां मतेनाह *अध्याहारेणेति । तत्त्वं तु प्रागुक्तं बोध्यम् । प्राचोक्तं खण्डयति *प्रसिद्धेरिति । प्रसिद्धातिरिक्तवृत्तित्वमपि फले विशेषणं देयमिति, अयं फलितोर्थः । शाब्दस्तु कर्मणः प्रसिद्ध्या तथा लाभात्क्रियाऽकर्मिका तत्पदप्रयोगरहितवाक्यप्रतिपाद्येत्यनेनैव सूचितः । यथाश्रुतार्थत्यागे बीजमाह *नत्विति । *भाष्ये इति । तथोपस्थितस्य तस्यान्वयस्वीकारेण तावन्मात्रेणाकर्मकत्वस्य भाष्ये ऽनुक्तत्वादित्यर्थः। अतएव "नदी वहतीत्यकर्मकः" इति भाष्यं "नदी स्यन्दते" इत्यर्थकतया कैयटेन व्याख्यातम् । एतत्सूचनार्थमेवेदमेव तदुदाहरणं दत्तम् । नन्वेवं 'मासमास्यत इत्यादि' इति कथमातिदेशखण्डनं

तत्र भाष्ये, अत आह *शास्त्रे इति । ज्ञापकं सामान्यापेक्षमिति भावः । *सामर्थ्यादिति । अयंभावः–किम अकर्मकपदे कर्मपदस्य कर्मसंज्ञाप्रयोजके लक्षणया न विद्यते कर्मसंज्ञाप्रयोजको ऽर्थो येषां धातूनामित्यर्थः, उत लक्षणया कर्मरहितार्थप्रतिपादकानामित्यर्थः ? । तत्राद्यं खण्डितम्–नचकेचिदिति । तथाच कर्मसंज्ञाप्रयोजकार्थरहितानामित्यर्थे सर्वेषां तदर्थसम्भवेनाकर्मकाणामित्यस्योदाहरणासम्भव इत्यर्थः । अन्त्येऽविवक्षितकर्मतयोदाहरणसम्भवो वाच्यः । नच कालस्य क्रियामात्रेणाकाङ्क्षितया तदविवक्षाऽसम्भवः । आख्यातार्थकालेनैव तदाकाङ्क्षाशान्त्या बाह्यकालकर्मणोऽविवक्षासम्भवात् । एवञ्च सति गत्यादिसूत्रे तुल्यजातीयापेक्षतया नियमस्य सकर्मकविषयता ऽकर्मकविषये "कर्तुरीप्सिततमम्" इत्यनेन तदुपपत्तौ अकर्मकग्रहणं व्यर्थम्, तत्सामर्थ्यं हृदि निधायोक्तं "त एवम्"इत्यादि। "क्वचिद्"इत्यस्य कालादीनां कर्मत्वप्रयोजकव्याप्त्यादिरहितेऽर्थे इत्यर्थः । तत्सामर्थ्याच्चदवस्थायां कर्मरहिता गृह्यन्त इति तत्त्वम् । *इतीति—इत्यादौ ॥ १३ ॥

पचेर्विक्लित्त्यनुकूलव्यापारोऽर्थः । सचानेकविध इत्युक्तम् ।

नश्यतेरदर्शनानुकूलव्यापारो ऽर्थः । सच ध्वंससामग्रीरूपो व्यवधानाद्यनुकूलव्यापाररूपश्च । "उत्पातिते काके नष्टं तद् गृहं भवति"इति निष्ठासंज्ञासूत्रे भाष्यप्रयोगात् । 'हृतं नष्टं च लभ्यते' इति स्मार्तप्रयोगाच्च । तत्र व्यापारे कालान्वयः ।

एतेन नाशस्य नित्यत्वात्सर्वदा नश्यतीत्यापत्तिरित्यपास्तम् ।

ध्वंसश्च तिरोभावावस्था । कारणे शक्तिरूपेणावस्थानं च प्रागभावः । ततः प्रच्युता अभिव्यक्तिलक्षणं धर्मम्प्राप्ता व्यक्तिः 'जायते'इत्युच्यते । तिरोभा-

वावस्थैव लब्धक्रमा नश्यतीत्यनेनोच्यत इत्यन्ये ।

जानातेर्विषयतया ज्ञानं फलम् । आत्ममनस्संयोगो व्यापारः । अत एव 'मनो जानाति' इत्युपपद्यते । आत्मा चान्तःकरणं मनो ऽपि तद्वृत्तिविशेषरूपम् । तत्रोभयोरपि सावयवत्वादवच्छेदकांशसम्भवेन संयोग उपपद्यते ।

मनो निरवयवमात्माऽपि ज्ञानाश्रयो निरवयव इतिनये ऽवच्छेदकांशासम्भवेन संयोगानुपपत्तेः । तदभ्युपगमे ऽपि—

उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्' इति—

न्यायेन ज्ञानाश्रयत्वस्य संयोगस्य चात्मनाश एव पर्यवसानात् तन्नित्यत्वमनुपपन्नम् ।

एवमाकाशस्यापि सावयवत्वम् ।

तदुक्तं खण्डनकृता—

संयोगो ऽव्याप्यवृत्तित्वादेकदेशो ऽस्ति संमतः ।
तदेकदेशदेशस्य प्रश्ने संयोग एव कः ॥

तस्मात्—

अणौ निरंशे नितरां कल्पिते कल्पितं जगद् इति ।

निरंशे ऽप्यणौ संयोगकल्पनायां सर्वथा जगतः कल्पितत्वमेवेति तद्भावः ।

कणादः पारिमाण्डल्यसंयोगाद् द्व्यणुकक्रमात् ।
जगदुत्प्रेक्षयन् मायावादसादरमानसः ॥ इति

प्रघट्टकान्तरे तदुक्तेः ॥ १४ ॥

(कुं० टी०) *सचानेकविधइति । स्थालीस्थस्य व्यापारस्यापि पच्यर्थत्वात् । अदर्शनमज्ञानम् । तदुदाहरति *नष्टन्तद्-

गृहमिति । *हृतं नष्टमिति व्यवधानस्य । *ध्वंसस्य नित्यत्वादिति । ध्वंसपरम्पराकल्पने गौरवमिति भावः । एतेन 'नाशं प्रति जन्यभावत्वेन कारणत्वे गौरवाज्जन्यस्यैव कारणता इति ध्वंसो ऽप्यनित्य' इत्यपास्तम् ।

यत्तु ध्वंसस्यानित्यत्वे घटो नष्ट इत्यप्रसङ्ग इति ।

तन्न । द्वितीयादिध्वंसप्रतियोगित्वस्य लाघवेन घट एव स्वीकारात् । ननु जन्मनाशयोरवस्तुत्वात् कथं तयोः सत्तात्मकत्वमित्याशङ्क्य नाशस्य तावत्सत्तावत् सत्तात्मकत्वमुपपादयति *ध्वंसश्चेति । तदुक्तं हरिणा—

तिरोभावाभ्युपगमे भावानां सैव नास्तिता । इति ।

अयं भावः–नित्या ब्रह्मात्मिका सत्ता न निरन्वयनाशसहेति अभावो नाम न भावाद् व्यतिरिक्तः, किन्तु सत्तैव तिरोभूय स्वकारणेषु शक्तिरूपतया स्थिता वस्तूनां नाशः । सैव च तिरोभावावस्था साधनसम्पर्कात् क्रमवत्त्वेन प्रतीयमाना नश्यतीत्याख्यातेन प्रत्याय्यते इति ।

*ततः प्रच्युतेति । कारणनिष्ठशक्तिरूपेणावस्थानात् प्रच्युता अभिव्यक्तिहेतुकं धर्ममप्राप्ता घटादिव्यक्तिर्जायते इत्युच्यते । तदानीं घटत्वेन ग्रहाभावादप्राप्तत्वम् । जाते तु घटे 'घटो जातः' इति व्यवह्रियते । अथवा अभिव्यक्तिरूपमवस्थाऽन्तरमप्राप्तेत्यर्थः । तदुक्तं हरिणा—

पूर्वस्मात्प्रच्युता धर्मादप्राप्ता चोत्तरं पदम् ।
यदन्तराले भेदानामाश्रयाज्जन्म कथ्यते ॥ इति ।

अस्यार्थः–कारणे शक्तिरूपेणावस्थितात्पूर्वधर्मात् प्रच्युता कार्यनिष्ठधर्मान्तराभिव्यक्त्युन्मुखादुत्तरावस्थामप्राप्ता जायत

इत्युच्यते इति । एवञ्च पूर्वापरावस्थान्तरालवर्त्तिक्षणक्रमविवक्षायां जनिक्रियाव्यवहारः ।

अत एवोक्तं तत्रैव—

पूर्वावस्थामपजहत्संस्पृशद्धर्ममुत्तरम् ।
संमूर्छित इवार्थात्मा जायमानोऽभिधीयते ॥ इति ।

अस्यार्थः–न सर्वथा पूर्वां कारणावस्थां त्यजत्, अनेन प्रकृतेरपि कर्तृत्वं दर्शितम् । नापि सर्वथोदासीनम्, अपि तु उत्तरावस्थाविशेषं स्पृशत् आस्वदयत्, अनेन विकृतेः कर्त्तृत्वं दर्शितम् । एवं च पूर्वापरावस्थोपाध्यवच्छिन्न एकः संमूर्छित इव उभयरूप इवाध्यवसीयमानो जायत इत्युच्यत इति ।

*लब्धक्रमेति । साध्यरूपता ऽनेन दर्शिता । तेन नष्टे नश्यतीति न प्रयोगः । *मनो जानातीति । साङ्ख्यरीत्या ज्ञानस्य मनोधर्मत्वात् । *मनोऽपीति । संशयजनकतायामन्तःकरणमेव मनःसंज्ञां लभते । *सावयवत्वेनेति । अन्तःकरणं सावयवं सादिद्रव्यत्वात् पटवदित्यनुमानात् । अवच्छेदकांशः,एकदेशः । *मनो निरवयवमिति । तार्किकमते परमाणुरूपत्वात् । *अवच्छेदकांशासम्भवेति । अवयवसम्बन्धे एव संयोगव्यवहारात् । *तदभ्युपगमेऽपीति । संयोगाभ्युपगमे ऽपीत्यर्थः । *उपयन्–आगच्छन् । *अपयन्–निवर्त्तमानः । *आत्मनाश एवेति । संयोगरूपधर्मस्योत्पात्तिविनाशाभ्यामात्मनो ऽपि विकारापत्तावनित्यत्वं स्यादित्यर्थः । *तदेकदेशेति । आकाशादावेकदेशस्य प्रश्ने तु संयोग एव न सिद्ध्येदित्यर्थः । *अणोर्निरंशे इति । निरवयवाभ्यामपि परमाणुभ्यां संयोगे द्व्यणुकादीनामधिकपरिमाणत्वानापत्तिरिति भावः । *पारिमाण्डल्यसंयोगादिति । परमाणुद्वयसंयोगाद् द्व्य-

णुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकमिति क्रमेण जगदुत्पत्तिस्वीकारात्। भर्तृहरिस्त्वाह—

परमाणोरभागस्य दिशा भागः प्रकल्प्यते। इति।

निरंशानामपि परमाणूनां दिग्निमित्त एव पार्श्वचतुष्टय-भाग इति द्व्यणुकादिसिद्धिः। तथा तेनैवोक्तम्—

अदेशाश्चाप्यभागाश्च निष्क्रमा निरुपाधयः।
भावाः संसर्गरूपा तु शक्तिर्भेदाय कल्पते॥ इति।

येषामाकाशादीनां देशो नास्ति, नापि अवयवादिस्तेषां संसर्गनिमित्तक एव शक्तिभेदः। पूर्वाकाशसंयुक्तो घट इत्यादि-व्यवहारादिसर्थ इति॥ १४॥

(क० टी०) एवं सामान्यतो धात्वर्थं निरूप्य परमतनिरासाय केषांचिद्विशिष्यार्थान्निरूपयति *पचेरित्यादिना। पुनःकथन-फलं सूचयन्नाह *सचानेकेति। एतेन तेजःसंयोगानुकूलव्या-पारमात्रं पच्यर्थ इति निरस्तम्। अग्निसंयोगानुकूलकृत्यभाववति भक्तविक्लित्त्यनुकूलप्रस्रवणकर्त्तरि 'पचति' इति प्रयोगानापत्तेः। *ध्वंससामग्रीति। प्रतियोगित्वघटिततत्समवधानेत्यर्थः। ध्वंसानु-कूलेत्येव वाच्ये ऽदर्शनेत्युक्तिफलमाह *व्यवेति। तत्राद्ये प्र-सिद्धत्वात् द्वितीये मानमाह *उत्पतिते इति। *नष्टम्—बुद्ध्यनारूढ-म्। *हृतामित्यस्य—

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्।

तस्य संस्मरणादेवेत्यादिः। एतेन लक्षणा तत्रेत्यपास्तम्। अनुप-पत्तिप्रतिसन्धानं विनाऽपि ततो बोधात्। *तत्र—तयोर्मध्ये। *एते-न—तत्र कालान्वयेन। *नाशस्य—ध्वंसजन्यादर्शनस्य। *नित्यत्वा-त्—तस्य जन्यत्वे ऽप्यविनाशित्वात्। ध्वंसानुकूलव्यापार एव सर्वत्र धात्वर्थ इति न शक्तिद्वयकल्पनेति लाघवात्सत्कार्यवादेन सि-द्धान्तमाह *ध्वंसश्चेत्यादि—'अन्येइत्यन्तेन। *शक्तिः—सूक्ष्मावस्था। नन्वेवं प्रागुक्तनिरुक्तादिविरोधः, वस्तुत उत्पत्तिध्वंसयोरभा-

वादत आह *तत इति । तद्रूपप्रागभावत इत्यर्थः । द्वितीयादिनिरासायाह *अभिव्यक्तीति । क्रियात्वायाह *लब्धेति । *अतएव-तस्य तत्त्वेन तद्वृत्तित्वादेव । संयोगोपपत्तये सिद्धान्तमाह *आत्मा चेति । *तत्र-तथा सति । नैयायिकमते दोषमाह *मन इति । *ज्ञानाश्रयः-चेतनो जीवः । *संयोगानुपपत्तेरिति । 'मनो जानाति' इत्यनुपपत्तिः स्पष्टैवेति शेषः । ज्ञानाश्रय इत्यनेन ज्ञानाश्रयेणापि न तदुपपत्तिरिति सूचितम् । तद् ध्वनयन्नाह *तदभ्युपेति । युगपदनेकज्ञानानुत्पत्त्या मनसोऽणुरूपत्वम्, न विभुत्वम्, एवं च विभुद्वयसंयोगानङ्गीकारेऽपि तदङ्गीकारे न बाधकम्, तस्याव्याप्यवृत्तित्वं तु बाह्यपदार्थसंयोगविषयमिति तदाकूतम् । *उपयन्निति । उत्पत्तिविनाशशालीत्यर्थः । *विकरोति-तन्नाशं बोधयति । मनसस्तत्त्वस्येष्टत्वादाह *आत्मेति । तथाच स्वसिद्धान्तस्यैव भङ्ग इति भावः । आकाशङ्गच्छतीत्यादिप्रयोगाय प्रसङ्गादाह *एवमिति । अन्तःकरणमनसोरित्यर्थः । सर्वत्र संमतिमाह *तदुक्तमिति । श्रीहर्षेणेत्यर्थः । *अव्याप्येति । अवच्छेदकभेदेन स्वाभावसमानाधिकरणत्वादित्यर्थः । *संमत इत्यनेन तस्य निर्विवादत्वं सूचितम् । *तदेकेति यदेकदेशोऽस्ति तदेकदेशरूपसंयोगीयदेशाविषयकप्रश्ने इत्यर्थ एव पूर्वपक्षे । प्रागुक्तस्थलेऽग्रिमा सिद्धान्तोक्तिरिति सूचयन् चूर्णिकामाह *तस्मादिति । कथमिदं प्रकृतसाधकम् अत आह *निरंशोऽपीति । नितरामित्यस्याग्रेऽन्वय इत्याह *सर्वथेति । एवेन परसंमतनित्यत्वनिरासः । ननु निरंशोऽप्यणौ कल्पित इति यथाश्रुतप्रतीयमानार्थमपहाय किमर्थं संयोगेति शेषपूरणेन व्याख्यातम्, तथाच नेष्टासिद्धिरतआह *कणाद इति । पारिमाण्डल्यम्, परमाणुः । एवं च सर्वेषां सावयवत्वेन प्रागुक्तसिद्धिः । एतेन तत्तद्दिगवच्छिन्नपरमाणुद्वयसंयोगात्सृष्टिरिति नैयायिकोक्तमपास्तम् । उक्तयुक्तेः आद्यसृष्टौ दिशोऽप्यभावाच्चेति दिक् ॥ १४ ॥

यत्तु-आवरणभङ्गो विषयता वा फलम् । विषयताया यथा फलत्वं तथा कारके निरूपयिष्यामः । व्यापारस्तु ज्ञानमेवेति ।

तन्न । कर्मस्थाक्रियकत्वापत्तेः । तद्व्यवस्था चेत्थमुक्ता हरिणा—

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।

क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥ इति । अस्यार्थः—यत्र कर्मणि कर्त्तरि वा क्रियाकृतो विशेषः कश्चिद् दृश्यते तत्र क्रिया व्यवस्थितेति । उच्यते इति शेषः ।

नन्वेवं पच्यादिकर्त्तर्यपि श्रमादिरूपविशेषस्य दर्शनादिदमयुक्तम् । किञ्च चिन्तयति–पश्यतीत्यादीनां कर्तृस्थभावकत्वानुपपत्तिः । कर्त्तरि क्रियाकृतविशेषाभावादतो ऽन्येषामिति । मते इति शेषः । यत्र कर्तृकर्मसाधारणधर्मरूपं फलं शब्देन प्रतिपाद्यते स कर्तृस्थभावकः । यथा–पश्यति घटम्, ग्रामं गच्छति, हसति इत्यादौ । तत्र विषयतासमवायाभ्यां ज्ञानमुभयनिष्ठं संयोगश्चोभयनिष्ठः । एवं हासोऽपि । नच विषयताऽऽवरणभङ्गावेवम् । यत्र तु कर्मवृत्तिधर्मरूपं फलं स कर्मस्थभावकः, यथा–भिनत्तीत्यादौ । नहि द्विधाभवनादि कथमपि कर्तृनिष्ठं प्रतियन्तीति हेलाराजः ।

अत एव "कर्मवद्" इतिसूत्रे भाष्ये उक्तम्—"नच कर्तृस्थभावकानां कर्मणि क्रियायाः प्रवृत्तिरस्ति" इति । तेषां धातूनां वाच्यायाः फलरूपक्रियायाः कर्ममात्रे प्रवृत्तिर्नास्तीत्यर्थः । कारिकापूर्वार्धोक्तार्थपरत्वे ज्ञानादिकर्त्तर्यपि क्रियाकृतविशेषानुपलम्भेन "चिन्तयति, गच्छति" इत्याद्युपक्रम्य " कर्तृस्थभावकानाम्" इत्युक्त्यसङ्गतेः ॥ १५ ॥

(कुं० टी०) *कर्मस्थक्रियकत्वापत्तेरिति । विषयतादिरूपफलस्य कर्तृकर्मसाधारणत्वाभावादिति भावः । *यत्रेति । कर्मणि कर्त्तरि वेत्यर्थः । *क्रियातत्रेति । यत्र कर्मणि क्रियाकृतो विशेषस्तत्र कर्मस्थाक्रियत्वम्, यत्र कर्मकर्त्तरि तत्र कर्त्तृस्थक्रियत्वमित्यर्थः । *तत्र व्यवस्थिता—तन्निष्ठा । *क्रियाव्यवस्थात्विति । अन्येषां मते क्रियाव्यवस्था शब्दैरेव प्रकाश्यते ।

अयं भावः—ये ऽपि कर्मस्थभावकाः पच्यादयः तत्रापि श्रमादिको विशेषः कर्त्तर्यपि दृश्यते । तथाच विशेषदर्शनं यत्रेति लक्षणेन नास्ति निर्वाहः । तस्माद्यत्र शब्दैरेव विशेषः तत्रैव क्रिया स्थिता । तद्यथा—घटं पश्यतीत्यादौ शब्दो दृशिक्रियाविषयं किञ्चिद्विशेषविशिष्टं न अभिधत्ते इति तद्वशेन कर्तृस्थभावकत्वाद् 'दृश्यते स्वयमेव' इति न भवतीति । काष्ठं भिनत्तीत्यादौ तु भिदिक्रियाविषयं सविशेषमभिधत्ते इति तद्वशेन कर्मस्थभावकत्वाद् 'भिद्यते काष्ठं स्वयमेव' इति भवति ।

ग्रन्थकारस्तु कर्ममात्रनिष्ठफलकत्वं कर्मस्थक्रियत्वमित्यर्थं वक्ष्यति । यत्रेत्यस्य विवरणम् *कर्मणिकर्त्तरिवेति । तत्रेत्यादेस्तन्निष्ठेत्यर्थः । *विषयताऽऽवरणभङ्गावेवमिति । कर्तृकर्मसाधरणत्वाभावाद्विषयताऽऽवरणभङ्गयोः फलयोः कर्मस्थक्रियत्वापत्तिरित्यर्थः । *कारिकापूर्वार्द्धेति । 'विशेषदर्शनं यत्र' इतिलक्षणस्याश्रयणे इत्यर्थः ॥ १५ ॥

(क० टी०) भूषणाद्युक्तिं खण्डयति । *नन्वावरणभङ्गस्योक्तफललक्षणाक्रान्तत्वेन तत्त्वेऽपि कथं विषयतायास्तत्त्वं तदभावादत आह *विषयतायाश्चेति । व्यवस्थाचेति चो ह्यर्थे । *अस्यार्थ

---

१ कर्मणः क्रियायाः कर्ता तस्मिन् ।

इत्यस्य व्यवस्थितेतिघटकेत्तावन्वयः । यत्रेत्युभयार्थकमित्याह *कर्मणीति । असिद्धान्तत्वादाह *इत्युच्यत इतीति । अत आह उत्तरार्द्धे तुरुक्तवैलक्षण्येन सिद्धान्तत्वद्योतकः । शब्दैरेवेत्येवेन दर्शनव्यवच्छेदः । अत एवाह *मते इतीति । *यत्र-आख्याते । *सः-तद्घटको धातुः । एवमग्रेऽपि । *तत्र-तेषां मध्ये । *एवमिति । सम्बन्धभेदेनोभयानिष्ठ इत्यर्थः । *न च-नहि । *एवम्-उभयनिष्ठौ । *कथमपि-तदवच्छेदकसम्बन्धेन । नयन्तीति पाठः । अत्र भाष्यसंमतिमाह *अतएवेति । द्वितीयार्धोक्तमतस्य सिद्धान्तत्वादेवेत्यर्थः । *तेषाम्-कर्तृस्थभावकानाम् । अन्यपदार्थो धातुरित्याह *धातूनामिति । वाच्यवाचकभावः षष्ठ्यर्थ इत्याह *वाच्यायाइति । क्रियायाः परिनिष्पत्तिरितिवत्तत्प्रयोग इत्याह *फलरूपेति । तस्यापि तत्त्वं प्रागुपपादितम् । उक्तरीत्या तत्रापि सत्त्वाद्यथाश्रुतासङ्गतेः सर्वं वाक्यमिति न्यायेनाह *कर्ममात्रे इति । कर्मण्येवेत्यर्थः । ननु यथाश्रुतभाष्यस्य साधारणत्वेन पूर्वार्द्धोक्तार्थपरतैव कुतो न, अत आह *कारिकेति । ज्ञानादीत्यादिना भिदादिकर्तृसमुच्चयः । तस्मात्सोऽसिद्धान्त एवेति, तथाभूषणाद्युक्तमयुक्तमेवेति बोध्यम् ॥१५ ॥

एवमिच्छतेरिच्छानुकूलं ज्ञानमर्थः । अतीतानागतयोरपि बुद्ध्युपारोहात् फलशालित्वम् । 'आत्मानं जानाति' इत्यादौ अन्तःकरणावच्छिन्नः कर्त्ता, शरीरावच्छिन्नं कर्मेति कर्मवत्—सूत्रे भाष्ये स्पष्टम् । ब्रह्म जानाति, सविता प्रकाशते, इत्यादौ विषयोपहितज्ञानस्य तदुपहितप्रकाशस्य च जन्यत्वात्कर्त्तृत्वं ब्रह्मसवित्रोः ।

पतिर्गमिवत् सकर्मकः । नरकं पतित इत्यादिप्रयोगात् । विभागजन्यसंयोगमात्रपरत्वेऽकर्मकत्वं वाच्यम् । कृञ उत्पत्तिव्यधिकरणस्तदनुकूलव्यापारोऽर्थः । यत्नमात्रार्थकत्वेऽकर्मकत्वापत्तिः यतिवत् ।

किञ्च कर्मस्थभावकत्वाभावात् कर्मकर्त्तरि कर्मवद्भावानापत्त्या यगाद्यनापत्तिः । कृतिरित्यादौ धातूनामनेकार्थत्वाद्यत्नमात्रे ऽपि वृत्तिः ।

यद्वा कृतियत्नशब्दयोरपि व्यापारसामान्यवाचितैव । अतएव "स्थालीस्थे यत्ने कथ्यमाने" इति "कारके" इति सूत्रे भाष्ये प्रयुक्तमित्यलम् ॥ १६ ॥

(कुं० टी०) ननु नित्यज्ञानरूपस्य ब्रह्मणो ज्ञानकर्तृत्वं कथमत आह *ब्रह्मजानातीति । ननु विततौष्ण्यप्रकाशस्यैव सवितृपदार्थत्वात्तत्र कथं फलत्वम्, अत आह *तदुपहितेति । विषयोपहितेत्यर्थः । 'भूमौ पतति' इत्यादौ भूमेः कर्मत्ववारणायाश्रयानवच्छिन्नत्वं फले विशेषणमिति तार्किकमतं दूषयति *पततिरिति । कथं तर्हि पातयामास भूतले इत्यादिप्रयोग इत्यत आह *विभागजन्येति ॥ १६ ॥

(क० टी०) *एवमिति । जानातिवदित्यर्थः । नन्वतीतादौ तदाश्रयत्वस्य दुर्वचत्वेन कथं तत्त्वमत आह *अतीतेति । एवमेव घटं करोतीत्यादावपि बोध्यम्। सत्कार्यवादे तु न काचिद्दोषाशङ्केव । नन्वेवमप्यात्मन एव कथं तत्र तत्त्वमत आह *आत्मानमिति । *कर्मेतीति । तथाच कल्पितात्मभेदेन फलव्यापारयोर्भिन्ननिष्ठत्वाक्षत्या सकर्मकत्वादिति भावः । *कर्मवदिति । "द्वावात्मानौ शरीरात्माऽन्तरात्मा च । शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति, अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति" इति हि तत्रोक्तम् । एतेन "आत्मानमात्मना हन्ति सृजत्यात्मानमात्मना" इत्यपि व्याख्यातम् । ननु विषयतासम्बन्धावच्छिन्नज्ञानरूपफलानुकूलात्ममनःसंयोगरूपव्यापारस्योक्तेषु सम्भवेन तदुपपत्तावपि ब्रह्म जानातीत्यादौ स्वस्वरूपातिरिक्तज्ञानाभावात्तस्य चाजन्यत्वादात्ममनःसंयोगस्य चाभावात्कथं तत्त्वमत आह *ब्रह्मे-

ति। स्पष्टं चेदम् "ईक्षतेर्नाशब्दम्" इतिसूत्रे भाष्यभामत्योः। एवमेव "स ऐक्षत" इत्यादेरुपपत्तिः। तत्र प्रथमतोऽव्याकृतनामरूपेक्षणम्, ततः सामान्येन तद्व्याचिकीर्षा, ततो विशेषाकारेण सा, ततस्तदभिव्यक्तिरिति सिद्धान्त इति बोध्यम्। उत्तरदेशसंयोगरूपफलभेदेन धात्वर्थभेदेऽपि तद्व्यधिकरणत्वस्य तत्र तुल्यत्वेन सकर्मकत्वं तुल्यमित्याह *सकर्मक इति। "द्वितीयाश्रित" इतिसूत्रोदाहरणमाह *नरकमिति। वृक्षात्पर्णं पततीत्याद्यर्थमाह *विभागजन्यसंयोगमात्रेति। मात्रपदेन तदनुकूलव्यापारव्यवच्छेदः। तस्य तत्रोक्तफलत्वाभावेऽप्युक्तरीत्या क्रियात्वान्नानुपपत्तिः। एतेन व्यापारमात्रपरत्वेनाकर्मकत्वमित्यपास्तम्। जनिवन्नोत्पत्तिसमानाधिकरणव्यापारार्थकत्वमिति सूचयन्नाह *उत्पत्तिव्यधीति। नैयायिकादिमतं खण्डयति *यत्नमात्रेति। तथा च घटं करोतीत्यादि न स्यात्। दोषान्तरमाह *किञ्चेति। यगादीत्यादिना तङादि। नन्वेवं कृतिरित्यत्र कथं यत्नप्रतीतिरत आह *कृतिरिति। आदिना करणादि। एतेन तत्र लक्षणेत्यपास्तम्। इदमपि परीत्योक्तमिति सूचयन् सिद्धान्तमाह *यद्वेति। कृतियत्नशब्दयोरपीति पाठः। अन्यथा पाठे तु यत्नश्च कृतिशब्दश्चेति द्वन्द्वो बोध्यः। *कथ्यमाने इति। सा कर्त्रीति शेषः। जनेरुत्पत्तिसमानाधिकरणव्यापारोऽर्थः। तत्रोत्पत्तिस्वरूपं प्रागुक्तमेव। ध्वंसादेर्जीवत्यादिवदकर्मकत्वं दधात्यादेस्त्वतथात्वात्सकर्मकत्वं तदाह *इत्यलमिति॥ १६॥

अनुभूयते सुखम्, साक्षात्क्रियते गुरुरित्यादौ निपातानां द्योतकत्वेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेन सकर्मकत्वम्।

एतेन निपातस्यैव तदर्थकत्वमित्यपास्तम्।

कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति मतेऽपि फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफले एवान्वयौचित्येन द्योतकत्वमेवावश्यकम्।

द्योतकत्वं च समभिव्याहृतगतवृत्त्युद्बोधकत्वं प्रा-

येण ।

क्वचित्तु क्रियाविशेषाक्षेपकत्वं तत् । यथा प्रादेशं विलिखतीत्यादौ विर्विमानक्रियाऽऽक्षेपकः । प्रादेशं विमाय लिखतीत्यर्थावगमात् ।

क्वचित्तु सम्बन्धपरिच्छेदकत्वम्, यथा—कर्मप्रवचनीयानाम् । "अथ शब्दानुशासनम्" इत्यत्राथशब्दस्य प्रारम्भक्रियाऽऽक्षेपकत्वं कैयटादावुक्तम् । एवमन्यदप्यूह्यम् ।

विशिष्टस्य तु न धातुत्वम्, अपाठात्, अडाद्यव्यवस्थापत्तेश्च ।

एतेनोपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वम् । साक्षात्प्रत्यक्षतुल्ययोरिति कोशात् । नमःपदेन नमस्कारार्थत्वस्य लोकसिद्धत्वाच्च । सकर्मकत्वंच स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचकत्वम् । कर्मत्वमपि एतादृशफलाश्रयत्वमेवेति न कर्मणि लकारानुपपत्तिरित्यपास्तम् । वैषम्ये बीजाभावात् । 'अनुभूयते' इत्यस्य 'साक्षात्क्रियते' इत्यनेन समत्वात् ।

कर्मसंज्ञकार्थान्वय्यर्थकत्वं तत्त्वमिति निष्कृष्टमते उक्तरीत्या द्योतकतां विना गत्यभावाच्च । "लः कर्मणि" इत्यादौ तेन रूपेण बोधस्य दुर्लभत्वाच्च । अन्यतरत्वस्यातिगुरुत्वाद् दुर्ज्ञेयत्वाच्च ॥ १७ ॥

(कुं० टी०) *समभिव्याहृतेति । भूधातुगतानुभवबोधकशक्तेरुद्बोधको ऽनुरित्यर्थः । *प्रादेशमिति । अत्र कारकवि-

भक्तेर्लिखतीतिक्रियायोग्यताऽभावाद्विना मानक्रियाऽऽक्षिप्यते । *संबन्धेति । जपमनु प्रावर्षदित्यत्र । शैषिकी इयं विभक्तिर्न क्रियामाक्षिपति क्रियाकारकयोः परस्परमवच्छेद्यावच्छेदकभावात्, किन्तु जपवर्षणयोर्हेतुहेतुमद्भावं संबन्धम् । स नियतक्रियाजनित इत्यनुनाऽऽवेद्यते । *स्वस्वयुक्तेति । स्वस्य, स्वयुक्तनिपातस्य वाऽर्थो यत् फलमित्यर्थः । *अन्यतरत्वस्येति । तद्भिन्नत्वे सति तद्भिन्नो यः तद्भिन्नत्वं हि तत् ॥ १७ ॥

(क० टी०) एवं सामान्यतो विशेषतश्च केषांचित्तदर्थमर्थान् शुद्धान् निरूप्य मिश्रिते तद्विशेषे परप्राचीनोभयोक्तनिपातविषयकमतनिरासार्थमर्थान्निरूपयति *अनुभूयते इत्यादि । वक्ष्यमाणसमत्वोपपत्तये आह *साक्षादिति । आदिना 'अलं क्रियते' इत्यादिपरिग्रहः । उभयसाधारण्येनाह *निपातानामिति । *साक्षात्कारेति । तदादीत्यर्थः । प्रकृतानुरोधेन तु तावन्मात्रमुक्तम् । *सकर्मकत्वमिति । तथाच तद्रूपकर्मणि लादिसिद्धिः । *एतेन-एषां सकर्मकत्वं न स्यादनुभवादिफलस्य निपातार्थत्वे ऽपि इति शेषः । *धात्वर्थफले एवेति । प्रत्यासत्तेः । अन्यथा 'वनं त्यजति' इत्यादौ ग्रामादिनाऽपि सकर्मकत्वापत्तेरिति भावः । अथ प्रसङ्गात्तदर्थं तन्निरूपयति *द्योतकत्वं चेति ।

अत्र केचित्—तत्तद्धातोस्तत्र तत्रार्थे लक्षणा निपातास्तात्पर्यग्राहकाः, एतदेव द्योतकत्वमित्याहुः ।

अन्येतु-अनेकार्थत्वाद्धातूनां तत्राप्यर्थे शक्तिः, उपसर्गसमभिव्याहारस्तु तादृशशक्त्युद्बोधकः । शक्त्युद्बोधकत्वमेव च द्योतकत्वम् । इदमेव शक्त्याधायकत्वपदेनोच्यते व्यतिसे इत्यादावित्याहुः । *वृत्त्युद्बोधेति । एतेन जये क्लृप्तशक्तेः प्रकर्षे शक्तौ तेषां शक्त्यवच्छेदकत्वम् । शक्ततावच्छेदके विशेषणत्वमात्रमेव तत्त्वम् । एवञ्च प्रोत्तरजित्वेन प्रकर्षे शक्तिः । नच जिपूर्वप्रत्वेन शक्तिः । अधिककल्पनापत्तेः, आख्यातार्थानन्वयप्रसङ्गाच्च । शक्त्यवच्छेदकत्वमेव च द्योतकत्वमिति-तदर्थं विशेषमाह *प्रायेणेति । तत्फलमाह *क्वचिदिति । ननु 'लिखना-

स्ते भूमिम्' इतिवदत्र कुतो न,अत आह *प्रादेशमिति । *विमाय-परिच्छिद्य। वि-प्रादेशपदोपादानेन वक्तुस्तथैव तात्पर्यात् । अन्यथा तदुक्त्यसङ्गतिः स्पष्टैव । लिखधातोर्जीवत्यादिवदकर्मकत्वात् । अक्षररूपकर्मणो धात्वर्थेनोपसंग्रहात् । नचैवं कथं दृष्टान्ते इति वाच्यम् । तत्र बहुदिनव्यापिमानवतीं प्रति सखीवाक्ये-त्वत्प्राणवदस्माकं रक्षणीयोऽपि-भूमिं नतु भूमौ,तेनाकाङ्क्षितकर्मणः अनुद्देश्यत्वं ध्वन्यते। लिखन् नतु लिखतीति, तेन लिखनस्याबुद्धिपूर्वकत्वरूपमप्राधान्यं ध्वन्यते । बहिर्नतु मध्ये, तेन नायकस्यात्युद्वेगः। आस्ते न त्वासीत्, तेनैवमवस्थानस्य प्रसादपर्यन्तता ध्वन्यते-इत्यर्थेन धातूनामनेकार्थतया रेखाऽनुकूलव्यापारार्थकत्वेनादोषात् । तृतीयमाह *क्वचित्त्विति । सम्बन्धविशेषेत्यर्थः । इदं च "कर्मप्रवचनीया" इत्यत्र भाष्ये स्पष्टम् । तत्र हि-"कर्म प्रोक्तवन्तः कर्मप्रवचनीयाः । के पुनस्तथा ये सम्प्रति क्रियान्नाहुः । ये अप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीया" इत्यन्वर्थसंज्ञात्वमुक्तम् ।

तत्र हरिः—

क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः ।

नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः ॥ इति ।

तथाच भाष्ये क्रियापदम् अग्रे तत्सम्बन्धपरमिति भावः।द्वितीयस्योदाहरणान्तरमाह *अथेति । अनेकक्रियाविषयस्यापि शब्दानुशासनस्य आरभ्यमाणताऽथशब्दसंनिधाने प्रतीयते इति कैयटः। आदिना मिश्राद्युक्त्यादि। सर्वथा तदनियमायाह *एवमिति । ननु लोके तत्राविलक्षणत्वादाह *अडादीति । आदिना द्विर्वचनम् । नैयायिकमतं खण्डयति *एतेनेति ।

इत्थं हि तदाकूतम्—प्रजयतीत्यादौ प्रकृष्टजयादिर्नोपसर्गवाच्यः । एवं हि तस्याप्रकृत्यर्थतया ऽऽख्यातार्थकृतावनन्वयापत्तेः । "प्रत्ययानाम्" इति व्युत्पत्तेः । नच जयो धात्वर्थः, प्रकर्षः प्रशब्दार्थः । नामार्थधात्वर्थयोर्विभक्त्यर्थमद्वारीकृत्य साक्षाद्भेदसम्बन्धेन नान्वय इति व्युत्पत्त्या तस्य तथाऽपि धात्वर्थे ऽन्वयासम्भवात् । नच विशिष्टजयो धात्वर्थः । अर्थान्तरस्यैवोपसर्गं विनाऽप्येतदर्थप्रत्ययापत्तेः । तस्मात् 'जये कॢप्तशक्तेरित्यादितत्त्वम् इत्यन्तं' प्रागुक्तं बोध्यम् ।

किञ्चानुभूयते सुखमित्यत्र तस्य तद्वाचकत्वे धातोरकर्मकत्वात् कर्मणि लाद्यनापत्तिः । स्वार्थफलव्यधिकरणव्यापारवाचकत्वस्यैव सकर्मकत्वाद् । अन्यथा यत्किञ्चित्फलवैयाधिकरण्यस्य सर्वत्र सत्त्वेनातिप्रसङ्गात् । तस्मादुपसर्गाणां द्योतकत्वम्, चादयस्तु वाचका एव । 'साक्षात्क्रियते' इत्यादौ विषयतासम्बन्धेन प्रत्यक्षादिरूपतत्फलवाचकत्वस्य साक्षात्पदादेः सम्भवात् तदुत्पत्त्यनुकूलो व्यापारो धात्वर्थः । तथाच 'साक्षात् क्रियते गुरुः' इत्यादौ गुर्वभिन्नाश्रयनिष्ठो विषयतासम्बन्धेन यः साक्षात्कारस्तदुत्पत्त्यनुकूलो व्यापार इत्यादिबोध इति । तदाह *तदितरेति । तस्य तत्त्वे मानमाह *साक्षादिति ।

अलम्भूषणपर्याप्तशक्तिवारणवाचकः ।
उर्यूरी चोररीच विस्तारेऽङ्गीकृतौ त्रयम् ॥—

इत्यपि बोध्यम् । नन्वर्थविशेषान्तर्भावेणाकर्मकत्वादिविभजनादत्र प्रत्यक्षाद्यर्थे कथं कर्मणि लः ? । फलव्यधिकरणव्यापारवाचित्वमेव सकर्मकत्वमिति तु न युक्तम् । अनुपदं किञ्चेत्याद्युक्तदोषापत्तेः। तथाच तस्य धात्वर्थत्वादर्थादेषां द्योतकत्वमेवावश्यकमिति कथं तत्त्वमत आह *सकर्मकत्वञ्चेति । नन्वेवमप्यनतिप्रसङ्गाय धात्वर्थफलाश्रयत्वस्यैव कर्मत्वेनात्र तदभावात्कर्मत्वमेव तस्य कथमत आह *कर्मत्वमपीति । *एतादृशेति । स्वस्वयुक्तनिपातान्यतरार्थफलेत्यर्थः । एतेनेत्यस्यार्थमाह *वैषम्येइति । "नामार्थधात्वर्थयोः" इत्याद्युक्तरीत्या तत्र तथात्वे अत्रापि तथा । एतदनुरोधेन तद्व्युत्पत्तेर्निपातातिरिक्तविषयत्वम् । तत्राऽपि वाचकत्वमेवोचितम् । स्तोकं पचतीतितुल्यता तु द्योतकत्वं विनाऽनुपपन्नेति भावः, तदाह *अनुभूयते इति । सिद्धान्तमतेन दोषमाह *कर्मेति । *बोधस्येति । ततः शब्दमर्यादया ऽप्रतीतेरिति भावः । अतिगुरुत्वं दुर्ज्ञेयत्वे हेतुः । तस्य च भेदघटितत्वेनैतदुभयभिन्नानेकज्ञानसापेक्षत्वेन, यावतस्तस्य ज्ञानासम्भवेन च तत्त्वात्तत्वाबो- त्यर्थः ॥ १७ ॥

यत्तु—उपसर्गो द्योतकः उपसर्गत्वादित्यनुमानेन

परेणोपसर्गाणां तत्त्वसाधने, शक्तिसंबन्धेन निपातपदवत्त्वरूपमखण्डं वा निपातत्वं पक्षतावच्छेदकीकृत्य निपातत्वेनैव हेतुना वाचकत्वाभावसाधनं युक्तम्, प्रमाणानां सामान्ये पक्षपातादिति ।

तन्न । ततो ऽपि सामान्यधर्मान्वयत्वावच्छेदेनैव तत्सिद्ध्यापत्तेः ।

निपातत्वं द्योतकताग्रहे ऽवच्छेदकमिति तु न युक्तम् ।

तत्तदर्थनिरूपितद्योतकत्वस्य तत्तन्निपातवृत्तितया तद्वृत्त्यसाधारणधर्मस्यावच्छेदकत्वावश्यकतया सामान्यधर्मस्यावच्छेदकत्वे मानाभावात् । निपातत्वाद्यजानतोपि बोधाच्च ।

यदपि निपातानां वाचकत्वे 'शोभनः समुच्चय' इतिवत् 'शोभनः च' इत्यस्यापत्तिः । 'घटस्य समुच्चय' इत्यस्य स्थाने 'घटस्य च' इत्यस्याप्यापत्तिरिति ।

तन्न । शब्दशक्तिस्वाभाव्येन नित्यपरतन्त्रतया निपातैः स्वार्थस्य विशेषणत्वेनैव बोधेन विशेषणान्वयाप्रसङ्गात्, षष्ठ्यप्राप्तेश्च ।

किञ्च 'घटं पटं च' इत्यादौ घटमित्यस्य क्रिययामेवान्वयः । अत एव ततो द्वितीया । 'घटं समुच्चयवन्तं पटं पश्य' इति बोधः ।

तत्र समुच्चयस्य प्रतियोग्याकाङ्क्षायां सन्निहितत्वात् घटस्य प्रतियोगित्वम् । पटे तु समुच्चयस्य भेदेनान्वयो नतु पटस्य समुच्चये इति क्व षष्ठ्यापादनम् ।

नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया ।

वस्तुतो ऽव्ययेषु नामत्वमेव नेत्यग्रे वक्ष्यामः । अत एव समुच्चेयानन्तरं चादिप्रयोग इति वृद्धाः ।

यद्वा समुच्चितश्चार्थः । स्वभावतश्चाद्युपस्थाप्यस्यासत्त्वभूतत्वम् ।

तदुक्तम्—

समुच्चिताभिधाने च व्यतिरेको न विद्यते । इति ।

धर्म्यंशे शक्तिकल्पनागौरवं प्रामाणिकत्वान्न दोषाय १८ ॥

(कुं० टी०) *उपसर्गत्वादिति । नन्वेवं पक्षतावच्छेदकहेत्वोरैक्ये सिद्धसाधनमिति चेत्। सत्यम् । संज्ञारूपोपसर्गत्वं पक्षताऽवच्छेदकम्, द्योतकोपसर्गसजातीयत्वं च हेतुः। *परेण—तार्किकेण। *तत्त्वसाधने—द्योतकत्वसाधने । *वाचकत्वाभावेति । अनर्थकनिपातानां द्योतकत्वाभावादिदमुक्तम् । *तत्तदर्थेति । निपातविशेषेणार्थविशेषस्यैव द्योतनान्न सामान्यधर्मोऽवच्छेदक इत्यर्थः । *तद्वृत्तीति । एकैकमन्यत्रावृत्तीत्यर्थः । *शब्दशक्तीति । यथाहि एकैव पचिक्रिया पाक इत्यनेन सत्त्वभूताऽभिधीयते, पचतीत्यनेन चासत्त्वभूता एवं शब्दशक्तिस्वभावान्निपातानामपि नित्यपरतन्त्रत्वमेवेति न षष्ठी, नापि विशेषणयोग इत्यर्थः । *नामत्वमेवनेति । "चत्वारि पदजातानि" इति निरुक्ते नामनिपातयोः पृथगुपादानात् । तथाच नामार्थयोरभेद इत्यादेर्नायं विषयः । *अत एव—घटमित्यादेः पश्येत्यादावन्वयादेव । चादीनां समुच्चयाद्यर्थत्वे एव षष्ठ्यापत्तिः । सा तु ना-

स्तीत्याह *यद्वेति । ननु समुच्चिताभिधायकत्वे लिङ्गसंख्या-योगापत्तिरत आह *स्वभावत इति । अतएव 'शोभनश्च वृक्ष' इत्यपि न प्रयोगः। ननु समुच्चिताभिधाने द्रव्यवाचित्वान्निपातसंज्ञानापत्तिरिति चेन्न । असत्त्वभूतस्यैवाभिधानात्। *व्यतिरेकः—पृथगर्थोपस्थापकता। तेन न पूर्वोक्तदोषः । तदुक्तं हरिणा—

समुच्चिताभिधानेऽपि विशिष्टार्थाभिधायिनाम्।
गुणैः पदानां सम्बन्धः परतन्त्रास्तु चादयः॥ इति।

गुणैर्विशेषणैः पदानां विशिष्टार्थाभिधायिनां सम्बन्धो भवति, निपातानां तु शब्दशक्तिस्वाभाव्यात्परतन्त्रत्वमेवेति-तदर्थः॥ १८॥

(क० टी०) कौस्तुभाद्युक्तिं खण्डयति *यत्त्विति । *उपसर्ग-स्तत्पदवाच्यः। नातो हेतुपक्षतावच्छेदकयोरैक्यम्। *अनुमानेन। व्यतिरेकिणा। *परेण—नैयायिकेन । साधने इत्यस्य—दोषादुक्ते इति शेषः। चतुष्टयीपक्षे आह *शक्तीति । त्रयीपक्षे आह *अखण्डं वेति। उपाधिरूपं जातिरूपं वेत्यर्थकत्वे सति चादिगणादिपंठितत्वरूपं सखण्डमपि सम्भवति, तथाऽपि तस्य चादिगणादिभेदेनाननुगतत्वमिति तत्त्यागः। *निपातत्वेनैव—निपातपदवाच्यत्वेनैव। एतेन सामान्यावच्छेदेन तत्साधकहेतोरुभयवादिसंमतस्याभावादिदमयुक्तमित्यपास्तम् । अत्र पक्षे तद्वत् द्योतकत्वं न साध्यम्, अनर्थकनिपातेषु तादृशनिपातत्ववत्सु द्योतकत्वाभावेन व्यभिचारादत आह *वाचकत्वाभावेति। एवञ्च सम्भवे द्योतकत्वमार्थसमाजग्रस्तमिति भावः। युक्तत्वे हेतुमाह *प्रमाणानामिति । प्रमाकरणानां व्यापकधर्मग्रहादित्यर्थः। व्याप्यत्वेन गृहीतधर्मोपस्थितौ व्यापकधर्मोपस्थितेरावश्यकत्वादिति भावः । प्रमाणस्य सामान्यावच्छेदेन प्रवृत्तौ बाधकाभावसहकृतं लाघवं बीजमिति तत्त्वम्। *तत्सिद्ध्यापत्तेरिति। नचेष्टापत्तिः। स्वरादीनामपि स्वातन्त्र्येण प्रयोगानापत्तेः । अतएव अन्यथा भूषणाद्युक्तिश्च-

ण्डयति *निपातत्वमिति । तद्रूपमित्यर्थः । व्यापकत्वेन उक्तन्यायादिति भावः । एवञ्च नोक्तदोष इति तात्पर्यम् । सामान्यग्रहस्यानुपयोगादाह *तत्त्वादिति । *तद्वृत्तीति । तत्तद्वृत्तीत्यर्थः । ननु "यद्विशेषयोः" इतिन्यायेन तस्याप्युपयोग एव, अत आह *निपातत्वादीति । तथा चासति बाधके तथाऽङ्गीकारेऽपि प्रकृते बाधकसत्त्वान्न तथेति भावः । कौस्तुभाद्युक्तिमेवान्यां खण्डयति *यदपीति । धातुघञाद्युपस्थाप्यक्रिययोरिव. रामावित्यादौ द्वित्वादेः परविशेषणत्वे एव साधकप्रत्ययानामितिव्युत्पत्तिवदत्र गमकाभावात्स्वातन्त्र्येण पदादुपस्थितिसत्त्वादिदं दुर्वारमितिभूषणासाङ्गत्यायाह *शब्दशक्तीति । "पदार्थः" इति न्यायात्, तस्य तत्र प्रतियोगितयाऽनन्वयाच्चेति भावः । षष्ठीप्राप्तिमभ्युपेत्यान्त्ये वारितम् । वस्तुतः सैव नेत्याह *किञ्चेति । *द्वितीया-द्वितीयादि । अनतिप्रसङ्गायार्थिकार्थमाह *तत्रेति । विशेषणे इत्यर्थः । *घटस्य—तस्यैव । एवं च तत्र तस्य शाब्दान्वयाभावान्न तदापत्तिरिति भावः । तदाह *केति । 'नन्वेवमपि' "नामार्थयोः" इति प्राचां मतमभ्युपेत्येदम् । वस्तुतोऽयुक्तमेतदित्याह *वस्तुत इति । *अग्रे-अत्रैव प्रकरणेऽनुपदमेव । *अत एव-तेषां नित्यपरतन्त्रतया विशेषणत्वेन घटादेस्तत्र शाब्दान्वयाभावेन तस्यैव तत्र शाब्दान्वयेन । द्वन्द्वादौ तु मिथःसमुच्चयार्थमनेकचप्रयोग इति बोध्यम् । एतेन निपातानां वाचकत्वेऽभेदान्वयापत्तिर्निपातातिरिक्तत्वविशेषणदाने मानाभावश्चेति कौस्तुभभूषणाद्युक्तदोषोऽपि परास्तः । शब्दशक्तिस्वभावादराविशेषात । पररीत्या परमतेनैव तदभावप्रयुक्तलाघवादाह *यद्वेति । 'समुच्चितः स घट' इत्यभेदेनैवान्वयान्न भेदनिबन्धना षष्ठी, नापि तद्विशेषणांशदानम्, नापि शोभनाद्यन्वयः,एकदेशत्वादिति भावः । नन्वेवं सत्त्वार्थकत्वाद्विभक्तिश्रवणापत्तिरत आह *स्वभावतइति । शब्दशक्त्यादिः । *चादीति । समुच्चितानभिधाने निपातेभ्यो विभक्तिरेव न स्यात्तावत्तेषामर्थसत्त्वाभावेन प्रातिपदिकसंज्ञाया अभावात् । किञ्च नञ्समासादावुत्तरपदार्थः प्रधानमिति व्यवस्था न स्यात्, पूर्वपदस्य नञादेरनर्थकत्वादिति चाद्युपस्थाप्यत्वं तस्य आवश्यकं किन्तु तस्य तत्रासत्त्वभूतत्वम् । समुच्चितपदोपस्थाप्यत्वे तु तस्य सत्त्वभूतत्वमेव । अत्र हरिसंमतिमाह *तदुक्तमिति । *समुच्चितेति ।

प्रत्ययो वाचकत्वे ऽपि केवलो न प्रयुज्यते।

इत्यस्यादिः। यद्यपि प्रत्ययपरत्ववदेषां परत्वं न स्मर्यते, तद्बोध्यार्थस्य विना सम्बन्धिनमनन्वयात्केवलाप्रयोगः, चोऽप्यर्थे। तेन पूर्वमतसमुच्चयः। अतएव तेनैवोक्तम्—

समुच्चिताभिधानेऽपि विशिष्टार्थाभिधायिनाम्।

गुणैः पदानां सम्बन्धः परतन्त्रास्तु चादयः॥ इति,

तथाऽपि विशेषतस्तयोरुपस्थितिं विना प्रतीतेरपर्यवसानान्नित्यपरतन्त्रतैवेति न भिन्नप्रयोग इति भावः। इदं पूर्वमतेऽप्यावश्यकम्। एवञ्च पूर्वत्र स्वभावद्वयाश्रयणमत्रतु एकस्यैवेति लाघवतरमिति गूढाकूतम्। *धर्म्यंशे—समुच्चिते। घटस्यचेति विना विभक्त्यर्थं तयोर्भेदनान्वयायोगादन्यथाऽतिप्रसङ्गापत्तेरन्यथाऽन्वयायोगादिति भावः। घटादेर्विशिष्टशक्तिवदिति भावः॥ १८॥

निपातानामर्थवत्त्वमपि द्योत्यार्थमादायैव। शक्तिलक्षणाद्योतकताऽन्यतमसंबन्धेन बोधकत्वस्यैवार्थवत्त्वात्।

नञ्समासे उत्तरपदार्थप्राधान्यमपि द्योत्यार्थापेक्षयैव।

प्रतिष्ठत इत्यत्र तिष्ठतिरेव धातूनामनेकार्थत्वाद्गतिवाची। प्रशब्दस्तु तदर्थकत्वस्य, तद्गतादित्वस्य च बोधक इति भूवादिसूत्रे भाष्ये स्पष्टम्।

यद्यपि लोके विशिष्टादेव विशिष्टबोध इति विशिष्ट एव क्रियावाची, तथाप्यडादिव्यवस्थार्थं धातूपसर्गयोः पृथक् कल्पनम्।

एवञ्चान्तरङ्ग उपसर्गयोगः। अत एव 'उपास्यते गुरुः' इति कर्माणि लकारः। एतन्मूलक एव "पूर्वं धातुरुपसर्गेण युज्यते" इति प्रवादः। बाह्यश्च

साधनयोगः। अत एव संचस्कार इत्यादौ पूर्वं सुट्, ततः साधनप्रयुक्तकार्यम्। अध्ययनमित्यादौ 'प्रत्यय' इत्यादिनिर्देशेन क्वचित्प्रत्ययनिमित्तकार्यात् प्राग् उपसर्गनिमित्तकार्याप्रवृत्तेर्ज्ञापनेनादोषः । एतन्मूलकमेव पठ्यते "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति" इति नव्याः ॥ १९ ॥

(कुं० टी०) *साधनयोगइति। साध्यतेऽनेनेति साधनं कारकम्। तद्वाची च प्रत्ययः साधनशब्देनोच्यते। *अध्ययनमिति। अत्र धातूपसर्गयोः सवर्णदीर्घः प्राप्तः ॥ १९ ॥

(क० टी०) एवं वाचकत्वे तेषां परोक्तदूषणानि संखण्ड्य प्रागुक्तयुक्त्याऽऽवश्यके तेषां द्योतकत्वे सिद्धान्तमादाय परोक्तदूषणद्वयमुद्धरति *निपातानामित्यादि। *आदायैवेत्यस्य बोध्यमिति शेषः। एतेन साक्षादित्याद्यनुशासनादेरप्येवमेवोपपत्तिरिति सूचितम्।

ननु शक्तिलक्षणाऽन्यतररूपवृत्त्यर्थबोधजनकत्वरूपार्थवत्त्वम् अर्थवत्-सूत्रे ऽनतिप्रसङ्गाय निविष्टमिति कथं ततो निर्वाहः।

यत्तु भूषणादौ–संख्यान्वयाभावाद्वा एकाज्द्विर्वचनन्यायाद्वा, तथाऽपि लुकाऽदोषाद्वा, राम इत्यादे राजपुरुषादिवत्समासत्वाद्वा, यद्यपि नातिप्रसङ्गः तथापि आद्ये निपातानामपि संख्याद्यभावाद्विभक्तिर्न स्याद् औत्सर्गिकैकवचनाङ्गीकारे राम इत्यादावपि ततस्तदापत्तिः; एकाज्द्विर्वचनन्यायस्यापि नायं विषयः, समुदायकार्येणावयवानामननुग्रहाद्, एवं च तथा कैयटाद्युक्तं चिन्त्यम्; तृतीये प्रातिपदिकानवयवत्वाल्लुको ऽप्राप्त्या विभक्तिश्रवणापत्तिर्धनमित्यादौ जश्त्वनलोपापत्तिरिति । अतश्चतुर्थपक्षोऽप्यसङ्गतः। तस्मात् "अव्ययादाप्सुपः" इति ज्ञापकादेव न विभक्त्युत्पत्तिरिति केचित्।

"निपातस्य" इति वार्त्तिकादित्यन्ये । तस्य "अधिपरी" इति ज्ञापकेन प्रत्याख्यानपक्षे तस्य सामान्यापेक्षत्वाश्रयणेन सिद्धिरित्यपरे ।

"कृत्तद्धित" इत्यत्रानुक्तसमुच्चयार्थचेन तेषां संग्रह इति दीक्षिता इति तत्त्वमित्याहुः, तन्न ।

औत्सर्गिकैकवचनस्य गमके सत्येवाङ्गीकारात् । अत एव जश्त्वाद्यापत्तिर्न । "सुपो धातु" इति लुको धातुसाहचर्येण सुबन्त्यानेकघटितप्रातिपदिकावयवस्यैव सुपोऽङ्गीकारात् । वार्त्तिकस्य प्रत्याख्यानात् । तस्य सामान्यापेक्षत्वे मानाभावात् । चकारस्यानर्थकसंग्राहकत्वस्य भाष्यादावुक्तत्वाच्च ।

तदेतद् ध्वनयन्नाह *शक्तीति । तादृशार्थवत्त्वस्यैव तत्सूत्रे निविष्टत्वादित्यर्थः । एतदर्थमेव व्यञ्जनावृत्तिस्वीकार इत्युक्तं प्राक् ।

एतेन विषयतापर्याप्त्यधिकरणत्वस्य निवेशेन तत्रादोषः । विशिष्टे एव तत्सत्त्वात् । प्रकृते तु प्रादेरेव तात्पर्यग्राहकत्वादुक्तरीत्याऽर्थधीप्रयोजकतया तत्प्रयोजकधीविषयतापर्याप्त्यधिकरणत्वस्यैव सत्त्वेनादोष इत्यपास्तम् ।

क्लिष्टत्वात्, व्यतिलुनत इत्यादौ दोषापत्तेश्च ।

नन्वेवं प्रातिपदिकत्वेऽपि संख्याद्यभावात्कथं विभक्तिरिति चेन्न। "अव्ययादाप्" इति ज्ञापकात् "तद्धितश्च" इति सूत्रभाष्योक्त्या सर्वविभक्त्येकवचनाङ्गीकारात् ।

एवमुपसर्गान्यनिपातानां द्योतकत्वे वाचकत्वे च व्यवस्थितत्वेनोक्ते ऽप्युपसर्गाणां सर्वथा द्योतकत्वमेव, अन्यथा प्रतिष्ठत इत्यत्र गमनत्वेन रूपेण बोधानापत्तेः। ष्ठाधातोर्गतिनिवृत्त्यर्थकत्वे ऽभावस्य प्रशब्दार्थत्वे गत्यभावो नास्तीत्येव प्रत्ययापत्तेः । न चात्र तथाबोधसम्भावनाऽपि गत्यभावसम्बन्धित्वेनानुपस्थितेः, अन्यथा घट अभाव इत्यत्रापि तथाबोधापत्तेः। नञ्समभिव्याहारे चानादिसिद्धतथाव्युत्पत्तिस्वीकारान्न दोषः । नापि तथाबोधानुभवः। अतस्तेषां द्योतकत्वमेव ।

तदेतद् ध्वनयन् तत्र भाष्यसंमतिमप्याह *प्रतिष्ठत इति । इत्यत्रापीत्यर्थः। *तदर्थेति । धातोरित्यादिः । *तद्गतादित्वेति । गतिनिष्ठादित्वेत्यर्थः । आदिकर्मेति यावत् । *भूवादीति ।

तत्रहि "क्रियावचने धातावुपसर्गप्रत्यययोः प्रतिषेधः" इति वार्त्तिकखण्डनावसरे "प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे" इति प्रतिपाद्य, "क्रियाविशेषक उपसर्गः, प■ती-

त्यत्र क्रिया गम्यते, तां प्रो विशिनष्टि" इत्युक्त्वा, तत्र धातोरुपसर्गव्यभिचारवदध्येतीत्यादौ उपसर्गस्य धातुव्यभिचारेण निर्वाहं कृत्वा, "इह तर्हि व्यक्तमर्थान्तरं गम्यते, तिष्ठति प्रतिष्ठते" इति, आद्ये व्रजिक्रियानिवृत्तिरन्त्ये व्रजिक्रिया अतः "मन्यामहे उपसर्गकृतमेतद् येनात्र व्रजिक्रिया गम्यत इति । प्रोऽयं दृष्टापचारः आदिकर्मणि वर्त्तते । नचेदं नास्ति बह्वर्था अपि धातवो भवन्ति" इति । वप्यादौ यथेदं तथाऽत्रापि "तिष्ठतिरेव व्रजिक्रियां तन्निवृत्तिं चाह" इत्युक्तम् । प्रोऽयमिति, अन्यत्रापि प्रयोगात् । ततश्चान्यत्रास्य यो ऽर्थो द्योत्यः स एवेहापीत्यनुमीयते । अनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतिवाचीति निर्णय इति कैयटः ।

विशेषं वक्तुं तत्र प्रागुक्तमपि शङ्कापूर्वं भाष्यतात्पर्यत्वेनाह *यद्यपीत्यादि । *पृथगिति ।

तदुक्तं हरिणा—

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥ इति ।

तादृशोऽखण्डः । तदेवाह *एवं चेति । लोके विशिष्टादेव विशिष्टबोधेन भेदस्य कार्यार्थं कल्पितत्वेन चेत्यर्थः । *अतएव—अन्तरङ्गत्वेन तदर्थकत्वादेव । *इतीति । इत्यादौ । तेनानुभूयते सुखमित्यादिपरिग्रहः । एतेन परिभाषेयं स्वतन्त्रेति सीरदेवाद्युक्तिनिरासः । *प्रवाद इत्यनेनानार्षत्वं सूचितम् । उपस्थितिक्रमादेव तत्त्वमित्याह *बाह्यश्चेति । *अतएव—तयोर्यथाक्रममन्तरङ्गत्वबहिरङ्गत्वाभ्यामेव । एवञ्च "अभ्यासव्यवायेऽपि" इति न कार्यमिति भावः । नन्वेवमध्ययनमित्याद्यसिद्धिः । पूर्वमुपसर्गयोगे तन्निमित्तदीर्घः ततो ल्युटि गुणे अधयनमित्यापत्तेरत आह *अध्ययनमिति । आदिना "णेरध्ययने" इत्यादिपरिग्रहः । अनतिप्रसङ्गायाह *काचिदिति । एवः प्राग्वत् । एवंच द्योतकत्वमपि प्रक्रियादशायां तन्निर्वाहार्थं काल्पनिकमेवेति तत्तात्पर्यम् । *नव्याः—दीक्षितादयः ॥ १९ ॥

वस्तुतस्तु "सुट् कात्पूर्वः" "गतिर्गतौ" इत्यत्र भाष्ये उक्तम्—"धातूपसर्गयोः कार्यमन्तरङ्गम् । कुत एतत् । पूर्वं हि धातुः उपसर्गेण युज्यते पश्चात्साधनेनेति" ।

उपसर्गेण तत्संज्ञकेन, साधनेन तत्प्रयुक्तकार्येणेति तदर्थः ।

इतर आह–"नैतत्सारम् । पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टि" इति ।

साधनेन तत्प्रयुक्तकार्येण । हि यतः साधनं क्रियान्निर्वर्त्तयति साध्यत्ववैशिष्ट्येन बोधयति, अतः पूर्वं तत्प्रयुक्तकार्यमिति भावः । तदुक्तं भूवादिसूत्रे कैयटेन--'साधनसम्बन्धेनावसीयमानसाध्यरूपा' इति । निश्चीयमानसाध्यतेत्यर्थः । ताम्, तेनरूपेण बुद्धाम् । उपसर्गः, तत्संज्ञकः शब्दः । विशिनष्टि, स्वद्योत्यविशेषणवैशिष्ट्येन बोधयति । साध्यत्वेन ज्ञानं विना क्रियायोगे विहितोपसर्गसंज्ञकशब्दैर्योगाज्ञानादिति तदर्थः । क्रियायोगश्च क्रियाविशेषणीभूतार्थद्योतकत्वमेव ।

इतर आह "सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते । अवश्यं च एतदेवं विज्ञेयम् । यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति, तस्य 'आस्यते गुरुणा' इत्यकर्मकः 'उपास्यते गुरुः' इति केन सकर्मकः स्याद्" इति ।

एवमेतत्, 'पूर्वं धातुः साधनेन युज्यते' इति यदुक्तं तत्सत्यमेव । तत्सम्बन्धं बिना साध्यत्वेन प्रतीतेरपर्यवसानात् । कथं तर्हि उपसर्गकार्यस्यान्तरङ्गत्वं तत्राह–"यस्त्वसौ" इति । यस्तव धातू-

पसर्गसम्बन्धकृतत्वेनाभिमतो ऽर्थस्तमुपसर्गसंज्ञकसम्बन्धमन्तरेणापि धातुरभ्यन्तरं कृत्वाऽर्थत्वेनाङ्गीकृत्य साधनेन युज्यत इत्यर्थः ।

अयं भावः—वक्ता धातोरेव विशिष्टमर्थं बुद्धौ कृत्वा साधनसम्बन्धकार्यप्रत्यययोगेन तत्र साध्यत्वावगतौ श्रोतृबोधाय क्रियायोगनिमित्तोपसर्गसंज्ञकशब्दयोगं करोति । अन्यथा केवलधातुनः सर्वत्राप्रतीयमानतया श्रोतुस्तद्बोधो न स्यादिति ।

तदुक्तं "भूवादयः" इति सूत्रे कैयटेन—अनेकार्थत्वाद्धातूनां विशिष्टो ऽर्थो धातोरेवं, उपसर्गस्तु बोद्धारं प्रति तदर्थद्योतक इति ।

एवञ्च पूर्वमुपसर्गेण योगो नाम तदर्थसम्बन्धः तत उपसर्गयोगात्पूर्वं साधनकार्ययोगः ततः उपसर्गशब्दयोग इति परिभाषाद्वयार्थः ।

तदुक्तं हरिणा—

धातोः साधनयोगस्य भाविनः प्रक्रमाद् यथा ।
धातुत्वं कर्मभावश्च तथाऽन्यदपि दृश्यताम् ॥
बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः ।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ॥ इति ।

अस्यार्थः—यथा भाविसाधनसम्बन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसंज्ञोच्यते, यथा च भावीषिकर्मत्वमाश्रित्योपक्रमे एवेषिकर्मत्वमुक्तम्, तथा भाव्युपसर्गसंबन्धादुपक्रम एव विशिष्टक्रियावचनत्वं दृश्यताम् । धातूपसर्गयोः सम्बन्धं बुद्धिविषयीकृत्यो-

---

अर्थानुकरणमेतद् ।

पसर्गार्थकृतो विशेषो धातुनैवाभ्यन्तरीकृतः पदप्रयोगकाले उपसर्गसम्बन्धे सति प्रकाशते । श्रोतॄणामिति शेषः ।

तथा—

प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशेषणैः ।
प्राक् तु साधनसम्बन्धात् क्रिया नैवोपजायते ॥इति च।

प्रयोगार्हत्वं च प्रत्ययोत्पत्त्यनन्तरम् । तेषु शब्देषु सिद्धः सन्नेव विशेषणैर्भेत्तव्यः विशेष्यः । श्रोतृबोधार्थमिति शेषः ॥ २० ॥

(कुं० टी०) *पूर्वं हि धातुरुपसर्गेणेति । विशिष्टा हि क्रिया 'उपास्यते गुरुः' इत्यादौ कार्यलाभाय सम्बध्यते । एवञ्चान्तरङ्गत्वात्सुटि सञ्चस्करतुरित्यत्र गुणः सिद्धः इति भावः । *तत्संज्ञकेनेति । उपसर्गार्थमभ्यन्तरं कृत्वा पूर्वं साधनेन योग इत्यस्याग्रे व्याख्यास्यमानतया इहोपसर्गसंज्ञकशब्दयोग एव विवक्षित इति भावः । ननु "विष्वग्देवयोः" इत्यत्राप्रत्ययग्रहणेन तदादिविधेर्ज्ञापितत्वात् कथं धातूपसर्गकार्यस्यान्तरङ्गत्वमिति अत आह *नैतत्सारमिति । साधनसम्भवाद्धि धात्वर्थस्य साध्यत्वं प्रतीयते, क्रियायामेव चोपसर्गो विशेषं द्योतयति । *साध्यत्ववैशिष्ट्येनेति । साध्यत्वस्य साधननिरूप्यत्वात् । *सत्यमेतदिति । उपसर्गयोगात्पूर्वं साधनयोग इति सत्यम्, परं तु धातूपसर्गसम्बन्धकृतो योऽर्थस्तमभ्यन्तरं कृत्वा स्वबोध्यं कृत्वा साधनयोगे क्रियात्वावगतौ उपसर्गयोगः । नहि केवलधातुना सोऽर्थः प्रतीयते । *पूर्वमुपसर्गेणेति । उपसर्गार्थसंबन्धं विना उपसर्गार्थान्तर्भावेण धातोः

सकर्मकत्वासम्भवादिति भावः । *तदर्थसंबन्धइति । उपसर्गार्थसंबन्धात् पूर्वं बुद्धिस्थ इत्यर्थः । *परिभाषाद्वयेति । "पूर्वं धातुरुपसर्गेण" इति "पूर्वं धातुः साधनेन" इति च । *धातोरिति । क्रियावाचिनो धातव इत्युक्तं साधनसंबन्धाच्च प्राक् क्रियानिर्वृत्तेरसम्भवात् यथा भाविसाधनसंबन्धाश्रयेणोपक्रमे एव धातुसंज्ञा, यथा वा "धातोः कर्मण" इत्यत्र भावीषिकर्मत्वमुक्तम्, तथा भाविसंबन्धादुपक्रमे एव विशिष्टक्रियावचनत्वं तदाह *अन्यदपीति । दार्ष्टान्तिके योजयति *तथेति । भेदो विशेषः । *पदप्रयोगकाले–प्रतिष्ठते इत्यादिप्रयोगकाले । "पूर्वं धातुः साधनेन" इति पक्षेणाह *प्रयोगार्हेष्विति । प्रयोगार्हेषु धातुषु प्रसिद्धोऽर्थो विशेष्यो भवत्युपसर्गादिभिः ॥ २० ॥

(क० टी०) सर्वथैकवाक्यत्वे सम्भवति तथा व्यवस्था न युक्तेत्याद्याशयेन सिद्धान्तमाह *वस्तुतस्त्वित्यादि । अस्य बोध्यमित्यत्रान्वयः । *उक्तमित्यस्यादावित्यादिः । इतीत्यत्रान्वयः । "किमन्तरङ्गं बहिरङ्गम्" इति प्रश्ने "यद्युक्तं तदेवाश्रयणीयम्" इत्युक्त्वा युक्तं दर्शनमेवाह *धातूपेति । एवञ्च सुटोऽन्तरङ्गत्वेनासिद्धत्वाभावाल्लघुत्वाभावेन न दीर्घप्रसङ्गः । संयोगादित्वाच्च गुणसिद्धिरिति भावः । *हि–यतः । 'उपास्यते गुरुः' इत्यादिसिद्ध्यर्थमावश्यकमिदमिति तात्पर्यम् । वक्ष्यमाणार्थकत्वे दोषासङ्गतेरन्तरङ्गत्वासिद्धेश्चान्यथाऽर्थमाह *उपेति । अर्थकृतबहिरङ्गत्वादेरभावादिति भावः । उपसर्गत्वं विशेषणं नतूपलक्षणमित्याह *तत्संज्ञकेनेति । *आहेति "वर्त्तमानसामीप्ये" इति लट् । एवमग्रेऽपि । *नैतदिति । वक्ष्यमाणोऽभिप्रायः । अत्र हेतुमाह *पूर्वंहीति । हि यतः । तस्यासारतां दर्शयन्–"पूर्वं हि धातुः" इत्यस्य युक्तत्वं दर्शयति *साधनंहीति । साधनयोगेन हि साध्यत्वेन धात्वर्थप्रतीतिः, साध्यत्वस्य साधननिरूप्यत्वात् । क्रियायोगे चोपसर्गत्वमिति भावः । तदाह *तामिति । स्थितिम् । *करोतीति । एवंच संकृतीत्यवस्थायामन्तरङ्गतरार्थकसंज्ञशब्दनिमित्तत्वात् द्वित्वाद्यपेक्षयाऽप्यन्तरङ्गः सुडादिरित्यर्थः । एवञ्च प्रकृष्टतया ऽऽद्यर्थकधा-

तोः पूर्वं साधनतत्कार्यप्रत्यययोगे क्रियात्वावगतावुपसर्गसंज्ञकशब्द-योग इति भावः। विपक्षे बाधकमाह *अन्यथेति । तदयोगे इत्यर्थः । उक्तरीत्यैव व्याचष्टे *साधनेनेत्यादि तदर्थ इत्यन्तेन । एवञ्च "पूर्वं धातुरुपसर्गेण" इति न सारमिति भावः । *इतर इति । एतदङ्गीकुर्वन्नेव तस्यान्तरङ्गत्वं व्युत्पादयितुमाहेत्यर्थः । *पूर्वम्-उपसर्गसंज्ञकशब्दयोगात् पूर्वम् । *अपर्यवसानादिति । अनिश्चयादित्यर्थः । साध्यत्वस्य साधननिरूप्यत्वादिति भावः । *कथन्तर्हीति । संचस्कारेत्यादौ सुडादेरित्यर्थः । तथा नेष्टत्वादाह *यस्तवेति । धातोः पूर्वं नियमेनाकाङ्क्षितार्थत्वादाह *साधनसम्बन्धेति । *तत्र-विशिष्टेऽर्थे। *क्रियायोगेति । बहुव्रीहिद्वयम् । *धातुः-केवलधातुरेव । *अर्थत्वेन-स्वार्थत्वेन। *साधनेनेति। तस्य साध्यत्वबोधाय कारकेण युज्यते इत्यर्थः । तत उपसर्गेणेति भावः । तदुक्तं "गतिर्गतौ" इत्यत्र कैयटेन-"विशिष्टैव क्रिया साधनेन द्योत्यते । ततश्च प्रयोक्ता विशिष्टायाः क्रियायाः साधनसम्बन्धं प्रतिपादयितुं धातूपसर्गसमुदायं प्रयुङ्क्ते" इत्यादि। *यो हि मन्यते इत्यस्य शब्दसम्बन्धवदर्थसम्बन्धोऽपि पश्चादिति यो मन्यत इत्यर्थो बोध्यः । *धातोः-तत्त्वेनाभिमतस्य भ्वादेः । प्रक्रमादित्यस्य तन्निमित्तकक्रियावाचित्वस्यादावाश्रयणादित्यर्थः, तदाह *आश्रयणेनेति । *आश्रित्येत्यस्यादावित्यादिः । "भूवादय" इत्यनेनेति भावः । कर्मभावश्चेति व्याचष्टे *यथाचेति । पिपठिषतीत्यादौ "धातोः कर्मणः" इत्यनेनेति भावः । तथाऽन्यदपीति व्याचष्टे *तथाभ्युपसर्गेति । तच्छब्देत्यर्थः । तदेव विशदयति द्वितीयकारिकयेत्याह *धातूपसर्गेति । *विषयीकृत्येत्यस्योच्चारितेनेति शेषः । धातुविशेषणं सः । भेद इत्यत्रान्वितस्य तथेत्यस्य व्याख्या *उपसर्गार्थकृत इति । भेद इत्यस्यार्थः *विशेष इति । अर्थादाह *धातुनैवेति । अर्थत्वेनाङ्गीकृत इत्यर्थः । पदकाले इत्यस्यार्थः *पदप्रयोगेति । तदर्थः *उपसर्गेति । वक्तुः प्रागेव सत्त्वादाह *श्रोतृणामिति । हर्यन्तरमाह *तथेति । तद्वदित्यर्थः । *विशेषणैः-प्रादिभिः । *प्राक्त्विति । प्राक्चेति पाठेऽप्येवम् । *क्रियेति । साध्यत्वेन सा नैव प्रतीयते इत्यर्थः ॥ २० ॥

१ शेष इत्यर्थः ।

यद्यपि-

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥ इति ।

तादृश एव विशिष्ट एव-तु । धातुः क्रियावाचीत्यर्थः ।

क्रियाविशेषाः सङ्घातैः प्रक्रम्यन्ते तथाविधाः ।
कार्याणामन्तरङ्गत्वमेवं धातूपसर्गयोः ॥
साधनैर्याति संबन्धं तथाभूतैव सा क्रिया ।-

इत्यप्युक्तं हरिणा, तथाऽपि भाष्यसम्मतत्वादाद्यमेव युक्तम् । धातूपसर्गकार्यस्यान्तरङ्गत्वं तु पूर्वोपस्थितान्तर्भूतार्थकनिमित्तकत्वात । बाह्यसाधनकार्यप्रत्ययनिमित्तं तु द्वित्वादि बहिरङ्गमिति भावः ।

इदमेवाभिप्रेत्य "संप्रसारणाच्च" इति सूत्रे भाष्ये उक्तम्-अद्य आ ऊढा अद्योढा इत्यत्र धातूपसर्गकार्यत्वेनान्तरङ्गत्वाद्गुणेऽद्यशब्देन पररूपम् । कथम् । तत्कार्यमन्तरङ्गम् । पूर्वमुपसर्गस्य हि धातुना योगो भवति । धातोस्तदर्थान्तर्भावेण बोधजनकत्वस्य तत्संबन्धं विना अभावात् । अद्यशब्देन तु नाङो योगः, धात्वर्थक्रियापेक्षत्वादाधारस्य । किमर्थं तर्हि अद्यशब्दः प्रयुज्यते, आङ इव विशिष्टस्यापि अधातुत्वेनानन्वयात् । अद्यशब्दस्यापि समुदायेन योगो भवति, आङो द्योतकत्वेन विशिष्टस्य धात्वर्थत्वादिति । तेनैतद्बोधयति-पूर्वं धातोः साधनकार्ययोगस्तत उपसर्गसंज्ञकशब्दसंबन्धस्ततो भिन्नपदवाच्यकारकसम्बन्ध इति ।

एवं च साध्यत्वं निष्पाद्यत्वरूपमेव भासते इति भाष्यसम्मतम् ।

किञ्चोपसर्गाणां द्योतकत्वमेव भाष्यसम्मतम् । अतएव "उपपदमातिङ्" इति सूत्रे धातूपसर्गयोः समासमाशङ्क्य "पूर्वं धातुः साधनेन युज्यते" इति पूर्वं तिङि विशिष्टेनैव सामर्थ्यं स्यात्तत्र "अतिङ्" इति निषेधान्न तिङन्तेनैकार्थीभाव इति समाहितम् ।

पूर्वं धातोरुपसर्गसम्बन्धे, उपसर्गस्य वाचकत्वे च तत्र समासो वारयितुमशक्य एव ।

नच लकारमात्रोत्पत्त्याऽपि साधनसम्बन्धो जात एवेति तदा समासो दुर्वारः, नच तस्य काल्पनिकमर्थवत्त्वम्, विभक्तीनामपि तादृशार्थकत्वस्यार्थवत्सूत्रे भूवादिसूत्रे च भाष्यकैयटयोः स्पष्टत्वादिति वाच्यम् । साधनस्य संख्यावैशिष्टयनियमेन संपूर्णतदाकाङ्क्षानिवर्त्तकतिङामुत्पत्त्यैव तदाकाङ्क्षानिवृत्तेः । तिङ्पदे च तिङ्भाविनो ऽपि ग्रहणाच्च ।

नचैवं परमगार्ग्यस्यापत्यमित्यर्थे परमगार्ग्यायण इत्यादौ परमसंसृष्टस्यापि गार्ग्यस्य केवलस्यापत्येनैकार्थीभावाद्गार्ग्यशब्दादेव फक्, अतएव पकाराकारस्य न वृद्धिरिति "येन विधिस्तदन्तस्य" इति सूत्रे भाष्ये स्पष्टम्, तद्रीत्याऽत्रापि समासो दुर्वारः, तिङर्थरहितेनापि सामर्थ्यस्य सुवचत्वादिति वाच्यम् ।

वक्ष्यमाणरीत्या तिङां कर्त्रादिद्योतकत्वेन विशिष्टस्य धात्वर्थत्वात् तस्य वक्तुमशक्यत्वात् । तत्रा-

द्युपसर्गार्थोऽन्तरङ्गः तद्विशिष्टस्य साधनाकाङ्क्षत्वात् । द्योत्योऽपि कर्त्रादिर्बहिरङ्गः ॥ २१ ॥

(°कुं० टी०) *अडादीनामिति । अडादिव्यवस्थार्थमेव धातवः पृथगुपदिष्टाः । सोपसर्गा एव तु विशिष्टक्रियावचनाः । *विशिष्ट एव-उपसर्गविशिष्ट एव । तत एव लोके बोधात् । संग्रामयतौ सोपसर्गस्यैवाडादिदर्शनेनोपक्रम एवोपसर्गविशिष्टः क्रियाप्रणयनात्तत्कार्यमन्तरङ्गमित्यर्थः । *तथाभूतैव-उपसर्गविशिष्टैव । कारकसम्बन्धं याति । *आद्यमिति । "पूर्वं धातुःसाधनेन" इति । *बाह्येति । बाह्यं यत्साधनं तस्य यत् कार्यं प्रत्यय इत्यर्थः । आशङ्कते *कथमिति । समाधत्ते *तत्कार्यमिति । *तदर्थान्तर्भावेण-उपसर्गार्थान्तर्भावेण । *अद्यशब्देनान्विति । अद्यशब्दस्याधारवाचित्वादाधारस्य च क्रियापेक्षत्वादिति भावः । किमर्थं तथेत्यत्रैव हेतुमाह *आङइवेति । आङो यथा न धातुत्वन्तथेत्यर्थः । *विशिष्टस्य-आङ्विशिष्टस्य । *अनन्वयात्-अन्वयासम्भवात् । तेन सह अद्यशब्दस्येत्यादिः । समाधत्ते *अद्यशब्दस्यापीति । *समुदायेनेति । उपसर्गद्योत्यार्थसहितधात्वर्थेनेत्यर्थः । *विशिष्टेनैवेति । तिङन्तेनैव समासो वाच्यस्तत्र "अतिङ्"इति निषेध एवेत्यर्थः । *तदा-लावस्थायाम् । *नचतस्येति । नहीत्यर्थः । काल्पनिकमिति यदुक्तं तत्समाधत्ते *विभक्तीनामपीति । *तादृशार्थकत्वस्य-कल्पितार्थकत्वस्य । *तिङामुत्पत्त्यैवेति । एवञ्च न लकारावस्थायामेकार्थीभावसम्भवः । *तिङ्भाविनोऽपीति । एवञ्च "अतिङ्"इति निषेधान्न समासप्राप्तिः । *नचैवमिति । परमगार्ग्यशब्देन यथैकार्थीभावात्फक् एवं तिङ्पूर्वभागे ऽप्येकार्थीभावो ऽस्त्वित्यर्थः ।

*विशिष्टस्य—तिङर्थविशिष्टस्य । तथाच तेनैकार्थीभावासम्भव इति भावः । *तस्य—समासस्य । बहिरङ्गत्वे बीजमाह *तद्विशिष्टस्येति । उपसर्गार्थविशिष्टस्येत्यर्थः ॥ २१ ॥

(क० टी०) दीक्षितमतसाधकहर्यन्तराविरोधमाह *यद्यपीति । शास्त्रे इत्यन्तं पूर्वान्वयि । *तु—वस्तुतस्तु । हर्यन्तरमाह *क्रियेति । संघातैरिति । अनुभवानुकूलव्यापारादिरूपाः क्रियाविशेषाः अनुभवादिभिस्तदावेव बोध्यन्ते इत्यर्थः । *कार्याणामिति । तयोस्तेषामन्तरङ्गत्वमेवं सति सिद्धमित्यर्थः । *तथेति । संघातबोध्यैवेत्यर्थः । क्रियेति चेत्यपीति पाठः । नन्वेवं तदुक्तमन्तरङ्गत्वं स्वाभिमते कथं भाष्यमते ऽत आह *धातूपसर्गेति । अर्थकृतत्वाभावादाह *पूर्वोपस्थितेति । एवंच नानयोरन्तरङ्गबहिरङ्गभावः; किन्तु तत्कार्ययोरिति 'उपास्यते' इत्यादौ कर्मणि लसिद्धिः, संचस्कारेत्यादौ साधनसम्बन्धोत्तरमुपसर्गसम्बन्धे 'सं कृ ति' इति स्थिते ऽन्तर्भूतार्थकनिमित्तकत्वाद्बाह्यसाधनसम्बन्धद्वित्वादिकार्यात् सुडन्तरङ्ग इति तत्सिद्धिश्चेति न दोष इति बोध्यम् । *इतिभाव इति । पूर्वहरेरित्यर्थः ।*इदमेव—तत्कार्यस्योक्तान्तरङ्गत्वमेव । *गुणे—"आद्गुण" इति । *पररूपम्—"ओमाङोश्च" इति । हर्यर्थमाह *धातोरिति । *नाङो योग इति । पृथग् उपसर्गस्यार्थाभावात् । तत्सत्त्वे ऽप्याह *धात्वर्थेति । शङ्काशयमाह *आङ्इवेति । *समुदायेनेति । उपसर्गद्योत्यार्थसहितधात्वर्थेनेत्यर्थः । तदाह *आङ इति । एवंचान्तरङ्गार्थकशब्दनिमित्तकत्वेन धातूपसर्गकार्यमन्तरङ्गमिति तात्पर्यम् । तदाह *तेनेति । सूचयतीत्यर्थः । इतो ऽपि प्रागुक्तभूषणाद्युक्तमयुक्तमित्याह *एवंचेति । पूर्वं धातोः साधनयोगप्रतिपादने चेत्यर्थः । तस्यैव तदायत्तत्वं न तदुक्तस्येति तन्मते भाष्यासङ्गतिः स्पष्टैवेति भावः । उक्तसूत्रद्वयभाष्यस्य "उपपदम्" इति सूत्रभाष्याविरोधं प्रतिपादयितुं दीक्षिताद्युक्तिं खण्डयन्नाह *किञ्चेति । *उपसर्गाणाम्—तत्संज्ञकानामित्यर्थः । क्रियागतविशेषबोधकानामिति यावत् । *अतएव—द्योतकत्वेन तेषां पश्चात्सम्बन्धादेव । इत्थं हि तत्रोक्तम् "उपपदम्" इति सूत्रे "गतिः" इतिसूत्रेच—अ-

तिङ्ग्रहणात् सुप्सुपेति निवर्त्त्य 'गतिकारकोपपदानाम्—" इति परिभाषां प्रत्याख्याय, "यद्येतज्ज्ञाप्यते केनेदानीं समासो भविष्यति ?, समर्थेन । यद्येवं धातूपसर्गयोरपि समासः प्राप्नोति-"पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन" इति । नैतदस्ति । "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण" । साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टि । अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्" इति ।

अस्यार्थः-यद्येतदिति, अतिङित्यस्य समासविशेषणतया शब्देनोत्तरपदस्यानुपादानात्प्रश्नः । समर्थेनेति, उपपदस्य सुबन्तत्वेन "सुप्"इत्यनुवृत्त्या वा पदविधित्वेन समर्थपरिभाषोपस्थानात् । सुपेत्यननुवृत्तावतिप्रसङ्गमाह यद्येवमिति । "कुगति"इत्यनेन । "अतिङ्" इत्यनेन तिङन्तस्यैव प्रतिषेधइति तात्पर्यम् । ततश्चैकस्वर्यादिप्रसङ्गः । न च "अतिङ्"इत्यस्य पर्युदासत्वेन तिङ्भिन्नप्रत्ययान्तः समास इत्यर्थान्न दोषः । प्रपिपाठिषतीत्यादौ 'प्रकृष्टा पठनेच्छा' इत्याद्यर्थके सन्नन्ते धातुनोपसर्गस्य समासापत्तेर्दुर्वारत्वात् । तिङ्भिन्नः कृत्प्रत्यय एवेत्यत्र तु न मानम् । तथा हि सति "उपपदं कृद्"इत्येव सूत्रयेत् । धातुप्रकृतिकत्वातिरिक्तसाजात्यस्य कृत्स्वप्यभावाच्च । प्रत्ययत्वं तु सुप्स्वतिप्रसक्तमेव । इदमेव ध्वनयितुमत्र वक्ष्यति-प्रपिपठीति । उपसर्गेण, तत्संज्ञकशब्देन । ततस्तयोः सामर्थ्यमस्ति उपसर्गार्थविशिष्टायाः क्रियायाः साधनेन योगात् । नैतदिति, "पूर्वं धातुरुपसर्गेण"इत्येतन्नास्तीत्यर्थः । अन्यथा "नैष दोष"इत्येव वदेत् । साधनेन, कर्त्तृकर्मरूपकारकेण । साध्यत्वेन प्रतीतस्य पूर्वं साधनाकाङ्क्षोदयेन तत्सम्बन्धस्यान्तरङ्गत्वात् । ततश्च पूर्वं साधनाभिधायिप्रत्ययोत्पत्तिः, पश्चात्साधनसंसृष्ट एव धातुरुपसर्गेण युज्यते न केवल इति, तेन सामर्थ्याभावात्तयोः समासाभावः । तत्र कृदन्तेन समासो भवत्येव, तिङन्तेन तु "अतिङ्" इति निषेधान्न भवति । पूर्वं धातोः साधनेन योगे युक्तिमाह—साधनंहीति । क्रियाम्, तत्प्रतीतिम् । निर्वर्त्तयति, निष्पादयति । साध्यत्वप्रतीतेस्तत्सम्बन्धाधीनत्वात् । साध्यत्वेन प्रतीतार्थकयोगे च तेषामुपसर्गत्वादिः । नच धातोः "भू सत्तायाम्" इत्यादितो व्याकरणात् गृहीतशक्तिकस्य तत्प्रतीतिः, कारकसम्बन्धसाध्यत्वात् । उपसर्गस्य तु क्रियागतविशेषद्योतकत्वरूपक्रिया-

योगनिमित्तोपसर्गसंज्ञकत्वात् क्रियात्वज्ञानोत्तरमेव सम्बन्धः, तदुत्तरमेव "ते प्राग्धातोः" इति नियमप्रवृत्तेः । ताम्, साध्यत्वेन गृहीताम् । उपसर्गः, तत्संज्ञकशब्दः । द्योतकत्वेन विशिनष्टि । तत्र युक्तिमाह—अभिनिर्वृत्तस्येति, निष्पन्नत्वेन ज्ञातस्य । विशेषः, विशेषणं प्रकर्षादिः प्रजयतीत्यादावुपसर्गेण द्योतयितुं शक्यः । बोद्धारं प्रतीति शेष इति ।

तदेतदभिप्रेत्य संक्षेपेणाह *धातूपसर्गयोरिति । अतएवेत्यस्योकार्थं सूचयन् तद्व्यतिरेकमाह *पूर्वमिति । द्योतकत्वे ऽपि स दुर्निवार इति शङ्कते *नचेति । मात्रपदेन तिङ्व्यवच्छेदः । *इतीति । लकाराणामपि कारकार्थकतायाः शास्त्रसिद्धत्वेन तत्सम्बन्धेनैव साध्यत्वबोधे उपसर्गसम्बन्धे सति लावस्थायामिनामित्यर्थः । *तस्य—लत्वावच्छिन्नस्य । *विभक्तीनामिति । तदादेशास्येत्यर्थः । तेषां भावार्थकत्वस्यापि सत्त्वेन तत्प्रतीतावनियामकत्वादिति युक्तिस्तु न युक्ता, तात्पर्येण निर्णयादिति सूचयन्नाह *साधनस्येति । अत एव अध्यैयातामित्यादौ लावस्थायामाट्यपि पूर्वं न वृद्धिः, साधनकार्यस्य आताम एव पूर्वं प्रवृत्तेः, साध्यस्य साधनाकाङ्क्षानैयत्येनान्तरङ्गत्वात् । ततो "वार्णादाङ्गम्" इतीयङि यणि वृद्धाविष्टसिद्धेरिति केचित् ।

वस्तुतस्तत्पक्षे ऽन्तरङ्गत्वाद् वृद्धावेतद्रूपासिद्धिः । कथं चिद् "वार्णादाङ्गम्" इत्याश्रयणे ऽप्यनेकाच्त्वाद्यणापत्तिः । तस्मादध्यैयातामित्यादि छान्दसम् । तत्र हि "बहुलं छन्दस्यमाङ्योगे ऽपि" इति बहुलग्रहणादादेशोत्तरं परत्वादियङि तत आटि वृद्धिरिति बोध्यम् । सामर्थ्यादाह *तिङिति । एतद्भाष्यतात्पर्यं वक्तुं शङ्कते *नचैवमपीति । तिङन्तस्य, तिङ्भाविलान्तस्य च समासवारणे ऽपीत्यर्थः । *समासइति । धातूपसर्गयोः निष्कृष्यैकार्थीभावो न समासादिप्रयोजक इति विशिष्टैनैकार्थीभावे ऽवयवानामपि तत्सत्त्वादिति भावः । तदाशयमाह *वक्ष्यमाणेति । तिङर्थनिरूपणावसरे इति भावः । *विशिष्टस्य—कालसंख्याकारकादिविशिष्टस्य । पञ्चकं धात्वर्थ इति भावः । *तस्य—अवयवेनासामर्थ्यस्य ।

अयं भावः—तिङन्तेन नैकार्थीभावः, "अतिङ्" इति निषेधात् ।

नापि तदवयवेन प्रत्ययार्थासंसृष्टेन, साधनसंसृष्टार्थस्यैवोपसर्गेण योगात् । तथा च तिङां द्योतकत्वमेवेति ।

नन्वेवमुपसर्गसंबन्धात्प्राक् केवलभ्वासादेः सकर्मकत्वाभावेन कर्मणि लादयो न स्युः, किञ्च सञ्चस्कारेत्यादौ सुटोऽन्तरङ्गत्वं "सुट् कात्पूर्व" इति सूत्रभाष्योक्तं भज्येत, अत आह *तत्रापीति । तिङां द्योतकत्वे ऽपीत्यर्थः । *उपसर्गार्थः–तद्द्योत्यार्थः । *द्योत्योऽपीति । आकाङ्क्षाक्रमेणोपस्थितिक्रमस्यात्रापि सत्त्वात् पञ्चकपक्षे स्वार्थादिक्रमवत् । यथा चैतत्तथोक्तं प्राक् ।

एतेनोपसर्गाणां द्योतकत्वे ऽप्युपास्यत इत्यादौ सकर्मकत्वाय तद्द्योत्यार्थस्य साधनसंबन्धात्पूर्वमेव धातुना बोधनावश्यकत्वेनोपसर्गेण पूर्वयोगस्यावश्यकत्वेन सामर्थ्यस्य सत्त्वेन धातूपसर्गयोस्तत्रैव समासो दुर्वार इत्यपास्तम् ।

तदुक्तम् "उपपदम्" इत्यत्र कैयटेनोक्तप्रथमाशङ्कासमाधित्वेन 'अनुभूयते सुखम्, उपास्यते गुरुरित्यादौ केवलधातुरेव सकर्मिकां क्रियां वक्ति, उपसर्गस्तु द्योतकः श्रोतृबोधाय पश्चादेव सम्बध्यते इति नास्ति कश्चिदस्मिन्पक्षे दोष' इति ॥ २१ ॥

प्रपिपठिषतीत्यादौ "समानकर्तृकाद्" इत्युक्तेः सनर्थसाधनेनैव प्रकृतेरपि तदाकाङ्क्षाशान्तेः सनैकार्थीभावात्, तद्विशेषणत्वाच्च प्रकृत्यर्थस्य तदुत्तरं प्रादियोग इति न समासः । इतो ऽप्युपसर्गाणां वाचकत्वं निरस्तम् । विशिष्टाया एव क्रियाया इषिकर्मत्वस्य प्रतिपाद्यतया सापेक्षत्वेनासामर्थ्यात्सनुत्पत्त्यनापत्तेः ।

"नेर्विशः" इत्यादेर्नेः परत्वयोग्याद्विशेरित्यर्थः । "सम्पृच" इत्यादेरपि संपूर्वत्वयोग्यात्पृचेरित्यादिः क्रमेणार्थः । गोसन्दाय इत्यादावपि समुपसर्गद्योत्यार्थविशिष्टाद्धातोः कर्मण्युपपदे बुद्धिस्थे ऽणि ततः समायोगे गतिसमासे उपपदसमासो बोध्यः ।

यद्यप्युपसर्गमुपक्रम्य—

स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा । इति-

उक्तं हरिणा, यथा प्रतिष्ठते इत्यत्र गतिनिवृत्ति-वाचको धातुः, उपसर्गो गतिवाचक इति पुञ्जराजश्च,

तथापि तिष्ठतेर्धातुत्वेन यज्यादिवदनेकार्थत्वाद्धातोरेव गतिरर्थः । प्रशब्दस्तु द्योतक एव, उपसर्गत्वात्, प्रपचतीत्यादिस्थप्रशब्दवदित्यर्थिकया—

स्थाऽऽदिभिः केवलैर्यच्च गमनादि न गम्यते ।

तत्रानुमानाद्द्विविधात्तद्धर्मा प्रादिरुच्यते ॥ इति-

कारिकया,

क्वचित्सम्भविनो भेदाः केवलैरनिदर्शिताः ।

उपसर्गेण संबन्धे व्यज्यन्ते प्रपराऽऽदिना ॥

इत्यादिना च द्योतकत्वमेवोपसर्गाणां सिद्धान्तितम् । तद्धर्मा, द्योतकत्वधर्मा । क्वचित्, पचत्यादौ ॥२२॥

(कुं० टी०) *समानकर्तृकादित्युक्तेरिति । समानकर्त्तृकत्वसिद्धये उभयोः कर्त्रोरैक्यं प्रतिपाद्यम्, तथाच तादृशपाठविषयकेच्छायामेव प्रकर्षो बोध्यते इत्यर्थः । *सनर्थेति । सनर्थस्य साधनमिति विग्रहः । *तदाकाङ्क्षा—साधनाकाङ्क्षा । *सनेति । प्रकृतेरिति शेषः । हेत्वन्तरमाह *तद्विशेषणत्वाच्चेति । सनर्थे विशेषणत्वाच्चेत्यर्थः । *विशिष्टायाइति । प्रादीनां वाचकत्वे तु प्रकर्षविशिष्टपाठादीनामिषिकर्मत्वं वाच्यम्, तत्र पाठस्य सापेक्षत्वात्सन् न स्यादित्यर्थः । ननु धातूपसर्गयोः पूर्वं योगाभावे कथं

१ उभयनिरूपितकर्त्रोरित्यर्थः ।

"नेर्विशः" इति, तत्राह *योग्यादिति। *सम्पृचेत्यादेरिति। "सम्पृचानुरुधाङ्–"इति णिनिविधेः। *गोसन्दायइति। अत्रापि उपसर्गयोगे भाविनि दाधातोरण्, ततो दाय-संशब्दयोः समासे गवा समास इत्यर्थः। *बुद्धिस्थेइति। कर्मत्वस्य क्रियानिरूप्यत्वादिति भावः। *स वाचकइति। न केवलमुपसर्गो द्योतकः किन्तु वाचको ऽपि, तिष्ठतेर्गतिनिवृत्तिवाचित्वे ऽपि प्रतिष्ठते इत्यत्र गतिबोधेन विशेषसम्भवात्। *यज्यादिवदिति। तत्र पूजादानाद्यनेकार्थत्वस्य सुप्रसिद्धत्वात्। *प्रपचतीति। अत्र आदिकर्मद्योतकत्वं प्रशब्दस्य। *स्थादिभिरिति। केवलैस्तिष्ठत्यादिभिर्यत्र गमनं न प्रतीयते तत्र तद्द्योतनाय प्रादिः प्रयुज्यते इत्यर्थः। *तत्रानुमानाद् द्विविधादिति। प्रशब्द आदिकर्मद्योतकः प्रशब्दत्वात्, प्रपूर्वोदितगत्यादिदृष्टप्रशब्दवदित्येकेनानुमानेनोपसर्गाणां द्योतकत्वम्, तिष्ठतिरनेकार्थः धातुत्वादिति द्वितीयेनानुमानेन धातूनां नानार्थत्वम्। सम्भवन्तोऽपि भेदा यत्र केवलधातुभिरप्रतीतास्तत्रोपसर्गा व्यञ्जका इत्यर्थः॥ २२॥

(क० टी०) उक्तमेव ध्वनयन् भाष्याद्यनुक्तत्वान्न्यूनतानिरासायान्यत्रापि समासापत्तिं वारयति *प्रपिपठीति। इत्यादावपीत्यर्थः। *सनेति। प्रकृतेरिति शेषः। तथा च न केवलधातुनोपसर्गस्य सामर्थ्यमिति न तयोः स इति भावः। नन्वेवमपि सन्नन्तेनैवास्त्वत आह *तत्तद्विशेषेति। तथाच प्रधानकार्योत्तरमित्यर्थः। अस्याशय 'अयम्भाव' इत्यनेन व्याख्याने उक्त एव। नच"कर्मग्रहणात्सन्विधौ धातुग्रहणानर्थक्यम्। सोपसर्गे कर्मेति चेत् कर्मविशेषकत्वादुपसर्गस्यानुपसर्गं कर्म, सोपसर्गस्य हि कर्मत्वे धात्वधिकारे ऽपि सनो विशिष्टविषयेच्छाया एव बोधनीयत्वादविधानमकर्मत्वाद्" इति। "एतच्चात्र युक्तं यत्सोपसर्गं कर्म। न च सनो ऽनुत्पत्त्यापत्तिः। कर्मण इति षष्ठी, कर्मणो ऽवयवाद्धातोरित्यर्थात्। केवलात्तु व्यपदेशिवद्भावेन। महान्तं पुत्र-

मिच्छतीत्यादौ विशिष्टकर्मणो ऽवयवात्सुबन्तात्तु क्यज् न, सापेक्षत्वेनासामर्थ्याद्'' इति च सनूसूत्रस्थवार्त्तिकभाष्यविरोध इति वाच्यम् । सोपसर्गमित्यस्योपसर्गद्योत्यार्थविशिष्टमित्यर्थेनाद्यदोषाभावात्, अग्रिमग्रन्थस्त्वेकदेशिन इति सोऽप्यदोषः । तदुक्तं कैयटेन- 'धातुरेव विशिष्टां क्रियामाह, उपसर्गस्तु द्योतक इति सापेक्षत्वाभाव इति । तदेतद् ध्वनयन्नाह *इतोऽपीति । अस्यार्थमाह *विशिष्टायाइति । एतेन 'इषिकर्मत्वमिह विशिष्टाया एव क्रियायाः प्रतिपाद्यमिति पूर्वमुपसर्गेण सम्बन्धाद्धातुग्रहणाभावे विशिष्टात् सन आपत्तिः' इति तत्रत्यकैयटोक्तमपास्तम् । अत्रैव धातूपसर्गयोः समासापत्तेः । भाष्यं तु उक्तसर्वभाष्याविरोधेनैव व्याख्यातम् ।

नन्वेवमपि निविशते इत्यादौ तयोः समासापत्तिस्तयोर्मिथः सम्बन्धमुपजीव्यैवात्मनेपदविधानेन ततस्तस्य पूर्वमावश्यकत्वादत आह *नेर्विश इति । आदिना "परिव्यवेभ्यः", "विपराभ्यां जेः" इत्यादिपरिग्रहः । यद्यप्यत्र षष्ठ्या निद्योत्यार्थविशेषार्थप्रतिपादकादित्यर्थेन निर्वाहस्तथाऽप्यग्रिमसूत्रानुरोधेनाह *नेःपरत्वेनेति । *इत्यर्थः–क्रमेणेत्याद्यर्थः । तथाच तत्सम्बन्धात्पूर्वमेवात्मनेपदप्रवृत्तिरिति न दोषः । तत्र षष्ठ्यर्थे पञ्चमीकल्पने तु गौरवम् । स्पष्टं चेदं "नेर्विश" इत्यत्र भाष्ये । एतेन सुटो ऽपि संपरिभ्यामुपसृष्टस्येत्यर्थेन, ताभ्यां परत्वयोग्यस्येत्यर्थेन वा समो योगात्पूर्वमेव सुडित्येवमन्तरङ्गत्वं सूचितम् । नन्वेवमपि विभक्त्यभावेन समुदायोच्चारणेन विधेः सस्पर्कीत्यादौ तयोः समासापत्तिरत आह *संपृचेत्यादेरपीति । उक्तभाष्याविरोधायोक्तरीत्या सूत्रे द्वयोरनुकरणेन षष्ठीसमास इति भावः । आयतस्तूः कटप्रूरजस्रमित्यादौ तथा सत्त्वे ऽपि धातूपसर्गयोः क्वापि स नेति तात्पर्यम् । उक्तरीत्या "संप्रसारणाच्च" इति भाष्यरीत्या चेष्टमपि सिद्धान्ते सिध्यतीत्याह *गोसन्दाय इति । *विशिष्टात्–तद्विशिष्टार्थप्रतिपादिकात् । पूर्वमसम्बन्धायाह *बुद्धिस्थेइति । ईदृशे स्थले ऽयमेव साधुत्वान्वाख्यानप्रकार इति सर्वतात्पर्यम् । एवं हरिसंमतभाष्यासिद्धान्ते हरिविरोधं ह्युक्त्यैव परिहरति *यद्यपीत्यादिना सिद्धान्तितमित्यन्तेन । तत्त्वस्य स्पष्टत्वाद्वाचकमात्रोदाहरणमाह *यथाप्रतिष्ठते इति । भूवादिसूत्रभाष्योक्तमेव । *तिष्ठतेरिति । स्थाधातोरित्यर्थः । *इत्यर्थिकया–इतितात्पर्यिकया ।

चेतनविशिष्टैर्गम्यत इत्यस्य समुच्चयः । एवमन्वयव्यतिरेकयोः सत्त्वेऽपि न वाचकत्वं तयोर्द्योतकतयैवोपपत्तेरित्याह *तत्र–तत्प्रतीतिविषये इत्यर्थः । *द्विविधाल्–अन्वयव्यतिरेकिणः । पूर्वोक्तमीदृशमेव । प्रादिरुपसर्ग एवेत्याह *क्वचिदिति । *भेदाः–विशेषाः प्रकर्षादयः । तत्र हेतुमाह *उपसर्गेति । यत इत्यादिः ॥ २२ ॥

यत्र तु भावे प्रत्ययः तत्राप्यन्तरङ्गत्वाद्भिन्नपदोपात्तकर्त्रादिना साधनांशे निराकाङ्क्षत्वे उपसर्गयोग इति तत्रापि न समासः । अत एव "गेरध्ययने" इत्यादि सङ्गच्छते। अध्यागच्छति, पर्यागच्छतीत्यादावागच्छतीत्यस्मादेव गमनस्यावगत्या लौकिके शब्दव्यवहारे लाघवानादरात्स्पष्टार्थमेवाधिपर्योः प्रयोगः इति संभूयार्थबोधकत्वात्समुदाय एव विशिष्टार्थबोधक इति । उपसर्गस्यानर्थकत्वमर्थान्तराबोधकत्वादिति बोध्यम् ।

क्वचित्तु क्रियागतविशेषबोधकातिरिक्तनिपातानां वाचकत्वमपि । अतएव 'न'इत्यतो ऽभावबोधः, 'कस्य' इति जिज्ञासा च दृश्यते ऽभावशब्द इव ।

किञ्च 'पर्वताद् आ' इत्यादौ पर्वतादर्वागित्यर्थप्रतीतेस्तत्र वाचकत्वमेवेति निरुक्ते स्पष्टम् । द्योत्यत्वे हि पञ्चमी न स्यात्तस्य विशेषणता च स्यात् ॥ २३ ॥

(कुं० टी०) ननु स्थीयते इत्यादौ धात्वर्थस्यैव बोध्यत्वाद्धातूपसर्गयोः समासो दुर्वार इत्यत आह *यत्रत्विति । *आगमनस्येति । उपरिभावविशिष्टस्य, सर्वतोभावविशिष्टस्यच आगमनस्य प्रकरणादेवावगत्येत्यर्थः । *सम्भूय–मिलित्वा ॥२३॥

(क० टी०) नन्वेवमपि प्रत्ययो ज्ञानमित्यादौ भावप्रत्यये

उक्तरीतेरसम्भवात्तयोः समासापत्तिरेवेति अत आह *यत्र-त्विति । तुरुक्तवैलक्षण्ये । समानपदोपात्तसाधनस्थले तथा, अत्र तु भावार्थकत्वेनान्तरङ्गत्वात् घञादौ प्रोक्तरीत्यैवागत्या बाह्यसाधनसम्बन्धेन क्रियात्वावगतौ उपसर्गसम्बन्ध इत्यर्थः।तदाह *अन्तरङ्गत्वादिति।*निराकाङ्क्षत्वे सति।एवञ्च "वार्णादाङ्गम्" इतिन्यायेन गुणे यणा रूपसिद्धिस्तदाह *अतएवेति।तत्र तथाऽङ्गीकारादेवेत्यर्थः।*आदिना प्रत्यय इत्यादि।"सम्प्रसारणाच्च" इति सूत्रभाष्यं तु समानपदोपात्तसाधनविषयमिति न तद्विरोधः।एतेनात्र पूर्वमुपसर्गसम्बन्धे ऽपि "अध्ययने" इत्यादिनिर्देशैः पूर्वं ततः साधनकार्यप्रवृत्तिरिष्यते इति हरदत्ताद्युक्तम्, उपसर्गाणां वाचकत्वमेवास्तु स्वस्वयुक्तेत्याद्युक्तमेव कर्मत्वं सकर्मकत्वं चेत्यनुभूयत इत्यादौ कर्मणि लादिसिद्धिरिति नव्योक्तं चापास्तम् । तत्रैव धातूपसर्गयोः समासापत्तेः । नन्वध्यागच्छतीत्यादावध्यादेरनर्थकत्वव्यवहारः सोऽत्रासङ्गतः । क्रियानिरूपितसम्बन्धविशेषद्योतकत्वं विना कर्मप्रवचनीयत्वस्य दुर्वचत्वात् । किञ्च तत्त्वे क्रियाविशेषणीभूतार्थद्योतकत्वमेव क्रियायोगः सच नेति तस्य गत्याद्यपवादत्वस्य दुर्वचत्वादत आह *अध्यागच्छतीति । आङस्तद्गतविशेषद्योतकत्वमस्तीत्याह *आगच्छतीति । एतेन वैपरीत्यं निरस्तम् । तत्प्रयोगासङ्गतिं परिहरति *लौकिके इति । अन्यथा कलशादिप्रयोगो न स्यात् । गतित्वादिप्राप्तये आह*सम्भूयेति । स्थितयोरिति शेषः । तत्प्रयोगे इति भावः । *उपसर्गस्येति । तत्त्वाद्यभिमतस्याधिपर्यन्यतरस्य, तत्ववत आङश्चेत्यर्थः । *अर्थान्तरेति । आङ्द्योत्यार्थतोऽन्यार्थेत्यर्थः । कर्मप्रवचनीयसंज्ञा तु वचनसामर्थ्यादिति तात्पर्यम् । एवमुपसर्गाणां द्योतकत्वं तत्समकक्षतदन्यनिपातानां चोक्तम्, चादीनां वाचकत्वे परोक्तदूषणखण्डनेन तेषां तत्त्वं चोक्तम्, तद्विशदयति *क्वचित्त्विति । घटश्चेत्यादावित्यर्थः । प्रादेरपि संग्रहाय *निपातानामिति । द्योतकत्वस्यापिना संग्रहः । तच्च व्यवस्थितं बोध्यम् । इदमेवोदाहरणान्तरप्रदर्शनेन पोषयति *अतएवेति। तेषां वाचकत्वादेवेत्यर्थः । अस्य दृश्यते इत्यत्रान्वयः। तेनानुभवोऽत्र प्रमाणमिति सूचितम् । *शब्देइति विषयसप्तमी । निपातानामित्युक्तिं सफलयन्नाह *किञ्चेति । *नस्यादिति । तथासति तस्य प्रकृत्यर्थतया तस्यादिकशब्दत्वेन तद्योगाभावादिति भावः । ननु

द्योत्यार्थेनैव तत्त्वमस्तु प्राग्वदत आह *तस्येति । अर्वागित्यस्ये-त्यर्थः ॥ २३ ॥

अत एव "स्त्रियाम्" इतिसूत्रे स्त्रीत्वस्य प्राधान्ये वचनानुपपत्तिमाशङ्क्य द्योतकतापक्षेण समाहितम् । अत एव च "हेतुमतिच" इतिसूत्रे भाष्ये द्योतकतापक्षे 'हेतुमति' इत्यस्य प्रकृत्यर्थविशेषणत्वमुक्तम् । "स्त्रियाम्" इति सूत्रे च 'स्त्रियाः प्रकृतिविशेषणत्वाद्' इत्यनेन स्त्रीशब्दार्थस्य प्रकृत्यर्थविशेषणत्वादित्यर्थकेन द्योतकतापक्ष उक्तः ।

तदुक्तं हरिणा—

निपाता द्योतकाः केचित्पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः ॥ इति ।

केचिदित्युभयान्वयि—केचित्पृथगर्थाभिधायिनः वाचकाः, केचिदनर्थका एवेत्याह—आगमा इवेति, इति तदर्थः ।

प्रातिशाख्ये ऽपि—

नामाख्यातमुपसर्गो निपातः
चत्वार्याहुः पदजातानि शाब्दाः ॥
तन्नाम येनाभिदधाति सत्त्वम्
तदाख्यातं येन भावं सधातुः ॥
उपसर्गा विंशतिरर्थवाचकाः
सहेतराभ्यामितरे निपाताः ॥
क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपाताः पादपूरणाः ॥ इति ।

"सधातुरित्यत्र तृतीयार्थे प्रथमा । इतराभ्यां नामा-

ख्याताभ्यां सह । अर्थवाचका इत्यस्य मध्यमणिन्यायेन सम्बन्धः । इतरे नामाख्यातेभ्यो ऽन्ये निपातास्तथा-ज्ञेयाः । उपसर्गो विशेषकृदित्यनेन तेषां द्योतकत्वं दर्शयति । पादपूरणाः पादपूरणा अपि इत्यर्थः" इति तद्भाष्यम् । थाल्जातीयप्रकृनो ऽत्यन्तस्वार्थिकाः, नतु ते प्रकृतेः प्रकारवद्वृत्तित्वद्योतकाः प्रत्ययं विना ऽपि यो 'हरिः स हरः' 'सिंहो माणवक' इत्यादौ प्रकृतिमात्रात्तदर्थबोधनात् । अतएवैषां नित्यत्वं नोक्तमाकरे ।

एतेन तत्र द्योत्यार्थस्य विशेष्यताऽस्त्येवेति द्योत्यत्वे विशेषणत्वापत्तिरित्ययुक्तमित्यपास्तम् । "जात्यन्ताच्छ बन्धुनि" इतिच्छस्तु आश्रयरूपबन्धुवाचक एव । "प्राग्दिश" इत्यारभ्य स्वार्थिकत्वं तु प्रायेणेति बोध्यम् ।

एवं "देवतान्तात्तादर्थ्ये यत्" इत्यादेरपि । "तत्प्रकृतवचने मयट्" इत्यत्राकरे स्पष्टमिदम् ।

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव । इत्यादौ तु द्योतकता । अन्यथा उस्रसदृशस्य करणत्वे ऽपि उस्रस्याकरणत्वादुस्रपदोत्तरतृतीयाया नैरर्थक्यमसाधुत्वं च स्यात् । इवशब्दात्तृतीयाऽभावेन सदृशस्य करणत्वालाभश्च स्यात् । इवशब्दोत्तरं सर्वविभक्तिलुक्सत्त्वे ऽपि न ताः सार्थिकाः । विभक्त्यर्थाप्रधाननिपातार्थस्य कारकत्वेनानन्वयात् ॥ २४ ॥

(कुं०टी०) *वचनानुपपत्तिमिति । स्त्रीत्वे संख्याद्य-

भावात् । *निपाता द्योतका इति । घटश्च पटश्चेत्यादौ पृथगर्थाभिधायिनो निपाता द्योतकाः, अध्यागच्छतीत्यादौ सम्भूयार्थस्य वाचकास्तु अनर्थका एव । वाचकत्वं तु निपातानां नास्ति ।

चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः । इति—

हरिणैव निराकृतत्वादिति पुञ्जराजस्वरसः । मूलकारस्तु केषां चिद्वाचकत्वं स्वीकृत्य केचिद् द्योतकाः, केचित्तु पृथगर्थाभिधायिनो वाचका इति व्याख्यत् । *तृतीयार्थे इति । धातुसहितेन येनेत्यर्थ इति भावः । *इतरे निपाताः—उपसर्गभिन्ननिपाताः ॥ २४ ॥

(कु० टी०) ननु द्योत्यत्वे ऽपि कुतो न विशेष्यत्वमत आह *अतएवेति । तस्य विशेषणत्वादेवेत्यर्थः । *स्त्रियामिति । चातुर्थिके इत्यर्थः । प्राधान्यात्प्रत्ययविशेषणत्वे आह *स्त्रीत्वस्येति । प्रकृतिप्रत्ययोरिति न्यायात् ।*वचनेति । तस्य असत्त्वभूतत्वेन संख्यानन्वयात् । अन्यथा समाधानासङ्गतिस्स्पष्टैव । भाष्यान्तरमप्याह *अतएवचेति । नन्वाद्ये द्योतकतापक्षो न कण्ठत उक्तोऽत आह *स्त्रियामितीति । इदमपि हरिसंमतामित्याह *तदुक्तमिति । स्पष्टत्वादाद्यमुपेक्ष्य द्वितीयमाह *केचिदिति । अध्यागच्छतीत्याद्याशयेनाह *केचिदनर्थकाइति । दृष्टान्तलब्धामिदम् । *सम्भूयेत्यत्र स्थिता इति शेषः । वाचकपदं बोधकपरम् । क्वचित्तथापाठ एव । तथाच के ऽपि ते यतः सम्भूय स्थिता अर्थस्य बोधका अतो आगमा इव स्युरनर्थका एवेत्यर्थो बोध्यः । *प्रातिशाख्येति । द्वितीयाध्यायसमाप्तौ । जातं समूहः । तान्येवादावुक्तानि । अत्र सर्वत्र प्रयोक्तुः कर्तृत्वम् । *सत्त्वम—द्रव्यम् अनेनाव्ययेषु नामत्वाभावः स्पष्टमेवोक्तः । उक्तमेव विशदयति *क्रियावाचकमित्यादि । क्रियेत्यनेन भावपदार्थ उक्तः । आख्यातपदवाच्यत्वं न प्रत्ययस्य किन्तु विशिष्टस्येति च स्पष्टमुक्तम् । *प्रथमेति । धातुसहितेन वक्ता क्रियामभिदधातीत्यर्थः । इतराभ्यामित्यस्य प्रक्रान्तपरत्वमित्याह *नामेति । इतरेइत्यस्यार्थमाह *नामेति । ब्राह्मणवसिष्ठन्यायलब्धमिदम् । *तथा—ताभ्यां सहार्थवाचकाः ।

पूर्वतो विशेषमाह *उपसर्गइति । *पूरणा अपीत्यादिना द्योतकत्वादिसंग्रहः । द्योत्यार्थस्य प्रकारत्वं व्यभिचरितमिति खण्डनायाह *थालिति । तत्त्वमेव सविशेषं विशदयति *नत्विति । प्रकारविशिष्टवृत्तित्वेत्यर्थः । *प्रत्ययं-जातावेकवचनम् । आद्यद्वयव्यतिरेकमाह *योहरिरिति । अन्त्यव्यतिरेकमाह *सिंहइति । *अतएव-तद्द्योतकत्वादेव । कैयटादिसंग्रहायाह *आकरेइति । *एतेन-तद्द्योतकत्वेन । *तत्र-थालादिविषये । अन्यत्रापि तद्व्यभिचारभ्रममन्यथा निराचष्टे *जात्यन्तादिति । *तुरुक्तवैलक्षण्ये । *आश्रयेति ।जातेर्व्यक्तिरेव बन्धुः। *यदितीति । तेन विहितयदादेरपि ताद्धर्म्यादिवाचकत्वमित्यर्थः।तेषां तत्त्वस्य प्रायेणेत्यादिपूरणेन प्रायिकत्वे मानमाह *तत्प्रकृतेति।तत्रहि-'प्रचुरार्थबोधकात्प्रथमासमर्थात्स्वार्थे मयट्'' इति पक्षमुक्त्वा, 'प्राचुर्येण प्रस्तुताज्ञादिवचनात्प्रथमासमर्थादधिकरणेऽर्थे मयट्' इति पक्षान्तरमुक्तम् । तेन भवन्मयो ध्यायति नावनीपतिरिति सिद्धम् । तन्त्रेणार्थद्वये सूत्रतात्पर्यं व्याख्यानादिति तदाकूतम् । अत्युक्तिं सफलयति *शरैरिति । अत एव तुः । *अन्यथा-वाचकत्वे । तत्र प्रतियोगिविशिष्टः सदृश इवार्थः । तत्र प्रतियोगिन्युस्रस्याभेदेनान्वयः, सदृशस्य च शरेष्वभेदेन । तृतीया तूपमानोपमेययोः समानविभक्तिकत्वनियमात् । एवञ्चोस्राभिन्नप्रतियोगिविशिष्टसदृशाभिन्नैः शरैरित्याद्यर्थस्तत्पक्षेणाह *उस्रसदृशस्येति । सादृश्यमिवार्थः, तत्र प्रतियोगितयोस्रान्वयः, तस्याश्रयतया शरेष्वन्वयस्तृतीया प्राग्वत्, तत्पक्षे तस्य तदभावसमुच्चायकोऽपिः । नैरर्थक्यस्यान्यत्रेष्टत्वादाह *असाधुत्वंचेति । आद्यपक्षे आह *इवेति । *तृतीयेति । अभावेनेति च्छेदः । ननु "अव्ययात्" इति ज्ञापकात्तत्सत्त्वमिति ततस्तद्बोधोऽत आह *इवशब्दोत्तरमिति । श्रवणापत्तिवारणायाह *लुगिति । अव्ययत्वात्तेनैवेति भावः । *सत्त्वेऽपीत्यादिना तत एकवचनसत्त्वेऽपि बहुवचनाभावसमुच्चयः । उस्रपदोत्तरतृतीयया तु न सदृशगतं करणत्वं बोधयितुं शक्यम् । अप्रकृत्यर्थत्वात् । तस्मात् द्योतकत्वमेव युक्तमिति भावः ॥ २४ ॥

भाष्यकृतोऽपि-पस्पशायाम्, "अधिपरी अनर्थकौ" इत्यत्र, नञ्-सूत्रे, "अव्ययं विभक्ति-" इति सूत्रे च द्यो-

तकत्वं वाचकत्वं वेत्येव स्वरसः। अत एव निर्मक्षिक-मित्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं सङ्गच्छते। अत एव संकटं उद्धत इत्यादावुत्समादेः उद्गतसङ्गतरूप-क्रियाविशिष्टसाधनवाचकतोक्ता भाष्ये ।

ननु "शरैरुस्रैः" इत्यत्र द्योतकत्वेऽपि उस्रसदृशैः शरैरित्यर्थे उस्रपदोत्तरं तृतीयाऽनुपपत्तिस्तदवस्था, उस्राणां करणत्वाभावात् । उपमानोपमेययोः समान-विभक्तिकत्वमिति वचनाभावात् ।

यद्यपि उस्रसदृशरूपोस्रपदार्थस्य करणरूपशरैर-भेदान्वयात्सा सुलभा, तथाऽपि सदृशस्योक्तरीत्या विशेष्यत्वानापत्तिरिति चेद् ।

इष्टापत्तेः । तथाहि–इवादीनां स्वसमभिव्याहृ-ते उपमानताद्योतकत्वं उपमानत्वेन प्रतीतेस्तादृश-धर्मवदुपमेयप्रतीतिं विनाऽनुपपत्त्या उभयत्रापि साधारणधर्मबोधे तात्पर्यग्राहकत्वम् ।

उपमानत्वं च साधारणधर्मवत्त्वेनेषदितरपरिच्छे-दकत्वम्। तद्धर्मवत्तया परिच्छेद्यत्वं चोपमेयत्वम् । इदम् "उपमानानि" इतिसूत्रे भाष्ये स्पष्टमित्यन्यत्र निरूपितम् ।

उभयत्रापि साधारणधर्मान्वय इति लिङ्गभे-दाद्युपमादूषणानिरूपणावसरे दशमशेषे काव्यप्रका-शादौ स्फुटम् ।

एवं च 'चन्द्र इव मुखमाल्हादकम्' इत्यादौ 'आल्हादकोपमानभूतचन्द्राभिन्नमाल्हादकं मुखम्' इत्यादिरीत्या बोधः।

एवं चोपमानस्योपमेयेन समानविभक्तिकत्वं तेनाभेदान्वयात् ।

साधारणधर्मसम्बन्धश्च विशेषणतया क्वचित् यथोदाहृते । क्वचिद्विशेष्यतया यथा—'चन्द्र इव मुखमाल्हादयति' इत्यादौ। अत्र हि 'उपमानचन्द्रकर्तृकाल्हादाभिन्नो मुखकर्तृक आल्हाद' इति बोधः ॥२८॥

(कुं० टी०) ननु इवशब्दात् तृतीयालुकेष्टसिद्धिरत आह—*न ताः सार्थिका इति । औत्सर्गिकत्वादिति भावः । *अतएव-वाचकत्वादेव । *उद्धतइति । अत्र हि उद्धतमनस्कवृत्तेः उच्छब्दाद्धतिप्रत्ययः। *करणत्वाभावादिति । सदृशानामेव करणत्वात्। ननूपमानसमानविभक्तिकत्वं सिद्धमत आह *वचनाभावादिति । *विशेष्यत्वानापत्तिरिति । द्योत्यत्वात् । *इष्टापत्तेरिति । विशेष्यत्वाभावे इत्यादिः । *तादृशेति । साधारणधर्मवद् यद् उपमेयं तत्प्रतीतिं विना उपमानत्वप्रतीतेरभावादित्यर्थः । *उभयत्र—उपमानोपमेययोः । *उपमानत्वश्चेति । साधारणधर्महेतुकपरिच्छेदकरणत्वमुपमानत्वमित्यर्थः । *ईषदितरेति । स्वल्पभेदवदित्यर्थः ॥ २८ ॥

(क० टी०) उभयत्र तेषां भाष्यसंमतिमाह *भाष्येति । यथाचैतत्तथा तत्र स्फुटम्।तत्राद्ये "शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्"इत्युक्तम् । एवमन्यत्रापि तत एव बोध्यम् । *अत एव-तेषां वाचकत्वादेव । एवमग्रेऽपि । अव्ययीभावत्वादाह *पूर्वेति । द्योतकत्वे द्योत्यार्थेन पूर्वपदार्थत्वे ऽपि तस्य प्रागुक्तरीत्या प्राधान्यं दुर्घटमेवेति भावः । अत एव चेतिपाठः । सङ्कटे सङ्गतमित्यर्थे "संप्रोदश्च" इति कटच् । उद्धत इत्यत्रोद्गतानीत्यर्थे "उपसर्गाच्छन्दसि" इति वतिः । *उद्धतइत्यादि—समादेरित्यादिभ्यां निवत इत्यादौ न्यादिसंग्रहः । रूपमित्यस्य साधनेऽन्वयः । *भा-

ध्ये इति । "गतिश्च" इत्यादिसूत्रेष्विति भावः । तद्विना तस्य दुर्वचत्वेन ततः पूर्वं तदनुक्तावपि तदुत्तरं सूचीकटाहन्यायेनान्यदुक्ता सिंहावलोकनन्यायेन तत्र सिद्धान्ते शङ्कते *नन्विति । *इत्यर्थइति । वक्ष्यमाणार्थे तु नानुपपत्तिरिति भावः । पदसंस्कारपक्षेणाह *उक्तेति । परोक्तिं खण्डयति *उपमेति । वाक्यसंस्कारपक्षेणाह *यद्यपीति । *सेति । परोक्तमपि नानुशासनालभ्यं किन्तूपमेयेनाभेदान्वयमूलकमेव । योऽन्येनाभेदमापन्नस्स तत्समानशक्तिक इति व्याप्तेः । एवञ्च प्रागुक्तद्वितीयपक्षोऽसङ्गत एवेति भावः । *उक्तेति । द्योत्यार्थस्य प्रकारत्वमेवेति प्रागुक्तरीत्येत्यर्थः । तथाचोक्तबोधासम्भव इति भावः । कथं तर्ह्यर्थोऽत आह *तथाहीति । *इवादीत्यादिना यथादि । न तावन्मात्रमित्याह *उपमानत्वेनेति । स्वसमभिव्याहृतस्येत्यादिः । *तादृशेति । उभयसाधारणधर्मविशिष्टोपमेयेत्यर्थः । तत्कृतमेव हि तत्त्वमिति भावः । ननूपमानत्वस्योपमेयानिरूपितत्वेन तन्मात्रप्रतीतिं विना तदनुपपत्तावपि न विशिष्टतत्प्रतीतिसापेक्षत्वमिति कथमन्त्यसिद्धिरत आह *उपमानत्वं चेति । वैशिष्ट्यं तृतीयार्थः । अत एव सर्वांशेन तत्त्वासम्भवादाह *ईषदिति । नन्वत्रैव किं मानमत आह *इदमिति । तत्र हि "किं सर्वथा भेदे उपमानोपमेयभाव उताभेदे" इति प्रश्ने उभयत्रापि साधारणधर्मासम्भवाद्गौरिव गौर्गौरिवाश्व इत्यादौ उपमावाचकेवादेर्नैरर्थक्यापत्तिमुक्त्वा "यत्र विशेषरूपेण भेदावगतिः साधारणधर्मरूपेणाभेदावगतिस्तत्र स" इत्युक्त्वा "कथमेतज्ज्ञातम्" इति शङ्कायां "हीनं मानमुपमानं यन्नात्यन्ताय मिमीते इत्यर्थकोपमानव्यवहारादेतन्निर्णीतम्" इत्युक्तम् ।

तस्यायम्भावः–प्रस्थादि हि साकल्येन मानमिति तद् अत्यन्तभेदेनैव परिच्छेदकम् । प्रस्थः परिमाणमस्येति प्रस्थो व्रीहिरिति वा । इदं तु हीनमिति भेदाभेदाभ्यामेव परिच्छेदकमिति । अत्यन्तायेत्यव्ययमत्यन्तमित्यर्थे । तदाह *अन्यत्रेति । उद्योतगुरुमञ्जूषयोरित्यर्थः । एतेनोपमानत्वं चोपमानिरूपकत्वेन विवक्षितत्वम्, तदाश्रयत्वेन विवक्षितत्वं चोपमेयत्वमित्यपास्तम् ।

अन्त्यमालङ्कारिकसंमतमपीत्याह *उभयत्रेति । तद्बोध इत्यर्थः । *लिङ्गेति । लिङ्गभेदादिरूपोपमादोषेत्यर्थः । *आदिना वचनभेदः । *प्रकाशादौ—तत्राप्यादिना प्रदीपादि ।

तत्र हीत्थमुक्तम्–"लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं धर्मं चेद् अन्यरूपं कुर्यात्तदैकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेनापि धर्मेण प्रतीयेतेति प्रक्रान्तार्थस्य स्फुटमनिर्वाहात्तस्य भग्नप्रक्रमरूपत्वम् । यथा—

चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे ।
सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव" इति ।

तत्र बोधं सूचयन् व्यस्ते बोधमाह *एवंचेति । तस्य तद्द्योतकत्वे चेत्यर्थः । 'अरविन्दमिव सुन्दरं वदनम्' इत्यादौ सुन्दरोपमानभूतारविन्दाभिन्नं सुन्दरं वदनमित्यादिबोधसंग्राहक आदिः । एतेन 'चन्द्रनिरूपितसादृश्यप्रयोजकाह्लादवदभिन्नं मुखम्' 'अरविन्दनिरूपितसादृश्यप्रयोजकसौन्दर्यवदभिन्नं वदनम्' इत्यादिबोधा निरस्ताः । अस्यावश्यकतामाह *एवञ्चेति । इवादिसमभिव्याहारे इति भावः । *विभक्तिकत्वम्–तन्नियमः । अस्यार्थमाह *तेनेति । विशेषमाह *साधारणेति । *इतिबोधइति । अतो ऽत्रापि तयोः समानविभक्तिकतैवेति भावः । एवं 'गज इव गच्छति चैत्र' इत्यादौ बोध्यम् ।

'वनं गज इव शूरः समरभूमिं गच्छति' इत्यादौ 'उपमानगजकर्तृकवनगमनाभिन्नं शूरकर्तृकसमरभूमिगमनम्' इति बोधः । अत्र साधारणधर्मरूपगमनस्य विधेयतयोपमाविधेयिका धीः । 'व्याघ्र इव यः पुरुषः स गच्छति' इत्यादौ 'उपमानव्याघ्राभिन्नशूरपुरुषकर्तृकं गमनम्' इति धीः । शूरत्वादिसाधारणधर्मस्योद्देश्यतयोपमोद्देश्यिका ऽत्र धीरित्यादि ॥ २५ ॥

ये त्वत्र 'चन्द्रसादृश्यप्रयोजको मुखकर्तृक आह्लाद' इत्यर्थं वर्णयन्ति, तेषां तयोः समानवचनकत्वं दुर्लभम्।वचनं तु तादृशं न व्याकरणे उपलभ्यते । तत्र यद्यपि चन्द्रमुखयोस्तत्त्वेन भेदस्तथापि विशेषणतया प्रतीतसाधारणधर्मनिमित्ताभेदोपचारेणाभेदः । अत एव 'भेदाभेदप्रधाना उपमा' इति वृद्धाः । चन्द्रमुखयोः

सादृश्यप्रतीतिस्त्वार्थ्यैवेति बोध्यम् ।

इदमेव युक्तम् । घनश्याम इत्यादौ विग्रहे समासे च घनशब्दस्य तत्सदृशपरत्वे "उपमानानि सामान्यवचनैः" इत्यनेनोपमानत्वेन बोधकानि सामान्यधर्मविशिष्टोपमेयवचनैः समानाधिकरणैः समस्यन्ते इत्यर्थकेन समासानापत्तिः, घनपदस्याप्युपमेयपरत्वेन उपमानवाचकत्वाभावात् । न च भूतपूर्वगत्या तत्त्वम् । तद्विग्रहवाक्ये ऽप्युक्तरीत्या तत्त्वाभावात् । घनेन तुल्य इत्यत्र तथात्वे ऽपि तस्य विग्रहत्वाभावात् । प्रत्यासत्त्या तत्र वृत्तौ तद्विग्रहवाक्ये चोपमानवाचकत्वस्य ग्रहणौचित्यात् । तस्य तद्विग्रहत्वे 'मृगचपला'इत्यादौ पुंवत्त्वानापत्तिः । वृत्तौ विग्रहे च सामानाधिकरण्ये एव तत्प्रवृत्तेः ।

एतेन पूर्वावस्थाऽऽश्रयेण शक्त्या उपमानवाचित्वमिति कैयटः परास्तः ।

केवलशस्त्रीपदप्रयोगे तु सर्वथोपमानवाचित्वं दुरुपपादम् । एवं मृग्यादेः सादृश्यसम्बन्धेनान्वये ऽपि तदनुपपत्तिः । किञ्च श्यामशब्दस्योपमेयपरतया घने तदन्वयाभावेन तस्य साधारणधर्मवैशिष्ट्येनेतरपरिच्छेदकत्वरूपोपमानत्वाभावः ॥ २६ ॥

(कुं० टी०) *अभेद इति । यदि सर्वथा अभेदे उपमानोपमेयभावस्तदा तद्गतभूयोधर्मपरिच्छेद्यत्वरूपोपमेयत्वस्य तत्रासंभवः । अत एव तयोः सर्वथा भेदो ऽपि न । तस्मात्साधारणधर्मरूपेणाभेदस्तत्तद्रूपेण भेद इति भावः ।

इदं तु चिन्त्यते—उपमानोपमेययोः समानविभक्तिकत्व-नियमे "प्रत्ययोत्तरपदयोश्च" इति सूत्रे "यूयमिवाचरति युष्मद्यते" इति प्रत्युदाहरणासङ्गतिः । अत एव ईश्वर इव मुनय इति प्रयोगो ऽनुभवसिद्ध इति ।

*तत्त्वम्—उपमानत्वम् । *तत्त्वाभावादिति । घनसदृश इत्यस्यैव विग्रहार्थतया तत्राप्युपमानत्वाभावादित्यर्थः । *विग्रहत्वाभावादिति । घनतुल्यसदृश इति रूपापत्तेः ।

अयं भावः-शस्त्रीशब्दो यदि शस्त्र्यामेव वर्त्तते श्यामाशब्दोऽपि तस्यामेव समासेनचोपमेयाया देवदत्ताया अभिधानं तदा शस्त्रीश्यामो देवदत्त इति न स्यात् । अथ श्यामाशब्दो देवदत्तायां वर्त्तते तदा वैयधिकरण्यात्समासो न स्यात् । वचनसामर्थ्यात्समास इत्युक्तौ तु मृगीव चपला मृगचपलेत्यादौ पुंवद्भावो न स्यात् इति ।

*विग्रहवाक्येचेति । अन्यथा राज्ञी दासीत्यत्रापि पुंवद्भावापत्तेः । *अस्यैव—श्यामा इत्यस्यैव । *तदनुपपत्तिः—उपमानत्वानुपपत्तिः । *तदन्वयाभावेति । घननिष्ठश्यामत्वबोधाभावेनेत्यर्थः ॥ २६ ॥

(क० टी०) परमतं दूषयति *ये त्विति । इतिबोधं वदन्तीतिपाठः । एतेन 'अरविन्दमिव वदनं भाति इत्यत्र अरविन्दनिरूपितसादृश्यप्रकारकज्ञानविषयो मुखम्' इति बोध इति निरस्तम् । *नोपलभ्यते इति ।

एतेनात्र निपातेवादेरुपसर्गत्ववत् द्योतकत्वमेव, कथमन्यथा "शरैरुस्रैः" इत्यादावुस्रादिपदोत्तरतृतीयादिसङ्गतिः । उस्रादेरुद्धरणक्रियां प्रत्यकरणत्वात्, इवार्थसादृश्यान्वयित्वेन करणभूतशरविशेषणत्वाभावाच्च । द्योतकत्वे तूस्रादिपदस्य तत्सदृशपरतयोस्रसदृशैः शरैरिति शरविशेषणत्वेन तृतीयादिसङ्गतिरिति वैयाकरणमतंतु

न युक्तम्, 'उपास्यते गुरुः' इत्यादौ कर्मत्वानुपपत्तिरूपबाधकस्योपस्योपसर्गस्य वाचकतायामिवेवादिषु वाचकत्वे अभावेन दृष्टान्तवैषम्यात् । विशेषणविशेष्ययोः समानविभक्तिकतायाम्—

विशेष्येण सहैकार्थं भवेद्यत्र विशेषणम् ।
तत्र लिङ्गादयः प्रायो विशेष्यस्था विशेषणे ॥

इत्यनुशासनस्येवोपमानोपमेययोरपि तस्याम्—

लिङ्गसंख्याविभेदेऽपि ह्युपमानोपमेयता ।
विभक्तिः पुनरेकैव उपमानोपमेययोः ॥

इत्यनुशासनस्य सत्त्वेनोपमानपदोत्तरतृतीयादेः साधुत्वार्थतयोपपत्तेश्च । तस्माद्वाचकत्वमेवेवादीनाम् । अन्यथा सकलालंकारिकसंमतेवशब्दप्रयोगे श्रौतीत्वस्य दत्तजलाञ्जलित्वापत्तेः। रूढिफलान्यतराभावेन सदृशलक्षणायां निषिद्धलाक्षणिकत्वरूपनेयार्थत्वदोषापत्तेश्च। किञ्चेवादेर्द्योतकत्वे चन्द्राद्युपमानपदार्थैकदेशे तत्र साधारणधर्मान्वयानुपपत्तिः, तस्योपमेयमात्रान्वयाङ्गीकारे च लिङ्गवचनभेदस्य दोषत्वानुपपत्तिरिति वैद्यनाथोक्तमपास्तम् ।

"विशेषणानां च" इत्यादिसूत्रमते आद्यपद्यस्य कल्पितस्योपपत्तावपि प्रामाणिकत्वापत्तेः । अनवस्थापत्तेश्च । किञ्च क्रियागतविशेषबोधकातिरिक्तनिपातेषु पस्पशास्थ–अधिपरी–नञ्–अव्ययंविभक्तीत्यादिसूत्रस्थभाष्यस्वरसाद्द्युक्तेश्चोभयमित्यस्य वैयाकरणमतत्वेन भवदुक्तमतस्यैवाभावात् । तथा कस्य चिदुक्तेस्त्वदुक्तिलभ्यत्वात् । अत एव 'इति वैयाकरणमतं तु न युक्तम्'इत्युक्तिरपि 'काकस्य कति वा दन्ता' इतिन्यायायिता । तस्मात् 'शरैः' इत्यादावुक्तरीत्या द्योतकत्वमेव । एवं च 'तस्माद्वाचकत्वमेवेवादीनाम्' इति प्रतिज्ञानमपि शुक्तौ 'इदं रजतम्' इति ज्ञानवदविचारितरमणीयम् । एवम् 'उपास्यते गुरुरितिवदिवादिवाचकतायां बाधकाभावेन दृष्टान्तवैषम्यम्' इत्युक्तिरपि सिद्धान्ताज्ञानविलसिता । किञ्च इवादिप्रयोगे साधारणधर्मसम्बन्धरूपोपमाया वाच्यत्वेन सर्वालङ्कारिकसंमतश्रौतीत्वोपपत्तेः। सादृश्यप्रतीतिस्त्वार्थ्येवेति स्फुटमग्रे। अत एव–"सदृशे लक्षणा न" इति निषिद्धलाक्षणिकत्वापत्तिरूपदोषवद् "किञ्चेत्यादुक्तदोषोऽपि नेति दिक् । *तत्र–चन्द्र इव मुखमित्याभ्याम् । ननूभयोः साधारणधर्मवत्त्वेनाभेदप्रतीतावपि ततो निर्वाहः कथं "सादृश्य

भियोऽत आह *चन्द्रेति । नन्वार्थे प्रतीयमानमनियतधर्मकृतं प्रतीयेत उपस्थितत्वेन बोध्यधर्मकृतस्यैव प्रत्ययात् । 'गजो वनं गच्छतीव शूरः समरभूमिं गच्छति' इत्यादौ क्रियासमभिव्याहृते-वादेः संभावनाऽर्थत्वेन न तत्रोपमा । 'गजकर्तृकवनकर्मकगमनक्रिया-सम्भावनाविषयः शूरकर्तृकं समरकर्मकं गमनम्' इति बोधः । नच 'घटो न पश्यति' इत्यतो 'घटभेदं पश्यति' इति बोधवारणाय धात्व-र्थनिष्ठविशेष्यतानिरूपितप्रकारतया बोधं प्रति श्रूयमाणविभक्त्यन्तज-न्योपस्थितेर्हेतुत्वादेतद्बोधानुपपत्तिरिति वाच्यम् । दधि, तूष्णीम्, आरात्, पृथग् इत्यादीनां धात्वर्थान्वयानापत्तेः । घटो न पश्यतीत्या-देस्तूक्तार्थे न साधुत्वम्, भेदार्थकनञोऽधिकरणसाकाङ्क्षतया घटो न पट इत्येव तत्र प्रयोगात् । अधिकरणप्रयोगं विना भिन्नार्थकत्वस्याभा-वाद् । आरोपितघटत्वस्यापि न तथा ऽन्वयः । धात्वर्थ—सत्त्ववाचिना-मार्थोभयविषयकभेदसंसर्गकबोधे विभक्तिशक्तिग्रहत उद्बुद्धसंस्का-रस्य हेतुत्वात् । विशेषणविशेष्यभावान्यसंसर्गस्य वाचकप्रत्ययं विनाऽबोधाच्चेति स्फुटमग्रे षष्ठीप्रकरणे ।

एतेन 'हंसीव' इत्यादौ सादृश्यस्य स्वर्गङ्गावगाहनाश्रये ऽन्वयः, न त्ववगाहने धात्वर्थे । धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासं-सर्गेण शाब्दबोधे विशेष्यतया विभक्त्यर्थोपस्थितेर्हेतुत्वात् । नच निपातार्थभिन्नवृत्तित्वेन प्रकारता विशेषणीयेति वाच्यम् । 'घटो न पश्यति' इत्यादौ घटाद्यन्विताभावस्य कर्मतासंसर्गेण दर्शने ऽन्व-यापत्तेः । यदि तु धात्वर्थेऽपि तात्पर्यवशात्सादृश्यान्वयो ऽनु-भवसिद्धस्तदा धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेना-न्वयबुद्धिं प्रति नञ्जन्योपस्थितेः प्रतिबन्धकत्वमात्रं परिकल्प्य 'घटो न पश्यति' इत्यादौ तथा बोधो निवार्य इति तदुक्तमपास्तम् । क्रियान्यसमभिव्याहृतस्यात्यन्ताभावार्थकत्वस्याभावाच्चेत्यग्रे स्फुटी-भविष्यति ।

समासस्थले उक्तप्रकारं विना सर्वथा न गतिरिति तत्र तदावश्यकत्वे तदेकरूप्याय प्रागुक्तव्यस्तस्थले ऽपि तथैवो-चितमिति तत्र तथोक्तं समर्थयते *इदमेव युक्तमित्यादिना । तत्र हेतुमाह *घनेति । यत इत्यादिः । *विग्रहे इति । अलौ-किकविग्रहे इत्यर्थः । अन्यथा तस्यान्यार्थकत्वेन विग्रहत्वापत्त्या

तत्र तदर्थान्तर्भावेण समासो न स्यात्। इवस्य तत्राप्यभावात्, असामानाधिकरण्याच्चेति भावः। सिद्धान्तमाह *उपमानत्वेनेति। अन्यथा ससम्बन्धिकत्वात् "सामान्यवचनैः" इत्येव तेन समासलाभे तद्वैयर्थ्यं स्पष्टमेव। स्वपरसाधारणमाह *सामान्येति। अधिकृतमाह *समानाधिकरणैरिति। उपमानपरत्वस्यैवाभावेन तत्त्वेन बोधकत्वं सुतरां नास्तीत्याशयेनाह *घनपदेति। *अपिना श्यामपदसंग्रहः। "साम्प्रतिकाभावे" इति न्यायेनाह *न चेति। *उक्तेति। तत्रापि तस्य तत्परत्वावश्यकत्वमित्युक्तेत्यर्थः। लौकिकविग्रहे तु इवस्य सत्त्वे ऽपि सामानाधिकरण्याय तस्य तत्परत्वमावश्यकमिति तत्रापि तत्त्वाभावः, तद् ध्वनयन्नाह *घनेनेति। श्याम इति शेषः। *तथात्वेऽपीति। घनत्वेनोपमानबोधकत्वेऽपि व्यधिकरणत्वेन तस्य तदविग्रहत्वादित्यर्थः। ननु तस्य तद्विग्रहत्वे ऽपि अगत्या तत्त्वमेव तद् गृह्यते ऽत आह *प्रत्यासत्त्येति। *तत्र–तस्याम्। अन्यथा नीलोत्पलादावतिप्रसङ्गापत्तेः। अत एवाह *तस्येति। यत्र समासस्तत्र सामानाधिकरण्यापेक्षा नतु लौकिकविग्रहवाक्ये इति तत्र वैयधिकरण्ये ऽपि यावत्तदर्थबोधकत्वमात्रेणागत्या तत्त्वाङ्गीकारे इत्यर्थः। एवंच न समासापत्तिर्दोषः। अत एवाह *पुंवत्त्वेति। ननु तदपि समासवत्सुसाधमत आह *वृत्ताविति। अत एव दर्शनीयाया माता दर्शनीयामातेत्यादौ द्वयोरेकविशेष्यकप्रतीतिजनकत्वेन तत्र सामानाधिकरण्ये ऽपि न पुंवत्त्वम्। अत एवात्र पक्षे पुंवत्त्वासिद्धिर्भाष्ये उक्ता। तद् ध्वनयन्नाह *एनेति। पुंवत्त्वासाधनेनेत्यर्थः। कैयटाशयान्तरमाह *केवलेति। इयमेव पूर्वावस्था नतु विग्रहवाक्यघटकत्वावस्था। *सर्वेति। शक्तीत्वेन तस्य बोधकत्वेऽपि नियामकासमभिव्याहारेण तस्य तत्त्वेनाबोधकत्वात् अन्यथाऽतिप्रसङ्गापत्तेः।

एतेन पूर्वपदं तत्सदृशे लाक्षणिकमिति द्योतयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते इति लाक्षणिकमिति। अत एव सामानाधिकरण्यान्मृगचपलेत्यादौ पुंवत्त्वम्। कथं तर्ह्युपमानपरत्वमिति चेत्। भूतपूर्वगत्या शक्यार्थमादायेत्यर्थेवेहीति। अनतिप्रसङ्गायावश्यकस्योभयत्र सामानाधिकरण्यस्य निर्वाहाय तत्र वाक्ये ऽपि तत् सदृशलाक्षणिकम् इवस्तवस्यैवार्थस्य द्योतकः। 'घनसमानसदृशः

श्याम' इति बोधः सर्वत्रेति च दीक्षिताद्युक्तम्, अरविन्दसुन्दरमिति समासे त्वरविन्दपदेनारविन्दनिरूपितसादृश्यप्रयोजकाभिन्नसौन्दर्यवदभिन्नं वदनमिति बोधः । एकदेशान्वयायोगादरविन्दमेव लक्षणया सर्वार्थबोधकं सुन्दरपदं तु तात्पर्यग्राहकमित्येके इति तदुक्तं चापास्तम् । उक्तरीतिभिः समासाद्यनापत्तेस्तथाबोधासम्भवाच्च । उक्तदोषद्वयमसामानाधिकरण्यादन्यपक्षेऽतिदिशति *एवमिति । तत्र पक्षे इवेत्यर्थः । सादृश्यस्य संसर्गतया भानं नतु तद्वत् प्रकारतयेति भावः । *तत्–उभयम् । उक्तरीत्या प्राचां मतेन समासमभ्युपेत्य पुंवत्त्वाभावदोष उक्तः । वस्तुतः सिद्धान्तरीत्या सो ऽपि नेत्याह *किञ्चेति । तथाबोधे इति शेषः । श्यामत्ववैशिष्ट्येनोपमेयस्यैव प्रतीतेराह *श्यामेति । *तस्य—घनस्य । तथाच तेनाबोधकत्वात्समासो नेति भावः ॥ २६ ॥

तदुक्तं भाष्ये "यदि शस्त्रीव श्यामा देवदत्तेति विग्रहस्तदा शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यात् । यदि यथा शस्त्री श्यामा तद्वद् देवदत्तेति विग्रहस्तदा देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यात्" इति ।

कैयटेऽपि–'न च शब्दस्यावृत्तिरस्ति येनोभयगतश्यामत्वं प्रतिपादयेद्' इति । एको हि श्यामाशब्द एकगतगुणस्यैव प्रतिपादकः, नहि तस्य शब्दान्वयं विना उक्तमुपमानत्वमिति तद्भावः । श्यामेत्यस्योपमेयपरत्वाभावे तु साधारणधर्मविशिष्टोपमेयपरत्वरूपसामान्यवचनत्वाभावात्समासो न स्यात् ।

अतएव भाष्ये "शस्त्रीशब्दः शस्त्र्यामेव श्यामाशब्दो देवदत्तायामेव" इति पक्षे "सामानाधिकरण्याभावात्समासपुंवद्भावौ न प्राप्नुत" इत्युक्त्वा "एवं

तर्हि तस्यामेवोभयं वर्त्तते इति युक्तम्" इत्युक्तम् ।

तत्र तस्यामेवेत्यस्योपमेयायामेवेत्यर्थः । उपमानशब्दोऽपि सादृश्यमूलाभेदाध्यवसायात्तत्रेति तद्भावः । तत्र सादृश्यनिर्वाहायास्यैव तन्त्रादिना उपमानेऽपि सम्बन्धोऽवश्यं वाच्यः ।

तदुक्तं कैयटेन-'यदा देवदत्तायां शस्त्रीत्वमारोप्यते सादृश्यात् तदा कं गुणमाश्रित्य तयोः सादृश्यम्' इत्याशङ्क्य, 'यदा चन्द्रमुखीत्यादौ चन्द्रेऽनेकगुणसत्त्वेऽपि तात्पर्यवशात्प्रियदर्शनत्वमनिर्दिष्टोऽपि गुणो वृद्धव्यवहारादुपमानिमित्तं तदोपमेये श्रुतः संनिधानात् कथमुपमानं न स्प्रक्ष्यति' इति ।

अत एवैतदुत्तरं 'शस्त्रीशब्देनाभिसंबध्यमानत्वात् श्यामाशब्दस्य सामान्यवचनत्वाभावः' इत्याशङ्कितम् । शस्त्रीशब्देनाप्यभिसंबध्यमानत्वादिति तदर्थः । बहूनां यः सामान्यमाह स एव सामान्यवचन इत्याशयेन शङ्का। ततः सिद्धान्तिनोक्तं "श्यामत्वस्योभयत्र शस्त्र्यां देवदत्तायां च भावात्, उभयगतगुणवाचकत्वाच्च श्यामाशब्दस्य सामान्यवचनत्वम् । नावश्यं स एव सामान्यवचनो यो बहूनां सामान्यमाह द्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचनः" इति । अत्रोभयगतगुणवाचकत्वादित्यनेनोभयोः साधारणधर्मसंबन्धः शाब्द इति सूचितम् । अतएव "सामान्यैः" इति नोक्तं "सामान्यवचनैः" इति चोक्तम् । तच्चोभयान्वयित्वेनोभयगतधर्मवाचकत्वबोधनार्थम् । श्यामाशब्दस्य द्विगतधर्मवाचकत्वेनैव

सामान्यवचनत्वं बोध्यम्। एवं चोपमानश्यामघनाभिन्नः श्यामो देवदत्त इति बोध इति भाष्यस्वरसः॥२७॥

(कुं० टी०) अपेक्ष्यंस्यादिति। तत्त्वेन बोधार्थमिति शेषः। *शब्दस्य-श्यामाशब्दस्य। *अस्यैव-श्यामाइत्यस्यैव।*इति-चोक्तमिति। उपमानोपमेयसाधारणो धर्मः सामान्यं तद्वाचकत्वं च सामान्यवचनत्वम् ॥ २७ ॥

(क० टी०) तथार्थबोधलाभो न परोक्तबोधलाभ इत्याशयेनोक्तार्थे तत्संमतिमप्याह *तदुक्तमिति । *कैयटेऽपि-उक्तमित्यस्यानुषङ्गः । तदेवाह *न चेति । *उक्तमिति । तत्त्वाशस्त्र्याः साधारणधर्मवत्त्वेनेतरपरिच्छेदकत्वरूपामित्यर्थः । तत्त्वायैव हि तदपेक्षेति भावः । भाष्याद्यनुक्तमाह *श्यामेत्येति । गुणव्यक्तेर्विशेष्यतया स्त्रीत्वम् । ननु सामान्यवचत्वन्तादृशमित्यत्रैव किं मानमत आह *अत एवेति। तस्य तद्रूपत्वादेवेत्यर्थः। *पक्षेइति। सादृश्यसम्बन्धेनान्वय इति भावः । उपमानाभ्रमायाह *तत्रेति। सिद्धान्ते इत्यर्थः । अनेन तस्य तद्रूपत्वं स्पष्टमेवोक्तम् । बाधनिरासायाह *उपेति । नन्वेवमपि सादृश्यस्यान्यमूलकत्वस्य वाच्यत्वादेतन्मूलकत्वस्योक्तरीत्याऽसम्भवात्, भाष्यतो ऽलाभाच्च तादृशोपमानत्वालाभेनोक्तभाष्यासङ्गतिरत आह *तत्रेति । उपमेये इत्यर्थः। *अस्यैव-श्यामत्वस्यैव। *तन्त्रादीत्यादिना बोद्धुरावृत्तिः। तथाचात्र तन्त्रमसहविवक्षाविषयविभक्त्यन्ततन्त्रं बोध्यम् । उपात्तधर्मसत्त्वे सांनिध्यात्तेनैव सा प्रतीतिरनुभवसिद्धेति भावः। अत्र संमतिमाह *तदुक्तमिति । तात्पर्यग्राहकमाह *वृद्धेति । अत्र भाष्यसंमतिमप्याह *अतएवेति । *तस्यैव-तत्रान्वयादेवेत्यर्थः। अस्योभयत्रान्वयः । एतदुत्तरमितिसूचितं नावधारणपरं भाष्यमित्यत आह *शस्त्रीशब्देनापीति । नन्वेवं शङ्काऽसङ्गतिरतः सिद्धान्तानुरोधेनाह *बहूनामिति । बहुगतधर्मस्यैव सामान्यत्वमिति तत्र समासे द्विगतधर्मबोधकत्वेनातत्त्वादिति भावः । उभयत्रेत्यस्य व्याख्या *शस्त्र्यामिति । *बहूनामिति। बहूनान्तेषामेव । नन्वेतद्भाष्यत उभयत्र गुणसत्तायाः, शब्दे त-

द्वाचकत्वस्य च लाभे ऽप्युभयत्रान्वयो न लब्धोऽत आह *अत्रेति । सिद्धान्तभाष्ये इत्यर्थः । अन्यथा तद्धत्त्वाच्चेत्येव सिद्धे तथोक्तिरधिकेति स्पष्टमेव । किञ्च तथासति वस्तुतो बहुधर्मवाचकताया अपि श्यामाशब्दे सत्त्वेन "नावश्यम्" इत्यादिभाष्यस्थपूर्वपक्षस्य निरालम्बनताऽऽपत्तिस्तस्माद्यावतामर्थानां शब्दजबोधेऽन्वयस्तावतां तच्छब्दवाच्यतेत्येव भाष्यतात्पर्यम् । एवं भाष्यसंमते सूत्रसंमतिमप्याह *अतएवेति । तस्योभयोः शाब्दत्वादेवेत्यर्थः । तथासति लक्षणया लब्धमर्थमाह *तच्चेति । एतत्सर्वं विग्रहविषयम् । वृत्तौ तु "उपमानानि" इत्युक्त्यैकार्थीभावबलात्तदुपस्थितिरिति बोध्यम् । यद्यपि तयोः स्वरूपतो भेद एव तथाऽप्युक्तरीत्या ऽभेदस्यापि प्रतीतेः सामानाधिकरण्यनिमित्तसमासपुंवद्भावौ सिद्धौ । अनेन भाष्येणोपमानश्यामशस्त्र्यभिन्ना श्यामा देवदत्तेति बोध इति स्पष्टमेवोक्तम् । तदभिप्रेत्य प्रकृते आह *श्यामेति । एवेन बहुगतधर्मवाचकत्वव्यवच्छेदः । एतेन तथा लोकप्रवादो निरस्तः । *एवञ्च-तथासत्त्वे च ॥ २७ ॥

काव्यप्रकाशस्वरसो ऽप्येवमेव ।

तत्राहि एवमुक्तम्-"यथेववाशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति । यद्यप्युपमानविशेषणानि ते, तथाऽपि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत्सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा । तेन तुल्यम् इत्यादौ प्रतीततुल्यतोपपत्तये साधर्म्यस्यार्थत्वादार्थी"इति । यत्परा इत्यस्य यदनन्तरमुपात्ता इत्यर्थः । उपमानताप्रतीतिश्च शाब्द्येव । तेषां शब्दानामुपमानविशेषणार्थप्रतिपादकत्वेऽस्यां: इतिना हेतुत्वेनोपादानात् । उपमानविशेषणानीति बहुव्रीहिरिति तु न युक्तम् । पुंस्त्वापत्तेः । उपमानविशेषणा एते

१ प्रतीतेरित्यर्थः ।

इति पाठस्तु प्रदीपादिविरुद्ध इत्यन्यत्र विस्तरः ।

नचैवं 'पुरुषो व्याघ्र इव शूरः' इत्यादौ भवदुक्तरीत्या बोधे विशेषणस्य व्याघ्रस्यापि सविशेषणत्वेनासामर्थ्यात्समासो न स्यादिति वाच्यम्। उपमानत्वेन बोधकस्य तस्य साधारणधर्मांशे नित्यसापेक्षत्वेनादोषात् । साधारणधर्मवत्त्वेन परिच्छेदकत्वं हि तत्त्वम् । तच्च तत्त्वेन ज्ञातस्यैव ।

यद्यप्युपमेयत्वं तद्वत्त्वेन परिच्छेद्यत्वमेव तस्य च तत्त्वं विधेयमिति न तन्नित्यसापेक्षम्, तथाऽपि प्रधानस्य सापेक्षत्वेन भवत्येव समासः । प्रधानेऽनेकविशेषणसम्बन्धसम्भवात् । 'देवदत्तो धनी सुन्दरश्च' इतिवत् । अतएव "सामान्याप्रयोगे" इति चरितार्थम् ।

अस्तु वा उपमेयस्यापि नित्यसापेक्षत्वम्, परन्तु तत्त्वं न समासप्रयोजकम्, किन्तु गमकत्वमेवेति समासवादे वक्ष्यते । तस्य तत्त्वं च बहुशो दृष्टमिति अत्रापि समासः स्यादिति तद्वारणाय "सामान्याप्रयोगे" इति । इदमेव तत्र गमकत्वबोधकमिति बोध्यम् ॥ २८ ॥

(कुं० टी०) *यथेति । यथादिशब्दा यस्यानन्तरं प्रयुज्यन्ते तस्योपमानत्वमित्यर्थः ।

उपमा द्विविधा श्रौती आर्थीच । उपमानोपमेययोः साधारणधर्मसम्बन्धरूपाया उपमायाः शाब्दबोधविषयत्वं श्रौतत्वम् । अर्थापत्तिविषयत्वमार्थत्वम् । नन्विवादिशब्दानाम्, तुल्या-

दिशब्दानां चार्थप्रतीतौ विशेषाभावादियं शाब्दी, इयमार्थीति विषयविभागो न युक्तः। नच यथाऽऽदिशब्दैः साधारणधर्मसम्बन्ध उभयत्र शक्त्यैव बोध्यते तुल्यादिशब्दैस्तु नेतीति वाच्यम्। यथादिशब्दा यदनन्तरमुपात्तास्तस्यैवोपमानतां प्रतिपादयन्तीति शङ्कते *यद्यपीति। *उपमानविशेषणानीति। उपमानविशेषणार्थप्रतिपादकानीत्यर्थः। एवं चोपमान एव तत्सम्बन्धं बोधयन्ति न तूपमेये अन्यविशेषणस्यान्यत्र सम्बन्धबोधकत्वाभावादिति भावः। शब्दशक्तिस्वाभाव्यादन्यविशेषणस्याप्यन्यत्र सम्बन्धबोधकत्वमस्तीत्याह *षष्ठीवदिति। षष्ठी हि यदनन्तरमुपात्ता तस्यैवोपसर्जनत्वं गमयन्त्यपि प्रधानेऽपि सम्बन्धं बोधयतीति भावः। *आर्थीति। तथाच सम्बन्धबोधे विशेषात् श्रौत्यर्थीविभागः। तथाहि 'चन्द्रइव मुखम्' इत्यादौ रमणीयत्वादिसम्बन्धमविषयीकृत्य तु न पर्यवसानं यथादिशब्दानां धर्मविशेषसम्बन्धे एव शक्तत्वात्। 'चन्द्रेण तुल्यं मुखम्' इत्यादौ तु सामान्यतस्तुल्यत्वं बोधयित्वा विश्रान्ते तस्मिन् धर्मविशेषं विना कथं तुल्यतेति शङ्कायां धर्मविशेषसम्बन्धप्रतीतिरिति। *इतिनेति। 'तस्यैवोपमानताप्रतीतिरिति' इति काव्यप्रकाशवाक्ये इतिशब्देन उपमानविशेषणार्थप्रतिपादकत्वं हेतुर्निर्दिश्यते इत्यर्थः। *भवदुक्तरीत्येति। उपमानशूरव्याघ्रेत्याद्याकारकेत्यर्थः *नस्यादिति। तथाच किं "सामान्याप्रयोगे" इतिनिषेधेनेति भावः। *नित्यसापेक्षत्वेनेति। साधारणधर्मसम्बन्धं विना उपमानत्वस्यैवासम्भवात्। *साधारणधर्मवत्त्वेनेति। साधारणधर्महेतुकपरिच्छेदकरणत्वमित्यर्थः। *तत्त्वम्—उपमानत्वम्। *तच्च—उपमानत्वञ्च। *तत्त्वेन—साधारणधर्मवत्त्वेन। ननूपमानस्य नित्यसापेक्षत्वे ऽप्युपमेयस्य नित्यसापे-

क्त्वाभावात् समासानुपपत्तिरेवेत्याशङ्कते *यद्यपीति । *तस्य-उपमेयस्य। *तत्त्वम्-परिच्छेद्यत्वम्। *तत्त्वम्-नित्यसापेक्षत्वम्। *गमकत्वमिति । राजपुरुष इत्यत्राकाङ्क्षायाः शान्तत्वान्न ऋद्धान्वयः । देवदत्तस्य गुरुकुलमित्यादौ तु नित्यसापेक्षत्वेनाकाङ्क्षाया अशान्तत्वाद् भवति विशेषणान्वय इति भावः। *तस्य-गमकत्वस्य । *तत्त्वम्-समासप्रयोजकत्वम् । *इदमेव-सामान्याप्रयोग इति वचनमेव। *तत्र-पुरुषो व्याघ्र इवेत्यत्र ॥ २८ ॥

(क० टी०) एवं सिद्धान्ते आलङ्कारिकसंमतिमपि तदविरोधायाह *काव्येति । "तत्र तस्येव" इति विहितवतेरपि पूर्वत्र संग्रह इति ध्वनयन्नाह *तेनतुल्यमिति । तथा वाक्ये, तत्र विहितवतिघटितवाक्येचेत्यर्थः । बहुव्रीहावर्थासङ्गतेराह *यदनन्तरमिति । आर्थत्वे विरोधापत्तेराह *उपमानतेति । *तेषाम्-यथेवादीनाम् । *उपमानविशेषणानीत्यस्योपमानं विशेषयन्ति उपमानत्ववैशिष्ट्येन बोधयन्तीति व्युत्पत्त्योपमानविशेषणोपमानत्वद्योतकानीत्यर्थः। तदाह *उपमानेति । *अस्याः-तत्प्रतीतेः । अस्येत्यपपाठः। उपमानता सादृश्यमिति प्राचां मतमेव प्रकाशाभिमतमिति खण्डयति *उपमानेति । तत्रेष्टापत्तिस्तथैव पाठादिति खण्डयति *उपमानेति। *प्रदीपेति। तत्र हि-नन्वयं विभागोऽनुपपन्नः उभयत्र सादृश्यप्रत्ययाविशेषात् । नचेवादिशब्दैः साधारणधर्मसम्बन्ध उभयत्र बोध्यते न तुल्यादिशब्दैरिति विशेषः, यतो यथाऽऽदयो यदनन्तरमुपात्तास्तस्यैवोपमानताप्रतीतिरिति उपमानविशेषणानि ते; अत उपमाने तत्सम्बन्धं बोधयन्ति, नतूपमेये, अन्यविशेषणस्यान्यत्र सम्बन्धबोधकत्वादर्शनादिति चेन्न । शब्दशक्तीत्याद्युक्तम् । अन्यविशेषणत्वे ऽप्यन्यत्र सम्बन्धबोधकत्वे ऽदृष्टचरत्वनिरासाय षष्ठीवदिति दृष्टान्त उक्तः । सा यथा 'राज्ञः पुरुष' इत्यादौ स्वस्वामिभावादिसम्बन्धबोधिका प्रकृत्यर्थस्य विशेषणत्वबोधिका च, विशेषणस्येतरविशेषणत्वार्थं सम्बन्धस्याकाङ्क्षणादिति तन्निष्ठाविशेषणत्वस्वामित्वबोधकत्वे ऽपि प्रधाने पुरुषे सम्बन्धस्य द्विष्ठतास्व-

भावत्वात्सम्बन्धघटकं स्वत्वं बोधयति, तथेवादिना तत्रोपमानत्वं तन्निर्वाहकाह्लादकत्वादिसाधारणधर्मसम्बन्धश्च बोध्यते उक्तहेतोरिति तदर्थः । तदाह *अन्यत्रेति । काव्यप्रदीपोद्द्योते इत्यर्थः । *एवम्-"उपमानानि" इति सूत्रविषये घनश्यामादौ तथाङ्गीकारे । "उपमितम्" इतिसूत्रविषये दोषमाह *पुरुषइति । *समासइति । तथाच "सामान्याप्रयोगे" इति सूत्रं च व्यर्थं स्यात् । शङ्कायास्तत्रापि तुल्यत्वात् । अध्यर्द्धसूत्रसाधारणगत्यन्तरसम्भवे विशिष्य सूत्रवैयर्थ्योक्तेर्हेतुत्वमयुक्तमित्याशयेनाह *उपमानेति । "उपमितम्" इत्येतत्स्वारस्यात्, तस्योपमानेन नित्यसाकाङ्क्षत्वाच्च व्याघ्रादीनामुपमानत्वे एव तत्प्रवृत्तेः तस्य रूढत्वात् । *तच्च-तादृशोपमानत्वं च । *तत्त्वेन-साधारणधर्मवत्त्वेन । तथाच तस्य सिद्धत्वान्नित्यसापेक्षत्वमिति भावः । नन्वेवं पूर्वसूत्रसार्थक्ये ऽपि नोत्तरसूत्रसार्थक्यमित्याशयेन शङ्कते *यद्यपीति । *तस्य तत्त्वम्-उपमेयस्योपमेयत्वम् । *विधेयम्-विधेयमेव । तथासामर्थ्ये हेतोः प्रसिद्धत्वायाह *सम्भवादेवेति । एतत्सूचकमेव विशेषणमित्याह *अत एवेति । तत्रासामर्थ्याभावादेवेत्यर्थः । ननु विधेयत्वेन पूर्वमप्रतीतावपि ततः प्रतीतस्य नित्यसापेक्षत्वं दुर्वारमिति तथा प्राचां ग्रन्थासङ्गतिरेव अत आह *अस्तुवेति । अत्र मते वैलक्षण्यमाह *परन्त्विति । *तत्त्वम्-नित्यसापेक्षत्वम् । *गमकत्वम्-अर्थावबोधकत्वम् । अन्यथा दोष इत्याह *इतिसमासेति । *तस्येति । 'राजपुरुषः सुन्दर'इत्यादौ प्रधानस्यार्थावबोधकत्वमित्यर्थः । *अत्रापि-सामान्यप्रयोगे ऽपि । प्राग्वदाह *इदमिति । उक्तविशेषणमेवेत्यर्थः । *तत्र-नित्यसापेक्षप्रधानसमासे । अत एव पुरुषव्याघ्र इत्यादौ समाससिद्धिः, अन्यथा आक्षिप्तसाधारणधर्मान्वयस्योभयत्राप्यावश्यकत्वेन तत्रापि समासो न स्यात् ॥ २८ ॥

एवञ्च इवादियोगे साधारणधर्मसम्बन्धरूपा उपमा वाच्या, सादृश्यप्रतीतिरार्थी । सदृशादिपदयोगे सादृश्यप्रतीतिः शाब्दी उपमा त्वार्थी । सादृश्यं तु साधारणधर्मसम्बन्धप्रयोज्यं सदृशादिपदशक्य-

तावच्छेदकतया सिद्धम्, सदृशदर्शने संस्कारोद्बोधकत्वस्य सर्वसंमतत्वेन तत्त्वेन तत्कारणतावच्छेदकतया ~~च~~ सिद्धमखण्डमतिरिक्तः पदार्थः । नचातिरिक्तपदार्थत्वे गोतमकणादोक्तपदार्थसंख्याविरोध इति वाच्यम् । प्रमेयपदार्थे गोतमोक्तेऽन्तर्भावात् ।

किञ्च पदार्थसंख्याबन्धनमुपलक्षणमेव ।

तदुक्तं गोतमेन "संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्" इति ।

'पदार्थगतसंख्यानियमस्यासिद्धिः कारणप्रमाणस्यानुपपत्तेः । उपपत्तौ न तन्नियमः, साधनस्य साध्यातिरेकाद्' इति तदर्थं तद्व्याख्यातार आहुः ।

किञ्च "अकर्त्तरि च कारके" इति सूत्रे भाष्ये "-"नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः" । नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते, तथा ह्यर्थो गम्यते । तद्यथा-अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति, एवमिहापि "अकर्त्तरि" इति कर्तृप्रतिषेधादन्यस्मिन्नकर्त्तरि कर्तृसदृशे कार्यं विज्ञायते । किञ्चान्यत् अकर्तृ कर्तृसदृशं कारकम्" इत्युक्तम् । एवं च सूत्रे कारकग्रहणं प्रत्याख्यातम् । "कर्तृप्रतिषेधाद्" इत्यस्यारोपितकर्तृबोधादित्यर्थः । अनेन हि भाष्येणाभेदेऽपि सादृश्यमिति सूच्यते । अन्यथाऽन्यस्मिन्नित्यस्य वैयर्थ्यापत्तिः । तथा इवयोगेऽपि भेदसादृश्ये गम्ये, न तु तद्वाच्ये द्योत्येचेति प्रतीयते । इव-

युक्तोदाहरणम् "इवे प्रतिकृतौ" इत्यधिकारे "शाखादिभ्यो यः" इति ये सोम्य इत्यादि । तत्र सोमसदृशस्तद्भिन्नः प्रतीयते न तु सोम एव ।

एतेन भेदनियतं सादृश्यमित्यपास्तम् । अस्या मुखसदृशमस्या मुखमित्यादावभेदे ऽपि सादृश्यप्रतीतेश्च ॥ २९ ॥

(कुं० टी०)*वाच्या-शब्दलभ्या । *गोतमेति । प्रमाणप्रमेयादयः षोडश पदार्था इति गोतमः, सप्तेति कणादः । *बन्धनम्-नियमनम् । "एकमेवाद्वयम्" इत्यादिश्रुतिबलात् द्वितीयाभावमाशङ्क्याह *संख्यैकान्तासिद्धिरिति । संख्यैकान्तो नियमो न सिद्ध्यति । प्रमाणस्यानुपपत्तेः-असत्त्वात् । वस्तुमात्रस्य ब्रह्मरूपत्वे तद्व्यतिरिक्तस्य प्रमाणस्य वक्तुमशक्यत्वादिति भावः । उपपत्तौ वा अतिरिक्तप्रमाणानि सन्त्येवेति न संख्यैकान्तः । साधनस्य साध्यातिरिक्तस्यापेक्षितत्वादिति तदर्थः । साध्यस्य एकत्वेन साधनीयस्य वस्तुमात्रस्य पक्षतया पक्षातिरिक्तहेतोरभावादिति भावः । एका संख्यैव पदार्थ इत्यत्र, सप्तत्वविशिष्टाः पदार्थाः साध्यन्ते तत्रापि तदतिरिक्तप्रमाणसत्त्वासत्त्वाभ्यामुक्तरीत्या दोषो बोध्यः ।

अन्ये तु सादृश्यस्यातिरिक्तत्वे सुसदृशमीषत्सदृशमित्युत्कर्षापकर्षाभावप्रसङ्गः । सिद्धान्ते तु सामान्याल्पत्वभूयस्त्वाभ्यां तदुपपत्तिरिति सामान्येऽन्तर्भावः । तद्गतभूयोधर्मवत्त्वस्य सादृश्योपाधित्वेन प्रमेयत्वादिवत्सामान्ये ऽपि वृत्तेः ।

न च सामान्यनिष्ठं प्रतियोगिसादृश्यं च सप्रतियोगिकमिति शङ्क्यम् ।

इतरनिरूप्यं हि सप्रतियोगिकत्वं तद्गतधर्मवत्त्वलक्षणं तथा । ननु भाष्ये कर्तृप्रतिषेधादित्ययुक्तमकर्त्तरीत्यस्य पर्युदासत्वादत आह *आरोपितेति । भेदसादृश्ये गम्ये इति भावः । *सादृश्यं च–प्रतीयते इत्यर्थः । *भेदनियतमिति । तदुक्तं हरिणा ।

साहश्यमेव सर्वत्र प्रकारः कैश्चिदिष्यते ।

भेदेऽपि तु प्रकाराख्या कैश्चिदभ्युपगम्यते ॥ इति ॥ २९ ॥

(क० टी०) विशेषं वक्तुं प्रकारातात्पर्यमाह *एवञ्चेति । तथा सिद्धान्तेचेत्यर्थः । *आर्थीति । हेतुहेतुमतोर्नित्यसम्बन्धेन तात्पर्यतो वक्त्रादिवैशिष्ट्येन च व्यञ्जनया तत्प्रतीतेरिति भावः । नन्वयुक्तमेतत् सादृश्यस्य धर्मरूपत्वेन ततो भेदाभावादत आह *सादृश्यन्त्विवति । अस्य जनकमाह *साधारणेति । ज्ञापकं सिद्धान्तमतेनाह *सदृशेति । परमतेनाप्याह *सदृशेति । परमतनिरासायाह *अखण्डमिति । तस्य क्वचिदप्यन्तर्भावासम्भवादाह *अतिरिक्तमिति । *संख्येति । षोडशत्वसप्तत्वेत्यर्थः । आद्याविरोधसम्भवान्न तथेत्याह *प्रमेयेति । द्वितीयविरोधमाद्योक्त्याऽन्यथा परिहरति *किञ्चेति । पदार्थगतसंख्यानिबन्धनमित्यर्थः । तत्र "अथेमे संख्यैकान्ताः–सर्वमेकं सदविशेषात्, सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा ज्ञातृज्ञानज्ञेयभेदात्, सर्वं चतुर्धा प्रमातृप्रमाणप्रमेयप्रमितिभेदात् । एवं यथासम्भवमन्येष्वपीति । तत्र परीक्षा संख्यैकान्तेति । यदि साध्यसाधनयोर्नानात्वं तदैकान्तो न सिध्यति व्यतिरेकात् । अथ साध्यसाधनयोरभेदः एवमप्येकान्तो न सिध्यति साधनाभावात् । नहि तमन्तरेण कस्यचित्सिद्धिः" इति वात्स्यायनभाष्यं तदाह *पदार्थेति । *उपपत्तौ–तत्रापि । एतेन तन्नियमपरतया व्याख्यानं तत्परिष्कारं च कुर्वन्तोऽर्वाचीननैयायिकाः परास्ताः । मूलविरोधात् । सर्वपरमतनिरासाय स्वमते साधकान्तरं विशेषं वक्तुमाह *किञ्चेति । प्रसज्यप्रतिषेधात्पर्युदासो न्याय्य इत्याह *नञिवेति । नञ्युक्तमिवयुक्तञ्चेति यत्किञ्चित् दृश्य-

ते तत्र तस्मादिति शेषः । योगश्च प्रयोगभेदेन बोध्यः । तथा-च चो वार्थे । *तत्सदृशे-अधिकरणे द्रव्ये । *तथाहीति-हि यतः, लोके तादृशार्थप्रतीतिरेवास्तीत्यर्थः । तदेवाह *तद्यथेति । *लोष्टम्-मृत्पिण्डम् । *एवञ्चेति । पर्युदासेन तथा लाभेत्यर्थः । एतेन फलान्तरम्, अर्थान्तरञ्चास्या वदन्तः सीरदेवादयः परास्ताः । नन्वेवं कथं प्रतिषेधोक्तिरत आह *कर्तृनिषेधादिति । सिद्धान्तमतेनाह *आरोपितेति । अनेनायं शाब्दः स आर्थ इति सूचितम् । प्रकृतोप-योगमाह *अनेनहीति । हि यतः, सादृश्यस्यातिरिक्तत्वात् । *तथे-वेति । यथा नञ्योगे उक्तविषये तथाशाब्दार्थेन भेदसादृश्ययोः परिभाषाप्रतिपाद्ययोर्गम्यत्वं तथेत्यर्थः । तुल्यतया प्रतिपादना-दिति भावः । *तद्वाच्ये-इववाच्ये । नन्वेवमिवयुक्तोदाहरणा-सम्भवः, 'चन्द्र इव मुखम्' इत्यादावभेदवत् भेदस्यापि शाब्दत्वात्। अत एव "तत्र तस्येव" इति विहितवत्यन्तमपि न, नापि केवलं चन्द्रइवेत्यादि तस्य प्रसिद्धार्थे प्रयोगेऽपि तदर्थे शिष्टप्रयोगाभावादत आह *इवेति । *अधिकारेइति । पठितेनेति शेषः । तत्रारोपितसो-मबोधस्य शाब्दत्वादाह *तद्भिन्नः । *प्रतीयत इति । ननु तत्र गम-कासम्भवात् उक्तार्थासम्भवे ऽपि सादृश्यमिववाच्यमेवास्तु, भेदस्य तु तदर्थत्वमेव तत्प्रागुक्तं तदेतद्ध्वनयन्नाह *नतुसोम एवेति । एवं-च परिभाषायामिवस्तादृशनअर्थसजातीयार्थक एव । तद्युक्तस्त्वम-प्यर्थतो नतु शब्दत इति बोध्यम् । नैयायिकादिमतं खण्डयति *एतेनेति । अन्यपदघटितपरिभाषाव्याख्यातृभाष्यविरोधेनेत्य-र्थः । मतद्वयसंग्रहायाह *भेदनियतमिति । अतएवाह *अ-स्याइति ॥ २९ ॥

नचाभेदे साधारणधर्माभावात् कथं तत्प्रयोज्यं सादृश्यमिति वाच्यम् । अनेकवृत्तिधर्मस्यैव साधा-रणधर्मत्वेन तत्रावृत्त्या एकस्याप्यनेकत्वात् ।

अत एव अइउण्सूत्रे भाष्ये-"एकां कपिलां स-हस्रमृषय एकैकशो दत्त्वा तथा सर्वे ते सहस्रदक्षिणाः

सम्पन्नाः" इति श्रौतेन स्मार्त्तेन वा व्यवहारेण एकस्या अप्यावृत्त्या अनेकत्वं सूचितम्। अत एव "सप्तदश सामिधेन्यो भवन्ति" इति श्रुतौ पठितत्रयोदशसामिधेनीमन्त्राणां प्रथमान्त्यमन्त्रयोस्त्रिरावृत्त्या सप्तदशत्वमुक्तं श्रौतसूत्रे। अत एव "एक एवाकारः" इति पक्षे 'घटिक' इत्यादावावृत्तिकृतद्व्यच्त्वेन "नौद्व्यचः ठन्" इति ठन्नुक्तो भाष्ये।

एतेनायं व्यवहारो गौण इति परास्तम्। मुख्यद्व्यचि चारितार्थ्येनात्राप्रवृत्त्यापत्तेः। उत्तरसंख्यया पूर्वसंख्याबाधात्। घटेनेत्यादौ "सावेकाचः" इति स्वरो न स्यादिति चोक्तम्।

एवं चैकस्यैव ब्राह्मणस्यावृत्त्या भोजनदानेन दशादिब्राह्मणभोजनसङ्कल्पः सिद्ध्यतीति बोध्यम्। एवं प्रकृतेऽपि मुख्यस्यानेकत्वेनैकस्यापि धर्मस्य साधारणधर्मत्वम्। न चैकस्यैवावृत्त्याऽनेकत्ववत् कालादिभेदेन भेदं प्रकल्प्य मुखमिव मुखमित्यादावुपमैवास्त्विति वाच्यम्। तस्य भेदस्य शब्देनासंस्पर्शात्।

अतएव "उपमानानि" इति सूत्रे भाष्ये "यदेवोपमानं तदेवोपमेयं क इहोपमाऽर्थः गौरिव गौः" इति। उपमानोपमेयभावद्योतकेवशब्दप्रयोगे किं प्रयोजनं कर्मकरणरूपोपमानोपमेयभावस्यैकत्रासम्भवात् इवस्यार्थान्तराभावात्। न च द्वितीयसदृशव्यवच्छेदप्रतीतिः फलम्। गोसदृशो गौरित्यतोऽपि तत्सम्भवात्। अभेदेऽपि सादृश्याङ्गीकारेण तस्य बोधकत्वादबोधकैतत्प्रयोगो न स्यात्। एवं-

चोपमालंकारस्य, अस्य सूत्रस्य चोक्तिसम्भवाभाव इत्याशयकमुक्त्वा, "तस्माद्यत्र किञ्चित्सामान्यं कश्चिच विशेषस्तत्रोपमानोपमेये भवतः" इति सिद्धान्तितम्। तत्र भिन्नगोव्यक्त्योस्तद्बोधनार्थं आरोपितभेदवतोस्तद्बोधनार्थो वा तत्रेवशब्दप्रयोग इत्याशङ्क्य कैयटेनोक्तम्-तस्य भेदस्य शब्देनासंस्पर्शात्सामान्यमुखेन द्रव्यावसायादिति भावः' इति।

अत्र पक्षे 'घन इव श्यामः' इत्यादेः सम्भवेनोपमालङ्कारस्य सूत्रस्य चोक्तिसम्भवः । गौरित्यादौ तूपमानत्वाद्यप्रतीत्या ऽनन्वयालङ्कार एवेत्यादि बोध्यम् ।

तस्माद्भेदे ऽपि साधारणधर्मसम्बन्धस्तत्प्रयोज्यं सादृश्यं चावश्यं स्वीकार्यम् । काव्यप्रकाशकृताऽपि 'साधर्म्यमुपमा भेदे' इतिवदता भेदे साधारणधर्मसम्बन्धस्याङ्गीकारात् । यत्र साधारणधर्मेण सामान्यरूपताप्रतीतिः, प्रत्येकरूपेण शब्दतो विशेषरूपताप्रतीतिस्तत्रोपमानत्वादिप्रतीतिरिति सिद्धान्तार्थो भाष्ये । एतेन रामरावणयोर्युद्धं रामरावणयोरिवेत्यादौ कल्पभेदेन भिन्नयोर्युद्धयोरुपमैवेति परास्तम्। तस्य भेदस्य शब्देनासंस्पर्शात् ।

मुखसदृशं मुखमित्यादावपि आर्थ्याः, गौरिव गौरित्यादौ शाब्द्या उपमाया प्रतीतेरार्थः, शाब्दश्चानन्वयः । उपमासम्बन्धाभाव एवानन्वयः ।

तत्रेयती मर्यादा—भेदे सदृशादिशब्दप्रयोगे आर्थी उपमा । गम्यस्योपमानोपमेयभावस्य प्रतीतेः ।

अभेदे तत्प्रयोगे तु अनन्वयः । सर्वथा तदप्रतीतेः । तत्र भेदःसमानाधिकरणसादृश्यमुपमाव्यञ्जकमिति बोध्यम् । अनन्वयालङ्कारे एकस्यैवोपमानोपमेयत्वामिति व्यवहारस्तु तत्सादृश्यात् ।

अत एव "ऊकाल" इति सूत्रे भाष्ये "ऊअज्" इत्येव सामर्थ्यादुकारसदृशो ऽजित्यर्थेनैव सिद्धे कालग्रहणं श्रूयमाणेनैवोकारेण कालं विशेषयितुमिति द्विमात्रादीनां न ह्रस्वसंज्ञेत्युक्तम् । भेदे एव सादृश्यमिति वदतां मते तूकारस्य ह्रस्वसंज्ञा दुर्लभा स्यात्, भेदाभावादित्यलम् ॥ ३० ॥

(कुं० टी०) *सप्तदशेति । सामिधेनीमन्त्रेषु पठ्यमानेषु अध्वर्युणाऽऽहवनीयोपरि समिध आधीयन्ते । मन्त्रकाण्डे तु सामिधेनीमन्त्रास्त्रयोदश सन्ति । तत्र प्रथममन्त्रस्य वारत्रयं पाठात् वारत्रयं चान्त्यमन्त्रस्य पाठात्सप्तदशसंख्या भवति । *मुख्यद्व्यचि-बाहुकादिशब्दे । *उत्तरसंख्यया—आरोपितद्वित्वसंख्यया । *पूर्वसंख्यायाः—अनारोपितैकत्वस्य । *तस्य भेदस्य—कालकृतभेदस्य । *असंस्पर्शात्—अबोधात् । *यदेवोपमानमिति । अयं भावः-शस्त्रीश्यामा देवदत्तेति श्यामत्वं सर्वाश्रयनिष्ठं यद्येकमेव विवक्षितं तदा तद्द्वारेणोपमानोपमेयभावो वाच्यः । श्यामत्वस्य चोभयत्राविशेष इति तद्द्वारा तयोरप्यभेदः इत्यभ्युपगतं भवति । अस्मिन्पक्षे शस्त्रीशब्दप्रयोगवैयर्थ्यापत्तिः । अथाश्रयभेदात् श्यामत्वस्य भेदः । शस्त्रीदेवदत्तागतयोः श्यामत्वयोर्भेदान्नास्ति तद्द्वारक उपमानोपमेयभाव इति कैयटः । कर्मकरणरूपार्थभेदे ऽपि द्वितीयसदृशव्यवच्छेदफलस्य गौरिव

गौरिति प्रयोगस्य दर्शनात् सर्वत्रैव तथैव किमिति प्रश्न इत्यन्ये । *तदेवेति । उपमानोपमेययोर्भेदे सामानाधिकरण्याभावात् समासाप्राप्तिः । अभेदे उपमानत्वस्यैवासम्भव इत्यर्थः । *कइहोपमार्थ इति । उपमानोपमेयभावबोधकेवादिपदप्रयोगे किं फलम्, कर्मकरणरूपोपमानोपमयत्वबोधस्यैकत्रासम्भवादित्यर्थः । द्वितीयोपमानव्यवच्छेदार्थत्वे तु नोपमानत्वव्यवहार इति भावः । भाष्यार्थमनुवदति *उपमानोपमेयभावेति । उपमानमिति करणे ल्युट् । उपमेयमिति कर्मणि यत् । नचैकस्य कर्मत्वं करणत्वं च सम्भवतीति भावः । *तत्सम्भवादिति । अभेदे ऽपि सादृश्याङ्गीकाराद्गोसदृशो गौरित्येव प्रयोगः स्यात् । भवति ह्ययं वाचकः, गौरिव गौरिति प्रयोगस्त्ववाचकत्वान्न स्यादित्यर्थः । *उक्तिसम्भवाभावइति । गौरिव गौरित्येवोदाहरणं वक्तव्यं तच्च न सम्भवतीति भावः । *किञ्चित्सामान्यमिति । शब्दोपात्तप्रत्येकधर्मेण शबलीत्वदेवदत्तात्वादिना भेदः, श्यामत्वादिसाधारणधर्मेण चाभेद इत्यर्थः । आश्रयभेदात् श्यामत्वस्य भेदेऽपि श्यामत्वजातेरेकत्वादसाधारणधर्मत्वमिति । *भिन्नगोव्यक्त्योः–वास्तविकभेदवत्योः । *तद्बोधनार्थः–उपमानोपमेयभावबोधनार्थः । *आरोपितेति । एकस्यामेव व्यक्तौ भेदमारोप्य वा तद्बोधनार्थ इत्यर्थः । *अत्र पक्षे–यत्र किञ्चित्सामान्यमिति पक्षे । असंस्पर्शादित्यत्र हेतुः *सामान्येति । तत्तद्व्यक्तित्वेनानुपस्थितेरित्यर्थः । *इत्याशङ्क्येति । गौरिव गौरित्यत्र सूत्रस्योक्तिसम्भवमाशङ्क्येत्यर्थः । *तस्य भेदस्य—व्यक्तिगतभेदस्य । *तत्सादृश्यात्–उपमानोपमेयसादृश्यात् । *नह्रस्वसञ्ज्ञेति । यावच्च तपरकरणं तावत्कालग्रहणमित्येकमात्रस्यैव ह्रस्वसञ्ज्ञा ॥ ३० ॥

(क० टी०) नन्वभेदे सादृश्यमतमपि दुर्घटं तत्प्रयोजकसाधा-

रणधर्मसम्बन्धाभावात्, धर्मे साधारणत्वस्य भेदनियतत्वरूपत्वादित्याशयेन शङ्कते *नचेति । धर्मस्यैवेत्यवेनोक्तव्यवच्छेदः । *तत्र-अभेदस्थले । एवञ्च मुखत्वादेस्तत्त्वं सिद्धमिति नोक्तदोषः । अत्र मानमाह *अत एवेति । तस्य तत्त्वाङ्गीकारादेवेत्यर्थः । ऋदिसहस्रमित्यत्र कर्मधारय इति सूचयन्नाह *सहस्रमिति । *तया—एककपिलया । *सहस्रेति । सहस्रगोदक्षिणादानफला इत्यर्थः । तस्य छान्दसत्वसूचनद्वारा परसंमतभाष्यीयत्वनिरासस्सूचनायाह *श्रौतेनेति । स्पष्टं श्रौतव्यवहारमाह *अत एवेति । उक्तोऽर्थः । एवमग्रे ऽपि । *इतीत्यस्य सप्तदशत्वमित्यत्रान्वयः । *श्रुतावित्यस्य पठितेत्यत्रैवान्वयः । अन्यदाह *अत एवेति । एतेनेत्यस्यार्थमाह *मुख्येति । अन्यदप्याह *उत्तरेति । तत्रैव पक्षे इति भावः । प्रासङ्गिकमाह *एवं चेति । तस्या गौणत्वेचेत्यर्थः । प्रकृते तथाऽऽह *एवमिति । तद्वदित्यर्थः । एकस्येति शेषः । *धर्मस्य—मुखत्वस्य । नन्वेवमनन्वयालङ्कारोच्छेदापत्तिरित्याशयेनाह *न चैकेति । *भेदेन—तेनापि । एतेनानन्वयव्यवच्छेदः । *असंस्पर्शः—तदप्रतिपाद्यत्वम् । तत्त्वं प्रतिपादकोच्चारितभिन्नशब्दनियतम् । नन्वारोपिताभेदस्योपमायां यथा शब्दबोध्यत्वं तथा तत्रास्त्वत आह *अत एवेति । तस्य तदसंस्पर्शादेवेत्यर्थः । अस्योक्त्वा सिद्धान्तितमित्यत्रान्वयः । अभेद एव उपमानोपमेयभाव इति पक्षे आह *यदिति । *यदेवतदेवेत्येवाभ्याम् यत्तत्प्रतिपादितयोरत्यन्ताभेदः सूचितः । शङ्काशयं सार्थमाह *उपमानेति । उपमाशब्दः प्रयोगान्ते लाक्षणिकः । अर्थशब्दः फलवाचीति भावः । *कर्मेति । रूपशब्दो भावशब्दवद् धर्मपरः । तयोरभेदः । कर्मकरणत्वरूपं यदुपमानोपमेयत्वं तद्बोधस्येत्यर्थः । धर्म्यभेदे तु व्युत्क्रमाद्यथासंख्यासम्भवेनासाधुत्वाच्चासङ्गतिः स्पष्टैव । *करणत्वरूपेति पाठस्तु सुगमः । नन्वेवमप्यन्यद्योतकत्वमिवस्याऽऽस्तामत आह *इवस्येति । उत्प्रेक्षादेरसम्भवादिति भावः । *नचेति । तदभावेऽपि तत्पदप्रयोगसामर्थ्यात् । तथाच तत्र तथा दर्शनात्सर्वत्र तथैव किमिति प्रश्नतात्पर्यम् । यद्यपि तत्र नोपमानत्वादिव्यवहारस्तथाऽप्यगत्या तदभ्युपगमेऽप्याह *गोसदृशइति । *तत्सम्भवात्—तद्व्यवच्छेदबोधसम्भवात् । *तद्बो-

धेतिच पाठान्तरे ऽप्यर्थः स एव । तावता "किम्" इति शङ्कानिरासायास्याप्यावश्यकत्वात् कथं प्रयोग इति शङ्कां निराचष्टे *अभेदेऽपीति । *अबोधकेति । उक्तार्थाबोधकेत्यर्थः । प्रश्नतात्पर्यमाह *एवं चेति । फलाभावादप्रयोगापत्तावित्यर्थः । अत्र पक्षेऽस्यैवोदाहरणत्वेन तत्र चोपमानत्वाद्यप्रतीत्या सर्वथेवादिघटितप्रयोगस्य बोधकस्य मुख्यस्यासम्भव इति उपमोदाहरणासम्भवः, "उपमानानि" इति सूत्रवैयर्थ्यं चेत्यर्थः । *इत्याशयकमिति । एतेन कैयटोक्ताशयः परास्त इत्युद्द्योते स्पष्टम् । एवन्तर्हीत्यस्य तत्रत्यस्यार्थः *तस्मादिति । *तत्र–प्रश्नभाष्ये । व्यक्तिभेदे आह *भिन्नेति । *तदिति । उपमानोपमेयभावेत्यर्थः । व्यक्त्यभेदे ऽप्याह *आरोपितेति । *तत्र-गौरित्यत्र । *तस्य–अन्यतरस्य । तत्र बीजमाह *सामान्येति । शब्दैक्यादिति भावः । ननु सिद्धान्ते कथं द्वयोरुक्तिसंभवो ऽत आह *अत्रेति । सिद्धान्ते इत्यर्थः । *इत्यादेः—इवघटितप्रयोगस्येत्यर्थः । अत एव तत्र गतिमाह *गौरिवेति । किञ्चेत्याद्युक्तमुपसंहरति *तस्मादिति । अत्रालंकारिकसंमतिमप्याह *काव्येति । तत्र भेदपदस्यानन्वयव्यावृत्त्यर्थत्वेनोक्तेः । सिद्धान्तभूतोक्तभाष्यतात्पर्यमाह *यत्रेति । *साधारणधर्मेण-श्यामत्वादिना । *सामान्येति । अभेदेत्यर्थः । *प्रत्येकेति । शस्त्रीत्वादिनेत्यर्थः । *विशेषेति । भेदेत्यर्थः । नैयायिकोक्तिं खण्डयति *एतेनेति । *इत्यादौ–अनन्वयलक्ष्ये । एवेन तत्खण्डनम् । एतेनेत्यस्यार्थमाह *तस्येति । नन्वेवमपि प्रागुक्ते गोसदृशो गौरित्यत्र को ऽलङ्कारो ऽत आह *मुखेति । दृष्टान्तविधया आह *गौरिवेति । तत्र तदप्रतीत्या तद्वदत्रापि तदप्रतीतेः स एवेत्यर्थः । अन्यतरत्रान्यतराप्रतीत्याऽन्यतरोपमा तूक्तरीत्या दुर्घटैवेति भावः । ननु कथं तत्र सः तद्वत् द्योतकासमभिव्याहारेणोपमात्वाद्यप्रतीत्या तल्लक्षणानाक्रान्तत्वादत आह *उपमेति । यत इत्यादिः । शब्दसंस्पृष्टभेदसमानाधिकरणसाधर्म्यरूपोपमायाः सम्बन्धस्य प्रतियोगित्वादेरभावो यत्रेत्यर्थः । एतेन न विद्यते ऽन्वयः सम्बन्ध उपमाया यत्रेति व्युत्पत्त्या ऽन्वर्थमलङ्कारनामानन्वयपदमिति सूचितम् । तदभावश्च भेदाभावकृतः । साधर्म्यस्योक्तरीत्या सत्त्वात् । अत एवोपमानान्तरव्यवच्छेदः फलितः । तमेव च गृहीत्वा उपमानान्तरसम्बन्धाभावो ऽनन्वय इति प्रकाशप्रदीपादा-

युक्तम् । व्याख्यातं तथैव तदुद्द्योते ऽपि गुरुचरणैः । अत एव न मिथस्तैश्च विरोधः । तथा च द्वितीयसदृशाव्यवच्छेदबुद्धिफलक-वर्णमात्रविषयैकनिष्ठोपमानोपमेयत्वं तथेति सिद्धम् । एवं चानन्व-यविषये आपाततः शाब्दबोधोपपत्तये उपमानान्तरव्यवच्छेदबोधाय चाहार्यो भेदाभावे ऽपि भेदविशिष्टसाधर्म्योपचारः इति तत्रैवादेरुद्दे-श्यभूतस्वसमभिव्याहृतभेदविशिष्टसाधर्म्यस्य निरुपमस्य च द्यो-तकत्वमिति गोभिन्नो गोसदृशो निरुपमो गौरित्यादिरीत्या बोधः । एवंच मुखसदृशं मुखमित्यादावपि गौरिव गौरित्यादाविव वस्तुतो भेदाभावेन द्विविधोपमाया अभावेऽपि दृष्टान्ते तदुद्योतकेवादिसत्त्वात् तस्य शाब्दत्वं केवलसादृश्यस्यार्थत्वम्, आद्ये सदृशादिपदस्य सा-दृश्यमात्रबोधकत्वात्तस्य चोक्तरीत्या ऽभेदे ऽपि सत्त्वात्ततो ऽपि तद्व्य-वच्छेदसम्भवात्तस्य केवलं शाब्दत्वमुक्तान्वयस्यार्थत्वमिति भावः । नन्वेवं चन्द्रसदृशं मुखमित्यादावपि तद्व्यवच्छेदतस्तदप्रतीत्या तद-भावसत्त्वादनन्वयापत्तिरिति सिद्धान्तविरोधापत्तिरत आह *त-त्रेति । उपमाऽनन्वयविषये इत्यर्थः । *भेदे—वस्तुतः । *प्रतीतेरिति । तथाच तत्सम्बन्धस्यैव सत्त्वेन तदभावाभावान्नानन्वय इति भावः । *सर्वथेति । अर्थतः, शब्दतश्चोपमाया अप्रतीतेरित्यर्थः । भेदा-भावादिति भावः । ननूपमायाः शाब्दत्वे कारणसत्त्वे कार्यसत्ताऽऽव-श्यकतया तात्पर्यतया सादृश्यप्रतीतेरार्थत्वेऽपि सादृश्यस्य शाब्दत्वे तत्र कथं उपमाया गम्यत्वमपि । कार्येण कारणानुमानन्यायेन तथेति चेत् तर्हि मुखसदृशं मुखमित्यादावपि तदापत्तिरिति प्रागु-क्तासङ्गतिरत आह *तत्रेति । भेदविषये तत्प्रयोगे इत्यर्थः । एवंच नातिप्रसङ्ग इति भावः । नन्वेवमनेकत्वे तत्र कथं तल्लक्षणसमन्व-यस्तस्यैकत्वघटितस्य प्रकाशाद्युक्तत्वादत आह *अनन्वयेति । तथा च समानार्थक एकशब्दो न संख्यापर इति भावः । अभेदे सादृश्यसत्त्वे भाष्यान्तरमपि गमकमाह *अत एवेति । सा-दृश्यस्याभेदे सत्त्वादेवेत्यर्थः । यथाश्रुते प्रथमवाक्ये ऽणुदित्सू-त्रप्रवृत्त्या प्राप्तातिप्रसङ्गवारणायाह *ऊ अजित्येवेति । अभेदेना-न्वयेऽच्पदानर्थक्यादाह *सामर्थ्यादिति । एवेनाणुदित्सूत्रगृ-हीतव्यवच्छेदः । बहुवचनं व्यक्त्यभिप्रायम् । अत एवेत्यस्याशय-माह *भेदएवेति । प्रयोगादिभेदेन भेदं स्वीकृत्य तदुपपादने

तु तस्य सार्वत्रिकत्वेन व्यावर्त्याभावात्तदुक्तिनैष्फल्यमेव तदाह *इत्यलमिति ॥ ३० ॥

सादृश्यस्यातिरिक्तत्वादेव 'अनेनायं सदृशः' इत्युक्ते केन धर्मेणानयोः सादृश्यमित्येव जिज्ञासा नतु को धर्मोऽनयोः सादृश्यमिति। अत एव क्षमया पृथ्वीसदृशः धर्मतः सादृश्यमित्यादि आञ्जस्येनैवोपपद्यते।

तच्च व्यञ्जकधर्मभेदाद्, आश्रयभेदात्, निरूपकभेदाच्च भिन्नम् । अतएवोभयोरुभयं वर्त्तते सादृश्यमूलाभेदाध्यवसायेन उपमानस्योपमेये अभेदान्वय इति सिद्धान्तपक्षे "एवमपि सादृश्यनिमित्तं गुणो न निर्दिष्ट" इति शङ्का "संनिधानात् श्यामत्वमेव गुणः" इति समाधानं च भाष्ये सङ्गच्छते। साधारणधर्मस्यैव सादृश्यरूपत्वे तदसङ्गतिः स्पष्टैव। मम तु–'प्रतीयमानं सादृश्यं किंधर्ममूलकम्' इति शङ्का 'उपात्तधर्ममूलकमेव' इत्युत्तरमिति न दोष इत्यलम् ।

'मातेव हितकारिणीम्' इत्यादौ त्विवस्य सादृश्यवाचकता। इवशब्दार्थसादृश्येच मातुरन्वय इति प्रातिपदिकार्थे प्रथमैव ।

न च षष्ठ्यापत्तिः। प्रतियोगिविशिष्टसादृश्यवत इवार्थत्वेन तदेकदेशे प्रतियोगिनि मातुरभेदेनान्वयात् षष्ठ्यप्राप्तेरिति कश्चित् ।

असाध्वेवेदम् । क्रियान्वये एव प्रथमायास्साधुत्वात् । अत एव "तिङ्समानाधिकरणे प्रथमा" "अभिहिते प्रथमा" इति च वार्त्तिकम्, प्रथमायाः

कारकविभक्तित्वपरं भाष्यं च सङ्गच्छते इत्यन्ये ।

तत्र तेषां गमकसत्त्वे द्योतकता अन्यथा वाचकतैव । वृत्तिद्वयकल्पनागौरवात् ।

न च तस्य वाचकत्वे 'इवास्ति' इत्याद्यपि 'सादृश्यमस्ति' इत्यादिवत्स्यादिति वाच्यम् । तथा शिष्टप्रयोगाभावेनोपमानादिपदोपसंदानेनैव प्रयोगे तेषां साधुत्वाङ्गीकारात् ॥ ३१ ॥

(कुं० टी०) *व्यञ्जकेति । चन्द्र इव मुखमित्यादौ । व्यञ्जकः आल्हादकत्वादिः । आश्रयो–मुखादिः । निरूपकश्चन्द्रादिः । *अतएव—सादृश्यस्यातिरिक्तत्वादेव । अस्य सङ्गच्छते इत्यत्रान्वयः । *उभयोः–उपमानोपमेययोः । *उभयमिति । उपमानवाचक उपमेयवाचकश्चेत्यर्थः । *सिद्धान्तपक्षेइति । एतस्य इतिशङ्क्येत्यत्रान्वयः । *गुणो न निर्दिष्ट इति । शस्त्रीश्यामेत्यत्र श्यामशब्दस्योपमेयपरत्वे इत्यर्थः । *प्रतियोगिविशिष्टेति । मातृप्रतियोगिकसादृश्यवतीमित्यर्थात् । *कारकविभक्तित्वपरमिति । पुत्रेण सहागतः पितेत्यत्रोपपदविभक्तेरिति न्यायेन प्रथमासिद्धावप्रधानेग्रहणं न कर्त्तव्यमिति भाष्यकृतोक्तत्वात् । वस्तुतस्तु इतिन्यायेनेत्यस्य इतिरीत्येत्यर्थः । यथा हि तत्रान्तरङ्गत्वात्प्रबलत्वं तथा प्रथमाया अपीत्यर्थः । *गमकसत्त्वे–तात्पर्यग्राहकसत्त्वे । *अन्यथा–गमकाभावे । *वृत्तिद्वयेति । अभिधाद्योतनारूपेत्यर्थः ॥ ३१ ॥

(क०टी०) तस्यातिरिक्तत्वं द्रढयति *सादृश्येति । एवव्यवच्छेद्यमाह *नत्विति । *अतएव–तस्यातिरिक्तत्वादेव । *इत्यादि–इत्याद्यपि । प्रकृत्यादित्वादभेदतृतीययोपपत्तौ क्लेश इत्याह *आश्रयेनेति । नन्वेवमपि तस्यैकत्वे बहूपप्लवापत्तिरत आह *तच्चेति । सा-

दृश्यं चेत्यर्थः । तथैव तस्य सिद्धिरित्याह *व्यञ्जकेति । नित्यत्वपक्षेणेदमिति न पूर्वविरोधः । ननूपमानस्योपमेयवृत्तित्वं बाधितमत आह *सादृश्येति । अत एवेत्यस्यार्थं सूचयन्नाह *साधारणेति । *ममत्विति । शस्त्रीश्यामेत्युक्ते इति भावः । एतेन "न तत्त्वान्तरं सादृश्यं प्रत्यक्षोपलब्धेः" इतिसांख्यसूत्रेण प्रत्यक्षेण साधारणधर्मरूपस्यैवोपलब्धेरित्यर्थकेनोक्तमपास्तम् । उक्तप्रमाणसिद्धत्वात् । कंबुग्रीवादिमत्त्वाद्यतिरिक्तघटत्वादेरपि प्रत्यक्षेणानुपलम्भात्तेषामपि तत्त्वान्तरत्वानापत्तेश्च । तदाह *इत्यलमिति । इवांशे शरैरित्यतो विशेषस्तावत्परीत्या आह *मातेवेति । राजन् हरीतकीं भुङ्क्ष्वेत्यादिः । *प्रतियोगीति । एतेन प्रागुक्ते शुद्धसादृश्यमिवार्थ इतिपक्षे षष्ठ्यापत्त्यनिवारणात्स पक्षो ऽयुक्त एवान्यथाऽसाधुत्वमस्य स्यादिति सूचितम् । अत एव सादृश्यस्य भेदेनोपमेये ऽन्वयः नामार्थयोरिति व्युत्पत्तिर्निपातातिरिक्तविषयेत्यपि निरस्तम् । उक्तयुक्तेः। तस्या नामत्वात्, पदार्थ इतिन्यायेन प्रधानान्वये सम्भवति एकदेशान्वयासंभवेनोक्तदोषाच्च । तदेतद्ध्वनयन्नाह *सादृश्यवत इति । अत एवाह *तदेकदेशइति । प्रधानान्वयासंभवेन व्युत्पत्तिवैचित्र्यादिति भावः । कश्चिदितिसूचितारुचिं कथयन् सिद्धान्तमाह *असाध्वेवेदमिति । तथा व्युत्पन्नस्य दुर्निवारत्वादिति भावः । *वार्त्तिकमिति । जातावेकवचनम् । निपातस्थले तादृशे प्रागुक्तोभयपक्षव्यवस्थां सामान्यत आह *तत्रेति । क्रियागतविशेषबोधकाधकातिरिक्तनिपातस्थले इत्यर्थः । *तस्य–तादृशनिपातस्य । तेषामित्यस्योभयत्रान्वयः । चैत्रस्येव मैत्रस्य धनमित्यादावुभयत्रापि धनयोगे षष्ठी । चैत्रादधीते इत्यादौ चैत्रादित्यस्य तदपादानके ऽध्ययने लक्षणा, उक्तरीतिर्वा, नत्वधीते इत्यनेनान्वयः । आख्यातवाच्यस्योपमानत्वाभावादित्याद्यूह्यम् ॥ ३१ ॥

'घटो नास्ति' इत्यादावभावस्य विशेष्यतया बोधान्नञो वाचकत्वम्। "नानुयाजेषु" इत्यादौ सप्तम्याः साधुत्वार्थं द्योतकत्वमपि। आरोपितानुयाजेषु यजतिष्विति तदर्थः। भेदे प्रतियोगित्वेनान्वयेनानुयाजभिन्ने-

ध्वित्यर्थे सप्तम्यनुपपत्तिः । आरोपविषयत्वं तत्र नञ्-द्योत्यम् । अतएव 'अघटः' इत्यादौ नञ्तत्पुरुषस्योत्तरपदार्थप्राधान्यं सङ्गच्छते ।

अभावस्य तु प्रतियोगिनिरूपितविशेषणतयैव भानस्य सर्वसिद्धत्वात्तदनुपपत्तिः स्पष्टैव। अत एव 'असः' इत्यादौ सर्वनामकार्यम्, अन्यथा गौणत्वात्तन्न स्यात्। इतरविशेषणत्वेनोपस्थितिविषयत्वस्यैव गौणत्वात् । यद्वा नञ् स्वसमभिव्याहृतघटादिपदानामारोपितप्रवृत्तिनिमित्तबोधकत्वे तात्पर्यग्राहकः । यथा सिंहो माणवक इत्यादौ माणवकादिपदानि सिंहादिपदस्यारोपितसिंहत्ववद्बोधकत्वे। 'अनुदरा कन्या' इत्यादावल्पत्वेनोदराभावमारोप्य नञ्समभिव्याहारे आरोपितोदरबुद्ध्या तन्मूलाल्पत्वादौ विश्रमः। अद्विज इत्यादौ च तद्भेदमूलकमारोपितप्रवृत्तिनिमित्तकत्वमिति भेदे विश्रान्तिः । अधर्म इत्यादौ च विरोधिनि । आरोपितत्वस्य नञ्वाच्यत्वे तु तस्य ब्राह्मणादिपदशक्येऽनारोपितब्राह्मण्यवति सम्बन्धो दुरुपपादः । तत्र प्रसिद्धार्थपरित्यागोऽप्रसिद्धार्थपरिग्रहश्चेत्युभयं द्योतककृत्यमिति नञ्सूत्रे भाष्ये स्पष्टम् ।

इदमेव नञो द्योतकत्वं नाम । एतावतैव तत्रैकार्थीभावव्यवहारः । विशिष्टानुपूर्व्या द्योत्यार्थान्तर्भावेण शक्ततावच्छेदकत्वाद्विशिष्टस्यार्थवत्त्वम् । समासविधायकशास्त्रबलादत्र एवमेव कल्पनोचिता । प्रजयतीत्यादौ तु नैवम् । अडादिव्यवस्थार्थमन्यथा तत्र कल्पनात् । लोकस्य तु तत्रापि विशिष्टशक्त्यैव बोधः ।

अवयवशक्तिबोधनद्वारा विशिष्टस्य विशिष्टे शक्तिबोधकमेव व्याकरणमिति दिक् ।

असन्देह इत्यादावारोपितसन्देह इति बोधः । भेदसम्बन्धेनारोपितज्ञानाच्च तदत्यन्ताभावप्रतीतिः ॥ ३२ ॥

(कुं० टी०) *विशेष्यतयेति । घटकर्तृकसत्ताऽभाव इत्यर्थात् । *साधुत्वार्थमिति । "यजतिषु येयजामहं करोति, नानुयाजेषु" इत्यत्र नञर्थे अधिकरणस्यान्वयासम्भवेनानुयाजेषु न करोतीत्यर्थासम्भवात् । यजतिलक्षणं तूक्तं श्रौतसूत्रेषु—तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोऽनुवाक्यावन्तो यजतय इति । अध्वर्युणा यजेति प्रैषे कृते होत्रा प्रयुज्यमानो मन्त्रो याज्या, ब्रूहीति प्रैषानन्तरं प्रयुज्यमानो ऽनुवाक्या । देवं बर्हिरित्यादिना क्रियमाणा होमा अनुयाजाः । *सप्तम्यनुपपत्तिरिति । प्रत्ययानां प्रकृत्यर्थे एवान्वयात् । *तदनुपपत्तिः—उत्तरपदार्थप्राधान्यानुपपत्तिः । तस्मादभावो नार्थ इति भावः । नन्वारोपितत्वार्थकत्वेऽपि गौणत्वमत आह *इतरेति । *नञिति । तात्पर्यग्राहक इत्यत्रान्वयः । *विश्रमइति । "नोदात्तोपदेशस्य" इति वृद्धिनिषेधः । अल्पत्वेनोदराभावारोपादल्पत्वे पर्यवसानमित्यर्थः । *दुरुपपादइति । अनारोपितब्राह्मण्यवति ब्राह्मणपदार्थे आरोपितत्वान्वयो विरोधादसम्भवीति भावः । *प्रसिद्धार्थेति । मुख्यब्राह्मणादीत्यर्थः । *द्योतकत्वम्—द्योतकस्वभावः । *विशिष्टेति । समुदितानुपूर्व्याः शक्ततावच्छेदकत्वादित्यर्थः । *नैवम्न समुदायस्यार्थवत्त्वम् । *तादात्म्येतरेति । घटो नास्तीत्यत्र घटसंयोगाभावप्रतीतेः । *तादात्म्याभावइति । घटः पटो नेत्यादौ

घटतादात्म्याभाववान् पट इति बोधपर्यवसानम् । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकघटाभाववान् पट इति तार्किकमते बोधः ॥ ३२ ॥

(क० टी०) अथ प्रसङ्गान्निपातविशेषनञर्थे तत्र गमकेत्याद्युक्तस्य तावदप्युदाहरणमाह *घटो नास्तीति । प्रसज्यप्रतिषेधविषये इत्यर्थः । यथाचैतत्तथा ऽनुपदमेव स्फुटीभविष्यति । पर्युदासविषयमाह *नानुयाजेष्विति । स्वमते तत्त्वमुपपादयति *आरोपितेति । "यजतिषु येयजामहं करोति" इति वक्ष्यमाणश्रुत्यर्थसिद्धं तदादिरित्याह *यजतिष्वितीति । तथाच तस्य तेन सामानाधिकरण्यात्तदुपपत्तिः । विपक्षे बाधकमाह *अन्यथेति । तथाऽर्थानङ्गीकारे इत्यर्थः । भेदस्य वाच्यत्वपक्षे विशेष्यतयैव बोधादाह *भेदइति । तस्य द्योत्यत्वेन विशेषणत्वे ऽपि नञर्थस्य प्रतियोगिन्यन्वयेन तद्वत्तदसामानाधिकरण्यात्तदनुपपत्तिरेव, तदेतद्धुनयन्नारोपमात्रं नञर्थो विषयत्वं संसर्गो लाघवादिति दीक्षितभूषणाद्युक्तेः प्रागुक्तरीत्या विना प्रत्ययं तेन सम्बन्धेन बोधासम्भवनासाङ्गत्यात्प्रथमपक्षत्वेन तदुक्तमेवाह *आरोपेति । *तत्र–पर्युदासस्थले । समासे तथाऽङ्गीकारे दोषद्वयसत्त्वादिदमत्यावश्यकमिति तदैकरूप्यमपीत्याह *तस्य तत्रेति । तद्द्योतयत्वादेवेत्यर्थः । *प्राधान्यम्–भाष्योक्तम् । *सर्वेति । तदादिकार्यम् । ननु न गौणमुख्यन्यायघटकगौणत्वमत्र, अत आह *इतरेति । आरोपविषये घटादिपदानां शक्तिर्नञो द्योतकत्वमित्यपि तदुक्तमयुक्तम् । वृत्तिद्वयकल्पने विशिष्टशक्तिकल्पनेऽक्लृप्तकल्पनेच गौरवादतः शक्यतावच्छेदकारोपो लक्षणेति सिद्धान्तरीत्या लघुभूतं सिद्धान्तमाह *यद्वेति । नञित्यस्य ग्राहक इत्यत्रान्वयः । अन्यत्र तेषामनारोपितप्रवृत्तिनिमित्तवति शक्तेराह *स्वेति । आरोपितं यत् प्रवृत्तिनिमित्तन्तद्रूपेण बोधकत्वे इत्यर्थः । यद्वा बहुव्रीहिरारोपितप्रवृत्तिनिमित्तकबोधे इत्यर्थः । तथाच तद्वति ते लाक्षणिका इति सूचयन्नाह *यथेति । अत एव वृत्त्युद्बोधकत्वमिति प्रागुक्तम् । अत्रेयं रीतिः क्लृप्तेति भावः । एवञ्च लाक्षणिकतामात्रेण न गौणत्वमिति न काऽपि शङ्केति तात्पर्यम् । एवं सति तत्सादृश्यमभावश्चे-

त्यादिप्राचीनोक्तषडर्थोपपत्तिः । सादृश्योदाहरणस्याब्राह्मणमित्यस्य प्रागुक्तत्वात् तत्क्रमानादरेणाह *अनुदरेत्यादि । आरोप्येत्यस्य जायमानयेति शेषः । आरोपितोदरबुद्ध्येति पाठः । विश्रम इति पाठः । तादात्म्यारोपस्य भेदसादृश्ययोः सतोरेव सत्त्वेन संसर्गारोपस्य तदभावे एव सत्त्वेनारोपितत्वबोधोत्तरं प्रकरणादितात्पर्यग्राहकवशादर्थतो मानसः सादृश्याभावादेर्बोध इत्यर्थः। अनश्वइति प्राचोक्तभेदोदाहरणस्याब्राह्मण इत्यतो ऽविशेषाच्चिन्त्यत्वमिति सूचयन्नाह *अद्विजइति । प्रवृत्तिनिमित्तारोप इत्यर्थः । *इतिर्हेतौ । *इत्यादौचेति । तद्विरोधमूलकस्ततत्प्रवृत्तिनिमित्तारोप इतीति शेषः । *विश्रान्तिरित्यस्यानुषङ्गो ऽग्रे । अपापम्, अपशवः इति अभावाप्राशस्त्ययोरुदाहरणे बोध्ये । नन्वेवं तस्य वाच्यत्वे ऽपि विशेषणत्वान्न प्रागुक्तदोषा इति किमर्थं द्योतकत्वमत आह *आरोपितेति । अत्र भाष्यसंमतिमाह *तत्रेति । नञ्समभिव्याहारे सर्वत्र इत्यर्थः । *इदमेव—तत्त्यागपूर्वकतत्परिग्राहकत्वमेव । एवेन पूर्वमतव्यवच्छेदः । नन्वेवं पृथगर्थाभावेनैकार्थीभावाभावात्कथं समासो ऽत आह *एतावतैवेति । तद्द्योतकत्वेनैवेत्यर्थः । उत्तरपदार्थप्राधान्यवत् एवेन वाचकत्वव्यवच्छेदः। नन्वेवमप्युत्तरपदार्थान्यार्थस्याप्रतीत्या विशिष्टस्य शक्त्यभावेनानर्थकत्वात् कथं प्रातिपदिकत्वमत आह *विशिष्टेति । तत्र बीजमाह *द्योत्येति । उत्तरपदलक्ष्येत्यर्थः । समासे सर्वत्र शक्तिस्वीकारादाह *शक्ताविति । ननु रूपसिद्ध्या भिन्नार्थत्वमेवास्त्वत आह *समासेति । ऐकपद्यैकस्वर्यार्थमिति भावः । नन्वेवं द्योतकत्वाविशेषात्प्रजयतीत्यादावपि विशिष्टस्यैवार्थवत्त्वापत्तिरत आह *प्रजयतीति । शास्त्राप्रामाण्यं परिहरति । *अवयवेति । न केवलमत्रैवेत्थमपि तु अन्यत्रापीदमावश्यकम् । किंच रेखागवयन्यायेनापि शास्त्रोपयोगो बोध्यः । तदाह *इति दिगिति ॥३२॥

असमस्ते त्वभावो नञर्थः । स द्विधा—अत्यन्ताभावो भेदश्च। तत्र तादात्म्येतरसम्बन्धाभाव आद्यः, तादात्म्याभावोऽन्त्यः । तादात्म्यमतिरिक्तं तद्वृत्त्य-

साधारणधर्मरूपं वेत्यन्यद् । समनियताभावस्थले एक-
स्यानेकप्रतियोगिकत्ववदनयोर्घटादिप्रतियोगिकत्वम-
पि । तत्राद्यस्तिङर्थक्रियान्वय्येव । असमस्तनञर्थात्य-
न्ताभावविशेष्यकबोधे तिङ्समभिव्याहृतधातुजन्यो-
पस्थितेर्हेतुत्वात् । अतएव 'अहं नास्मि, घटो नास्ति'
इत्यादौ पुरुषव्यवस्था 'घटौ न स्तः, घटा न सन्ति' इत्या-
दौ वचननियमश्चोपपद्यते । युष्मदादेः तिङ्सामानाधि-
करण्यात् । मदभावोऽस्तीत्याद्यन्वये च स न स्यात् ।
आख्यातार्थसंख्यान्वयित्वस्य तु न सामानाधिकरण्य-
पदार्थत्वम् । किंच तिबादिविधिना "द्व्येकयोः" इत्यस्यै-
कवाक्यतया–एकत्वे तिबित्यादिवाक्यार्थे कस्यैकत्वे
इत्याकाङ्क्षायां प्रत्यासत्त्या तिबाद्यर्थान्वयिन इत्यस्यैव
लाभेनाभावप्रतियोगिन्यनन्वयात् । घटसत्ताऽभावबो-
धे समनैयत्यादेव नियमेन घटाभावबोधो ऽपीति न
तद्विषयसन्देहादि । एवं समनियतभावयोरपि एक-
ज्ञाने नियमेनापरज्ञानं बोध्यम् । अतएव घटज्ञाने
तत्सत्तासन्देहादि न । समनियतानामैक्यमेव । नच
प्रतीतिभेदे जाग्रति एवंकथनस्य न कश्चिदुपयोगः ।
लाघवात्पदार्थ एक एव धर्मभेदात्प्रतीतिभेद इत्यस्य
वक्तुं शक्यत्वात् । घटत्वाभावघटभेदयोरिव, घट-
त्वघटभेदाभावयोरिव च सति समनैयत्ये भावयोरपि
तत्त्वमुचितमेव । हेतोः समत्वात् इति केचित् । तन्न ।

एक एव धर्मी तत्रैव धर्मभेदकल्पनेन व्यवहार-
भेदोपपत्तौ धर्मिभेदस्य न्यायादिनये ऽपि विलयाप-
त्तेः । तद्रूपतद्रसादेरप्यैक्यापत्तेश्च । तत्र भासमानता-

वच्छेदकरूपत्वादिना न समैनयत्यम् । तद्रूपं भासते इत्यादे रूपत्वादिना व्यक्तिविशेषो भासते इत्येवार्थः।

एतेन अधिकरणानालिङ्गिताभावबुद्धेरभावाद् 'इह घटो नास्ति' इत्यादावेतदधिकरणकाभावप्रतियोगिघटकर्तृका सत्तेति बोध इत्यपास्तम् ।

वक्ष्यमाणरीत्या प्रतियोग्यधिकरणस्यैवाभावाधिकरणत्वेन तस्य पृथगधिकरणाकाङ्क्षाभावात् । अधिकरणकारकस्य क्रियान्वये क्रियान्वयिकर्तृकर्मान्वये वा साधुत्वेनासाधुतापत्तेश्च । अत्यन्ताभावार्थकनञः प्रतियोगिभूतक्रियान्वयनियमाच्च । एतेन भूतले न घट इत्यादौ तात्पर्यवशात् कदाचिद् भूतलादौ घटाभावः कदाचिद् घटादौ भूतलवृत्तित्वाभावः प्रतीयते । अन्यथा इह घटो नास्तीत्यादितो बोधानुपपत्तिः ।

तथाहि-पदार्थानां क्रमेणान्वयेन घटसत्तारूपोऽर्थः प्रथमं बुद्धो नञा निवर्त्तयितुमशक्यः सतो निषेधायोगात् । असतस्त्वसत्त्वादेव निवृत्तिसिद्धा नञो वैयर्थ्यम् ।

तदुक्तम्—

सतां च न निषेधोऽस्ति सो ऽसत्सु च न विद्यते।
जगत्यनेन न्यायेन नञर्थः प्रलयङ्गतः ॥ इति ।

नच घटास्तिपदाभ्यां या घटविषया ऽस्तिबुद्धिर्जाता सा नञा निवर्त्त्यते इति वाच्यम् ।
बुद्धेः शब्दावाच्यत्वेन नञा तन्निषेधायोगात् ।
एतेन तस्या बुद्धेर्मिथ्यात्वं नञा क्रियते इत्यपास्तम् ।

घटाभावाद्यनवगतिप्रसङ्गाच्च।

कणादसूत्रे ऽपि नास्ति घटो गेहे इति सतो घटस्य गेहसंसर्गप्रतिषेध इत्युक्तम्। सतः सत्त्वेन बुद्धस्य। एवं च घटकर्तृकसत्ताऽभावो बोधयितुमशक्य इति विशेषणीभूतगेहसंसर्गाभावप्रतीतिरिति तदर्थः॥ ३३॥

(कुं० टी०) ननु संयोगितादात्म्यं संयोग एव तथाच संयोगसम्बन्धावच्छिन्नप्रतियोगिताके संयोगिनोऽत्यन्ताभावे ऽतिव्याप्तिरत आह *अतिरिक्तमिति। ननु तत्र संयोगस्य संयोगत्वेनैव सम्बन्धता ननु तादात्म्यत्वेनेति नातिव्याप्तिरत आह *तद्वृत्तीति। *समनियतेति। वह्न्यभावस्य वह्नित्वेन प्रमेयाभावस्य चैक्यस्वीकारात्। *एकस्येति। अभावस्येति शेषः। *अनयोः—संयोगादिसंबन्धाभावतादात्म्यसम्बन्धाभावयोः। *घटादीति। वह्निसंयोगाभावस्य वह्निरिव उभयोरप्यभावयोर्घटः प्रतियोगीत्यर्थः। *आद्यः—अत्यन्ताभावः। *अहंनास्मीति। मत्कर्तृकसत्ताऽभाव इत्यर्थादुत्तमः पुरुषः सिद्ध इत्यर्थः। तार्किकास्तु नञ्समभिव्याहारे भावनान्वय्यभावप्रतियोगिनि संख्यान्वयो नातो घटौ न स्त इत्यादौ द्विवचनाद्यनुपपत्तिरित्याहुः। तन्न। तेनैव वचनारम्भेण गौरवम्। तार्किकोक्तं युष्मादिसामानाधिकरण्यमनुवदति *आख्यातार्थेति। *नेति। शब्दमर्यादया तस्यार्थस्यालाभात्। *अनन्वयात्—अन्वयासम्भवात्। *समनियतभावयोः—घटतत्सत्तयोः। केषांचिन्मतमाह *समनियतानामिति। समाधत्ते *लाघवादिति। पदार्थो लाघवादेक एव प्रतीतिभेदस्तु धर्मभेदादित्यर्थः। *इवेति। यथा

घटभेदाभावो घटत्वमित्यर्थः । *तत्त्वमिति । अभावयोरिव युक्तिसाम्यात्समनैयत्येन भावयोरप्यैक्यमुचितमित्यर्थः । *एक-एवेति । घटत्वपटत्वादिधर्मभेदादेव व्यवहारभेदोपपत्तौ घ-टपटादीनामपि भेदानापत्तिरित्यर्थः *तद्रूपेति । एकद्रव्य-वृत्तिरूपरसयोरित्यर्थः । नन्वेकव्यक्तिनिष्ठयोरूपरसयोरेकस्य भाने अपरस्य भानं कुतो नेत्यत आह *तत्रेति । ननु भास-मानयोरूपरसयोः समनैयत्यमेवेत्यत आह *इत्येवार्थ इति । *अधिकरणानालिङ्गितेति । केवलं घटो नास्तीतिप्रतीतेः । एत-दधिकरणको योऽभावस्तत्प्रतियोगी घट इत्यादिरर्थः । अधि-करणानालिङ्गितेति युक्तिं निराकरोति *वक्ष्यमाणेति । *प्रति-योगिभूतेति । प्रतियोगिभूता या क्रिया तद्वाचकेनैवान्वयनियमा-दित्यर्थः । *कदाचिच्चेति । पटादौ प्रसिद्धस्य भूतलवृत्तित्वस्य घटादावभाव इत्यर्थः । *अशक्य इति । स्वकारणाद् वृत्त्यात्म-लाभस्य निवृत्तिरशक्येत्यर्थः । बौद्धपदार्थानभ्युपगमे खण्डन-कारोक्तं दूषणं भूतलाधिकरणिका घटकर्तृका सत्तेत्यर्थेऽपि दर्श-यति *सताश्चेति । सतो हि निषेधः कर्तुं न शक्यते यथा तथा असतो ऽपि प्रतियोग्यप्रसिद्ध्या निषेधासम्भव इत्यर्थः । तस्माद्बौद्धस्यैव निषेध इति भावः । अत्र तु मते भूतलवृत्तित्व-स्य निषेध इत्याशयो बोध्यः । *घटास्तिपदाभ्यामिति । विच्छे-देन 'घटो ऽस्ति' इति बुद्धिर्जाता सा निवर्त्यते इत्यर्थः । *श-ब्दावाच्यत्वेनेति । शब्दवाच्य एवार्थो नञा निषिध्यते बुद्धि-स्त्वर्थाल्लब्धा न शब्दवाच्येत्यर्थः । *कणादसूत्रे ऽपीति । प्राचां मतेऽत्यन्ताभावस्तत्रैव यत्र प्रतियोगिनो ऽसत्त्वमेव । यथा जले पृथिवीत्वं नास्तीति । भूतस्य यो ऽभावः स तु ध्वंस एव । भवि-ष्यतो ऽभावस्तु प्रागभाव एव । एवं सति यत्र गेहे कदापि न

घटस्य सत्त्वं तत्रात्यन्ताभावमुपपादयति *गेहसंसर्गेति । घटशब्दस्य घटसंसर्गे लक्षणया तदत्यन्ताभावबोध इति भावः ॥ ३३ ॥

(क॰ टी॰) सिंहावलोकनन्यायेनाभावोदाहरणमत्राग्रे विशेषं सूचयितुमाह *असन्देहइति । *भेदेति । तन्मूलकसम्बन्धेनेत्यर्थः । *चस्त्वर्थे । "रक्षोहागमलघ्वसन्देहाः" इत्यत्र त्वगत्या तत्प्रागभावधीरित्यन्यत्र स्पष्टम् । अथ घटो नास्तीत्याद्युक्तं विशदयति *असमस्ते त्विति । समासादितो वैलक्षण्यसूचकस्तुः । *नञर्थः-नञ्वाच्यः । *तत्र-तयोर्मध्ये ।

यत्तु नैयायिकाः नित्यसंसर्गाभावस्तादात्म्येतरसंसर्गावच्छिन्नप्रतियोगिताकाभावो वाऽत्यन्ताभावस्तादात्म्यसंसर्गावच्छिन्नप्रतियोगिताकाभावो ऽन्योन्याभाव इति ।

तन्न । तस्य प्रागुक्तरीत्या नित्यत्वाभावात्, गुरुत्वाच्च । तद्धनयन्नाह *तादात्म्येतरेति । अन्योन्याभावे ऽनतिप्रसङ्गार्थमिदम् । *सम्बन्धाभाव इति । सम्बन्धप्रतियोगिकाभाव इत्यर्थः । एवमग्रेऽपि । ननु तादात्म्यमत्र न धर्मिरूपम्, अशब्दार्थत्वात्, अत एव न सम्बन्धरूपमपि, सम्बन्धलक्षणानाक्रान्तत्वाच्च, अत एव न भेदविशिष्टाभेदरूपमपीत्यत आह *तादात्म्यमिति । सम्बन्धविशेष इत्यर्थः । ततो लाघवादाह *तद्वृत्तीति । साधारणधर्मस्य तत्र ततो ऽनुपस्थितेरतिप्रसक्तत्वाच्चाह *असाधारणेति । अत एव तादात्म्याभाव इत्येवोक्तं न तु तत्सम्बन्धाभाव इति । नन्वेवं कथमनयोः सर्वसंमतं घटादिप्रतियोगिकत्वमत आह *समनियतेति । द्रव्यत्वगुणाश्रयत्वक्रियाश्रयत्वाभावादिस्थले इत्यर्थः । परैस्तेषामैक्याङ्गीकारादाह *एकस्येति । अभावस्येत्यर्थः । घटादितत्सत्तातत्सम्बन्धानां समनैयत्यादेवाह *अनयोरिति । अत्यन्ताभावान्योन्याभावयोरित्यर्थः । एवं च न तदतिरिक्तः कश्चिद् घटाद्यभावादिरिति भावः । कृद्वारणायाह *तिङिति । फलादिवारणाय *क्रियेति । एतेन द्रव्यादिव्यवच्छेदः । तत्रैव तत्प्रयोगसाधुत्वे बीजमाह *असमस्तेति । तत्त्वंच समाससंज्ञकशब्दघटकभिन्नत्वम् । नन्वेवमिदं विशेषणं व्यर्थम्, असन्देह इत्यादौ समासे तथा बोधस्यैवाभावात् । नच पूर्वं तदभावेऽपि पश्चाज्जायमानात्यन्ताभा-

घबोधे व्यभिचार इति तदावश्यकमिति वाच्यम् । एवमपि न-ञ्समासस्यापि वैकल्पिकत्वेन तदीयलौकिकवाक्ये 'न सन्देहः' इत्यादावपि तथा बोधेन व्यभिचारतादवस्थ्यादिति चेन्न । तत्त्वस्य समासायोग्यसमूहघटकत्वरूपस्य विवक्षितत्वात् । नन्वेवमप्यसमस्तनञर्थत्येतावन्मात्रोक्तौ नानुयाजेषु अद्विज इत्यादौ पूर्वं तथा बोधाभावेऽपि पश्चात्तथाबोधेन व्यभिचार एवात आह *अत्यन्तेति । तत्र तु भेदविशेष्यकत्वमिति समासः । तथाच प्रसज्यप्रतिषेधीयो नञिति तात्पर्यम् । तत्र तूक्तहेतोः+ पर्युदास एव । सामर्थ्यसत्त्वे ऽपि समासो वैकल्पिकत्वान्नाद्ये । एतेनोभयसंशये समासापत्त्या पर्युदासो न किन्तु प्रसज्यप्रतिषेध इत्याशङ्कोक्तरीत्या पर्युदासे एव समासाभावो ऽपि, विभाषेति तु कार्यमेवेति बाधलक्षणे सिद्धान्तोक्त्या तस्य न क्रियान्वयनियमो ऽन्यत्राप्यन्वयसिद्धेरिति परास्तम् । विभाषेत्यस्याफलत्वस्यान्यथा भाष्ये स्पष्टत्वाच्च । अत्रापि बीजमाह *अत एवेति । तस्य तदन्वये एव साधुत्वादेवेत्यर्थः । अस्योपपद्यते इत्यत्रान्वयः । व्युत्क्रमेणाह *अहमिति । औत्सर्गिकैकवचनेन तत्सिद्धेराह *घटाविति । पुरुषविधायकसूत्रक्रमेणाह *युष्मदादेरिति । उक्तक्रमेणाह *मदेति । इत्यादिवदन्वये[2] चेत्यर्थः । नन्वाख्यातार्थसंख्याया भावनान्वयिनीव परमते भावनान्वयिनञर्थप्रतियोगिन्यप्यन्वयो व्युत्पत्तिवैचित्र्याद्, एवञ्च तदर्थसंख्यान्वयित्वमेव तत्सामानाधिकरण्यमिति पुरुषवचनव्यवस्थोपपत्तिरत आह *आख्यातार्थेति । अभ्युपेत्येदम् । वस्तुतः स एव नेत्याह *किञ्चेति । नन्वेवं घटो नास्तीत्यादितो घटकर्तृकसत्ताऽभावादिबोधे ऽपि घ-

---

+ अत्र १ पु० पत्तेश्चेति खण्डितमुपलभ्यते हेत्वन्तरसमुच्चायकम् । परन्तु २ पु० तदनुपलम्भात्खण्डितत्वाच्चात्र नोपन्यस्तम् ।

(१) 'अन्वयः । औत्सर्गिकैकवचनेन तत्सिद्धेराह घटाविति । पुरुषविधायकसूत्रविधायकसूत्रक्रमेण त्वमित्याद्युक्तिक्रमेणाह युष्मदादेरिति । तत्क्रमेणैवाह त्वदेति' इति पुस्तकान्तरे उपलभ्यमानः पाठः । मूले उपलभ्यमानस्तु स्थापित एव ।

(२) अन्वयेत्वित्यर्थमूले इति पाठः पु–२ ।

टाभावाद्यबोधात् घटादिविषयकसन्देहापत्तिः, तद्वत्ताज्ञानस्याप्रतिबन्धकत्वापत्तिश्चाविरोधादित्यत आह *घटसत्तेति । आदिना तदप्रतिबन्धकत्वपरिग्रहः । एतेन 'न पचति चैत्रः' इत्यादौ पाककृत्यभाववांश्चैत्र इत्यादिवत् घटो नास्तीत्यादावपि सत्ताश्रयत्वाभाववान् घट इतिबोधात्तयोर्व्यवस्था सिद्धा । कर्तृत्वनियामकं चाख्याततत्समभिव्याहृतनञेतदन्यतरार्थाश्रयत्वमेव । संख्या तु भावनाप्रतियोगिकनञर्थान्वय्यन्वयिन्यपीति न दोष इति नैयायिकोक्तमपास्तम् । सर्वानुभवसिद्धघटाभावबोधानुपपत्तेः । ममतु घटकर्तृकसत्ताऽभावस्य घटाभावसमनियतत्वेन तद्बोधोपपत्तेः, वक्ष्यमाणदोषाच्च । विशेषं वक्तुं तुल्ययुक्त्या प्रसङ्गात्तदर्थमाह *एवमिति । समनियताभाववदित्यर्थः । सन्देहादीत्यादिना तदभावबुद्धिपरिग्रहः । खण्डयितुं नैयायिकमत आह *समेति । समनियताभावानामित्यर्थः । क्वचित्तथा पाठ एव । तत्र बाधकमाह *नचेति । तस्यान्याविषयकतया न बाधकत्वमित्याह *लाघवादिति । स्वतः स्वरूपभेदेऽप्यैक्ये दृष्टान्तमाह *घटत्वेति । एकस्मिन्नेव भेदत्वेन घटप्रतियोगिकता अत्यन्ताभावत्वेन च घटत्वप्रतियोगिकतेति भावः । भावाभावयोरैक्ये दृष्टान्तमाह *घटत्वेति । *भावयोरपि-घटतत्सत्ताऽऽद्योरपि । *तत्त्वम्-ऐक्यम् । *हेतोः-लाघवादित्याद्युक्तस्य । असमनैयत्यमादाय दोषमाह *एक एवेति । उभयकल्पनेनेत्यर्थः । आदिना धर्मितात्विकत्ववादिसकलान्यमतसंग्रहः । *अपिः सिद्धान्तमतसमुच्चये । यथा तत्र तत्त्वं तथा प्रागुक्तम् । अत एवेष्टापत्तौ समनैयत्यमादायैव दोषान्तरमाह *तद्रूपेति । उक्तयुक्त्यैव । इदं तु नेष्टं तेषां समवायैक्यमादाय दोषापत्तिवारणाय तद्भेदावश्यकत्वात् । अत्र द्वितीयदोषं परिहरति *तत्रेत्यादिकेचिदित्यन्तेन । *तत्र-तद्रूपतद्वत्तादौ । तस्याप्रसक्तत्वात् । ननु रूपं भासते इत्यादिप्रतीतिर्नैव, सर्वरूपभानासम्भवात्, किन्तु विशेषप्रतीतिरिति तदवच्छेदकेन तद्रूपत्वादिना तदस्त्येवेत्यत आह *तद्रूपमिति । एवेन तस्य व्यावृत्तिः । नन्वेवन्तेषामभावानान्तयोर्भावाभावयोः भावयोश्च समनैयत्यं न स्यात् रू-

(१) पर उद्धरतीत्यपि पाठः क्वचित् ।

पत्वादिवदभावत्वभेदत्वसत्तात्वादेर्भासमानताऽवच्छेदकस्यातिप्रसक्तत्वादत आह *क्रियायाइति । *तत्र–तेषु । तथा च तत्र तत्तदभावत्वततत्सत्तात्वादि भासमानताऽवच्छेदकं रूपम्, नोक्तरूपमिति न दोषः । केचिदित्यरुचिबीजं तु तत्रापि तद्रूपत्वादेर्भासमानतावच्छेदकत्वमन्यथा लक्षणाऽऽपत्तेः । किञ्च तद्रूपादेरप्याश्रयविशेषालिङ्गितस्यैव भानम् । किञ्च तस्यास्तदनालिङ्गितायास्तस्य च तदनालिङ्गितस्य भानं प्राक् प्रतिपादितं तथाच उभयतःस्पाशा रज्जुरिति न्यायायितम् । एवञ्च द्वितीयदोषो ऽपि स्थिर एवेति । स्वपरसाधारणपरमतं खण्डयति *एतेनेति । तस्य तदाकाङ्क्षत्वादाह *अधिकरणानामिति । घटाभावेत्युक्तौ वचनपुरुषव्यवस्थादि न स्यादतस्तत्तिसद्ध्यर्थमाह *अभावप्रतियोगीति । एतेनेत्यस्यार्थमाह *वक्ष्यमाणे इति । अत्र प्रकरणेति भावः । *तस्य–अभावस्य । *आकाङ्क्षाऽभावात्–तस्या अभावात् । साक्षात्तदन्वयाभावादाह *कर्तृकर्मेति । *असाधुतेति । इहेत्यादेरिति भावः । उक्तकार्यकारणभावादाह *अत्यन्तेति । एतेन तादृशो घटः सत्ताऽऽश्रय इति बोधान्न तदनुपपत्तिरित्यप्यपास्तम् । तस्य सत्तायां तत्कर्त्रादा वाऽन्वयेतु यत्किञ्चिन्निष्ठाभावप्रतियोगी घट इहास्तीत्येवं बोधः स्यात् । तथा च महदनिष्टम् । न च तस्य क्रियान्वयेऽपि तत्समभिव्याहृतनञस्तद्वृत्यभावे लक्षणाऽङ्गीकारान्न दोषः ॥ एतद्देशवृत्त्यभावप्रतियोगिनि घटे एतद्वृत्तिसत्ताऽभावनिश्चयसत्त्वात्तत्र तदधिकरणकसत्ताश्रयत्वबोधानुपपत्तेः । नञ्वादादुयुक्तपरमतं निराचष्टे *एतेनेति । चरमदोषेणेत्यर्थः । अस्य विस्तर इत्यपास्तमित्यत्रान्वयः । *अन्यथा–तथाऽनङ्गीकारे क्रियाध्याहारेण तथा बोधाङ्गीकारे । ननूक्तरीत्या एतदधिकरणकघटकर्तृकसत्ताऽभाव इति बोधः सूपपन्न एव, अत आह *तथाहीति । *क्रमेण–आकाङ्क्षाक्रमेण । अत एवाह *घटसत्तेति । तस्य सत्त्वे आह *सत इति । भ्रमत्वे आह *असतइति । *तदुक्तम्—खण्डनकृता ।'

*सः–निषेधः।द्वितीये सार्थक्यमाह *न चेति । तस्याः सत्त्वात् क्षणिकत्वाच्चेति भावः । विरोधिबुद्धेस्तद्बुद्धिनिवर्त्तकत्वे ऽपि प्रयुज्यमाननञ्वाच्यनिवृत्तेर्वाच्यसाकाङ्क्षत्वादत्रासम्भवमाह *बुद्धेरिति । *एतेन–उक्तहेतुना । इत्यप्यपास्तमिति पाठः । उभयसाधारणं दो-

षान्तरमाह *घटाभावेति । आदिना भूतलवृत्तित्वाभावपरिग्रहः । तस्मान्न तथा बोधः । किन्त्वगत्या तथा बोधः कादाचित्क इति सिद्धम् । तत्र सम्मतिमप्याह *कणादेति । इत्यनेन संसर्गस्य प्रतीति पाठः । सतो घटस्येति हेतुगर्भतया सफलं नान्यथेत्याह *सत इति । *गेहसंसर्गेति । तद्वृत्तित्वेत्यर्थः ॥ ३३ ॥

नचाऽव्ययीभावस्य नित्यत्वाद् 'भूतले न घटः' इति वाक्यं दुर्लभमिति वाच्यम् । अर्थाभावशब्दे नञो घटकतया सूत्रगृहीताव्ययत्वेन नञा अव्ययीभावाभावात् । अत एव 'पूर्वपदार्थप्रधानो नञ्तत्पुरुषः' इति पक्षे तत्पुरुषेणाऽव्ययीभावस्य बाधप्राप्त्याऽव्ययीभावासिद्धिस्वरूपं दूषणं भाष्ये नोपन्यस्तम् । अत एव तत्र पक्षे 'अवर्षा हेमन्तः' इत्यादौ लिङ्गसङ्ख्यायोगो न स्यात् पूर्वपदार्थत्वेनासत्त्वभूतत्वादित्याशङ्क्य शब्दशक्तिस्वभावेन परिहृतम् । अत्र तु पक्षे ऽनेकमित्यादावेकवचनासिद्धिं मनसि निधाय उत्तरपदार्थप्रधानत्वं सिद्धान्तितम् । असंहितमिति तु सन्धानरूपसंहिताऽपरपर्यायभावसाधनक्तान्तनपुंसकसंहितशब्देन नञ्तत्पुरुषे बोध्यम् । सूत्रवार्त्तिकप्रामाण्यादुभयलिङ्गः संहिताशब्दः । 'जात्यवद्धा तथा वाऽन्तौ' इति प्रातिशाख्यव्याख्याने संहितवादिति तद्भाष्ये प्रयुक्तमित्यन्यत्र विस्तर इत्यपास्तम् । सत्त्वेन निश्चितस्य निषेधाभावेऽपि तत्त्वेन संभावितस्य निषेधसम्भवाच्च । नञ्समभिव्याहार एव च तस्य तत्त्वे प्रयोजकः । कणादसूत्रे तु समनियताभावानामैक्यं बोधयितुं तथोक्तिः । गेहसंसर्गस्यापि प्रतिषेध इत्यर्थादिति दिक् ।

पृथिव्यां गन्धो न जले इत्यादौ प्रतीतेरेकविशेष्यकत्वानुभवस्तु स्ववासनाकल्पित इति दिक् ॥३४॥

(कुं० टी०) *अर्थाभावेति । अभावशब्दे नञोऽन्तर्भूतत्वेन सूत्रगृहीतत्वान्न समासः । सर्वपश्चादिति भाष्यप्रयोगात् । *नोपन्यस्तमिति । तत्पुरुषेण बाधापत्तावव्ययीभावो न स्यादिति दूषणं नोक्तम् । *अत्र तु पक्षे—पूर्वपदार्थप्रधान इति पक्षे । अव्ययीभावस्यात्रानिष्टत्वादेवेत्यर्थः । उत्तरपदार्थप्रधानत्वे क्लीबत्वमुपपादयति *असंहितमितित्विति । *अपास्तमिति । अधिकरणकारकस्याभावादावन्वयासम्भवात् । *तत्त्वेन-सत्त्वेन । ननु कथं तत्र घटादेः सम्भावनेत्यत आह *नञ्समभिव्याहारएवेति । *तस्य—घटस्य । *तत्त्वे-सम्भावितत्वे । *तथोक्तिः-गेहसंसर्गाभावो निषिध्यते इत्युक्तिः । *संसर्गस्यापीति । अपिना घटसत्ताऽभावः । नन्वधिकरणस्य क्रियायामेवान्वये पृथिवीवृत्तित्वजलवृत्तित्वाभावयोर्गन्धे बोधो न स्यादत आह *पृथिव्यामिति । *एकविशेष्यकत्वेति । गन्धविशेष्यकत्वेत्यर्थः ॥ ३४ ॥

(क० टी०) अत्र मते दीक्षितभूषणादिरीत्या प्राप्तदोषमुद्धर्तुं शङ्कते *नचेति । नञ्तत्पुरुषस्य वैकल्पिकत्वान्न तत्प्रयुक्तदोष इत्याह *अव्ययीति । पक्षद्वयेऽपीति सूचयन्नाह *भूतले न घट इतीति । *अव्ययीभावाभावादिति । "अचः परस्मिन्" इति सूत्रस्थात् "ततः पश्चाद्" इति भाष्यप्रयोगाद्, "यथाऽसादृश्ये" इति सूत्रे "सादृश्यसंपत्तीति प्राप्नोति" इति भाष्योक्तेश्च । तत्सूत्रे तत्तदर्थबोधकपदघटकतया गृहीताव्ययेन तत्तदर्थकेन न समासः सः । यथाशब्देन तु भवत्येवोत्तरसूत्रारम्भादित्यर्थः ।

अत्र भाष्यान्तरमपि गमकमाह *अत एवेति । ततस्तदभावाङ्गीकारादेव चेत्यर्थः । *इति पक्षे-द्वितीये । *नोपन्यस्तमिति । तथा च न्यू-

नताऽऽपत्तिः । ननूपलक्षणं तदत आह *अत एवेति।उक्तोऽर्थः । *तत्र पक्षे—पूर्वपदार्थप्रधानः स इति पक्षे । *शब्देति । वाक्ये नञोऽसत्त्वभूतार्थाभिधायित्वेऽपि समासे सत्त्वरूपार्थाभिधायित्वं तत इत्यर्थः । तेनाव्ययीभावस्येष्टत्वे तु तेन तद्योगासिद्ध्या तावत्पर्यन्तगमनासंगतिः स्पष्टैव । ननु नेदं सिद्धान्तभाष्यं तत्पुरुषस्योत्सर्गतं उत्तरपदार्थप्रधानत्वादतः कथं ते उक्तार्थसिद्धिरत आह *अत्रात्विति । उक्तदोषद्वयाभावसूचकस्तुरिति तदंशे तस्य सिद्धान्तत्वमेवेति भावः । *वचनासिद्धिम्—वक्ष्यमाणाम् । *प्रधानत्वमिति । अथवा पुनरस्तूत्तरपदार्थप्रधान इत्यनेनेति भावः । नन्वेवं कथमम् "अद्रुतायामसंहितम्" इति संहितासूत्रस्थवार्त्तिकप्रयोगो ऽत आह *असंहितमिति त्विति । आरोपितः परः संनिकर्ष इति तदर्थः । *सूत्रेति । एतदुभयप्रामाण्यात्स्त्रीनपुंसकलिङ्ग इत्यर्थः । संहितशब्द इति पाठः । अत्रान्यसंमतिमप्याह *अत एवेति । क्लीबाङ्गीकारादेवेत्यर्थः । एतेन सूत्रवार्त्तिकप्रयोगादव्ययीभावेन सह नञ्तत्पुरुषो वैकल्पिक इति दीक्षिताद्युक्तमपास्तम् । असन्देह इत्यस्य गतिरुक्तैव । तदाह *अन्यत्रेति । शेखरादावित्यर्थः । तदुक्तदोषमुद्धरति *सत्त्वेनेति । तस्यैव तत्प्रतिबन्धकत्वात् । ननु तत्रैव न मानमत आह *नञिति । *तस्य तत्त्वेघटस्य सम्भावितत्वे । नन्वेवमपि कणादोक्तिविरोध एवात आह *कणादेति । तल्लाभे बीजमाह *संसर्गस्यापीति । अपिना सत्तादिसमुच्चयः । एवं च तत् प्रागुक्तरीत्या ऽयुक्तमेवेति तद्रीत्या पूर्वं दृष्टान्तदानं न स्वरीत्येति न सिद्धान्ते तद्विरोध इति च बोध्यम् । किञ्च उक्तभाष्यादपि अत्यन्ताभावार्थकनञः क्रियादिप्रतियोगिकाभावबोधकत्वेनोत्तरादिपदार्थेनानन्वयादसामर्थ्येनाव्ययीभावो न निर्मक्षिकमित्यादिवदिति तथा वाक्योपपत्तावपि तथा बोधस्यैव लाभ इति तथा बोधो ऽयुक्त एव । न सन्देह इत्यादौ तु सन्देहस्य गुणत्वाद्द्रवत्येव नञा तदभावबोधनमिति सामर्थ्यमस्त्येव । सो ऽप्युक्तरीत्यैवेति न दोषः । इदमनुपदमे-

(१) नामक्षिकामिति पाठः ।
(२) 'स्वोक्तार्थसाधकतया तदुक्तमेव' इति पाठः ।

व स्फुटीभविष्यतीति न पूर्वविरोधः । एतेन भूतले न घट इत्यादौ घटात्यन्ताभावे भूतलाद्यन्वितस्य सप्तम्यर्थाधेयत्वस्यैव तात्पर्यवशात् घटादौ सप्तम्यन्तभूतलादिवृत्तित्वाभावस्यान्वयबोधो ऽनुभवसिद्धः । अन्यथा तादृशवाक्यजन्यस्याप्रामाण्यज्ञानानास्कन्दिताभावबोधस्य भूतले घट इत्यादिवाक्यजन्यघटादिविशेष्यकभूतलाधेयत्वप्रकारकबोधविरोधिताया अनुपपत्तेः । नञ्पदं विना यत्र धर्मिणि यस्य विशेषणतया भानं यादृशसमभिव्याहाराद्भवति तादृशसमभिव्याहारस्थले नञ्सत्त्वे तत्र धर्मिणि तदभावः प्रतीयते इति अनुभवापलापप्रसङ्गात् इति व्युत्पत्तिवादाद्युक्तमप्यपास्तम् । उक्तयुक्तेः । उक्तरीत्या प्रतिबन्धकत्वोपपत्तेः, ततोऽपि क्रियाविशेष्यकबोधस्यैवोक्तरीत्या सत्त्वाच्चेति दिक् । तदाह *इतिदिगिति । यत्तु त्वन्मते पृथिव्यामित्यादौ प्रतीतेरेकविशेष्यत्वानुभवो विरुध्येतातो मदुक्तमेव युक्तमिति सा, तत् खण्डयति *पृथिव्यामिति । तात्पर्यवशातकदाचित्प्रातिपदिकार्थविशेष्यकविभक्त्यर्थवृत्तित्वाभावप्रतीत्यङ्गीकारेण गन्धः पृथिवीवृत्तित्ववान् जलवृत्तित्वाभाववांश्चेति बोधादाह *प्रतीतेरेकेति । अन्यथा न जले इत्यत्र गन्धपदावृत्तिप्रसङ्ग इति तद्भावः । यत्तु पृथिवीवृत्तिगन्धप्रतियोगिकाभाववज्जलमित्यर्थ इति । तन्न । जले इति सप्तम्यनुपपत्तेः । तदभावो जलवृत्तिरिति बोधे पृथिव्यामिति सप्तम्यनुपपत्तिः, तत्पदवैयर्थ्यापत्तिश्च । तस्मात्सिद्धान्तरीत्या प्रतीतिद्वयं भिन्नविशेष्यकम् । एतेनोक्तरीत्या सप्तम्यर्थान्विताभावस्य विशेषणतया प्रतियोगिन्यन्वयाद् भूतलवृत्त्यभावप्रतियोगी घट इतिवज्जलवृत्त्यभावप्रतियोगी गन्धः पृथिव्यामिति विनैवावृत्ति बोध इति मतमपि निरस्तमिति दिक् । तदाह *इति दिगिति ॥ ३४ ॥

"नेक्षेतोद्यन्तमादित्यम्" इत्यादौ तस्य ब्रह्मचारिणो व्रतमित्यनुष्ठेयवाचिव्रतशब्दोपक्रमादभावस्य चाननुष्ठानादीक्षतेर्नञ्समभिव्याहारादीक्षणाभावसंकल्पबोधकतेति बोध्यम् ।

यत्त्वत्र पर्युदासस्तत्राभावस्याननुष्ठेयत्वाद्भुतशब्दोपक्रमाच्च तद्भिन्नक्रियायाः सामान्यतः प्राप्त्या चानीक्षणसङ्कल्पे लक्षणेति । तन्न ।

ईक्षणभिन्नसङ्कल्पे तात्पर्याभावात् । तथा, शिष्टाचाराभावाच्च । नेक्षिष्यामीति ईक्षणाभावसङ्कल्पस्यैव सर्वैराचरणाच्च ।

किं च यत्र नञसमभिव्याहारे पदार्थस्याभेदेनान्वये आकाङ्क्षा तत्रैव नञ्समभिव्याहारे भेदप्रतीतिर्नान्यत्र । नच प्रकृते तथा । अत एव 'न पचति तिष्ठति' इत्यादौ न भेदबोधः । अत एव तिङन्तसमभिव्याहृतनञो ऽत्यन्ताभावार्थकत्वमेव ।

अयमेव प्रसज्यप्रतिषेध इत्युच्यते । प्रसज्य विधाय विहितस्य प्रतिषेध इति तदर्थः । नञ्सूत्रे भाष्ये तु—"प्रसज्य क्रियागुणौ ततः पश्चान्निवृत्तिं करोति" इत्युक्तम् । तेन गुणाभावबोधे ऽपि प्रसज्यप्रतिषेध इति लभ्यते । 'नास्माकमेकं प्रियम्' इत्युदाहरणम् । अत्र हि एकप्रियप्रतिषेधे बहुप्रियप्रतीतिः । 'न सन्देह' इत्यादौ च सन्देहाभावप्रतीतिः । सन्देहस्य गुणत्वात् । सर्वत्र क्रियाप्रतिषेधे हि गुणपदोपादानं भाष्ये अनर्थकं स्यात् ।

प्रसज्यप्रतिषेधो ऽसौ क्रियया सह यत्र नञ् ॥—
इत्यत्र क्रियाग्रहणं गुणस्याप्युपलक्षणमिति बहवः॥३८॥

(कुं०टी०) *नेक्षेतेति । अत्र प्रतिषेधवाचिनो नञः क्रियायामन्वयादीक्षणनिषेधो वाक्यार्थः । निषेधश्च प्राप्तिपूर्व-

क इति यत्र क्रतौ सूर्येक्षणं विहितं तत्रोदयकालिकसूर्येक्षणानिषेधः क्रत्वर्थ इति पूर्वपक्षे ऽभावस्यानुष्ठानासम्भवान्नञः पर्युदासपरतयाऽनीक्षणसङ्कल्प एव पुरुषार्थो विधीयते इति मीमांसकाः । *किञ्चयत्रेति । नञो ऽभावे यत्राभेदान्वयसम्भावना तत्रैव नञ्समभिव्याहारे भेदान्वयः । घटः पटो नेत्यत्र हि नञो ऽभावे नामार्थयोरिति न्यायादस्त्यभेदप्राप्तिरिति भावः । *नभेदबोधइति । पाकस्थित्योरभेदाप्रसङ्गाद्भेदबोधो ऽपि नेत्यर्थः ॥ ३८ ॥

(क० टी०) सिद्धान्ते प्राप्तदोषमुद्धरति *नेक्षेतोद्यन्तमिति ।
अस्तं यान्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ।

इत्यस्य परिग्रहः । इदं च स्नातकव्रतान्तर्गतं न मानवम्, न याज्ञवल्क्यीयम्, नाप्यापस्तम्बीयम्, किन्तु ब्रह्मचारिधर्मभूतप्रजापतिव्रतान्तर्गतम् । तदुत्सर्गे "कर्माणि पुरुषार्थाय" इत्यादितुर्याद्यपादस्थजैमिनिसूत्रविषयभूतन्तदाह *तस्येति । 'अस्य व्याख्या *ब्रह्मेति । *ईक्षणाभावेति । अत एव स्नातकव्रतप्रकरणे "उद्यन्तमस्तं यन्तमादित्यं दर्शने वर्जयेद्" इत्यापस्तम्बः सङ्गच्छते । एवञ्चोक्तनियमात्प्रसज्यप्रतिषेध एव तत्रेति भावः । तत्सूत्रस्थमीमांसकविज्ञानेश्वरादिमतं खण्डयति *यत्त्विति । *तत्र-पर्युदासे । *व्रतेति । तद्वाचीत्यादिः । अत एव सामान्यप्राप्तिः, तत्र निषेधलब्धमादायाह *तद्भिन्नेति । नञिवयुक्तन्यायेनाह *क्रियायाइति । *प्राप्त्याचेति । तद्विशेषजिज्ञासायां पुरुषक्रियामात्रस्य सङ्कल्पपूर्वकतया प्रत्यासत्त्या तत्समभिव्याहारेण चेति शेषः । अन्यथा मन्वाश्वलायनापस्तम्बादिकृततथोपक्रमविरोधः स्पष्ट एवेति भावः । उदयास्तमयकालयोः प्रत्यहं सङ्कल्प इति तन्त्ररत्नाद्युक्तमसङ्गतमिति ध्वनयन्नुक्तापस्तम्बमूलकमेवाह *नेक्षिष्यामीति । यथा चैतत्तथा स्पष्टं मिताक्षराव्याख्यायाः सूच्याम् । अतएव विज्ञानेश्वरेणापि मांसभक्षणविधि-

निषेधयोर्मन्वाद्येकवाक्यतया तथैव सङ्कल्पो दर्शितः । इदमप्यभ्युपेत्योक्तम् । वस्तुतस्तदेव नेत्याह *किञ्चेति । *यत्रेति । स्ववाक्योपात्ते इत्यर्थः । एतेन व्रतेन तत्सत्त्वाच्चिन्त्यमित्यपास्तम् । तस्य वाक्यान्तरत्वात् । तथा सति तथाऽन्वयस्यैव सत्त्वेन तदाकाङ्क्षामात्रस्यैवाभावाच्च । अन्वयस्य बाधितत्वादाह *आकाङ्क्षेति । 'तन्मात्र-मित्यर्थः । भिन्नार्थकात्तस्य बोधे ऽपि समानविभक्तिनामार्थयोरिति व्युत्पत्त्या तदाकाङ्क्षा सम्भवति, तस्या असाङ्क्षिपयाया अपि बहुशो दृष्टत्वादिति भावः । *नच—नहि । तदविषयतया बाधेन च व्युत्पत्त्यन्तरेण भेदसम्बन्धेनैवान्वयस्य तस्य तदाकाङ्क्षायाश्च सत्त्वात् । घटो न नील इत्यादौ च वक्ष्यमाणरीत्या ऽत्यन्ताभावधीरेव, न भेदधीः । तत्र तदभावे तथाऽन्वयस्यैव सत्त्वेन तदाकाङ्क्षामात्रस्यासत्त्वाच्च । वक्ष्यमाणरीत्या विपरीतधीरपि न ।

एतेन नञो ऽभावे यत्राभेदेनान्वयबाधस्तत्र नञाऽत्यन्ताभावधीर्यत्र तदभावे ऽभेदेनान्वयस्तत्र तेन भेदधीस्तत्र च तत्तदाकाङ्क्षाज्ञानाद्येव नियामकमिति नैयायिकाद्युक्तपास्तम् ।

तदेतद् ध्वनयन्नाह *अत एवेति । उक्तनियमादेवेत्यर्थः । परमते तु घटः पटो नेत्येतत्तुल्यतया ऽत्रापि स स्यादिति भावः । उपसंहरन्नाह *अत एवेति । उक्तोऽर्थः । अतएव 'न पचति चैत्र' इत्यतः 'चैत्रभिन्नकर्तृकः पाक' इत्यबोधः । विशेषं वक्तुमाह *अबमेवेति । तत्समभिव्याहृतनञ्बोध्यात्यन्ताभाव एवेत्यर्थः । प्रसज्येत्यस्यार्थः *विधायेति । विशिष्टफलितार्थमाह *विहितेति । विधानं च तदसमभिव्याहृतवाक्यतो बोध्यम् । तमेव विशेषमाह *नञ्सूत्रे इति । *तेन—भाष्यीयतथाकथनेन । "न एकं प्रियम" इति तत्रोक्तम् । नद्वित्वाशयकामित्यर्थत आह *नास्माकामिति । येननाप्राप्तेऽइतिवन्नेत्याह *अत्रहीति । बहुप्रियशब्दः पात्रादिः । बहुप्रियतेतिपाठस्तु सुगम एव । प्रागुक्तदार्ढ्यायोदाहरणान्तरमाह *नसन्देह इति । अभियुक्तोक्तिविरोधं परिहरति *प्रसज्येति । एवं च न तथैव कार्यकारणभावः, किन्तु तत्र तादृशधानुगुणवाचकपदान्यतरजन्योपस्थितिः कारणमिति बोध्यः ॥ ३५ ॥

अन्त्यो घटः पटो नेत्यादौ ।

यत्त्वत्र भेदो नञर्थः तत्र प्रतियोगितासम्बन्धेन पटस्यान्वयः । नच गृहस्योच्चैरित्यादाविव षष्ठ्यापत्तिः । एवं तर्हि पटपदं पटप्रतियोगिकपरम्, तस्य भेदे ऽभेदान्वयः । भेदस्याश्रयतया घटे ऽन्वयः । अभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया ।

यद्वा भेदवान्नञर्थः । भेदवति लक्षणेति तु न युक्तम् । निपातानामनेकार्थत्वेन लक्षणानवसरात्, केवलभेदस्य काप्यबोधाच्चेति । तन्न ।

न ब्राह्मणैरेतैरुपद्रुतमित्यादौ भेदाश्रयभेदप्रतियोगिनोः समानविभक्तित्वस्य दुरुपपादत्वात्, समासवाक्ययोस्तुल्यार्थत्वौचित्याच्च । तस्मादत्रापि आरोपितपटाभिन्नो घट इति बोधः । नञ् द्योतक एव । एवञ्च समानविभक्तिकत्वं सिद्धम् । घटभेदबोधस्त्वार्थः । तत्समनियतत्वाद् घटत्वाभावबोधो ऽपि तत्रार्थः ।

यद्यपि भेदो निरूपयितुमशक्यः । तथाहि—घटः पटाद्भिन्न इति भेदज्ञानं भिन्नत्वेन गृहीतधर्मिप्रतियोगिज्ञानपूर्वकम् । तत्र स भेदो ऽयमेव चेदात्माश्रयः । भेदान्तरं चेत्तदपि भिन्नयोरेव धर्मिप्रतियोगिनोर्ज्ञातव्यम् । स चेत्पूर्वभेद एव तदाऽन्योन्याश्रयः । तृतीयो भेदोऽन्यश्चेच्चक्रकापत्तिः । भेदपरंपरास्वीकारे अनवस्था । अन्तिमभेदासिद्ध्या मूलभूतभेदपर्यन्तमसिद्धेर्मूलक्षयात् । अत एव भेदस्यासत्सामान्यशब्देन कैयटादौ व्यवहारः । असत्त्वमुक्तरीत्या, सामान्यत्वं केवलान्वयित्वात् । तथाऽप्यविचारितरमणीयेनैव मायिकेन भेदेन व्यव-

हाराद्यावहारिकस्यैव सत्त्वेनाक्षतिः, घटाद्यर्थस्य घटादिपदवाच्यत्ववत् । अन्यथा घटत्वाश्रयत्वेन अयं घटः, घटवृत्तित्वेन चेदं घटत्वमित्यन्योन्याश्रयात् । पदार्थमात्रस्याविचाररमणीयस्यानिर्वचनीयस्यैव व्यवहारप्रयोजकत्वात् ।

अत एवोक्तं श्रीहर्षेण—

समस्तलोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः ।
का तवास्तु गतिस्तर्कैर्वस्तुधीव्यवहारयोः ॥
उपपादयितुं तैस्तैर्मतैरशकनीययोः ।
अनिर्वक्तव्यतावादपादसेवा गतिस्तयोः ॥
यथा सतो जनिर्नैवमसतोऽपि जनिर्न च ।
जन्यत्वमेव जन्यस्यानिर्वाच्यत्वसमर्पकम् ॥ इति ।

तथा—

भेदसत्यपरस्तर्को भेदमायापरोऽपरः ।
भेदसत्यपरस्तर्को ह्यसन्वेदविरोधतः ॥
एकविज्ञाननिगमान्नेह नानेति च श्रुतेः । इत्यलम् ।

एवमघटस्य दर्शनमित्यादौ "सर्वं वाक्यं सावधारणम्" इति न्यायेन घटभिन्नस्यैव दर्शनमित्यर्थात् घटस्य दर्शनाभावोऽपि आर्थः प्रतीयते । अघटदर्शनमित्युक्ते तु न । तद्भिन्नदर्शने ऽपि तद्दर्शनाभावाभावेन तयोः समनैयत्याभावात् । एवकारान्तर्भावेण वृत्तौ तु न मानम् । एतच्च "तस्य भावः" "नञो गुणप्रतिषेध—"इत्यादिसूत्रेष्वाकरे स्पष्टम् ॥ ३६ ॥

(कुं०टी०) *अन्त्यः—तादात्म्यसम्बन्धाभावः । *तत्र—भेदे ।

*प्रतियोगितेति । घटप्रतियोगिकभेदवानित्यर्थः । *गृहस्योच्चैरित्यादाविवेति । "न लोक–" इत्यत्र पूर्वोत्तरसाहचर्यात् कृदव्ययस्यैव ग्रहणात् । *षष्ठ्यापत्तिरिति । घटसम्बन्धिभेदवानित्यर्थात् । *नयुक्तमिति । शक्त्यैव निर्वाहात् । *नब्राह्मणैरिति । अत्र भेदप्रतियोगिनो ब्राह्मणाः, भेदाश्रया एते, ब्राह्मणप्रतियोगिकभेदवन्त एते इत्यर्थे सामानाधिकरण्याभावात्समानविभक्तिकतानापत्तिरित्यर्थः । *तत्समनियतत्वात्–घटभेदसमनियतत्वात् । *धर्मिप्रतियोगीति । घटः पटो नेत्यत्र धर्मी घटः प्रतियोगी पटः अनयोर्भेदवत्त्वेनोपस्थितयोरेवेयं बुद्धिरित्यर्थः । *चक्रकमिति । त्रयाणां परस्परापेक्षा चक्रकम् । अत ऊर्ध्वमनवस्था । असत्सामान्यपदयोरर्थमाह *असत्त्वमिति । *उक्तरीत्या–भेदासिद्धिरितिरीत्या । *अतएवोक्तमिति । यदि घटबुद्धिविशेष्या घटसिद्धिस्तदा घटबुद्धिरपि घटबुद्धिबुद्धेरेव वाच्या इत्यनवस्था । नन्वेवं सर्वलोकशास्त्राविसंवादेन प्रवर्त्तमानयोर्वस्तुधीव्यवहारयोः का गतिरिति पृच्छति *कागतिरिति । वस्तुधीव्यवहारयोः संप्रतिपत्तिमात्रं विचारतस्तु तयोरुपादानमशक्यमित्याह *उपपादयितुमिति । *इत्युक्ते तु नेति । अत्र घटदर्शनाभावबोधो नेत्यर्थः । अत्र हेतुमाह *तद्भिन्नेति । घटभिन्नपटादिदर्शने घटस्य दर्शनं न भवतीति नेत्यर्थः । *तयोः–अघटदर्शनघटदर्शनाभावयोः ॥३६॥

(क० टी०) एवं तदर्थात्यन्ताभावं निरूप्य भेदं निरूपयति *अन्त्य इति । भेद इत्यर्थः । सोऽपि समासवदार्थ एव, न शाब्द इति प्रतिपादयितुं मीमांसकनैयायिकमतं खण्डयति *यत्त्विति । *नञर्थः–तद्वाच्यः । *एवं तर्हीत्यस्य यत इत्यादिः । लक्षणया आह *पटपदमिति । *भेदे–नञर्थे ।

*अभेदान्वयः–अभेदेनान्वयः। ननु व्युत्पत्तिविरुद्धमन्त्यमत आह *अभेदेति । नन्वेवमाद्यबोधोऽपि न स्यादत आह *यद्वेति। भेदेत्यस्य प्रतियोगिविशिष्टेत्यादिः । तथा च साकाङ्क्षत्वात्प्रतियोगिनि पटस्य अभेदेनान्वयो विशिष्टस्य घटे तथेति। तस्मादन्यथात्वेऽपि न कोऽपि दोषो ऽत्रेति भावः। एकदेश्युक्तं खण्डयति परः *भेदघतीति। भेदे शक्तस्य पर्युदासे सामानाधिकरण्यानुरोधेन तत्र लक्षणेत्यर्थः। सिद्धान्तमतेन दूषणमाह *निपातानामिति । परोक्तदोषमाह *केवलेति। घटः पटो नेत्यादौ परमते साधुत्वेन निर्वाहमभ्युपेत्याह *नब्राह्मणैरिति। अत एव तत्साधारणं दोषान्तरं समासस्थले पूर्वं तथा प्रतिपादितत्वादाह *समासवाक्ययोरिति । *अत्रापि–वाक्येऽपि तदीये। अपिना समाससमुच्चयः। अतएवाह *एवञ्चेति। साधुत्वार्थं प्रथमेति तु न युक्तम्। तथाऽनुशासनाभावात्। औत्सर्गिकैकवचनस्यापि गमके स्तयेव संस्वाद्य । नन्वेवं कथं तद्भेदधीः सर्वजनप्रसिद्धा ऽत आह *घटभेदेति । समनियताभावानामैक्यमेकस्मिन्नेव भेदत्वेन घटप्रतियोगिकत्वम्, अत्यन्ताभावत्वेन च घटत्वप्रतियोगिकत्वमिति मतस्य दूषितत्वादाह *तत्समनियतत्वादिति। भेदस्य न वास्तवत्वमित्याह *यद्यपीत्यादि । घटो घटाद्भिन्न इत्यादिवारणायाह *भिन्नत्वेनेति। तत्त्वेन गृहीतौ यौ तस्याश्रयप्रतियोगिनौ तयोर्यज्ज्ञानं प्रतियोग्यधिकरणयोर्ज्ञानं तत्पूर्वकमित्यर्थः। *तत्र–पूर्वतनतज्ज्ञाने। स्वस्मिन्स्साक्षात्स्वापेक्षासत्त्वाद् आह *आत्मेति। इदमुद्धरति *भेदान्तरमिति। *स चेत्–तृतीयभेदश्चेत्। *पूर्वभेद एव–सर्वाद्यभेद एव। एकमन्तरा स्वस्मिन्स्वापेक्षासत्त्वादाह *अन्योन्येति। इदमप्युद्धरति* तृतीयइति । चतुर्थस्य सर्वाद्यरूपत्वे ऽनेकद्वारा स्वस्मिन्स्वापेक्षासत्त्वादाह *चक्रकेति । धातोरिति सूत्रे स्पष्टमेतत् । तत्र हि–"आत" इत्यत्र "धातोः" इति विहितविशेषणम्, "आत" इत्यानन्तर्यविशेषणमित्यभ्युपेत्यापि लोपे कृते जुस् नेति समाधावलुनन् इत्यादौ लोप ईत्वेन बाध्यते, तच्चान्तिभावेन, सच जुस्भावेन, सच लोपेन, सचेत्वेनेत्वमन्तिनाऽन्तिर्जुसा सच लो-

---

(१) प्रतीतेश्चेति पाठः।

पेनेति चक्रकमुक्त्वा ऽऽयन्नादिषूपदेशिवद्भावेनान्तरङ्गत्वादादावन्तिभावे लोपेन व्यवस्थेति परिहृतमेकदेशिना । अन्योन्याश्रयस्तु वृद्धिसूत्रभाष्यादौ प्रसिद्धतरः । एतद्दोषाभावाय चतुर्थादेरपि भिन्नत्वाङ्गीकारे आह *भेदेति । अस्या दोषत्वे बीजमाह *अन्तिमेति । एवं सति क्वचिद्विश्रान्तेरसम्भवादाह *पर्यन्तमिति । अत एवोक्तम्—"एवमप्यनवस्था स्याद्या मूलक्षयकारिणी" इति । *अत एव—तदशक्यत्वादेव । *कैयटादाविति । *उक्तेति । तदशक्यत्वेनेत्यर्थः । न केवलमत्रैवेदं किन्त्वन्यत्रापि सर्वत्रेत्याह *घटाद्यर्थेति । इदमुपपादयति *अन्यथेति । उक्तरीत्यनङ्गीकारे इत्यर्थः । *अन्योऽन्याश्रयादिति । तदापत्तेस्तत्सिद्धेरप्यभावापत्तेरित्यर्थः । उपसंहरति *पदार्थेति । तस्मादित्यादिः । मात्रम् कार्त्स्न्ये । अनिर्वचनीयत्वस्वरूपं प्रागुक्तम् । प्रयोजकत्वमिति पाठः । समस्तेत्यादिविशेषणेनाविप्रतिपत्तिर्वस्तुनो धीव्यवहारयोः सूचिता । नर्तनं च सर्वदेशसम्बन्ध एव । तव तर्कैस्तयोः का गतिः स्यात्कुत इत्यत आह *उपपादयितुमिति । एवं प्रश्ने सिद्धान्तमाह *अनिर्वचनीयेति । ननु तत्त्वमेव कुतो ऽत आह *यथेति । *सतः-ब्रह्मणः । *एवम्-तथा। *असतः-नृशृङ्गादेः । *नच-नहि। नैवेति पाठेऽप्येवम्। उभयत्र बीजमुक्तमेव। प्रपञ्चे त्वाह *जन्यत्वमेवेति । एवं सामान्यत उक्त्वा विशेषतः प्रकृतसंमतिमाह *तथेति।सत्यमायाशब्दौ धर्मपरौ तयोर्मध्ये आह *भेदेति । *ह्यसन्-असन्नेव । *विरोधतः—पञ्चम्यन्तात्सार्वविभक्तिकस्तसिः । वेदमेवाह *एकेति । एकविज्ञानेन सर्वविज्ञानमित्यपि प्रागुक्तश्रुतेरित्यर्थः । *चश्रुतेः-श्रुतेश्च । यद्यपि "तत्त्वमसि" इत्यादयोऽभेदप्रतिपादिकाः,"नित्योऽनित्यानाम्"इत्यादयो भेदप्रतिपादकाश्चेति श्रुतीनामपि द्वैविध्यम्, तथापि लाघवतर्कानुगृहीताभेदश्रुतिबलात्तासामुपाधिकल्पितव्यावहारिकभेदानुवादकत्वमेव । किञ्च श्रुत्यैव भेदतिरस्कारोऽपि कृतः-"नेह नानास्ति किञ्चनेति, । "य एतस्मिन्नुदरमन्तरं कुरुते ऽथ तस्य भयं भवति मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिस्तन्निन्दापराऽपि । नैवमभेदस्य तत्त्वपरा श्रुतिरस्ति यया भेदवाक्यानुरोधादभेदवाक्यानामविभागलक्षणादिभेदपरत्वं यथोक्तं शुद्धमाक्षिप्तं तादृगेव भवति । किञ्चावि-

भागो नाम विभागाभावो न संयोगविरोधी विभागाभावस्य संयोगस्वरूपत्वेन संयोगाभावरूपविभागाभावस्य सुतरां तत्स्वरूपत्वेन द्वयोर्व्यापकयोर्जीवब्रह्मणोरप्राप्तिपूर्वकप्राप्तिरूपसंयोगाभावेन तदसम्भवात् । तस्माद्विभुनित्यानामविभागो नामाभेदापरपर्याय एव । एतद् ध्वननार्थमेव नेहेत्यादिहेत्वन्तरमुक्तम् । एवं च तादात्म्यमारोपितं भेद एव वास्तवो वस्तूनामिति व्यवहारोऽप्यविद्याविलसित एवेति बोध्यम् । तदाह *इतीत्यलमिति । अन्यत्रापि तथा तत्प्रतीतिमुपपादयति *एवमिति । तत्र घटत्वाभाववदित्यर्थः । *अर्थात्—आर्थिकात् । शाब्दस्तु आरोपितघटस्यैव दर्शनमिति । *अभावाभावेनेति । तद्दर्शनाभावे ऽपि तद्भिन्नदर्शनाभावेनचेत्यपि बोध्यम् । *एतच्चेति । समासे तदज्ञानं चेत्यर्थः । तत्राद्ये "त्वतलभ्यां नञ्समासः पूर्वविप्रतिषेधेन" इत्यत्र युगपद्विवक्षामाश्रित्य व्याख्यातम्, तच्च तत्रैवकारान्तर्भावे सति असम्बद्धं स्यात् । भेदस्यावास्तवत्वमपि तद्भाष्यादौ स्पष्टम् । द्वितीये गुणप्रतिषेधे इत्यस्य गर्दभरथमर्हति "तदर्हति" इति ठक्, गार्दभरथिकादन्य इत्यर्थकस्यागार्दभरथिक इत्यस्य दत्तस्य प्रत्युदाहरणस्योपपत्त्यर्थं व्याख्यातृभिर्व्याख्यातम् । नचास्य गर्दभरथार्हणकर्तृभिन्न इत्यर्थः, तत्रार्थत अर्हत्वाभावस्यापि बोधनादस्त्येव गुणप्रतिषेधः, यथा घटभिन्न इत्युक्ते घटत्वाभाववानिति प्रतीयते इति वाच्यम् । न गर्दभरथमर्हतीति गर्दभरथस्य नञर्थार्हाभ्यां युगपदेकार्थीभावविवक्षायां परत्वात्तद्धिते एकदेशद्वारकसामर्थ्यमाश्रित्य तद्धितान्तेन समासे आरोपितगर्दभरथमर्हतीत्यर्थके ऽतिप्रसङ्गवारणार्थत्वादिति । अन्यथैतदसङ्गतिरपि स्पष्टैव ॥ ३६ ॥

नञ्द्योत्यो भेदो विशेषणम्, भेदप्रतियोगी घट इत्यर्थ इति तु न युक्तम् । अघटमानयेत्युक्ते यत्किञ्चिन्निष्ठभेदप्रतियोगिनो यत्किञ्चित्प्रतियोगिकभेदवतो वा घटस्यैवानयनापत्तेः । अत ए-

---

१ मूलपुस्तकत्रितये भावादिति पञ्चम्यन्तः पाठ उपलभ्यते ।

योत्तरपदार्थप्रधानत्वे नञ्तत्पुरुषस्य अब्राह्मण इत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीत्याशङ्क्य नञः प्रयोगान्नञर्थविशिष्टस्यानयनं भविष्यतीत्युक्त्वा "कः पुनरसौ नञर्थविशिष्टः" इति प्रश्ने "निवृत्तपदार्थकः" इति भाष्ये उक्तम् । निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन्स क्षत्रियादिरित्यर्थः । सादृश्यादिना अध्यारोपितब्राह्मण्यो नञ्द्योतिततदवस्थ इत्यर्थः इति कैयटः ।

यत्तु निवृत्तेति भावे क्तः, निवृत्तमभावः पदार्थो यस्येति एतद् भाष्यार्थ इति । तद् भ्रान्त्यैवेति स्पष्टं भाष्यविदाम् । किञ्च प्रतियोग्यभावौ तुल्ययोगक्षेमाविति तान्त्रिकोक्तेर्नञ्वाच्यभेदस्य विशेषणता न युक्ता । यत्र प्रतियोगिनः प्रकारता तत्रैव तदभावस्यापि सा, यत्र तस्य विशेष्यता तत्र तदभावस्यापि सेति तदर्थः । बाधबुद्धिप्रतिबन्धकताऽपि यथाऽनुभवं कल्प्येति न तदनुरोधेन ऋष्यनुभवसिद्धबोधान्यथाभाव उचितः । अनेनैव न्यायेन प्रतियोग्यधिकरणमेवाभावाधिकरणमिति दिक् ॥ ३७ ॥

(कुं०टी०) *निवृत्तपदार्थक इति । अयं भावः—यो ऽयं ब्राह्मणार्थः स बहिरसन् केवलं भ्रान्त्या क्षत्रिये अध्यवसित इति स्वाभाविकी ब्राह्मणार्थनिवृत्तिरेव नञा द्योत्यते, तस्माद्बाह्यापेक्षयैव निवृत्तपदार्थकत्वम् उपचारसत्ताऽपेक्षया तु प्रयोग इति । घटप्रकारकभूतलविशेष्यकनिश्चयं प्रति घटाभावप्रकारकभूतलविशेष्यकनिश्चयः प्रतिबन्धक इत्यादि दूषयति *बाधबुद्धीति । *अन्यथाभावः—अन्यथात्वम् । *अनेनैवेति । नञो-

ऽभावे यत् प्रतियोग्यधिकरणं तत् नञ्समभिव्याहारे अभावाधिकरणमित्यर्थः ॥ ३७ ॥

(क० टी०) दीक्षितभूषणकारादिमतमाद्यं खण्डयति *नञ्द्योत्य इति । इदंच वाक्यसमासोभयपरम् । भेद एव नञर्थः तस्य तत्त्वादेव सर्वनामकार्यम्, तस्य तत्प्राधान्यम्, अत्वं भवसीत्यादौ पुरुषव्यवस्था, अनेकमित्यादौ तन्नियमश्च । अनेके इति त्वेकशेषेण साधु । समासे वक्ष्यमाणं त्वन्यथापरमिति न पौनरुक्त्यम् । समासवाक्ययोस्तुल्यार्थत्वात् । अतएवाह *अघटमिति । सामर्थ्यस्योभयत्रापि सत्त्वेन विनिगमनाविरहादाह *यत्किञ्चित्प्रतीति । उत्तरपदार्थप्राधान्ये राजपुरुषमानयेत्यादौ तथा दृष्टत्वात् । *अत एव—तत्र पक्षे तदापत्तेरेव । *नञिति । पूर्वान्वयि । मात्रपदेन शौचाचारादिहीनब्राह्मणस्य, क्षत्रियादेश्च निवृत्तिः । भाष्ये नञ्पदमर्थपरमित्याह *नञर्थेति । भेदस्य नञर्थत्वे तावताऽप्यवारणादाह *कःपुनरिति । नायं नञर्थमात्रविषयकः प्रश्नः, सर्वनाम्नां प्रधानपरामर्शित्वस्यौत्सर्गित्वाद्, अतस्तदर्थमाह *नञर्थविशिष्ट इति । अभावस्यैव नञर्थत्वेन प्रसिद्धत्वात्प्रमितोत्तरपदार्थव्यतिरिक्तः कोऽसौ नञ्विशिष्ट उत्तरपदार्थ इत्यर्थः । कप्रत्ययसूचितबहुव्रीहिसूचितमर्थमाह *निवृत्त इति । कर्मणि क्त इति भावः । सर्वथा निवृत्तपदार्थत्वे विशेषणमेव न युज्येतेत्यतस्तत्तात्पर्यार्थमाह *सादृश्यादिनेति । आदिना साहचर्यादि । निवृत्तमुख्यब्राह्मण्यादारोपिततद्वानिति भाष्याक्षरार्थस्तदाह *नञिति । एवं चारोपितस्वप्रवृत्तिनिमित्तवानुत्तरपदार्थ इत्यत्र तात्पर्यग्राहको नञिति तात्पर्यम् । उत्तरपदार्थप्राधान्यमप्येतदेवेति बोध्यम् । तदुक्तिमेव खण्डयति *यत्त्विति । *तदिति । उक्तयुक्तेः । पूर्वोत्तरसन्दर्भाभ्यामुक्तस्यैव भाष्येष्टत्वेन तथाऽर्थसम्भावनाया एवाभावात् । यथाचैतत्तथा स्पष्टमुद्द्योते । अभ्युपेत्य दोषान्तरमाह *किञ्चेति । तान्त्रिकाः—नैयायिकादयः । परमतेनाह *नञ्वाच्येति । प्रसिद्धयोगक्षेमतुल्यत्वाभावादाह *यत्रेति । नन्वेवं घटादिज्ञानस्य तत्प्रतिबन्धकता न स्यात्, ग्राह्याभावानवगाहित्वादत आह *बाधेति । ननु परेषां तथैवा-

नुभवो ऽत आह *ऋष्यनुभवेति । ततस्तस्य प्राबल्यात् । तस्यार्थान्तरमप्याह *अनेनैवेति । प्रतियोग्यभावावित्युक्तेनेत्यर्थः । विनिगमनाविरहादिति भावः । किञ्चार्थिकतज्ज्ञानमादाय तादृशबाधबुद्धेरपि प्रतिबन्धकत्वसम्भवः । वस्तुतो बाधबुद्धेर्नैव ज्ञाने प्रतिबन्धकत्वमिति प्रागुक्तम् । एतेन प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ तेन यत्पदोपस्थापितस्य प्रतियोगिनो ऽनुयोगिनि आधाराधेयभावसम्बन्धेनैवान्वयबोधस्तत्र तत्संसर्गाभावस्यापि तथा, यथा पचति चैत्र इत्यादौ तिङर्थकृत्यादेः प्रथमान्तपदोपस्थाप्ये एव तत्र तथेति, तत्रैतदभावस्यापि तथेति उक्तसिद्धान्तं जीर्णशाब्दिकमतत्वेनानूद्य तत्र सर्वत्राभावबोधस्यानुभविकत्वादिति च नैयायिकोक्तमपास्तम् । तदाह *इतिदिगिति ॥ ३७॥

यत्तु-"नानुयाजेषु" इत्यादौ पर्युदास एव, न प्रसज्यप्रतिषेधः, शास्त्रीयविहितप्रतिषिद्धत्वाद्विकल्पापत्तेर्वाक्यभेदापत्तेश्च । तथाहि क्रियायाः कारकाकाङ्क्षत्वेन विनिगमनाविरहात्सकलकारकविशिष्टां भावनां प्रतियोगिभूतामुद्दिश्याभावस्य विधिस्तत्र वाच्यः । एवञ्चोद्देश्यस्य प्रतियोगिनः प्रसिद्ध्यर्थं प्राप्तिसापेक्षता प्रतिषेधस्य । प्राप्तिश्च क्वचिद्रागतः, यथा "न कलञ्जं भक्षयेद्" इति । तत्राहि रागेण कलञ्जभक्षणादेरिष्टसाधनत्वावगत्या प्रसक्तायाः कलञ्जभक्षणभावनाया निषेधशास्त्रेण निवृत्तिविषयत्वे ऽवगते ऽर्थात्तद्विषयकलञ्जभक्षणादेरनिष्टसाधनत्वाक्षेपान्नित्यं ततो निवृत्तिः । प्रकृते च येयजामहेशास्त्रत एव सा । साच प्रमारूपेति उपजीव्या चेति तस्या अत्यन्तबाधायोगात् विकल्प एव प्राप्नोति । विकल्पे च प्रथमं व्रीह्यनुष्ठाने यवशास्त्रस्याप्रामाण्यस्वीकारात्मा प्रतीतप्रामाण्यपरित्यागः, वेदे विपर्यासरूपा-

प्रमितिजनकत्वासम्भवात्। ततः प्रयोगान्तरे यवोपादाने यवशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्मकं परित्यक्तप्रामाण्योपादानम्, व्रीहिशास्त्रे स्वीकृतप्रामाण्यपरित्यागरूपो ऽप्रतीताप्रामाण्यस्वीकारः, 'पुनस्तृतीयप्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्मा त्यक्तप्रामाण्यस्वीकार इति चत्वारो दोषाः । यथाकथञ्चिद्वेदारोपेणाष्टौ वा दोषा इति ।

तन्न । निषेधशास्त्रानालोचने सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिद्ध्याऽभावबोधसम्भवेन विकल्पाप्राप्तेः ।

ननु निषेधशास्त्रस्यैव प्रथममालोचने विशेषदर्शनसत्त्वेन सामान्यशास्त्रतो भ्रमानुपपत्त्या तादृशप्रतियोगिनो ऽप्रसिद्धौ तदुद्देश्यकप्रमाऽनुपपत्तिरिति चेन्न ।

निषेधशास्त्रस्य प्रथममालोचनं नाम तद्वाक्यज्ञानमुत तदर्थज्ञानम् ? । नाद्यः । तावन्मात्रेण विशेषदर्शनासम्भवात् । नान्त्यः । प्रतियोग्यप्रसिद्ध्या तदसम्भवात् । किञ्च निषेधस्य प्रथममालोचने बाधबुद्धेः सत्त्वेन विधिवाक्यतः प्रमा दुरुपपादेति विकल्पापत्त्युक्त्यसम्भवः ।

यद्वा तादृशे विषये आहार्यभ्रमात्मिका प्रतियोगिप्रसिद्धिरस्तु। एवमेव हि "नान्तरिक्षे जुहोति" 'ह्रदे वह्निर्नास्ति' इत्यादौ प्रतियोगिप्रसिद्धिः सर्वैरुपपाद्या। प्रतियोगिज्ञानस्याभावधीहेतुत्वेऽपि तत्कारणतावच्छेदककोटावनाहार्यत्वनिवेशे मानाभावात् । ससं-

वन्धिकपदार्थज्ञाने संबन्धितावच्छेदकप्रकारकज्ञानकारणतैव विशेषणतावच्छेदकप्रकारकज्ञानकारणतैव वा प्रतियोगिज्ञानकारणतेति पक्षेऽप्याहार्यानाहार्यसाधारणज्ञानत्वेनैव हेतुना । आहार्यतज्ज्ञानादाहार्य एव स इत्यनेनैवातिप्रसङ्गभङ्गात् । आहार्यः शाब्दबोधो नेति त्वश्रद्धेयमेव । ह्रदवृत्तित्वाभावबोधो वन्हाविन्त्यादि त्वधिकरणकारकस्य कर्तृकर्मद्वारा क्रियान्वयनियमादयुक्तम् । प्रसक्तं निषिध्यते इत्यस्य प्रसञ्जनार्हमित्यर्थः । यदि निषेधो न स्यात् स्यादेव सामान्येन प्रसक्तिरिति बोध्यम् ।

किञ्च विध्युपमर्दकत्वेन उपजीव्यादपि तस्मान्निषेधो बलवान् । एतदेवाभिप्रेत्य "निषेधाश्च बलीयांसः" इति भाष्यकृतः ।

किञ्च उपजीव्यविरोधो विकल्पवादिनोऽपि । तथाहि-यागत्वावच्छेदेन येयजामहकर्मकभावनारूपवाक्यार्थो निषेधस्योपजीव्यः, तस्य च यत्रानुयाजे तदकरणं तदंशे विरोधः, अवच्छेदकावच्छेदेन प्रतीतेरप्रामाण्यं च । अनुयाजवाक्ये तु एकवाक्यतालाभेन पर्युदास इति तत्त्वम् ।

अतएव "द्वन्द्वे च" "विभाषा जसि" इत्यादीनां चारितार्थ्यम् । अत एव "सुडनपुंसकस्य" इत्यादौ भाष्ये पर्युदासप्रसज्यप्रतिषेधयोः फलाविशेष उक्तः संगच्छते ॥ ३८ ॥

(कुं० टी०) *शास्त्रीयेति । विधानप्रतिषेधयोः शास्त्री-

यत्वादित्यर्थः । *वाक्यभेदेति । नञः क्रियायामन्वयात् । *सकलेति । सकलकारकविशिष्टक्रियाया एव निषेधादित्यर्थः । *नकलञ्जमिति । नञर्थस्य धात्वर्थेऽन्वयासम्भवाद् भक्षणप्रवर्तनायां नञर्थो ऽन्वेतीति मीमांसकाः । 'ओ३श्रावय' इति अध्वर्युणोक्ते 'अस्तु श्रौ३षड्' इति आग्नीध्रः, 'यज' इति पुनरध्वर्युः । 'ये३यजामहे इत्यादि' होता । "वषट्कार मा मा आयुः प्रमोषीः" इत्यादि च यजमानः, इति येयजामहः । *सा-प्राप्तिः । *प्रमारूपेति । शास्त्रविहितत्वात् । *उपजीव्येति । अभावज्ञाने प्रतियोगिज्ञानस्य हेतुत्वात् । *बाधायोगादिति–शास्त्राप्रामाण्यप्रसङ्गात् । *विकल्पेचेति । चत्वारो दोषा इत्यत्रान्वयः । *विपर्यासेति । वेदे भ्रमजनकत्वरूपाप्रामाण्यासम्भवात् प्रामाण्यस्वीकार एवेत्यर्थः । *यथा कथञ्चिदिति । प्रामाण्यपरित्यागो ऽप्रामाण्यस्वीकार इति दोषद्वयं मीमांसकाः व्यवहरन्ति–तन्मतेऽष्टौ इत्यर्थः । *अभावबोधेति । भ्रमप्राप्तस्यैव निषेध इति भावः । *विशेषेति । करचरणादिविशेषदर्शने स्थाणुर्वा पुरुषो वेति सन्देहाभाववत् । *एवमेव–भ्रमात्मिकैव । *अन्तरिक्षे–अनावृते । *प्रतियोगिज्ञानस्येति । अयं भावः–प्रतियोग्यविषयकाभावप्रत्यक्षस्यानुदयादभावलौकिकप्रत्यक्षे प्रतियोगिज्ञानस्य हेतुता कल्प्यते । नच प्रतियोग्यविषयकाभावप्रत्यक्षस्याभावेनापाद्याभावादेव सिद्धौ किं हेतुत्वकल्पनेनेति वाच्यम् । इन्द्रियसम्बद्धविशेषणताबलादेव अभावप्रत्यक्षस्यैव प्रतियोगिशून्यकालेऽप्यापत्त्यैव फलतः तत्पर्यवसानादिति । अपिशब्देनास्वरसः, तद्बीजं तु पूर्वोक्तहेतुत्वे मानाभावः । प्रतियोगिज्ञानाभावे आपादकाभावेनैवापत्त्यभावात् । नहि केवलसंनिकर्ष एवापादकः इतरकारणस्यापि सहकारित्वादिति ।

यत्तु प्रतियोगिज्ञानस्याहेतुत्वे घटत्वादिनिर्विकल्पकानन्तरं 'विशेष्ये विशेषणम्' इति न्यायेन घटो नास्तीति प्रतीत्यापत्तिरिति । तन्न ।

विशिष्टवैशिष्ट्यबोधात्मकस्यैवाभावप्रत्यक्षस्य स्वीकारात् ।

एतेन प्रतियोग्यमिश्रितनेत्याकारकप्रत्ययापत्तिरित्यपास्तम् । विशेषणतावच्छेदकप्रकारकनिर्णयहेतुतयैव गतार्थत्वात् । तदाह *विशेषणतावच्छेदकेति । अत एव पीतः शङ्खोऽत्र नास्ति किन्तु द्वीपान्तरे इति प्रतारकेण वाक्यं प्रयुज्यते । *आहार्यतज्ज्ञानादिति । प्रतियोगिज्ञानस्याहार्यत्वात्प्रतियोग्यप्याहार्य एवेत्यर्थः । *नातिप्रसङ्गः—न विकल्पप्रसङ्गः । ननु नौकायां प्रसिद्धस्य ह्रदवृत्तित्वस्याभावो वन्हाविति न प्रतियोग्यप्रसिद्धिरत आह *वह्नावित्यादीति । अयुक्तमित्यत्रान्वयः । अत्रैव हेतुमाह *अधिकरणेति । *यागत्वावच्छेदेनेति । यागत्वसमानाधिकरणाभावाप्रतियोगित्वं च तदर्थः । *प्रतीतेरिति । अवच्छेदकावच्छेदेन या प्रतीतिस्तस्या अप्रामाण्यमित्यर्थः । किमर्थं तदीयानुयाजवाक्ये पर्युदासः स्वीक्रियते इत्यत आह *अनुयाजवाक्येत्विति । *एकवाक्यतेति । वाक्यभेदवारणायैव प्रसज्यप्रतिषेधत्याग इति भावः । *चारितार्थ्यमिति । अन्यथा "द्वन्द्वे च" इत्यनेनैव विकल्पलाभे "विभाषा जसि" इत्यस्य वैयर्थ्यापत्तिरित्यर्थः । *अतएव—प्रसज्यप्रतिषेधे ऽपि विधेरकल्पनादेव । *फलाविशेषइति । तत्र हि "अनपुंसकस्येति निषेधाद्वनानि इत्यादौ सर्वनामस्थानसंज्ञा न प्राप्नोति" इत्याशङ्क्य "सुडिति प्राप्तिरेव प्रतिषिध्यते" इत्युक्तम् । तेन तत्र प्रतिषेधपर्युदासयोः फलसाम्यमिति भावः ॥ ३८ ॥

(क० टी०) सिंहावलोकन न्यायेन उक्तविषये बाधलक्षणे

मीमांसकोक्तं खण्डयति *यत्त्वित्यादि । *नानुयाजेष्विति । "नानुयाजेषु येयजामहं करोति" इति आपस्तम्बसूत्राद्युक्ते इत्यर्थः । तत्राद्यदोषमुपपादयति *तथाहीत्यादि । तस्या एवाभावप्रतियोगित्वादाह *प्रतियोगीति । *तत्र-अनुयाजेषु । *एवञ्च-तस्या उद्देश्यत्वेच । *रागेणेति । कदाचित् वैद्योपदिष्टतद्भक्षणेन रोगनिवृत्तेरनुभूतत्वात्क्षुन्निवृत्त्यर्थत्वाच्चेति भावः । क्वचिदितिसूचितासार्वत्रिकत्वलब्धमाह *प्रकृते चेति । यत्तु अनुयाजविषये "यजतिषु यजामहं करोति" इति ततः पूर्ववाक्येन प्राप्तिरिति सकलमीमांसकनैयायिकादिग्रन्थकाराः । तन्न । तस्य खपुष्पायमाणत्वात् । नन्वेवं कथं प्राप्तिरिति चेत् । शृणु "ओश्रावयेति चतुरक्षरं अस्तुश्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं येयजामहे इति पञ्चाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशाक्षरः प्रजापतिर्यज्ञमन्वायत्तं वेद" इति अनारभ्याधीतवाक्येन तदुपदेश इति ततस्तत्प्राप्तिरिति । तदेतदभिप्रेत्याह *येयजेति । यद्यपि तेन सर्वप्राप्तिस्तथापि प्रकृतत्वात्तावन्मात्रमुक्तम्, । तद्बोधकोक्तश्रुतिकल्पितशास्त्रत एव सा प्राप्तिरित्यर्थः । ननु निषेधस्य विध्युन्मूलकत्वेन बलवत्त्वमत आह *उपजीव्येति । तथाच तस्या अपि बलवत्त्वमिति भावः । ननु विकल्पे इष्टापत्तिर्ग्रहणाग्रहणवद् अत आह *विकल्पेचेति । दोषान्वयो ऽस्य । ननु कथमनयोरैक्यमाद्यस्यान्यार्थकत्वादत आह *वेदेति । तत्र सर्वत्रोक्तरीत्या प्रमाणशब्दत्वात् । नन्वेवमष्टदोषदुष्टस्स इति मीमांसकादिसिद्धान्तविरोधोऽत आह *यथाकथञ्चिदिति । अयं तेषामाशयः-यद्यपि प्रामाण्यपरित्यागो नाम प्रामाण्याभावस्वीकार एव, अप्रामाण्यस्वीकारो ऽपि स एव, वेदे विपर्यासरूपप्रतीतिजनकत्वस्यासम्भवादिति नानयोर्भेदः, तथापि प्रामाण्याभावस्वीकारे दोषत्वबीजं द्विविधम्, प्रामाण्ये प्रमाणस्य निर्दोषत्वादेः सद्भावरूपमेकम्, प्रामाण्याभावे प्रमाणस्य प्रामाण्यानुपलम्भस्याभावरूपमपरम् । एवं च भावप्रमाणसद्भावोपाधिक आद्यः, अभावप्रमाणाभावोपाधिको द्वितीय इति द्वैविध्यविवक्षेति । वस्तुत एतावता भिन्नदोषत्वाङ्गीकारो न युक्त इति दोषचतुष्टयमेव सारम् । सर्वथाऽपि विकल्पो दुष्ट एवेति यथाकथञ्चिदित्यनेन सूचितामिति बोध्यम् । *आलोचने-

सति । प्रथममित्यादिः । मात्रपदमवधारणार्थकम् । तेन भिन्नदेशस्थत्वेन तदा तदालोचननिरासः । बाधकसम्भावनया सर्वांशे प्रमात्वासम्भवादाह *भ्रमेति । *बोधेति । प्रमेत्यर्थः । अतएवाग्रे प्रमेत्यादि वक्ष्यति । तस्याः भ्रमत्वादेवाह *विकल्पेति । तच्छरीरे प्रामाण्यांनिवेशादिति भावः । तदाशयं प्रकाशयन्नुक्तदोषं खण्डयति *नन्विति । प्रत्यक्षत्वाह *निषेधेति । उक्ताशयेनैवाह *शास्त्रस्यैवेति । *तादृशेति । भ्रमात्मकेत्यर्थः । *प्रमेति । तदभावेत्यादिः । *चेन्नेति । तस्यैवासम्भवादिति शेषः । तमेवाह *निषेधेति । तदभ्युपगमे मूले एव कुठारमाह *किञ्चेति । उक्त एवाशयः । *विकल्पेति । तस्या एवासम्भव इत्यर्थः । ननु परैरप्रसिद्धप्रतियोगिकाया अत्यभावबुद्धेः स्वीकारस्य वक्ष्यमाणत्वात्तन्मते प्राक्निषेधज्ञानसम्भवेन नन्वित्युक्तदोष एवातस्तन्मतेनैवाह *यद्वेति । *तादृशे इति । निषेधशास्त्रस्य प्रथमालोचनविषये इत्यर्थः । इच्छायास्तत्रोत्तेजकत्वादाह *आहार्येति । इदमन्यत्रावश्यकमित्याह *एवमेवेति । एतेन खण्डशः प्रसिद्धिरित्यपास्तम् । प्रतियोगिप्रसिद्धिर्हि यस्य प्रतियोगितापर्याप्त्यधिकरणप्रसिद्धिरित्यर्थात् त्वन्मते ऽपि तत्र तद्वृत्तित्वाप्रसिद्धेः, अन्यथा ऽतिप्रसङ्गापत्तेश्च । सिद्धान्त्यन्यसर्वसंग्रहायाह *सर्वैरिति । नन्वनाहार्यप्रतियोगिज्ञानस्यैव तत्कारणत्वात्कथं तावता ऽपीष्टसिद्धिरत आह *प्रतियोगीति । ननु नायं पृथक् कार्यकारणभावः इतो व्यापकसामान्यकार्यकारणभावेनैव निर्वाहात् तत्र चातिप्रसङ्गभङ्गाय तथा निविष्टमत आह *ससम्बन्धिकेति । ततोऽपि सामान्यं व्यापकमाह *विशेषणमिति । नन्वेवमाहार्यज्ञानादनाहार्यज्ञानापत्तिरप्यत आह *आहार्येति । *आहार्येति । बाधकालिकेच्छाजन्यज्ञानविषय एव । *सः–प्रतियोगी । एवञ्च तथा कार्यकारणाभावेन न विशिष्टबुद्धिरित्यर्थः । तथैव कारणसामग्रीसत्त्वात् । नन्वेतावता प्रत्यक्षे निर्वाहे ऽपि न

---

(१) यथेति । तथाच प्रमारूपत्वरूपोक्तबलवत्ताबीजाभावेन तस्य ततो बलवत्त्वे प्रमेत्यर्थो मानस इति भावः । पाठोऽयं १ पुस्तके ।

(२) विशेषं वक्तुमभ्युपेत्यैव सम्भावितमन्यत्र दृष्टं पक्षान्तरमाहेति पाठः २ पु० ।

शाब्दे, तत्र तस्याभावाद्, एवं च तत्रानतिप्रसङ्गाय तत्र तन्निवेशावश्यकत्वे उक्तदोष एवात आह *आहार्येति । निर्युक्तिकत्वादिति भावः । एवमेवेत्येवव्यवच्छेद्यं परोक्तमाह *हृदेति । इत्यादि प्रकारान्तरं त्वित्यर्थः । नन्वेवं प्रसक्तं निषिध्यते इति नैयायिकाद्युक्तेरसाङ्गत्यं स्यादत आह *प्रसक्तमिति । अर्हतामेवाह *यदीति । तन्मते दोषान्तरमाह *किञ्चेति । *तस्माद्विधेः । *एतदेवेति । तत्त्वेन ततोऽपि ते बलीयांस इति तदर्थः । अत्यन्तबाधे उपजीव्यविरोधापत्तिर्विकल्पसाधकतयोक्ता बाधकत्वे पर्यवस्यतीति तन्नैव बलवत्त्वबीजमित्याह *किञ्चेति । *यत्र–यस्मिन् । दोषान्तरमाह* अवच्छेदकेति । नन्वेवं तद्व्यधिकरणस्य का गतिरत आह *अनुयाजेति । द्वितीयहेतोर्युक्तत्वात् । समासस्तु वैकल्पिकत्वान्नेत्युक्तमेव *अतएव—उक्तरीत्या सामान्यविशेषस्थले विकल्पाभावादेव । अन्यथा विधिनिषेधाभ्यां विकल्पापत्त्या जसि तत्रेष्टसिद्ध्या "विभाषा जसि" इति व्यर्थम् । ननु तत् नियमार्थम्, उत्तरार्थत्वे ऽपि सामान्यभिन्नसूत्रस्य तत्त्वसम्भवात् । अन्यतरपदं विना ऽन्यतरपदस्य तु न तत्त्वम्, अक्षरमर्यादया ऽप्रतीतेरत आह *आदीति । तेन प्रथमेत्यादिसूत्रचतुष्टयसंग्रहः । यद्यपि पूर्वेत्यादिसूत्रत्रयस्य तयनेमयोश्च प्राग्वन्नियामकत्वं सम्भवति प्रथमादौ त्वप्राप्तविभाषैव, तथापि तेषां लाघवेन तदभावज्ञापकतयैव सार्थक्यमुचितमिति तात्पर्यम् । *अतएव–पर्युदासवत्तत्र विकल्पानवसरादेव । अन्यथा तदसङ्गतिः स्पष्टैव ॥ ६८ ॥

एतदेव सकलमभिप्रेत्योक्तं "नवा"–इतिसूत्रे भाष्ये नवेत्यखण्डनिपातार्थस्य विभाषासंज्ञित्वे यद्यप्यप्राप्तविभाषाविषये निषेधकल्पितविधेरचारितार्थ्येन विकल्पः सिद्ध्यति तथापि प्राप्तविभाषायां कृतसामर्थ्यो विधिरिति प्रतिषेध एव स्यान्न विकल्प इति । "अपि तु वाक्यशेषत्वादितरपर्य्युदासः स्यात्प्रतिषेधे विकल्पः स्याद्" इति जैमिनिसूत्रे "प्रतिषेधे विकल्पः स्याद्"

इत्यभ्युच्चयः । युक्तिसिद्धपतञ्जलिवाक्यविरोधात् । वाक्यशेषत्वादित्यस्यैकवाक्यत्वलाभादित्यर्थः ।

ननु तत्तच्छास्त्रैः साधुत्वाविकल्पे एकस्यैव शब्दस्य साधुत्वेन धर्मजनकत्वम्, असाधुत्वेन अधर्मजनकतेति विरुद्धमापद्येतेति न तद्विकल्प इति नवेति सूत्रे भाष्ये सिद्धान्तितम् । एवं च "अतिरात्रे षोडशिनं गृह्णाति" इति ग्रहणवाक्येन तस्य धर्मजनकता बोध्यते, "नातिरात्रे षोडशिनं गृह्णाति" इत्यनेन निषेधेन तस्याधर्मजनकतेति विरुद्धस्वीकारः कथमिति चेद् ।

सत्यम् । उभयत्र संकल्पलक्षणया संकल्पद्वयस्यापि धर्मत्वबोधनात् । तयोरन्यतरस्य चेच्छयापरिग्रहः । एवं सर्वत्र स्मार्तवैदिकविकल्पस्थले बोध्यम् ।

अत एव वैकल्पिकेष्वादितोऽवधारणमित्युद्घोष इति ।

तत्र प्रतिषेधे द्वयी गतिः—प्रतिषेधं दृष्ट्वा पश्चादुत्सर्गस्य तद्विषयत्वाभावज्ञाने प्रामाण्यग्रह इत्येका, एवमुत्सर्गापवादस्थलेऽपि । तदुक्तं हरिणा—

ब्राह्मणानां श्रुतिर्दध्नि प्रक्रान्ता माठरं विना ।
माठरस्तक्रसम्बन्धात्तत्राचष्टे यथार्थताम् ॥ इति ।

'दधि ब्राह्मणेभ्यः' इत्यादौ माठरवर्जमेव दधिदानमुपक्रान्तम् उत्तरकालं 'तक्रं माठराय' इत्येतत् तस्य यथार्थत्वं गमयतीति भिन्नवाक्यतायामप्राप्त्यनुमानं बाध इति पुञ्जराजः ।

उत्सर्गापवादनियमनिषेधानामेकवाक्यतेत्यपरा। तदुक्तम्—

अनेकाख्यातयोगे ऽपि वाक्यं न्याय्यापवादयोः।
एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम् ॥
नियमः प्रतिषेधश्च विधिशेषस्तथा सति। इति।

न्याय्यः, उत्सर्गः। आपाततो भिन्नवाक्यत्वावभासे ऽपि सर्वस्याप्युत्सर्गस्य विशेषविधिनियमनिषेधविध्याकाङ्क्षानियमेन तल्लाभे वाक्यैकवाक्यता तयोः। तदलाभे तु स्वार्थे एव पर्यवसानम्।

एकवाक्यता चेत्थम्-यतो माठराय तक्रमतस्तदतिरिक्तेभ्यो दधीत्येवेत्यलम् ॥ ६९ ॥

(कुं०टी०) *अखण्डेति। निषेधार्थस्य नञेत्यखण्डनिपातस्य ग्रहणे इत्यर्थः। *विकल्पः सिद्ध्यतीति। निषेधबलेन विधेरपि कल्पनाद्विकल्पः सिद्ध्यतीत्यर्थः। *कृतसामर्थ्य इति। क्लृप्तशास्त्रेणैव विधिः कृतसामर्थ्यो विहितशक्तिकः प्रतिषेधविषयातिरिक्ते इत्यर्थः। *न विकल्पइति। तत्र विधिकल्पनाभावान्निषेधमात्रप्रत्ययः स्यादिति भावः।

*साधुत्वविकल्पे इति। शब्दानां नित्यत्वाद् व्याकरणेन साधुत्वमेव बोध्यते, ततश्च विकल्पोऽपि साधुत्वस्यैव स्यात्। तस्मात्कार्यशब्दवाद एवाश्रयणीय इति भावः। *षोडशी—ग्रहविशेषः। गृह्यते सोमादेरसोऽनेनेति ग्रहः। अतिरात्रो यागविशेषः। *आदितोऽवधारणमिति। वैकल्पिकपदार्थानां मध्ये यो जिघृक्षितस्तस्य कर्मादौ निश्चयः कर्त्तव्य इत्यर्थः।

वैकल्पिकेषु सर्वेषु स्वयमेकैकमादितः ।
अङ्गीकरोति यं कर्त्ता स विधिस्तस्य नेतरः ॥ इति-

स्मृतेः । माठरवर्जमेव दधिदानमुपक्रान्तमिति यदुक्तं तत्र हेतुः *तस्य यथार्थत्वं गमयतीति । उक्तविषयपरिहारेणैवार्थवत्तां गमयतीत्यर्थः । *तस्य—पूर्वोक्तार्थस्य । यथा "तुल्यास्यप्रयत्नम्" "नाज्झलौ" इत्यनेन इत्यादिरीत्या उत्सर्गस्यापवादादिभिः सहैकवाक्यतेत्यर्थः । *तदुक्तमिति । अनेकाख्यातयोगेऽपि क्रियाभेदे ऽपि उत्सर्गापवादयोस्तत्कालं भिन्नवाक्यत्वप्रतीतावपि एकवाक्यत्वमित्यर्थः । *नियम इति । तथा सति "इकोगुणवृद्धी" इति नियमः "सार्वधातुकार्धधातुकयोः"इति विधेरेव शेषः, "अलुगुत्तरपदे" इति निषेधश्च "सुपो धातुप्रातिपदिकयोः"इतिविधेरेव शेषः । अन्यथा "भुक्तवन्तम्" इति न्यायविरोधात् । *विशेषविधिः—अपवादः । अत्र त्रयाणां द्वन्द्वः । *तल्लाभे—विशेषविध्यादिलाभे । *तयोः—उत्सर्गापवादादिवाक्ययोः । *तदलाभे—विशेषविध्याद्यलाभे ॥ ६९ ॥

(क० टी०) अत्र भाष्यान्तरसंमतिमप्याह *एतदेवेति । "तन्निषेध" इत्याद्युक्तं सर्वमित्यर्थः । *सञ्ज्ञित्वे—अस्थिततत्पक्षे । *विधेः समानविषयस्य । *विभाषायाम्—तद्विषये । *कृतेति । क्षीणेत्यर्थः । एवं सति जैमिनिविरोधं परिहरति *अपित्विति । *अभ्युच्चय इति । आर्षत्वाविशेषेऽपि निर्युक्तिकत्वेनोक्तरीत्याऽयुक्तमित्यर्थः । तदाह *युक्तिसिद्धेति । अत एव तत् पश्चादुपात्तम्, मुख्यं तत्त्वसाधकं वाक्यत्वसम्पादनमेव, अतएव तत् प्रागुपात्तं तदाह *वाक्येति । तस्मात्सामान्यविशेषस्थले विकल्पाभावे ऽपि तुल्यविषयस्थले दुष्टस्याप्यगत्या तत्स्वीकार इति न तदुच्छेदः । अत एव "तुल्यार्थास्तु विकल्पेरन्" इति जैमिनिना सूत्रितम् । तत्र नवातिसूत्रभाष्यप्रसङ्गादन्य-

था आह *नन्विति । *तत्तदिति । विकल्पविधायकैरित्यर्थः । शास्त्रं साधुत्वविधायकं साक्षादिति पक्षे इति भावः । *एवं च-समानविषये विरुद्धापत्त्या तत्त्यागे च । समानविषयमेवाह *अतीति । *षोडशिनमिति । तैत्तिरीयश्रुतौ मन्त्रादौ तथा स्पष्टत्वात् । एवं च षोडशीं गृह्णातीति पाठः केषाञ्चिद् ग्रन्थेषूपलभ्यमानश्चिन्त्य एवेति बोध्यम् । *वाक्येनेति । विधिवाक्येनेत्यर्थः । *तस्य-षोडशिग्रहणस्य । यत्तु तत्र षोडशिग्रहणं नेष्टसाधनमिति नार्थः ग्रहणविधिविरोधात्, किन्तु षोडशिग्रहणाभाव इष्टसाधनमिति । व्युत्पन्नश्च नञ्समभिव्याहृतधात्वर्थस्याभावे विभक्त्यर्थान्वय इति नैयायिकादयः । तन्न । प्रत्ययानामिति न्यायविरोधापत्तेर्दोषान्तरस्य विधिवादे वक्ष्यमाणत्वाच्च । तदेतत् ध्वनयन्नाह *उभयत्रापीति । तत्रानुष्ठानव्यवस्थामाह तयोरिति । सर्वादाविति भावः । व्रीह्यादावपि परिग्रहस्तथैवेत्याह *एवमिति । अल्पाच्तरत्वेन स्मार्तस्य पूर्वनिपातः । *अत एव-तत्रैष्वन्यनियामकत्वाभावादेव । *आदितः—ऐच्छिकप्रथमारम्भात् । स्पष्टञ्चेदं त्रिकाण्डमण्डने । तत्र ह्युक्तम्—

> द्रव्यं वैकल्पिकं किञ्चिद्यत्र सङ्कल्पितं भवेत् ।
> तदभावे सदृग्ग्राह्यं नतु वैकल्पिकान्तरम् ॥

एवञ्च कातीयानां तथा अनुष्ठानं चिन्त्यमिति बोध्यम् । *इतिः—उक्तसमाप्तौ । प्रसङ्गादाह *तत्रेति । भिन्नविषयस्थले इत्यर्थः । *प्रतिषेधे-तद्विषये । पश्चादित्यस्य ग्रहे ऽन्वयः । उत्सर्गस्येत्यस्याभावे ऽन्वयः । ज्ञाने पूर्वं जाते प्रामाण्येति पाठः । अप्रामाण्येत्यपपाठः । तुल्यन्यायादाह *एवमिति । *श्रुतिः-संप्रदानत्वेन । *दध्नि-विषये । नन्वेवमुत्तरवाक्यवैयर्थ्यमत आह *माठर इति । इत्यादौ । तद्विषयवर्जमिति णमुलन्तम् । *कालमिति-क्रियाविशेषणम् । उक्तहेतोरेवाह *अपवादेति । *निषेधानामिति । मिथ इति शेषः । *तदुक्तमिति । तदप्युक्तं तेनैवेत्यर्थः । भिन्नरूपमिवेत्यस्यार्थमाह *आपातत इति । *तल्लाभे-सति । अत एवाह *तदेति । अनेकेत्यनेन तल्लक्षणानाक्रान्तत्वात्पदैकवाक्यत्वाभावप्रतिपादनाद्वाक्यैकवाक्यताऽत्रेष्टेत्याह *एकेति । एवं यतः अञ्जलोर्न सावर्ण्यमतस्तदन्येषामेव

तद्, यतः स्वादिविधावेव नलोपो ऽसिद्धो ऽतो ऽन्यत्र नासिद्धत्वमिति बोध्यम् । एतेन यत्तु तत्र करणनिषेधे विकल्पापत्तेर्भेदपरतेति । तदसत् । विशेषनिषेधे सामान्यविधेस्तदन्यपरताया ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय न दातव्यमित्यादौ व्युत्पत्तिसिद्धत्वेन विकल्पानवकाशात् । नच तत्रापि कौण्डिन्यभेदो बोध्य इति तद्भिन्नेभ्य इत्यर्थः। कौण्डिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात् । नहि खलु महतो राज्ञो न महतो राज्ञ इत्यत्रेव महतां राज्ञो न महतां राज्ञ इत्यत्र राजनि महदभेदभेदौ प्रतीयेते । एको न द्वावित्यादिवत्कथंचित्समर्थनेऽपि द्वितीयस्य दातव्यमित्यस्यानन्वयप्रसङ्गादिति नैयायिकोक्तमपास्तम् । द्वितीयतद्घटितप्रयोगस्य ऋष्यनुभवविरुद्धत्वाद् । अत एव भाष्ये "ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय" इत्येवोक्तम् । तदाह *इतीत्यलमिति ॥ ६९ ॥

नचात्यन्ताभावार्थकनञः क्रियाऽभावबोधकत्वेन क्रोधो नच मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

इत्यादावनेकनञां वैयर्थ्यमनन्वयश्चेति वाच्यम् । प्रत्येकं तद्भवनाभावस्य समुदितानां च भवनाभावस्य बोधनायानेकनञां भवन्तीति बहुवचनस्य च सत्त्वात । तत्र प्रत्येकं भवतीत्यध्याहारः । भवन्तीत्यत्र चैतेनेत्यस्यानुकर्षः ।

एतेन—

न तं विरिञ्चिर्न भवो न लक्ष्मीर्न धनाधिपः ।
दातुमर्हन्ति विभवं विष्णोराराधने न यः ॥

इत्यपि व्याख्यातम् । समुदितानां बलवत्त्वेऽपि दानयोग्यत्वाभावप्रतिपादनाय च बहुवचनं समुदितानां वैमत्येनादातृत्वे ऽपि प्रत्येकं दातृत्वाभावबोधफलकं नञनेकत्वमित्यदोषात ।

'मैत्रस्येदं न चैत्रस्य' इत्यादौ आरोपितचैत्रस्वामिकत्ववदिदं मैत्रसम्बन्धीति बोधः ।

यत्त्वत्र स्वत्ववान् षष्ठ्यर्थः, चैत्रस्वत्ववद्भिन्नमिति बोध इति । तन्न । यन्निरूपिते यन्निष्ठे ऽर्थे वा या विभक्तिस्तदर्थस्य तेनैव तत्रैवान्वयौचित्येन विभक्त्यर्थस्य प्रतियोगितया नञर्थे ऽनन्वयात् । अन्यथा एकत्वाभाववन्तौ पाककर्त्तारौ चैत्रौ इत्यर्थे न पचति चैत्रौ इत्यस्याप्यापत्तिः, एको न द्वाविति वत् ।

किञ्च चैत्रस्येत्यादेः संबन्ध्यन्तराकाङ्क्षाया विशेषाकाङ्क्षाया वा नियमतः सत्त्वेन तत्सम्बन्धं विना नञर्थस्य प्रतियोग्याकाङ्क्षया तत्सम्बन्धो वक्तुमशक्यः, स्वाकाङ्क्षानिवृत्त्युत्तरमेवान्याकाङ्क्षापूरणस्यौचित्यात् ।

एवं च कृतिर्व्यापारसामान्यं वा तिङर्थ इति चिन्त्यमेव । न पचतीत्यादितस्तदभावबोधानापत्तेः । प्रथमान्तार्थनिष्ठस्य नियमतस्तदाकाङ्क्षस्य च कृत्यादेरेव तव प्रत्ययार्थत्वात् ।

अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं चाभावे व्युत्पत्तिबललभ्यम् । नीलघटवति 'अत्र घटो नास्ति' इत्यव्यवहारात् 'पीतघटो नास्ति' इति व्यवहाराच्च । ध्वनितं चेदं "विरामो ऽवसानम्" इत्यत्र भाष्ये । अत एव वायौ रूपं नास्तीति प्रतीत्या सामान्याभावसिद्धिः । विशेषाभावकूटस्य ततो बोधासंभवात् ।

अन्वयितावच्छेदकशब्देन नञर्थान्वयिविशेषणमुच्यते । यथा–पीतघट इत्यत्र पीतरूपम् । प्रतियोगितावच्छेदकं च तत्रापि घटत्वमेव । विशिष्ट-

बोधे विशेष्यवृत्तिधर्मस्यैव प्रतियोगितावच्छेदकत्वात् । तदवच्छिन्ना प्रतियोगिता च पीतत्वाद्यादिविशेषणबलात् पीतघटव्यक्तिनिष्ठैव । विशिष्टं च प्रधानान्नात्यन्तमतिरिक्तम् । सर्वथाऽतिरिक्तत्वे तु वैशेषिकाणां पदार्थविभागन्यूनतापत्तिः ।

अत एवाभियुक्तैः'अन्वयितावच्छेदक'-इत्युक्तं नतु प्रतियोगितावच्छेदकेति । यथा घटपटादीनां घटत्वादिना शक्तावपि प्रकरणादिना कासांचिदेव व्यक्तीनां बोधः, तथा प्रकृते विशेषणबलात्। एवमाधारतावच्छेदकावच्छेदेनाभावान्वयः । घटे पीतघटत्वाभाव इत्यव्यवहारात् । एवं नीलघटो न घट इत्यपि न। आरोपितघटत्वस्य तत्राभावात् । अज्ञानशब्दे अधर्मशब्दे इव विरोध्यर्थको नञ्, तेन भावपदार्थ एव स सविषय इत्यन्यत्र विस्तरः ।

अभावपदे च विरोध्यर्थक एव सः। भावविरोधीत्यर्थः । एवं चाभावस्य भावप्रतियोगिकत्वमेव । अभावाभाव इत्यादिर्व्यवहारो वर्बराणामप्रामाणिक एव । घटाभावो नास्तीत्यादौ तत्कर्तृकसत्ताया मेवाभावप्रतियोगित्वम् । एवमेव नासहस्रदस्तत्रास्ते इत्यादावपि बोध्यम् ।

'येन नाप्राप्ते' 'नाविष्णुः पृथिवीपतिः' इत्यादौ नञ्द्वयस्य प्रकृतार्थगतदार्ढ्यद्योतकत्वम् ।

तदुक्तं "विनञ्भ्याम्" इति सूत्रे भाष्ये "द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः, न न सह सहैव" इति ।

यद्वा अविष्णुः पृथिवीपतिर्न भवतीत्यन्वयः ।

मथ्नामि कौरवशतं समरे न कोपादित्यादौ काकुसहकारेण नञा मन्थनादिगतं निश्चितत्वं द्योत्यते । तदेवाभिलष्यते–मथ्नाम्येवेति ।

शशशृङ्गं नास्तीत्यादौ बौद्धप्रतियोगिप्रसिद्धेः सत्त्वान्न दोषः ।

वह्नित्वेन घटो नास्तीत्यादौ अप्रसिद्धप्रतियोगिकाया अभावबुद्धेःसोन्दडादिभिः स्वीकाराच्च॥७०॥

(कुं० टी०) *प्रत्येकमिति । प्रत्येकं क्रोधाद्यभावाय अनेकनञां प्रयोगः, समुदिताभावबोधनाय तु भवन्तीति । *वैमत्येन ऐकमत्याभावेन । *यन्निरूपितेइति । यथा चैत्रस्येदं धनमित्यत्र चैत्रनिरूपिते धननिष्ठे स्वत्वसम्बन्धे षष्ठी । *तदर्थस्य-ताद्विभक्त्यर्थस्य । *विभक्त्यर्थस्य-स्वत्ववतः । *नञर्थे-भेदे । *अनन्वयात्—अन्वयासम्भवात् । *अन्यथेति । पचतिपदोपात्तकर्त्राभावबोधसम्भवात् । *सम्बन्धान्तरेति । धनादीत्यर्थः । *विशेषः–सम्बन्धविशेषः । *आकाङ्क्षेति । स्वार्थे परिपूर्णयोरेव चैत्रस्य धनमित्यनयोर्नञर्थसाकाङ्क्षत्वात् । *नञर्थस्येति । प्रतियोग्याकाङ्क्षया नञर्थे षष्ठ्यर्थान्वयोऽसम्भवीत्यर्थः । *तत्सम्बन्धंविनेति । चैत्रधनयोः सम्बन्धमपहायेत्यर्थः । *तत्सम्बन्धः—प्रतियोगिसम्बन्धः स्वत्वादिरूपः । *एवं चेति । यन्निरूपिते यन्निष्ठेऽर्थे विभक्तिरित्यादिनियमसत्त्वे इत्यर्थः । *व्यापारसामान्यमिति । फलं धात्वर्थो व्यापारस्तिङर्थ इति मण्डनमिश्रमतम् । *बोधानापत्तेरिति । चैत्रादिनिष्ठयत्ने तिङ्विधानेन यत्नस्य चैत्रादावन्वयानापत्तेरित्यर्थः । *तदाकाङ्क्षस्य–प्रथमान्तार्थसाका-

ङ्गस्य । ननु नीलघटवर्त्तिपीतघटाभावसत्त्वाद् घटो नास्तीति प्रयोगापत्तिः, घटकर्त्तृकसत्ताऽभावबोधे घटत्वावच्छिन्नप्रतियोगिताकाभावबोधाभावाद् अत आह *अन्वयितावच्छेदकेति । नीलघटाभावस्य प्रतियोगिता नीलघटत्वावच्छिन्ना न शुद्धघटत्वावच्छिन्नेति न नीलघटाभाववति शुद्धघटो नास्तीति प्रत्ययः। यद्यपि घटत्वेन वह्निर्नास्तीति प्रतीतेरप्यनुभवसिद्धतया तत्र घटत्वावच्छिन्नत्वमेव प्रतियोगितायां प्रतीयते तथापि प्रतियोगितावच्छेदकत्वमिवान्वयितावच्छेदकत्वमपि घटत्वे स्वीक्रियते । विशेषाभावकूटमेव सामान्याभाव इति मतं निराकरोति । *अत एवेति । अन्वयितावच्छेदकेत्याद्युक्तव्युत्पत्तेरेव । यत्तु विशेषाभावापेक्षया सामान्याभावो ऽन्यः प्रतियोगितावच्छेदकभेदस्याप्यभावभेदहेतुत्वात् । अन्यथा 'न' इत्यत्यन्ताभावान्योन्याभावप्रागभावानां भेदानापत्तिः, मम तु क्वचित्तादात्म्यम्, क्वचित्संसर्गो ऽवच्छेदक इति । तन्न । सर्वसाधारणस्यावच्छेदकस्य दुर्वचनत्वात् । तादात्म्यस्यावच्छेदकत्वे मानाभावाच्च । तस्मादभाववद् भावभेदो ऽपि विरुद्धधर्माध्यासादेव । ननु पीतघटत्वावच्छिन्नाभावबोधो ऽसम्भवी, तत्रापि घटत्वादेरेव प्रतियोगितावच्छेदकत्वाद् अत आह *नञर्थान्वयीति । यथा नीलघटो नास्तीत्यत्र नञर्थान्वयी घटस्तद्विशेषणं नीलत्वादि, पीतघटत्वं तु नान्वयितावच्छेदकं गुरुत्वात् । अन्वयितावच्छेदकावच्छिन्नाया एव च प्रतियोगिताया ग्रहणान्न पीतघटाभावप्रत्ययः । प्रतियोगितावच्छेदकेत्यपहाय अन्वयितावच्छेदकेति यदुक्तं तत्र बीजमाह *प्रतियोगितावच्छेदकश्चेति । *विशिष्टबोधे इति । नीलघटबोधे घटत्वमेव प्रतियोगितावच्छेदकमित्यर्थः । *प्रधानात्—केवलात् । *का-

सांचिदेवेति । घटमानयेत्युक्ते तात्पर्यविषयीभूतानामेवानयन-दर्शनात् । *तथाप्रकृते इति । घटत्वमात्रस्यैवावच्छेदकत्वेऽपि पीतघटत्वावच्छिन्नैव प्रतियोगिता प्रतीयते इत्यर्थः । *आरोपितघटत्वस्य—नञ आरोपितोत्तरपदार्थबोधकत्वात् । *अज्ञानेति । अधर्मशब्दे इव अज्ञानशब्दे विरोध्यर्थको नञित्यन्वयः । *अप्रामाणिकएवेति । अभावो नाम हि भावविरोधी, तथाचाभावबोध इत्यत आह *सत्ताया एवेति । घटाभावकर्तृकसत्ताऽभाव इति बोधः । यदपि घटाभावाभावो घटस्वरूप इति । तदपि न । घटाभावो नास्तीत्यबाधितप्रतीतेर्भावरूपत्वासम्भवात् । *मथ्नामीति । यावत्कौरवशतं न मथ्नामि तावद्युधिष्ठिरः सन्धिं करोत्विति कुपितभीमसेनवाक्ये मथ्नाम्येवेति प्रतीतिः । *अप्रसिद्धेति । तत्र वह्नित्वावच्छिन्नघटस्यैव प्रतियोगित्वात्, अन्यथा घटवति तादृशाभावप्रत्ययानापत्तेः । *स्वीकाराच्चेति । यद्यपि वह्नित्वेन घटो नास्तीत्यत्र घटस्यैव प्रतियोगित्वं सोन्दडोपाध्यायैः स्वीक्रियते तथाऽपि वह्नित्वस्य तत्राविद्यमानस्याप्यन्वयितावच्छेदकत्वं स्वीक्रियते ऽन्यथाऽन्वयितावच्छेदकेत्यादिन्यायविरोधात् ॥ ७० ॥

(क०टी०) सिद्धान्ते आह *नचेति । चो व्युत्क्रमे । यथासङ्ख्यमन्वयः । यथाश्रुते तदलाभाद् आह *तत्रेति । पूर्वार्द्धे इत्यर्थः । तत्रत्यचबोध्यसमुच्चयलब्धं योग्यमाह *एते इति । इत्यध्याहार इत्यनुषङ्गः । *एतेन—उक्तरीतिसम्भवेन । *नतमिति । वैष्णवमिदम् । य इत्यस्य लभ्यते इति शेषः । इत्यपीत्यपिना—

नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया ।
प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदाद् ॥

इति भागवतसमुच्चयः । पूर्वत्र कवितात्पर्यं सूच-

यन्नत्र कवितात्पर्यमाह *समुदितानामिति । तथा च भगवद्भक्त्याराधनादेर्माहात्म्यातिशयसूचनद्वारा ऽत्यन्तोपादेयतासूचनाय तथोक्तिरिति गूढाकूतम् । भेदस्योदाहरणान्तरमाह *मैत्रस्येदमिति । नैयायिकोक्तिं खण्डयति * यद्वेति । *स्वत्ववानिति । तस्यापि शेषत्वात् । ननु स्वामित्ववान् । तस्य धनाद्यवृत्तित्वेन चैत्रीये ऽपि धने 'नेदं चैत्रस्य' इति प्रसङ्गात् । निरूपकत्वादेः सम्बन्धस्य प्रतियोगितानवच्छेदकत्वादिति भावः । *चैत्रेति । चैत्रसम्बन्धिस्वत्ववद्भिन्नमिदं मैत्रसम्बन्धिस्वत्ववदिति बोध इत्यर्थः । एतेनात्र स्वत्वाभावस्य बोधात्प्रतिषेधार्थकनञः क्रियामात्रान्वयित्वमयुक्तमित्यपास्तम् । विनिगमनाविरहादाह *यन्निष्ठेति । *तदर्थस्य—तद्विभक्त्यर्थस्य । आद्ये आह *तेनैवेति । अन्त्ये आह *तत्रैवेति । प्रत्यासत्तेरिति भावः । *अन्यथा—प्रत्यासत्त्यनङ्गीकारे । *एकत्वेति । सति तात्पर्ये एककृत्यभाववांश्चैत्र इतिवत्तथा बोधसम्भवात् । दोषान्तरमाह *किञ्चेति । सामान्यतस्तस्यापि लाभादाह *विशेषेति । अन्तरङ्गन्यायमूलकमाह *स्वाकाङ्क्षेति । *एवञ्चेति । नैयायिकमतखण्डनम् । तदर्थं सूचयन्नाह *नपचतीति । *तदभावेति । कृत्याद्यभावे इत्यर्थः । *सच—तत्संमतः । आद्यरीत्या आह *प्रथमान्तेति । द्वितीयरीत्या आह *नियमतइति । *प्रत्ययः—तिङ्विभक्तिः । नैयायिकाद्युक्तमपि युक्तिसिद्धत्वात्सिद्धान्तिसंमतत्वेनाह *अन्वयीति । तत्रात्यन्ताभावे आह *नीलेति । तत्संमतिमेवाह *ध्वनितश्चेदमिति । तत्र हि लक्षणयोर्दोषो "भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं न" इति दत्तः । वर्णानामभाव इत्युक्तेर्वर्णत्वावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः; स च न वर्णसत्त्वे इति तदर्थः । *अत एव-तस्य तत्र तल्लभ्यत्वादेव । यद्यपि सिद्धान्ते तत्सत्ताऽभावः शाब्दो न तदभावस्तथाऽप्युक्तरीत्या तस्य आर्थत्वेन रूपसामान्याभावस्यापि सिद्धिरित्यर्थः । अत एव सामान्येनोक्तम् । ननु सामान्यरूपेण विशेषप्रतीतिरिति तदभावकूटस्यैव ततो बोधेन न तत्सिद्धिरत आह *विशेषेति । तथा सत्येकस्यैव बोधो न सर्वेषामिति तदलाभ इति भावः । नन्वेवमपि तत्र पीतघटो ना-

स्तीति व्यवहारो न स्यात् तत्र घटस्यैवान्वयितावच्छेदकत्वेन तदवच्छिन्नाभावप्रतीतेर्बाधितत्वादत आह *अन्वयितेति । प्रत्यासत्तेराह *नञर्थेति । सत्तावत् घटस्यापि आर्थिकनञर्थान्वयित्वादाह *पीतरूपमिति । पीतघट इति तद्वाक्यैकदेशः । प्रतियोगितावच्छेदकेत्युक्ते तु उक्तदोष एवेत्याह *प्रतीति । अपिना केवलसमुच्चयः । नचैवन्तद्वत्तस्यापि विशेष्यमात्रनिष्ठत्वान्न साऽन्वयिताऽवच्छेदकावच्छिन्नेत्युक्तदोष एवेत्यत आह *तद्वच्छिन्नेति । विशेष्यवृत्तिधर्मावच्छिन्नेत्यर्थः । ननु विशेषणसत्त्वेऽपि विशिष्टस्यातिरिक्तत्वात्केवलनिष्ठायाः कथं तन्निष्ठत्वमत आह *विशिष्टंचेति । सर्वथाऽनतिरिक्तत्वे दोषबाहुल्यस्य स्पष्टत्वादाह *सर्वथेति । एवं च विशेषणविशिष्टव्यक्तिनिष्ठत्वात्साऽन्वयिताऽवच्छेदकावच्छिन्ना भवतीति तथोक्तौ नोक्तदोषस्तदाह *अत एवेति । ननु शक्तिग्रहादेः समानविषयत्वात्कथं तावताऽपि व्यक्तिविशेषधीरत आह *यथेति । तथा च गमकासत्त्वविषयकः स नियम इति न दोषः । तद्वत्तदनुक्तं व्युत्पत्त्यन्तरमाह *एवमिति । एवमत्यन्ताभावे उक्त्वाऽन्योन्याभावे आह *एवमिति । अपिना घटो न नीलघट इत्यस्य समुच्चयः । नीलघटो न पीतघट इत्यादि तु भवत्येवेति भावः । प्राचा तस्य तत्रोदाहृतत्वादाह *अधर्मेति । नन्वेवमपि सोऽभावरूप एवास्तु तस्यापि तत्त्वादिति चेन्न । अस्ति कश्चिदेतद्वाक्यार्थ इति सामान्येन जानतो विशेषरूपेण तमजानत एतदुक्तस्यार्थं न जानामीत्यनुभवात् । अभावरूपत्वे हि तत्प्रत्यक्षादावभावज्ञानस्य विशिष्टबुद्धित्वात्तज्ज्ञाने प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्य कारणत्वस्य यथाकथंचिदावश्यकत्वात्प्रतियोगिज्ञानापेक्षा । नहि तत् सम्भाव्यते वाक्यार्थज्ञानत्वस्य तदानीं विद्यमाने सामान्यज्ञाने सत्त्वेन प्रतियोगितानवच्छेदकत्वात् । अभावाधिकरणवृत्तिपदार्थावृत्तिधर्मस्यैव प्रतियोगितावच्छेदकत्वात् । तादृशस्य विशेषज्ञानत्वस्य तु प्राग् विशेषानवगतेर्ज्ञातुमशक्यत्वम् । तस्मादज्ञानम् भावरूपं सविषयम् । नहि सविषयस्य ज्ञाने विषयतावच्छेदकावच्छिन्नविषयज्ञानापेक्षानियमः । जिज्ञासाज्ञाने व्यभिचारात् । अनवगतशास्त्रार्थविशेषज्ञानेच्छायाः शास्त्रार्थं जि-

ज्ञासे इत्यवगतसामान्याकारावच्छेदेन अनुभवात् । अत एवौपनिषदैरज्ञानं तथाऽङ्गीकृतं साक्षिण्यध्यस्तं साक्षिभास्यमिति चोक्तम् । तदाह *इत्यन्यत्रेति । गुरुमञ्जूषादावित्यर्थः । एवेनाभावार्थकत्वव्यच्छेदः । तथा सति आत्माश्रयापत्तिरिति भावः । एवेनाभावप्रतियोगिकत्वव्यवच्छेदः । अत एवाह *अभावेति । नन्वेवं घटाभावो नास्तीत्यादेः का गतिरत आह *घटाभाव इति । नन्वेवमपि येन नाप्राप्ते इत्यादौ का गतिरत आह *येनेति । आदिना "नारुद्रः क्रमपाठकः" इत्यादि । विशेषणत्वायाह *प्रकृतेति । निपातानामनेकार्थत्वात् । एकस्य तु न तथा, तथा प्रयोगाभावात् । तदेतद् ध्वनयन्नाह *तदुक्तमिति । *प्रतिषेधौ-नञौ । नञ्द्वयाभावेनोक्तगतेरसम्भवादभावस्यैवासत्त्वेनैकेनैव नञा तद्बोधनासम्भवाच्च । सिद्धान्ते प्रसक्तदोषमुद्धरति *मथ्नामीति । वेणीसंवरणे भीमवाक्यं सहदेवं प्रति । आदिना दुःशासनस्य रुधिरं न पिबाम्युरस्तः । संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेनेत्यस्य सङ्ग्रहः । काकुर्ध्वनिविकारविशेषः । आदिना 'जातौ जातिर्नास्ति' 'ह्रदे वन्हिर्नास्ति' 'नान्तरिक्षे जुहोति' इत्यादि । अयं सिद्धान्तः, प्रागुक्तं तु पररीत्येति न विरोधः । तदेतद् ध्वनयन्नत्रापि तथैवाह *वन्हित्वेनेति । अत्रत्यं तत्त्वं तु कारकप्रकरणे स्फुटीभविष्यति । एतेन सर्वत्र विशेष्ये विशेषणाभावो नञा बोध्यते इत्येकीयमते 'जातौ न सत्ता' इत्यादावगतिर्दोषः जातिसमवेतत्वस्य तत्राप्रसिद्धत्वात्सम्बन्धान्तरेण जातिवृत्तित्वस्य तत्रासत्त्वादिति नैयायिकोक्तमपास्तम् ॥ ७० ॥

अत्रेदं बोध्यम्—प्रतियोग्यारोपोऽभावज्ञाने तद्व्यवहारे च हेतुः, प्रतियोग्यनालिङ्गिताभावबुद्धेरभावात् । सर्षपे सुमेरुभेदतदत्यन्ताभावयोर्व्यवहाराभावाच्च । नच 'न न' इत्यत्र तदनालिङ्गिताभावबोधो भाष्ये स्वीकृत इति वाच्यम् । तादृशभाष्याप्रसिद्धेः । नञ्सूत्रे "न न एकं प्रियम्" इति भाष्ये प्रयुक्तम् । तस्य च नोऽस्माकमेकं प्रियं नेत्यर्थः कैयटेनोक्त इति प्र-

तियोग्यालिङ्गितैव तत्राभावबुद्धिः । तथा "आबाधे च" इति सूत्रे भाष्ये 'न न' इति द्वित्वे उदाहृतं तदपि 'न न जागर्त्ति' इत्येकदेश इति कैयटेन व्याख्यातम् । एवमन्यदपि भाष्ये परिदृश्यते तदप्येवमेव व्याख्येयमिति सूचितम् ।

किंच विपरीतं नञ्सूत्रे "नेत्युक्ते सन्देहः स्यात्—कश्च पदार्थो निवर्त्तते" इति ग्रन्थेन नित्यं प्रतियोग्याकाङ्क्षैव दर्शिता ।

एतदेवाभिप्रेत्य नञ्सूत्रे भाष्ये उक्तं ब्राह्मणदृष्टगुणस्य गौरत्वादेर्दर्शनात् दुष्टोपदेशाद्वा अब्राह्मणे पूर्वं 'ब्राह्मणोऽयम्' इत्यध्यवस्यति ततः पश्चादुपलभते 'नायं ब्राह्मणः' इति, तत 'अब्राह्मणोऽयम्' इति प्रयुङ्क्ते । आतश्च तद्दृष्टगुणदर्शनाद् दुष्टोपदेशाद्वा ब्राह्मणत्वाध्यवसायपूर्वकमेव 'अयं न ब्राह्मणः' इति ज्ञानम् । नह्ययं कालवर्णमापणे आसीनं दृष्ट्वाऽध्यवस्यति 'ब्राह्मणोऽयम्' इति यथास्थितं वस्तुतत्त्वं तस्य निर्ज्ञातं भवतीति तदारोपाभावान्न तदभावज्ञानं तत्रेति ब्राह्मणाब्राह्मणशब्दयोरुभयोरपि तत्र प्रयोगाभाव इत्यर्थकम् । एतेन प्रतियोग्यारोपस्यान्वयव्यतिरेकाभ्यां स्पष्टमेवाभावज्ञाने कारणतोक्ता । एतदेवाभिप्रेत्य आरोपितरजतत्वायामेव शुक्तौ 'नेदं रजतम्' इति प्रतीतिरिति लीलावत्युपाये उक्तम् । अत एव प्रतियोग्यधिकरणाभ्यामभावो निरूप्यते इति वृद्धाः । अधिकरणपदेन संनिधानात्प्रतियोग्यारोपाधिकरणमेव, तदेव चाभावाधिकरणम् । आरोपस्यैव

शब्दप्रयोगकारणत्वात्, बोद्धुरपि तदारोपितविषयस्यैव प्रतीतेरारोपितत्वमेव नञर्थ इति युक्तम् । 'अत्र ब्राह्मणो नास्ति'इत्यादावपि एतद्देशाधिकरणिका आरोपितब्राह्मणकर्तृका सत्तेत्येव बोधः, आर्थस्तु तदभावबोधः । अत एव तत्र तत्सदृशेतरसत्ताप्रतीतिः । अत एव 'न न एकं प्रियम्' इत्यादौ "स्वसम्बन्ध्येकप्रियनिषेधे ऽनेकप्रियप्रतीतिः" इति भाष्ये उक्तम् ।

एवञ्च यत्र तादात्म्यारोपस्तत्रारोपितत्वं नामार्थगतम्, एवं यत्र संसर्गारोपस्तत्र क्रियागुणगतं तदिति व्यवस्था ।

इदमेव युक्तम्, अन्यथा 'न कलञ्जं भक्षयेद्'इत्यादावनुपपत्तेः । यदि कलञ्जभक्षणाभावः प्रेरणाविषय इति बोधः तदा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गः । तस्मादारोपितकलञ्जभक्षणं प्रेरणाविषय इति बोधः । अनिष्टसाधनत्वं बुध्यते इति तु विधिवादे दूषयिष्यते ।

अत एव—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥

इत्यभियुक्तवाक्ये सादृश्याद्यार्थिकार्थेषु अभावभेदयोर्गणनमिति दिक् ॥ ७१ ॥

(कुं०टी०) *सर्षपेइति । सर्षपे सुमेरुत्वारोपासम्भवान्न सर्षपे सुमेरुभेदप्रत्ययः अतिविसदृशत्वादिति भावः । *ब्राह्मणदृष्टेति । तदुक्तं भाष्ये—"गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वा-

ऽध्यवस्यति—'ब्राह्मणोऽयम्' इति ततः पश्चादुपलभते नायं ब्राह्मण इति" इति । *दुष्टोपदेशाद्वेति । अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेत्येवमविवेकेनोपदेश इत्यर्थः । *आतश्चेति । अस्माच्च हेतोरित्यर्थः । *कालवर्णमिति । रूपाभावकथनमेतत् । *आपणे आसीनमिति । आचाराभावकथनम् । *निर्ज्ञातमिति । संदेहबीजाभावाद्ब्राह्मण्यमेव तत्र निर्ज्ञातं भवतीति ब्राह्मण्यारोपाभावान्नाब्राह्मणशब्दप्रयोग इत्यर्थः । *प्रतियोग्यधिकरणाभ्यामिति । सद्भ्यामिति शेषः । अन्यथा शशविषाणस्याप्यभावप्रतियोगित्वापत्तिरिति भावः । *निरूप्यते—प्रत्याय्यते । *आरोपितेति । असमस्तनञः क्रियायामन्वयात्सत्ताया एवारोपितत्वम् । *तत्सदृशेति । तत्सदृशोऽयम् इतर इत्यर्थः । नामार्थः—प्रातिपदिकार्थः । तद्गतमारोपितत्वं तत्रेत्यन्वयः । *व्युत्पत्तिभङ्ग इति । भक्षणे एव प्रेरणान्वयौचित्यात् । *अभावभेदयोरिति । तयोरप्यार्थिकत्वात् ॥ ७१ ॥

(क० टी०) भूषणाद्यसाङ्गत्यं ध्वनयन्सिद्धान्ततत्त्वमाह *अत्रेदमित्यादिना । आद्ये आह *प्रतियोग्यतेति । द्वितीये आह *सर्षपेइति । आद्यहेतुं विघटयति *नचेति । अप्रसिद्धिमेवाह *नञ्सूत्रेइति । *एवम्—एतादृशम् । दृश्यते इत्यत्रान्वयः । यदीत्यनेनादर्शनमेवेति ध्वनितम् । *सूचितमिति । सूचितमेव, कैयटेनेत्यर्थः । एवं तत्साधकभाष्यानुपलम्भमुक्त्वा तत्साधकतदुपलम्भमाह *किञ्चेति । *विपरीतमिति । दर्शनक्रियाविशेषणम् । *नेत्युक्ते इति । उत्तरत्वेनोक्ते इत्यर्थः । *सन्देहइति । समभिव्याहृतपदस्य बोधकस्याभावान्निवृत्तिरूपार्थस्य प्रतियोग्याकाङ्क्षाया अनिवृत्तेरबोधकत्वेन च तदप्रयोग एव स्यात् । वाचकत्वे तु सन्देहः स्यादित्यर्थः । तदाकारमाह *कस्येति । कस्य पदस्य पदार्थ इत्यर्थः । अभिधेयपरः पदार्थशब्दः सन्देहपदेन निर्णयाभावो विवक्षित इति तत्त्वम् । एतदाशयेनैवात एव नेत्युक्तमिति प्रागुक्तम् । एतेन

तत्र तथाङ्गीकारादिदं चिन्त्यमित्यपास्तम् । तत्र परानुवादसत्त्वेना-सिद्धान्तत्वात् । तपः श्रुतञ्चेत्याद्युक्त्वा तेषामपि तत्त्वस्य तत्रोक्तत्वा-दाह *गौरत्वादेरिति । अन्वयमुक्त्वा व्यतिरेकमाह *आतश्चेति । इतोऽपीत्यर्थः । कालः-श्यामः । आपणे-हट्टे । तत्तात्पर्यार्थमाह *तदा-रोपेति । *एतेन-भाष्येण । नैयायिकसंमतमपीदमित्याह *एतदेवेति । *उक्तम्-वर्धमानोपाध्यायैः । *अतएव-तस्य तत्र कारणत्वादेव । नन्वेवमभावस्य पृथगधिकरणाकाङ्क्षा समागतेति प्रागुक्तविरोधो ऽत आह *अपीति । एवं सति क्रियागुणान्यसमभिव्याहृतनञ इव तत्समभिव्याहृतनञोऽप्यारोपितत्वार्थकत्वमेवेति सर्वत्रैकरूपते-त्याशयेनाह *आरोपस्येति । एवञ्चेत्यादिः । *नञर्थः-नञ्द्यो-त्यः । अस्मिन्सिद्धान्ते तत्र बोधाकारमाह *अत्रेति । वाक्यघटक-मिदम् । अपिना "न न एकं प्रियम्" इत्यादि । *सन्देह इत्यादि । आदिना 'पीतः शङ्खो नास्ति' इत्यादिपरिग्रहः । नच विशिष्टसत्ताया अप्रसिद्धेः कथमारोपः । उक्तोत्तरत्वात् । एवेन प्रागुक्तबोधव्यवच्छेदः । नन्वनुभवसिद्धाभावबुद्धेरपलापः कथम् अत आह *आर्थस्त्विति । तमादायैव प्रतियोगिज्ञानप्रतिबन्धादि सङ्गमनीयम् । उक्तरीतिर्वा । *अत एव—तत्रापि तथैवाङ्गीकारादेव । नञिवयुक्तन्यायेनेति भावः । अत्राप्रमाणत्वं निराचष्टे *अतएवेति । तथाप्रतीतेरेवे-त्यर्थः । नन्वेवमसमासे क्व द्रव्यान्वयः, क्व क्रियाद्यन्वय इत्यत्र नियामकाभावादव्यवस्थापत्तिस्तव, मम तु भेदार्थकत्वे-आरोपिता-र्थकत्वे द्रव्यान्वयो ऽन्यन्ताभावार्थकत्वे क्रियाद्यन्वय इति व्यवस्था-सम्भवोऽत आह *एवञ्चेति । तथाऽर्थस्य प्रमाणसिद्धत्वे चेत्यर्थः । *संसर्गेति । तदितरेत्यादिः । उक्तं समर्थयते *इदमेवेति । *अन्यथा-अभावार्थकत्वे । तामेवाह *यदीति । नच तत्र लक्षणा नञ् द्योतकः । तथा सति तस्य विशेषणतापत्त्या प्रागुक्तदोषापत्तेः । तद् ध्वन-यन्नाह *तस्मादिति । इष्टसाधनत्वं विध्यर्थो नञ्समभिव्या-हारे त्वनिष्टसाधनत्वम्, इति नोक्तदोषो ऽत आह *अनिष्टेति । एतेन कलञ्जभक्षणाभावविषयकं कार्यमिति प्राभाकरोक्तमप्यपा-स्तम् । *अत एव—तस्यैव तच्छब्दार्थत्वादेव । अन्यथा तदसङ्गतिः स्पष्टैव । एतेन चिन्त्यमिदम् अनुभवसिद्धाभावबुद्धेरप-लापे मानाभावात् । किञ्च उक्तरीत्या तत्र अव्यवस्थापत्तेः । उक्तरी-

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीब्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः-प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमाविरचितः । स्वकृतटीकाविभूषितश्च । १

(४३) याज्ञवल्कस्मृतिः । बालम्भट्टीसमाख्य-व्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शाब्दीपिका । श्रीपार्थसारथिमिश्र प्रणिता रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य- बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाह्वटीकाद्वयसंवलिता । [illegible]

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वती[illegible] विश्वेश्वरसूरिविरचितः । [illegible]

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ६

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः । [illegible]

(५०) विरमित्रोदयः । राजनीतिप्रकाशः । मह[illegible]महोपाध्यायश्रीमित्रमिश्रविरचितः । [illegible]

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी

त्या व्यवस्थातु न, संसर्गारोपनियामकस्यैवात्यन्ताभावनियामकत्वसम्भवात् । सर्वदाऽप्यभावद्वयं बुध्यत एव व्यवजिहीर्षावशाद्व्यवहारस्य कादाचित्कत्वमित्युपपत्तेश्च । किञ्च 'घटो नास्ति' इति बोधोत्तरं घटवत्ताबुद्धिप्रतिबन्धो न स्यात् । नचाग्रेतनेन तेन प्रतिबन्धः, नियमतस्तज्ज्ञापकाभावात् । नचारोपितत्वज्ञानमेव तथा, इदं च तवाप्यावश्यकम् । अन्यथाऽत्यन्ताभावभेदबोधयोर्व्यवस्था न स्यात् । ममतु संसर्गारोपे आद्यस्तादात्म्यारोपे द्वितीय इति न दोषः इति वाच्यम् । संसर्गाद्यारोपनियामकस्यैव तन्नियामकत्वसम्भवात् । लौकिकप्रत्यक्षस्थले एवारोपस्य हेतुत्वाच्च । प्रतियोग्यधिकरणसंसर्गज्ञानमेव ह्यारोपः । अत एव नेत्यत्राभावबोधो भाष्ये उक्तः । तेन लीलावत्युपायोक्तमपास्तमिति भूषणाद्युक्तं समासे एव आरोपितत्वं नञर्थः, असमासे त्वभाव एवानुभवसिद्धाभावबुद्धेरपलापे मानाभावादिति नव्यशाब्दिकमतमनूद्य, तन्न, सर्वत्राभावबोधस्यानुभविकत्वात् । आरोपत्वस्याननुगतस्य ब्रह्मणोऽपि दुर्वचत्वेन तस्य नञर्थत्वे गौरवाच्च । एतेन तत्सादृश्यमित्याद्यपि निरस्तम् । सादृश्यादिबोधस्य लक्षणयैवोपपत्तावभावस्यैव नञर्थत्वादिति नैयायिकोक्तमपास्तम् । उक्तयुक्तिगणात् । एवं चार्थतदभावबोधानुसारात् प्रत्यक्षमपि तद्विषयमेव । नतु घटसत्ताप्रतियोगिकभूतलाधिकरणकाभावविषयम्, नापि भूतलाधिकरणकत्वविशिष्टघटप्रतियोगिकाभावविषयम्, कारकाणां भावनान्वयेन तस्य शब्दस्येदृशार्थपरताया दुर्वचनत्वात् । एवं च भूतले तादृशसत्तारोपः सिद्धः । 'घटः पटो न' इत्यत्राप्येवमेवोभयमिति अधिकरणे प्रतियोगितादात्म्यारोपः सिद्धः । अत एवोभयत्र प्रथमासिद्धिः । उभयत्र भूतले घटोस्तीति यत्तन्न, घटः पट इति यत्तन्नेत्यन्वयात्तत्सिद्धिर्बोध्या । तदाह *दिगिति ॥ ७१ ॥

यत्तु प्रमायां गुणस्य कारणत्वानुरोधेन प्रतियोग्यारोपस्याभावप्रमायां हेतुत्वमिति । तन्न । प्रमाया गुणजन्यत्वे मानाभावात् । चक्षुर्गतापित्तदोषाभावे शङ्खे श्वैत्यप्रमा, तत्सत्त्वे न, तद्गतमण्डूकवसाञ्जनाभावे

धंशप्रमा, तत्सत्त्वे न, इत्यन्वयव्यतिरेकाभ्यां तत्तत्प्रमायां तत्तद्दोषस्य प्रतिबन्धकताया एव कल्पनात् । सत्यां सामग्र्यां कार्यविरोधित्वमेव प्रतिबन्धकत्वम् । आरोपे गुणत्वाभावाच्च । प्रत्यक्षे निर्दुष्टेन्द्रियसंनिकर्षादिः, शाब्दे आप्तोक्तशब्दज्ञानस्य गुणस्य सत्त्वाच्च ।

यत्तु 'अघटः' इत्यादौ समासे षष्ठ्याप्रत्ययाद्यभावात् घटाभिन्न इत्येव बोधः । 'अवर्षा हेमन्तः' 'अनर्थः स्त्री' इत्यादौ हेमन्तादिगतलिङ्गं तु न, लोकाश्रयत्वाल्लिङ्गस्य । 'असः' इत्यादौ सर्वनामकार्यं तु "एतत्तदोः सुलोपोऽकोरनञ्समासे" इति ज्ञापकेन पूर्वपदार्थप्राधान्येऽप्युत्तरपदार्थप्रयुक्तकार्यज्ञापनात् । अत एव 'अभवसि' इत्यादौ पुरुषव्यवस्था । "अनेकमन्यपदार्थे" इत्येकवचनं तु विशेष्यभूतसुबित्यस्य एकवचनान्तत्वात् । 'सेव्यते ऽनेकया' इत्यत्रापि 'योषया' इति विशेष्यानुरोधादेकवचनम् । अत एव 'पतन्त्यनेके' इत्यादौ बहुवचनमपि । नञो द्योतकत्वेन भिन्नो ऽपि तच्छब्दाद्यर्थ इति तु न युक्तम् । द्योत्यार्थस्य विशेषणताया एव भाष्यसंमतत्वादिति ।

तन्न । 'ताभ्यां भिन्नोऽस्ति' इत्यर्थके 'अतौ स्तः' इति प्रयोगे द्विवचनानापत्तेरेकवचनापत्तेश्च ।

किञ्च विशेष्यानुरोधाद् 'अनेकम्' इत्यादावेकवचने 'अवर्षा हेमन्तः' इत्यादावपि एकवचनापत्तिः, स्वगतान्यसंख्यासत्त्वे विशेष्यगतसङ्ख्यया वचनं भवतीत्यनुशासनाभावाच्च । पतन्त्यनेके इत्याद्यसाध्वेव । एकेनैवानेकशब्देन सकलार्थप्रतीतेरनेकानेक-

शब्दप्रयोगाप्राप्त्याऽनेको रथो गजो ऽश्व इत्यर्थादेक-शेषेण बहुवचनमित्यपास्तम् ।

किञ्च विशेष्यबोधकरथादिपदानां पृथग्विभक्तिकत्वे एकस्यैवानेकपदस्यान्वय इत्येकशेषानुपयोगः । तेषां द्वन्द्वनिर्देशे ऽपि समुदिते एकस्यैवान्वयसम्भवात्तदनुपयोग एव । एतदेवाभिप्रेत्य भाष्ये "इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये संगृहीतम्, किम्, अनेकमित्यत्रैकवचनम्, आरोपितैकत्ववद्बोधाद्बहूनां संप्रत्ययः" इत्युक्तम्। "अनेकस्तिष्ठति" इति भाष्योदाहृते विशेष्यादर्शनाच्च । अनेको जना आगता इत्यस्य साधुतापत्तेश्च । अनञ्समासे इत्यनेनोत्तरपदार्थप्राधान्यस्यैव ज्ञापयितुमुचितत्वाच्चेति दिक् ।

'न क्वचिदस्ति' इत्यादौ न क्वापीत्यर्थः। पूर्वनञ्समभिव्याहृतक्वचिदादिपदान्तर्गतचिदित्यस्याप्यर्थत्वात्। अत एव "न ङिसम्बुद्ध्योः" इति सूत्रे भाष्ये न क्वचिन्ङिर्लोपेन लुप्यते" इत्यस्य "सर्वत्र लुमतैव लुप्यत" इति प्रतिनिर्देशः कृतः। 'क्वचिन्न' इत्यादौ त्वनिर्द्धारितविशेषावच्छिन्ने कस्मिंश्चिदेवाभावः प्रत्याय्यते । 'स्रजं न काचिद्विजहौ जलाविलाम्' इत्यत्रापि 'काऽपि न विजहौ' इति प्रतीतौ 'सर्वा न विजहुः' इति प्रतीत्या दुष्टत्वम् । जलक्रीडावर्णने कस्याश्चिदेकस्या एव तथा वर्णने कवितात्पर्यात् ॥ ७२ ॥

(कु०टी०) *प्रमायां गुणस्येति । अयं भावः—योग्यताक्षणेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावस्य तन्नि-

ष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वाभावस्य वा ऽननुगमा-न्निवेशो न सम्भवति । नच ग्राह्यसंसर्गविरोधिविरहज्ञानत्वेन द्वयोरप्यनुगमः । अन्योन्याभावगर्भाया योग्यताया ज्ञानेऽसत्यपि अत्यन्ताभावगर्भयोग्यताज्ञानादन्वयबोधापत्तेः । तस्मात्स्वरूपसती योग्यता गुणत्वविधया हेतुः । सा चात्रारोपितैवेति । अत्र तार्किकाः—यथा अप्रमां प्रति दोषः कारणम्, तथा प्रमां प्रति गुणः कारणम्, यथा प्रत्यक्षे भूयोऽवयवेन्द्रियसन्निकर्षः अनुमितौ सल्लिङ्गपरामर्श इति । दोषास्त्वननुगताः । यथा पीतादिभ्रमे पित्तादिः, चन्द्रादेः स्वल्पत्वे दूरत्वम्, वंशोरगभ्रमे मण्डूकवसाञ्जनम्, इत्येवमननुगतदोषाभावस्य कारणत्वापेक्षयाऽनुगतगुणस्यैव कारणत्वमुचितम् गुणश्च प्रत्यक्षे विशेषणवद्विशेष्यसंसर्ग इत्याद्याहुः । *मानाभावादिति । तादृशकार्यकारणभावस्य निष्फलत्वादिति भावः । *तत्सत्त्वेति । पित्तदोषाभावसत्त्वे शङ्खे श्वैत्यप्रमा भवति, दोषासत्त्वे तु न भवतीत्यन्वयः । *तद्वतेति । चक्षुषि मण्डूकवसाञ्जनेन वंशे सर्पभ्रमो भवति । *तत्तत्प्रमायामिति । विशिष्य प्रतिबन्धकताया आवश्यकतया किं सामान्यकार्यकारणभावेनेति भावः । ननु वचनारम्भे गौरवमत आह *सत्यामिति । सत्यामपि सामग्र्यां कार्यानुदयात् प्रतिबन्धकत्वं न्यायसिद्धमित्यर्थः । *गुणत्वाभावात्—गुणत्वव्यवहाराभावात् । *निर्दुष्टेति । एवं च दोषान्तरसद्भावे ऽपि प्रत्यक्षाद्यापत्तिः । *षष्ठ्यापत्तीति । घटस्य भेदवानित्यर्थाद्वाक्ये षष्ठीसम्भवे ऽपि समासे तदसम्भवादित्यर्थः । *भिन्नोपीति । घटभिन्नो ऽपि घटशब्दार्थ एवेति उत्तरपदार्थस्यैव प्राधान्यमिति भावः । *द्विवचनानापत्तेरिति । तद्भिन्नस्यैकत्वात् ।

*स्वगतान्येति । अनेकं सुबन्तमित्यत्र विशेषणे बहुत्वसङ्ख्यासत्त्वे सुबित्येतदनुरोधादेकवचनमित्यत्र वचनं नास्तीत्यर्थः । *एकेनैवेति । रथो गजोऽश्वोऽनेक इत्येवमेकशेषेण बहुवचनमित्यपास्तम् । एकेनैवानेकशब्देनेष्टार्थलाभे ऽनेकानेकशब्दप्रयोगप्राप्त्यभावादिति योजना । *पृथग्विभक्तिकत्वे–सर्वस्य सविभक्तिकत्वे । *अन्वयेति । रथोऽनेको गजो ऽनेक इत्याद्यन्वयेत्यर्थः । ननु कथमप्यर्थलाभ इत्यत आह *पूर्वेति । *दुष्टत्वमिति । काचिन्न विजहौ इति बोधयितव्ये सर्वा न विजहुरित्येतद्बोधनापत्तिर्दोष इत्यर्थः ॥ ७२ ॥

(क० टी०) भूषणोक्तमेव प्रकारान्तरनिरसनमाह *यत्त्विति । *गुणस्य–प्रमाणगतस्य । तत्र तस्यैव गुणत्वादाह *प्रतियोग्येति । *प्रमायाम्–नतु ज्ञानमात्रे । एवं चोक्तमयुक्तमिति भावः । *तद्गतेति । चक्षुर्गतेत्यर्थः । वंशप्रमा तत्रैव । नन्वेवं समागतं तदभावस्य कारणत्वं कारणीभूताभावप्रतियोगित्वस्यैव तत्त्वात्तथा च लाघवाद् गुणस्यैव कारणत्वम्—अत आह *सत्यामिति । एवेन तद्व्यवच्छेदः । साक्षादविरोधिनो ऽपि ज्ञानस्य जनकज्ञानविघटकस्य प्रतिबन्धकताया बहुशो दर्शनात् । पारिभाषिकगुणत्वाभावमाह *आरोपे इति । [2]तस्या गुणजन्यत्वाग्रहे आह *प्रत्यक्षेइति । एतेन तदनुरोधेन तत्र तस्य हेतुत्वावश्यकत्वेन सर्वत्रैव स हेतुरित्यप्यपास्तम् । उक्तरीत्या प्रतियोग्यनालिङ्गिताभावबुद्धेरेवाभावात् 'न[3] न' इत्येव प्रत्यक्षापत्तिरिति तद्रीत्याऽपि न तस्य तत्र हेतुत्वमिति बोध्यम । भूषणाद्युक्तमेव खण्डयति *यत्त्विति । आदिना 'नामार्थयोः' इतिव्युत्पत्तिभङ्गः । *घटभिन्न इति । पूर्वपदभूतनअर्थभेदवद्विशेष्यक एवेत्यर्थः । सामान्यापेक्षं ज्ञापकमित्याह *उत्तरेति । तत्फलमाह *अत एवेति । सामान्यतस्तत्र तज्ज्ञापनादेवेत्यर्थः । *सुबित्यस्य–"सुबामन्त्रित" इत्यतो ऽनुवृत्तस्य ।

(१) तदनुरोधेनापि तद्दुर्वचमित्यधिकः पाठः पु० २ ।
(२) अभ्युपेत्येत्यधिकम् पु० २ । (३) न्मनेत्येति पाठः ! ।

*अनुरोधात्—योषापदोपात्ततदनुरोधादेव । एतन्मतोपपत्तिः स्वयमेव कृता । यत्तु भूषणकारादिभिरिदं मतमित्थमुपपादितम्—अत्वं भवसीत्यादौ नञो द्योतकत्वेन युष्मदस्तद्भिन्नलाक्षणिकत्वाद्भिन्नरूपयुष्मदर्थेन सामानाधिकरण्यात्पुरुषव्यवस्था । अत एव 'असः' इत्यादौ सर्वनामकार्यं लाक्षणिकत्वे ऽप्युपसर्जनत्वाभावाद् । अत एव "अनञ्समासे" इति सङ्गच्छते इति, तत् खण्डयति *नञ इति । आदिना युष्मदादि । दोषान्तरमाह *स्वगतेति । अत एव गुणवचनानामिति सत्त्वे ऽपि न दोषस्तस्यान्यविषयत्वात् । नन्वेवं 'पतन्त्यनेके' इत्यस्य का गतिरत आह *पतन्तीति । नन्वेकशेषेण साधुतेति तत्पक्षे तैरुक्तमेवात आह *एकेनैवेति । अनेकेतिशब्देन । एवमग्रेऽपि । अप्राप्तिरपासने हेतुः । *पृथगिति । बहुव्रीहिः । *एतदेव—वचनासिद्धिरूपदोषस्य सर्वथा अन्यथा अपरिहार्यत्वमेव । अनेकमित्यादौ बहुष्वेकत्वस्यारोपादाह *आरोपीति । अन्यथा भाष्यविरोधोऽपीति भावः । दोषान्तरमाह *अनेकास्तिष्ठतीति । *साधुतेति । उत्तरपदार्थप्राधान्ये इत्यर्थः । *प्राधान्यस्यैवेति । लाघवादिति भावः । एतेन तत्पुरुषे तत्प्राधान्यनियमस्यैवाभावादुक्तज्ञापकादस इत्यादौ सर्वनामकार्यसिद्धौ नञो ऽभावार्थकत्वं युक्तमिति नैयायिकोक्तं तथाऽन्योक्तं चापास्तम् । तस्मादुक्तप्रथमपक्ष एव युक्ततर इति बोध्यम् । तदाह *इतिदिगिति । विशेषमाह *नक्वचिदिति । अत्र मानमाह *अत एवेति । तस्योक्तार्थकत्वादेवेत्यर्थः । पूर्वत्युक्तेः फलमाह *क्वचिन्नेत्यादाविति । विरुद्धमतिकृत्त्वदोषे प्रकाशाद्युदाहृतस्यात एव सङ्गतिरिति आदिपदसंग्राह्यमाह *स्रजामिति । ननु कुतोऽस्य विरुद्धत्वमतः आह * जलेति । अत्रानुपूर्वीव्यत्यासेन विवक्षितार्थबोधे ऽपि झटिति विरुद्धार्थप्रतीतिजनकत्वेन दुष्टत्वमित एवानित्यदोषत्वमस्येति तात्पर्यम् । इति नञर्थनिरूपणम् ॥ ७२ ॥

एवशब्दो ऽवधारणे । "एवे चानियोगे" इतिवार्त्तिके नियोगो ऽवधारणमिति कैयटाद्युक्तेः । अस्मादेवासम्भवान्यापि तदर्थः । अवधारणं ज्ञानविशेषः । सचैव-

कारद्योत्य एवसमभिव्याहृते विशेषणम् । तच्च 'पार्थ एव धनुर्धरः' इत्यादौ विशेष्यसङ्गतं स्वातिरिक्ता-वृत्तित्वेन गृहीतसमभिव्याहृतपदार्थप्रकारकज्ञानरूपं पार्थविशेषणम् । अवधारणाविशेष्यः पार्थो धनुर्धर इति बोधः । साधारण्येन धनुर्धरत्वज्ञानवन्तं प्रति तद्भ्रमनिरासायैवं प्रयोगात् । तदन्यो न धनुर्धर इति तु फलति ।

कदाचित्स्पष्टत्वार्थं तत्प्रयोगोऽपि । यथा—'त्व-न्मुखं त्वन्मुखेनैव तुल्यं नान्येन केनचिद्' इति । आर्थ्या वृत्त्या लब्धस्य शब्देन प्रतिपादने पौनरु-क्त्याभावस्यालङ्कारिकैरुक्तत्वात् ।

'लवणमेवासौ भुङ्क्ते' इत्यादौ प्राचुर्याद्यर्थकस्य, 'घट एव प्रसिद्धः' इत्यादावप्यर्थकस्य, 'क्व भोक्ष्यसे' इत्यादावसम्भवार्थस्य च तस्य सत्त्वेन तदर्थकत्वव्या-वृत्तये तदुक्तेश्च ।

'शङ्खे पाण्डुरत्वमेव' इत्यादौ स्वातिरिक्तरूपा-नाश्रयत्वेन गृहीतसमभिव्याहृतप्रकारकज्ञानरूपम-वधारणम् । शङ्खेऽनेकरूपवत्त्वज्ञानवन्तं प्रति अयं प्रयोगः । एवमग्रेऽप्यूह्यम् ।

'शङ्खः पाण्डुर एव' इत्यादौ विशेषणसङ्गते स्वा-तिरिक्तरूपानाश्रयसमभिव्याहृतपदार्थविशेष्यकज्ञान-रूपं तत् । अवधारणप्रकारपाण्डुराभिन्नः शङ्ख इति बोधः ।

क्रियासङ्गते 'चैत्रो हसत्येव' इत्यादौ स्वातिरिक्त-बुद्धिस्थक्रियानाश्रयसमभिव्याहृतपदार्थप्रकारकज्ञान-रूपं तत् । 'न रोदिति' इति प्रतिनिर्देशात् ।

'नीलं सरोजं भवत्येव' इत्यादौ नीलभवनाद्यभावानधिकरणसमभिव्याहृतप्रकारकज्ञानरूपं तत् । 'न भवतीति न' इति प्रतिनिर्देशात् ।

'ज्ञानमर्थं गृह्णात्येव' इत्यादाववच्छेदकावच्छेदेनार्थग्रहणाद्यभावानधिकरणज्ञानादिप्रकारकज्ञानरूपम् । 'न गृह्णातीति न' इति प्रतिनिर्देशात् । ज्ञानकर्तृकमर्थकर्म्मकमवधारणविषयो ग्रहणमिति बोधः ।

'शीत एव स्पर्शो जले' इत्यादौ शीतान्यस्पर्शानधिकरणसमभिव्याहृतपदार्थप्रकारकज्ञानरूपम् । 'नान्यः स्पर्शो जले' इति प्रतिनिर्देशात् ।

'चैत्रेणैवायं दृश्यते' इत्यादौ चैत्रान्याकर्तृकसकलकारकविशिष्टदर्शनादिक्रियाविशेष्यकबोधरूपं तत ।

'घटत्वं पृथिवीवृत्त्येव' इत्यादौ पृथिव्यन्यावृत्तित्ववद्घटत्वविशेष्यकज्ञानरूपम् । 'नान्यवृत्ति' इति प्रतिनिर्देशात् । अवधारणविषयपृथिवीवृत्तित्ववद् घटत्वमित्यादिप्रकारेण बोधः ।

'ऋतौ स्वभार्यामुपेयादेव' इत्यादौ स्वाभावानाश्रयकारकप्रकारकज्ञानरूपं तत् । 'नोपेयादिति न' इति प्रतिनिर्देशात् । एवञ्च ऋतुकालाधिकरणकस्वभार्याकर्मकमवधारणविषयो गमनं प्रेरणाविषय इति बोधः । तेन तस्य प्रत्यवायाभावरूपेष्टसाधनत्वलाभः । इष्टस्य प्रत्यवायाभावरूपत्वं तु—

"ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां पच्यते" इत्यादिवचनैकवाक्यतया बोध्यम् । तेन ऋतुकालाधिकरणकस्वभा-

र्थागमनाभावस्य प्रत्यवायसाधनत्वं लभ्यते ।

सकलसाधारणमवधारणत्वमखण्डोपाधिः तेनैव रूपेण शक्तिर्बोधश्चेति बोध्यम् ।

'पञ्च पञ्चनखा भक्ष्याः' इत्यादौ अवधारणविषयबुद्धिस्थवृत्तिपञ्चत्वसंख्यावति पञ्चपदस्य लक्षणा । अवधारणं चात्र स्वातिरिक्तसंख्याधिकरणासम्बन्धिसमभिव्याहृतप्रकारकज्ञानरूपम् । तेन 'अन्येऽभक्ष्याः' इति फलति । एवकारस्य तदर्थलक्षणाया वा फलं तु प्रापकप्रमाणबोधितस्य तदतिरिक्तविषयत्वाभावकल्पनामिति इष्टसिद्धिः ॥ ७३ ॥

(कुं० टी०) *अस्मादेवेति । "अनियोगे" इति निषेधादेवेत्यर्थः । *तच्चेति । विशेष्यसङ्गतमित्यत्रान्वयः । *स्वातिरिक्तेति । पार्थेतरावृत्तित्वेन गृहीतो यः पदार्थो धनुर्धरत्वं तत्प्रकारकं पार्थविशेष्यकं ज्ञानम् । अयमेवान्ययोगव्यवच्छेद इति तार्किकाः । ज्ञानरूपमवधारणं पार्थे विशेषणमित्यन्वयः । *तस्य–एवकारस्य । *व्यावृत्तयेइति । प्राचुर्याद्यर्थसम्भावनानिवृत्तये नान्येन केनचिदित्यस्य प्रयोगाच्चेत्यर्थः । अयोगव्यवच्छेदमुदाहरति *शङ्ख इति । पाण्डुरत्वातिरिक्तरूपानाश्रयत्वेन गृहीतः शङ्खो ऽत्र प्रकारः । *हसत्येवेति । अत्र हासातिरिक्ता बुद्धिस्था या रोदनादिक्रिया तदभावो गम्यते । *नभवतीति नेति । किन्तु भवत्येवेत्यर्थः । अत्रात्यन्तायोगो व्यवच्छिद्यते । *अवच्छेदकावच्छेदेन–अवच्छेदकावच्छेदेन यो ऽर्थग्रहणाभावस्तदनधिकरणज्ञानमित्यर्थः । *ऋताविति । अत एव न तत्र गमनादिनिमित्तकब्रह्मच-

र्यस्य हानिः । ऋतुशब्देन रजोदर्शनावधिकः षोडश-दिवसावच्छिन्नः कालविशेष उच्यते । तत्र तादृशदिवसत्वव्या-पकीभूताभावप्रतियोगिनो गमनस्य ग्रहणादेकदिवसगमनेऽपि शास्त्रस्य चारितार्थ्यम् । *स्वाभावेति । गमनाभावाश्रयो भार्या । *पञ्चपञ्चेति । अवधारणविषयो यो बुद्धिस्थस्तद्वृत्तिर्या पञ्चत्वसंख्येत्यर्थः । *लक्षणेति । तेनावधारणलाभः । *एव-कारस्येति । क्वचिदेवकारः प्रयुज्यते, क्वचित्तु तदर्थे लक्षणा क्रियते, तत्फलं त्विसर्थः । *प्रापकेति । प्रापकं प्रमाणं "पञ्च-पञ्च-" इत्यादि शास्त्रम् । तेन बोधितस्य भक्षणस्यान्या-विषयत्वमित्यर्थः ॥ ७३ ॥

(क० टी०) अथैवकारार्थं निरूपयति *एवशब्द इति । यत्तु जीर्णनैयायिकाः-अत्यन्तायोगव्यवच्छेदोऽयोगव्यवच्छेदोऽन्ययोग-व्यवच्छेदश्चैवकारार्थः । तत्राद्यः अन्वयितावच्छेदकव्यापकत्वाभाव-विशिष्टो योऽभावः प्रतियोगितासम्बन्धेन तद्विशिष्टव्यवच्छेदः । अयं च क्रियासङ्गतैवस्थले, तथाविधबोधे तादृशानुपूर्वीज्ञानस्य हेतुत्वात् । तथाच नीलं सरोजं भवत्येवेत्यादौ सरोजत्वव्यापकत्वाभावविशि-ष्टाभावव्यवच्छेदवन्नीलभवनाश्रयत्ववत्सरोजमित्यादिबोधः । तादा-त्म्याभावव्यवच्छेदो द्वितीयः । सच विशेषणसङ्गतैवस्थले, तद्बोधे तज्ज्ञानस्य हेतुत्वात् । तथाच शङ्खः पाण्डुर एवेत्यादौ पाण्डु-रतादात्म्याभावव्यवच्छेदवान् शङ्ख इत्यादिबोधः । अन्यतादात्म्या-दिव्यवच्छेदोऽन्त्यः । सच विशेष्यसङ्गतैवस्थले, तद्बोधे तज्ज्ञानस्य हेतुत्वात् । तथा च पार्थ एव धनुर्धर इत्यादौ पार्थान्यतादात्म्याभा-ववद्धनुर्धराभिन्नः पार्थः इत्यादिबोध इति ।

तन्न । अक्षरमर्यादया ततस्तदर्थालाभात् ज्ञानमर्थं गृह्णात्येवे-त्यादावयोगव्यवच्छेदमात्रप्रतीतेः । पचत्येवायमित्यादावन्ययोगव्य-वच्छेदप्रतीतेश्च । आद्यविषये सर्वत्रात्यन्तायोगव्यवच्छेदाप्रतीतेः । सरोजत्वादेः प्रागुक्तरीत्याऽन्वयितावच्छेदकत्वाभावात् । चैत्रेणैव सदृशं मुखमित्यादौ द्वितीयविषयेऽप्यन्ययोगव्यवच्छेदप्रतीत्या

तथा नियमस्य दुर्वचत्वात् । प्रागुक्तरीत्या ऽभावाभावस्यासत्त्वाच्च । यदि तु अयं सर्वोऽप्युत्सर्गो नतु सर्वथा नियम इति यथाऽनुभवं तात्पर्यतो ऽन्यथाऽपि बोधस्तत्र तत्तदानुपूर्वीज्ञानस्य हेतुत्वादिति न प्रागुक्तदोष इत्युच्यते तदाऽप्यवशिष्टोक्तदोषगणसत्त्वमेव । किञ्च विशिष्टशक्त्यनेकशक्तिकल्पनजं गौरवतरं दुष्परिहरमेव । तदेतत्सर्वमभिप्रेत्याह *अवधारणइति । प्रागुक्तविषयेष्वित्यर्थः । सर्वत्र तथेति तथा तदुक्त्यसाङ्गत्यायाह *अस्मादेवेति । उक्तवार्त्तिकादेवेत्यर्थः। अन्यथा लक्ष्यासम्भवेन तदसङ्गतिः स्पष्टैव । आदिपदसङ्ग्राह्यमनुपदमेव स्फुटीभविष्यति। *सच-ज्ञानविशेषश्च । प्रागुक्तरीत्या तस्य विशेषणत्वावश्यकत्वादाह *द्योत्य इति । *समेति । तत्प्राग्वर्त्तिनि। सच नैकरूपइति प्रागुक्तक्रमवैपरीत्येन सर्वस्वरूपप्रतिपादनायादौ विशेष्यसङ्गते ऽभेदविषये आह *तच्चेति । अवधारणंचेत्यर्थः । *स्वं पार्थः । *समेति। पार्थसमभिव्याहृतधनुर्धररूपेत्यर्थः । नतु कथं प्रसिद्धबोधापलापोऽत आह *तदन्यइति । अत एव कविप्रयोगविरोधोऽपि त्वन्मते स्फुटः मम मते नेत्याह *कदाचिदिति । नन्वेवं तत्र पार्थ एव धनुर्धरो नान्य इत्यादौ च नान्येनेत्यादेः पौनरुक्त्यापत्तिरुक्तरीत्या तल्लाभादत आह *आर्थ्येति । व्यञ्जनयेत्यर्थः । शब्दमर्यादया तथैव प्रतीतेरिति भावः । अभ्युपेत्येदं वस्तुतस्तदेव नेत्याह *लवणमेवेति । निपातानामनेकार्थत्वादिति भावः । इदमेव प्रागुक्तादिपदसङ्ग्राह्यम् । अत्रावधारणार्थकत्वं तु न, बाधात् । तात्पर्येण प्रयोगाच्च । एवमग्रेऽपि । *क्वेति । एवमुक्ते स्थलसङ्कीर्णत्वादिना नास्ति सम्भवस्तव भोजनस्येति प्रतीतः । *तस्य-एवस्य । तत्रैव भेदविषये आह *शङ्ख इति । स्वम्-पाण्डुरत्वम् । *समेति । पाण्डुरत्वसमभिव्याहृतशङ्खरूपपदार्थेत्यर्थः । *शङ्ख इति । यतइत्यादिः । असुव्वत इतिवद् *अनेकेति प्रयोगः । शङ्खाधिकरणकमवधारणविशेष्यं पाण्डुरत्वमिति बोधः । अथ द्वितीये आह *शङ्खइति । स्वं पाण्डुररूपम् । *रूपानाश्रयसमेति । तदनाश्रयत्वेन गृहीतपाण्डुरसमभिव्याहृतशङ्खरूपपदार्थेत्यर्थः । *अवधारणप्रकारेति । बहुव्रीहिः । शङ्खोऽनेकरूप इति ज्ञानवन्तं प्रत्येतत्प्रयोगात् । तृतीये आह *क्रियेति । स्वं हासः । तदन्या च प्रकर-

णादिवशाद्विशेषरूपैवेत्याह *बुद्धिस्थेति । तदनाश्रयत्वेन गृहीतक्रियासमभिव्याहृतचैत्ररूपपदार्थेत्यर्थः । चैत्राभिन्नकर्तृकावधारणविशेष्या हासक्रियेति बोधः । तत्रैव विशेषादन्यदाह *नीलमिति । अत्र शुद्धस्य ग्रहणे विशेषणवैयर्थ्यादाह *नीलेति । सामानाधिकरण्येन तदभावानधिकरणं यत् सरोजं नीलभवनसमभिव्याहृतं तत्प्रकारकेत्यर्थः । नीलाभिन्नसरोजाभिन्नकर्तृकमवधारणविशेष्यं भवनमिति बोधः । तत्रैवेतोऽपि विशेषादाह *ज्ञानमिति । परमते शीत एवेत्यादौ जलाद्यधिकरणकसत्ताकर्तृतावच्छेदकस्पर्शत्वावच्छेदेन शीतान्यतादात्म्यव्यवच्छेदवतोऽन्वयो वाच्यो व्युत्पत्तिवैचित्र्याद् अन्यथा यत्समभिव्याहृत एवस्तदन्वितान्ययोगव्यवच्छेदस्य तदन्वयिन्येव प्रतीतेः गन्धे पृथिव्यन्यावृत्तित्ववत्तत्र शीतान्यतादात्म्यव्यवच्छेदवान् स्पर्शो जलवृत्तिरित्यर्थापत्त्या शीतएव स्पर्शो द्रव्ये इत्यस्याप्यापत्तेरिति गौरवान्तरं सूचयन् द्वितीये विशेषादाह *शीत एवेति । *शीतेति । स्वाभाविकेत्यादिः । तदनधिकरणशीतस्पर्शसमभिव्याहृतजलरूपपदार्थेत्यर्थः । जलाधिकरणकावधारणविषयशीताभिन्नः स्पर्श इति बोधः । परमते चैत्रेणैवेत्यादौ स्वेतरकारकान्वितक्रियात्वावच्छेदेन चैत्रान्यतादात्म्याभाववत्कर्तृकत्वप्रत्ययो व्युत्पत्तिवैचित्र्यादिति नोभयदृश्यमाने तथा प्रयोगइति सूचयन् कर्मप्रत्यये विशेषादाह *चैत्रेणैवेति । अन्यत्र समभिव्याहारादाह *सकलेति । बुद्धिस्थयावदित्यर्थः । नान्येनेत्यर्थः । नान्येनेत्यादिप्रतिनिर्देशात् । अवधारणविषयचैत्रकर्तृकमेतत्कर्मकं दर्शनमिति बोधः । परमते घटत्वमित्यादौ पृथिवीवृत्तिपदस्य पृथिव्यन्यतादात्म्याभाववद्वृत्तिपरता एवस्तात्पर्यग्राहकः । समासे उपसर्जनस्य पृथिवीपदार्थस्यान्वयासम्भवात् । तथात्वे वा व्युत्पत्तिवैचित्र्यस्वीकार इति, तत् सूचयन् विशेषात् तत्रैवाह *घटत्वविशेष्यकज्ञानेति । तद्वृत्तित्वेन गृहीतपृथिवीवृत्तिसमभिव्याहृतघटत्वरूपपदार्थविशेष्यकेत्यर्थः । घटत्वप्रकारकेत्यपपाठः । पृथिवीवृत्तित्वस्य घटत्वेप्रसिद्धत्वात्तद्वृत्तित्वं तत्रेतिज्ञानवन्तं प्रति न प्रयोगः, किन्तु तत्र अन्यवृत्तित्वज्ञानवन्तं प्रत्येव प्रयोग इति पृथिव्यवृत्ति नेति न प्रतिनिर्देश इत्याह *नान्यवृत्तीति । *अवधारणेति । पृथिवीत्वसामा-

नाधिकरण्येनेत्यादिः । परमते ऋतावित्यत्र क्रियासङ्गतत्वे ऽन्ययोगव्यवच्छेदबोधकत्वेन ऋतुकालाधिकरणकभार्याकर्मकस्वकर्तृकगमनाभावाभावः प्रेरणाविषय इति बोधे एवार्थविशेष्यके प्रत्ययानामिति व्युत्पत्तिभङ्गः, प्रागुक्तदोषाक्रान्तत्वं चेत्यत आह *ऋताविति । स्वपदं स्पष्टार्थम् । स्वमुपगमनम् । तदनाश्रयत्वेन गृहीतकर्त्तृकारकेत्यर्थः । *स्वभार्येति । स्वकर्त्तृकमित्यपि बोध्यम् । *तस्य—उपगमनस्य । ननु तस्य तत्त्वे एव किं मानमत आह *इष्टस्येति । सन्निधौ स्थिते इति शेषः । *तेन—अगमने दोषश्रवणेन । अत एकऋतौ गमने ऽपि ऋत्वन्तरे प्रत्यवायपरिहारार्थं प्रवृत्तिः । एवं च ऋतुकालिकविशेषणतया भार्याकर्मकगमनाभावः कर्तृतासम्बन्धेन स्वनिष्ठः प्रत्यवायसाधनमिति बोध्यम् । नन्वेवमवधारणानां नानात्वेन तद्वदनेकशक्तिकल्पनापत्तिरत्रापीत्यत आह *सकलेति । प्रागुक्तरीत्यैव तत्सिद्धिः । परमतेनाह *अखण्डोपेति । एवाघटितपरिसंख्योदाहरणे ऽपि तत्रैवसमभिव्याहारे तथैव बोधात् एवमेवेत्याह *पञ्चपञ्चेति । इत्यादावपीत्यर्थः । अतिप्रसक्तत्वादितरत्वावच्छेदायाह *बुद्धिस्थेति । उभयं पञ्चत्वविशेषणम् । तद्रूपसंख्येत्यर्थः । स्वं तादृशपञ्चत्वम् । तदसम्बन्धि यद् भक्ष्यत्वं तद्वान् यः पञ्चपञ्चनखसमभिव्याहृतभक्ष्यपदार्थस्तत्प्रकारकेत्यर्थः । नन्वितरस्तेषामर्थतस्तत्त्वलाभेऽपि रागतः प्राप्तस्य न निवृत्तिरिति तत् स्यादेवेत्यनिष्टमेवात आह *एवेति । तत्प्रयोगे इदम् । तदभाव आह *लक्षणेति । प्रापकप्रमाणं रागः । *बोधितस्य-भक्षणस्य । *तदातिरिक्तेति । तादृशपञ्चपञ्चनखान्येत्यर्थः । अन्यथाऽदृष्टार्थमपूर्वविधौ तदकरणे प्रायश्चित्तापत्तिरनुक्तान्यभक्षणे तदुक्त्यसाङ्गत्यापत्तिश्चेति भावस्तदाह *इष्टेति ॥ ७३ ॥

यत्तु एवकारार्थो ऽन्ययोगव्यवच्छेदः । 'पृथिव्यामेव गन्धः' इत्यादौ पृथिव्यामित्यस्य एवकारार्थे ऽन्यत्वे गन्धे चान्वयः । पृथिव्यन्यावृत्तिः पृथिवीवृत्तिर्गन्धः इत्यादिक्रमेण बोधः । विभक्त्यर्थरहितस्यापि पृथिवीपदार्थादेरन्वयो व्युत्पत्तिवैचित्र्यादिति ।

तन्न । अनेकव्युत्पत्तिवैचित्र्यकल्पनाया अन्याय्यत्वात् । तादृशेऽर्थे विभक्तेः साधुत्वमात्रार्थिकायाः शास्त्रेणानन्वाख्यानाच्च । विभक्तिं विना तन्त्रेणोच्चारणासम्भवाच्च । पृथिवीवृत्तित्वस्य मानान्तरेण लाभाच्च ।

अत एव एवकारसमभिव्याहृते न विधेयतायां तात्पर्यं किन्त्वार्थ्यामन्यनिवृत्तावेव इति तान्त्रिकाः ।

एवञ्च एवकारसमभिव्याहारेऽपि आर्थ्येव परिसंख्या, सा चोपात्तातिरिक्ते समभिव्याहृतपदार्थाभावप्रत्ययरूपा । यथा 'पार्थ एव धनुर्धरः' इत्यादौ 'नान्यो धनुर्धरः' इति। सच नैवकारघटितवाक्यार्थः, किन्तु आर्थ एव । उक्तरीतेः ।

शाब्दी तु 'त्वन्मुखं त्वन्मुखेनैव' इत्यादौ । "पञ्च पञ्चनखा भक्ष्याः" इत्यादावप्युक्तरीत्या आर्थ्येव परिसंख्या । अत एव "युष्मद्युपपदे" इत्यादौ "नियमार्थोऽयमारम्भः । युष्मदि मध्यम एव युष्मद्येव मध्यमः" इति चेति भाष्ये उक्तम् । तेन हि नियमशास्त्राणामेवकाराभावेऽपि तदर्थान्तर्भावेण बोधकत्वं सूचितम् ।

यत्तु पञ्चपदस्य पञ्चातिरिक्ते लक्षणा भक्ष्यपदस्य भक्ष्यत्वाभाववति, तेन पञ्चातिरिक्ता भक्ष्यत्वाभाववन्त इति बोध इति । तन्न ।

पदद्वये लक्षणापेक्षया उक्तप्रकारस्यैव न्याय्यत्वात् ।

किञ्चैवं शास्त्रप्राप्तस्य शास्त्रीयनियमे विकल्पवा-

रणाय सामान्यविशेषन्यायेन विधेस्तद्विषयत्वाभावकल्पनामित्यतिगौरवम् ।

'किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः' इत्यार्थपरिसङ्ख्योदाहरणमिति प्रकाशादिग्रन्थासङ्गतेश्च । त्वद्रीत्या हि द्युसरित्सविधातिरिक्तमनासेव्यमिति बोधेन तस्याः शाब्दत्वात् । अत एव शाब्दपरिसंख्यायां "किं भूषणं सुदृढमत्र यशो न रत्नम्" इत्युदाहृतम् ।

भाष्यकारोऽपि पस्पशायामाह "किं शब्दापशब्दयोरुभयोरुपदेशः कार्यः उतान्यतरोपदेशः ? अन्यतरोपदेशेन कृतं स्यात् । तद्यथा भक्ष्यानियमेनाभक्ष्यप्रतिषेधो गम्यते । पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यते एतत् अतोऽन्ये न भक्ष्या इति । अभक्ष्यप्रतिषेधेन भक्ष्यानियमः । तद्यथा अभक्ष्यो ग्राम्यकुक्कुट इत्युक्ते गम्यते एतत् आरण्यो भक्ष्य इति । एवमिहापि गौरित्युपदिष्टे गम्यते एतत् गाव्यादयः अपशब्दा इति । गाव्यादिषु चोपदिष्टेषु गम्यते एतत् गौरित्ययं शब्द इति" इति ।

तत्र सुशब्दोपदेशः साधुत्वबोधनद्वारा प्रयोगविध्यर्थः । अपशब्दोपदेशस्तत्प्रतिषेधार्थः । अत्र "गम्यते" इत्युक्त्या तस्य तज्जन्यशाब्दबोधाविषयत्वं स्पष्टमेवोक्तम् ।

किंच लक्षणावादिमते दृष्टान्तदार्ष्टान्तिकयोर्महद्वैषम्यम् । नियमेनेत्यस्य चोद्देशेनेत्येवार्थः संदर्भबलाद् गम्यते । शब्दान्तरेणानुपदेशात् अर्थतो लाभा-

च अयं न मुख्य उपदेश इति नियमपदप्रयोगः । ईदृश इतरनिवृत्तिफलक उपदेश एव च नियमपदेनोच्यते इति प्रामाणिकाः ॥ ७४ ॥

(कुं० टी०) *अन्ययोगव्यवच्छेद इति । शङ्खः पाण्डुर एवेत्यत्र पाण्डुरान्ययोगव्यवच्छेद इत्यादि । *रहितस्यापीति । पृथिव्यन्येत्यत्र सप्तम्यर्थाप्रतीतेः । *मानान्तरेण—इतरवृत्तित्वनिषेधद्वारकेण । *परिसंख्यानिवृत्तिः । *सच—अन्ययोगव्यवच्छेदश्च । *नैवकारेति । एवकारघटितवाक्यप्रयोगगम्यो नेत्यर्थः । *त्वन्मुखमिति । अत्र 'नान्येन' इतिशब्दप्रयोगात् शाब्दी । *पञ्चेति । पञ्चनखाः—शल्यकशशश्वाविद्गोधाखड्गकच्छपा भक्ष्या इत्यर्थः । शल्यको वराहविशेषः, यस्य बाणाकाराणि लोमानि । श्वावित् शल्यः, यस्य चर्मणा तनुत्राणं क्रियते । *उक्तप्रकारस्यैवेति । पञ्चपदस्य लक्षणेत्युक्तस्यैवेत्यर्थः । *किञ्चैवमिति । शास्त्रस्य साक्षान्निषेधबोधकत्वे इत्यर्थः । *शास्त्रप्राप्तस्येति । "शेषो घ्यसखि" इत्यनेन प्राप्ताया घिसंज्ञायाः "पतिः समासे" इत्यनेन निषेध इत्यर्थः । *अतिगौरवमिति । तस्मात् प्राप्ताया एव घिसंज्ञायास्तत्र पुनर्विधानेन अर्थादितरनिवृत्तिः सिद्ध्यतीति भावः । *तस्याःपरिसङ्ख्यायाः । *अन्यतरोपदेशइति । पस्पशायां स्पष्टम् । तत्स्वीकरोति *कृतं स्यादिति । इष्टं सिद्धं भवेदित्यर्थः । यथा अश्वरशनायां गर्दभरशनायां च मन्त्रपाठः प्राप्तः अश्वाभिधानीमित्युक्तेर्गर्दभरशनातो निवर्तते तद्वत् । *दृष्टान्तदार्ष्टान्तिकयोः—भाष्यकारोक्तयोः । संदर्भबलमेवाह *शब्दान्तरेणेति । नियमस्य विधानसापेक्षत्वादिति भावः । नन्वेव-

मुपदेशशब्द एव कुतो न प्रयुक्त इत्यत आह *अर्थत इति। इतरनिवृत्तौ सत्यां तस्यैव लाभादिति भावः। ननु इतरनिवृत्त्यभावे कथं भाष्यकृतोक्तं भक्ष्यनियमेनेति अत आह *नियमेनेत्यस्यचेति ॥ ७४ ॥

(क०टी०) नव्यनैयायिकोक्तिंखण्डयति *यत्त्विति। सर्वत्रेति शेषः। *व्यवच्छेदः-स एव। तेन तदुभयव्यावृत्तिरिति नानेकशक्तिकल्पनं तद्वत्। अन्ययोगश्चान्यसम्बन्धमात्रम्। एवं च नीलं सरोजमित्यादौ आख्यातस्याश्रये लक्षणया नीलभवनवदन्यत्वव्यवच्छेदः सरोजत्वसामानाधिकरण्येन प्रतीयते, शङ्खः पाण्डुर एवेत्यादौ शङ्खत्वावच्छेदेन पाण्डुरान्यत्वव्यवच्छेदबोधः। पार्थ एवेत्यादौ धनुर्धरत्वावच्छेदेन पार्थान्यत्वव्यवच्छेदबोधः। ऋतावित्यत्र तादृशगमनवदन्यत्वव्यवच्छेदबोधः। पृथिव्यामित्यादौ पृथिव्यन्यवृत्तित्वव्यवच्छेदबोधो गन्धादाविति तदाकूतम्। तदाह *पृथिव्यामिति। *गन्धेचेति। अत एव पृथिव्यामेवाकाश इति न, तस्यावृत्तित्वात्। यत्पदसमभिव्याहारेण यः सम्बन्धः प्रतीयते एवसमभिव्याहारेपि तस्यैवान्ययोगस्य व्यवच्छेदधीरिति न दोषः। ननु सप्तम्यर्थविशेषणतयोपस्थितपृथिव्याः कथमेवार्थान्यत्वेऽन्वयः एकविशेषणत्वेनोपस्थितस्यान्यत्रान्वयस्याव्युत्पन्नत्वादत आह *विभक्तीति। एवस्थले तद्व्युत्पत्तिसङ्कोच इति भावः। प्राचीनमते तु नायम् एवस्य द्योतकत्वेन पृथिव्यन्यतादात्म्याभाववतो लक्षणया पृथिवीपदार्थत्वेन सप्तम्याः साधुत्वार्थकत्वेन पृथिव्यन्यतादात्म्याभाववद्वृत्तिर्गन्ध इति बोधेनैवोपपत्तेः। एतदर्थमियाऽस्योल्लेखः एवार्थबलादेव। समभिव्याहृतपदार्थतावच्छेदकावच्छेदेन तद्वृत्तित्वस्य बोधान्न पृथिव्यामेव रूपमिति प्रयोगः। पृथिव्यामेव घटत्वं घटत्वं पृथिवीवृत्त्येवेति तु भवत्येवोक्तरीत्येति बोध्यम्। प्राचीनमतसाधारणं दोषमाह *अनेकेति। *तत्र-प्राचीनमते। शीत एवेत्यादौ यथा तत् तथोक्तम्। पार्थ एवेत्यादौ धनुर्धराभिन्नः पार्थान्यतादात्म्याभाववानिति बोधेन नव्यमतोक्तव्युत्पत्तिवैचित्र्यम्। शङ्खे पाण्डुरत्वमेवेत्यादावप्येवं पाण्डुरत्वान्यतादात्म्याभाववच्छंख-

वृत्तीति बोधात् । शङ्खः पाण्डुर एवेत्यादावपि शङ्खत्वावच्छेदेन पाण्डुरतादात्म्याभाववान् शङ्ख इति बोधेन, एवं नीलं सरोजं भवत्येवेत्यादौ तु उक्त एव बोध इति तत्र स्फुटमेव । एवमुभयमतेऽपि अन्ययोगव्यवच्छेदादौ अन्यादिषु भिन्नशक्तावधिकगौरवम्, विशिष्टशक्तावर्थ्यवम् । घटादन्य इत्यादाविवैकदेशान्वयो व्युत्पत्तिवैचित्र्यादेकपदजोपस्थितिविषयाणामन्वयो ऽपि मिथो व्युत्पत्तिवैचित्र्यादेवेति बोध्यम् । एतेन व्यवच्छेदे शक्तिरन्यत्र लक्षणेत्यपि नव्यनैयायिकोक्तमपास्तम् । साधारणमेव दोषान्तरमाह *तादृशइति । ननु घटान्पश्येत्यादिवदत्र प्रातिपदिकतन्त्रेण निर्वाहोऽत आह *विभक्तिमिति । तत्र सहविवक्षाविषयत्वेन तत्सत्त्वेऽप्यत्रासहविवक्षाविषयत्वेन न तथेति भावः । एतेनावृत्तिप्रयुक्तं गौरवमप्यत्र मते सूचितम् । अभ्युपेत्येदम् । वस्तुतो ऽफलत्वान्नैव सेत्याह *पृथिवीति । गन्धे इत्यादिः । मानान्तरं प्रत्यक्षम् । तथाचावधारणविषयपृथिवीवृत्तित्ववान्गन्ध इत्येवोक्तरीत्या बोधः । अवधारणं च पृथिव्यन्यावृत्तित्वेन गृहीतसमभिव्याहृतगन्धविशेष्यकज्ञानरूपं तत् । एतद्दोषचतुष्टयेन पार्थ एवेत्यादौ पार्थो धनुर्धरः पार्थान्यो न धनुर्धर इत्यादिर्बोध इत्यप्यपास्तम् । *अत एव—तत्र तस्य ततो लब्धत्वादेव । उक्तरीत्या शाब्दत्वासम्भवादाह *आर्थ्येवेति । *एवं च-तस्यार्थत्वे च । आपिना तदसमभिव्याहृतपञ्चपञ्चेत्यस्य समुच्चयः । तत्स्वरूपमाह *साचेति । परिसंख्याचेत्यर्थः । तस्यास्तत्त्वमेवोपपादयति *सचेति । निषेधइत्यर्थः । नन्वेवं सिद्धान्ते शाब्द्युच्छेदापत्तिः । परमते तु नायं दोषः, एवासत्त्वासत्त्वाभ्यां तद्विभागसम्भवादत आह *शाब्दीत्विति । *इत्यादौ-इत्यादावेव । आदिना किं भूषणमित्यादिः । अपिसमुच्चेयमाह *पञ्चेति । *अतिरिक्तेति । प्राप्तानुवादवैयर्थ्येन तस्य तत्र लक्षणयेत्यर्थः । नन्वेवाभावे तदर्थघटितलक्षणायामेव न मानमिति कथं तथा परिसंख्या ऽत आह *अत एवेति । प्रायेणात्र शास्त्रे नियमपदेन परिसङ्ख्यैवोच्यते इति भावः । *तदभावेति । तदभावेऽपि तथार्थाङ्गीकारेणेत्यर्थः । तदेवाह *तेनहीति । भाष्यव्याख्यानेनेत्यर्थः । मीमांसकधर्मशास्त्रकारादयस्तु इयं शाब्दी परिसङ्ख्येत्याहुस्तन्मतं खण्डयति *यत्त्विति । "युष्मद्युपपदे" इत्यादौ दोषमाह *किञ्चेति । यत-

इति शेषः। *एवम्—तद्वदुशाब्दीत्वस्य तत्रार्थापत्तौ। नियमशास्त्रस्य निषेधपरत्वादाह *शास्त्रीयेति। *किमेति। किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः। किमाराध्यम् पुण्यं किमभिलषणीयञ्च करुणा यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवतीति एतच्छेषः। *आर्थेति। प्रश्नपूर्वकेत्यादिः। एवमग्रे ऽपि। आदिना प्रदीपादि। *अत एव—तस्या आर्थत्वादेव। *किम्भूषणमिति।

किं कार्यमार्यचरितं सुकृतं न दोषः। किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकमिति एतच्छेषः। *उदाहृतमिति। प्रकाशकारादिभिरिति भावः। तत्र भाष्यविरोधमपि सूचयन्नाह *भाष्येति। *कृतम्—इष्टम्। *इतीतीत्यत्राहेत्यस्यान्वयः। *तत्र—तयोर्मध्ये। *तादिति। तत्प्रयोगेत्यर्थः। यथा भाष्यतः प्रकृतलाभस्तदाह *अत्रेति। भाष्ये इत्यर्थः। अयं भावः-शब्दस्य वृत्तित्रयं अर्थस्य तु व्यञ्जकत्वमेवेति प्रकाशादौ स्पष्टम्। एवं च यत्र भाष्ये शब्दप्रस्तावस्तत्र शक्यत्वमेवाभिमतम्, इहत्वर्थप्रस्तावाद्व्यञ्जकत्वमेव। एवं च गम्यते इत्येतदभावे ऽपि तल्लाभे तदुक्त्या स्पष्टं तत्प्रतीतिः। एतेन विप्रतिषेधसूत्रस्थभाष्यं विरुद्धमित्यपास्तमिति। दोषान्तरमाह *किञ्चेति। *लक्षणेति। पदद्वयेत्यादिः। एकार्थतो ऽर्थान्तरप्रतीतेर्दार्ष्टान्तिकप्रतिपाद्यायास्तथा सति दृष्टान्ततोऽलाभादित्यर्थः। स्वमते साम्यमाह *नियमेनेति। दार्ष्टान्तिके तथोक्तेराह *सन्दर्भेति। उपदेशः आद्योच्चारणमित्याशयेनाह *शब्दान्तरेणेति। नन्वेवं तथैव कुतो नोक्तमत आह *अर्थत इति। न केवलमत्रैवेत्थं किन्तु तद्विषये सर्वत्रैवेत्याह *इहेति। शब्दतोऽप्राप्तिरर्थतः प्राप्तिर्यस्य तद्बोधक इत्यर्थः। लोके इति शेषः॥ ७४॥

परंतु "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र लिङ्गाद्गर्दभरशनायामपि प्राप्तस्य मन्त्रस्यापूर्वविधिद्वारा परिसङ्ख्या।

तदुक्तं तन्त्रवार्त्तिके,

अपूर्वविधिरेवायमतो मन्त्रश्च निश्चितः।

परिसंख्याफलेनोक्ता' इति,

आलङ्कारिका अपि परिसङ्ख्याप्रकरणे प्रमाणान्तरेण प्राप्तस्यैव वस्तुनः पुनः शब्देन प्रतिपादनं प्रयोजनान्तराभावात् स्वतुल्यान्यव्यवच्छेदं गमयन्तीति ।

भागवते ऽपि—

लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्नहि तत्र चोदना ।

व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा" ॥ इति ।

नित्या रागतः प्राप्ताः । जन्तोः प्राणिमात्रस्य । अतस्तत्र चोदनाविधिर्नास्ति ।

नन्वेवम् "ऋतौ भार्यामुपेयात्", "हुतशेषं भक्षयेत्" "सौत्रामण्यां सुराग्रहान्गृह्णाति" इत्येतेषां वैयर्थ्यम् । भार्यां विवाहितामित्यर्थः । तत्राह-व्यवस्थितिरिति । तेषु पुनः प्रापणमित्यर्थः। रागतो नित्यप्राप्तत्वात् नैते नियमविधयः, पाक्षिक्यां हि प्राप्तौ नियमो भवति, किन्तु प्राप्तस्याप्यर्थस्य पुनःप्रापणमनर्थकमित्यपूर्वविधिद्वारा अन्यनिवृत्तिः फलति तदाह-आसुनिवृत्तिरिति ।

भाष्येऽपि नियमपदेनाभ्यनुज्ञा "ऋतुस्नातां तु यो भार्याम्" इति दोषश्रवणं तु मनसि कामे सत्यपि तस्यां द्वेषादिनाऽनुपगमे बोध्यम् ।

एवं च "ऋतौ भार्याम्" इत्यस्य ऋतावेव, तत्र भार्यामेव, तत्र तामुपेयादेव, इत्यर्थत्रये तात्पर्यम् ।

अत एव गृहस्थस्यानृतौ अनुपगमे ब्रह्मचर्यमुक्तम् । अविवाहितागमने, ऋतौ भार्यागमनाभावे प्रायश्चित्तं प्रोक्तं स्मृतिषु ।

तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते ।

इत्यस्य शाब्दी आर्थी चेत्यर्थः ।

"इजादेः सनुमः" इतिसूत्रे कैयटोऽप्याह—नियमे प्राप्तबाधः सिद्धस्य पुनरुपादानात्, अनुवाददोषश्चेति ।

"यस्य हलः" इति सूत्रेऽपि नियमे श्रुतार्थत्यागेनाश्रुताया अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति ।

"अनुपराभ्यां कृञः" इति सूत्रे भाष्ये ऽपि "प्रतिषिध्यते तत्र परस्मैपदम् । "स्वरितञितः कर्त्रभिप्राये क्रियाफले" आत्मनेपदं भवति" इत्युक्तम्, तेन हि विधेरेव प्रतिषेध आर्थं फलमिति स्पष्टमेवोक्तम् ।

एवकारोऽपि स्वसत्त्वे स्फुटं तदर्थद्योतक एव, नतु तत्समभिव्याहारेऽपि शाब्दबोधे तद्भानम् । तत्समभिव्याहारेण मनसा बुध्यमानत्वमपि द्योतकत्वम् । एवकारासमभिव्याहारे ऽपि अनुवादबलादेव तदर्थलाभः ।

शाब्दपरिसङ्ख्या तु—

त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येन केनचित् ।

किम्भूषणं सुदृढमत्र यशो न रत्नम्,

इत्यादिष्वेव । "युष्मदि मध्यम एव युष्मद्येव मध्यमः" इति भाष्येणैवकारसमभिव्याहारासमभिव्याहारयोस्तुल्यार्थत्वमेव सूचितमित्याहुः ।

पक्षद्वये ऽपि स्वार्थहानिपरार्थकल्पनाप्राप्त-

बाधरूपदोषत्रयं तु यथाश्रुते प्रतीयमाने स्वार्थे तात्पर्याभावात्, तात्पर्यतस्त्यागोऽन्यार्थे तात्पर्याङ्गीकारेण तात्पर्यतः परार्थकल्पना प्राप्तबाधश्चेति सूपपादम् ।

ननु "व्रीहीनवहन्ति" इत्यादौ पक्षप्राप्तस्य नियमे अवहननेनैव व्रीहीन् संस्कुर्यात् न नखविदलनादिनेति प्रतीतेस्तत्रापि त्रैदोष्यं प्राप्तमिति परिसङ्ख्यायाः तस्य लघुत्वव्यवहारानुपपत्तिरिति चेन्न ।

पक्षे स्वरसत एव तस्याप्राप्त्या क्लृप्तबाधकल्पनम्। परिसङ्ख्यायां तु नित्यप्राप्तस्याक्लृप्तबाधस्यैव बाधकल्पनामिति ततः परिसङ्ख्यायाः गुरुत्वात् । क्लृप्तप्राप्तिकस्यैव च प्राप्तिबाधनेनापूर्वविधेरपि नियमस्य लघुत्वम् । अस्मच्छास्त्रे नियमस्तु आत्मनेपदविधायके मध्यमादिविधायके च प्रकृत्युपपदनियमरूपः । तद्विषये हि प्रत्ययानां पाक्षिकी प्राप्तिः ।

अत एव "युष्मदि–" इतिसूत्रे उपपदनियमं प्रकृत्य समे देशे यजेतेतिवत् पाक्षिक्यां प्राप्तौ नियम इति कैयटः ।

नच तत्सूत्रे भाष्योक्तप्रत्ययनियमानुपपत्तिः प्रत्ययनियमस्य परिसङ्ख्यात्वेन गुरुत्वादिति वाच्यम् ।

एतदनपेक्ष्येतरत्फलमस्ति नवेत्येतावन्मात्रेण प्राप्तबाधसत्त्वेन द्वयोः समतामाश्रित्य भाष्ये विचारसत्त्वेनादोषात् ।

एवञ्च "पञ्च पञ्चनखाः" इत्यादेः, "पतिः समास एव" इत्यादेश्च विधिमुखेनैव प्रवृत्तिः । अव-

धारणविषयत्वबोधात् पुनरनुवादाद्वा सामान्यप्रापकप्रमाणस्य तदतिरिक्ताविषयकत्वरूपः सङ्कोचः। तेन च आर्थस्तत्कार्याभावः। तमादाय नियमशास्त्रस्य निषेधत्वव्यवहारः, नान्यत्रेत्यादिप्रतिनिर्देशश्चेत्यन्यत्र विस्तरः ॥ ७९ ॥

धात्वर्थनिपातार्थनिरूपणम् ।

(कुं०टी०) *इमामगृभ्णन्निति। चितिनिर्माणार्थं गर्दभेनाश्वेन च इष्टका आनीयन्ते तत्र "इमामगृभ्णन् रशनाम्" इति लिङ्गात् गर्दभरशनायामपि मन्त्रः प्राप्तः "अश्वाभिधानीम्" इत्यनेन निवर्त्त्यते । अत एवोक्तम्—

तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते । इति ।

इमां रशनां दर्भमयीम् ऋतस्य यज्ञस्य प्रारम्भे प्रजापतिप्रभृतयः गृहीतवन्तः सा रशना अस्माकं यज्ञे उत्पन्नेति मन्त्रार्थः ।

*अपूर्वविधिद्वारा—अश्वरशनाविधिद्वारा । *परिसंख्या—इतरनिवृत्तिः । *फलेनेति। अर्थादित्यर्थः । व्यवायः, स्त्रीसेवा । आमिषं मांसम् । एतेषां प्राप्तिः स्वभावादेव । अतः ऋतौ स्वभार्यामुपेयादित्यादिना इतरनिवृत्तिः प्रत्याय्यते । *आसुइति । प्रेरणासु इत्यर्थः । *पाक्षिकत्वाहीति । "व्रीहीनवहन्ति" इत्यत्र नखविदलनपक्षे ऽवघातो न प्राप्त इति पाक्षिकप्राप्तौ अवघातेनैवेति नियमः । *भाष्येऽपीति । भक्ष्यनियम इत्यस्य भक्ष्याभ्यनुज्ञा इत्यर्थ इति भावः । *अनुपराभ्यामिति । आत्मगामिनि क्रियाफले परस्मैपदस्य "स्वरित–" इति निषेधादयं विधिः। आत्मनेपदे विहितेऽर्थात्परस्मैपदनिषेध इति भावः ।

*विधेरेवेति । विधानस्य फलमार्थः प्रतिषेध एवेत्यर्थः । *सत्त्वे-एवकारसत्त्वे । *तद्भानम्-इतरनिवृत्तिभानम् । ननु इतरनिवृत्तेरभाने द्योत्यत्वं कथमत आह *तत्समभिव्याहारे-तत्समभिव्याहारे सति मानसबोधोदयादेव च द्योतकत्वमित्यर्थः ।

ननु प्रथमकल्पे परेत्वित्यादिकल्पेच परिसंख्याया अर्थलब्धत्वाद्दोषत्रयप्रवादासङ्गतिरत आह *दोषत्रयंत्विति । सूपपादमित्यत्रान्वयः । *तात्पर्याभावादिति । स्वार्थे तात्पर्यं नास्तीत्येतावतैव स्वार्थत्याग इत्यर्थः । *पक्षेस्वरसतएवेति । अवघातपक्षे स्वत एव नखविदलनमप्राप्तम् । परिसंख्यायां तु गर्दभरशनायामवश्यं प्राप्तस्यैव बाधः कल्प्यते इति भेदः । अक्लृप्तः बाधो यस्येति बहुव्रीहिः । *प्रत्ययनियमस्येति । युष्मद्युपपदे एव मध्यमः अनुदात्तङिद्भ्य एवात्मनेपदमित्याकारकस्येत्यर्थः । *एतदनपेक्ष्य—गुरुत्वनपेक्ष्य ।

इति श्रीभट्टाचार्यकृष्णमित्रकृतायां कुञ्चिकायाम् धात्वर्थनिपातार्थनिर्णयः ॥ ७८ ॥

(क० टी०) स्वोक्तं लक्षणांविनेतिलाघवात् सिद्धान्ततत्त्वमाह *परेत्विति । *लिङ्गात्—रशनामात्रप्रकाशनसामर्थ्यरूपात् । शब्दान्तरादप्राप्तेराह *अपूर्वेति । तल्लक्षणे तथैव विवक्षितमिति भावः । *आदत्ते इति । लेट् । अनेन मन्त्रेण तामादद्यादित्यर्थः । *निश्चितः—निश्चितार्थबोधकः । एवं भट्टसंमतिमुक्त्वा मम्मटादिसंमतिमप्याह *आलङ्कारिकाइति । आहुरिति शेषः । व्यवायः सुन्दरीगमनम् । *मद्यसेवेति । तथाच तैत्तिरीयब्राह्मणम्—"ब्राह्मणं परिक्रीणीयादुच्छेषणस्यं पातारं यदि ब्राह्मणं न विन्देत वल्मीकवपायामवनमयेत् सा तत्र प्रायश्चित्तिः" इति । ब्राह्मणो

द्यात्हुत्था उच्छेषणस्य पाता । अकरणे प्रत्यवायाभावरूपनित्यत्वाभावादाह *रागत इति । तथोक्तिस्वारस्यादाह *प्राणीति । अन्यथा तिरश्चां विधिनिषेधाविषयत्वात् तत्र प्रवृत्तिर्न स्यादिति भावः । तदाह *अत इति । ह्यर्थोऽयम् । यौगिकव्यवच्छेदायाह *विवाहेति । *तेषु—व्यवायामिषमद्येषु । विवाहादिहेतुना विशेषेण शब्दतः अवस्थितिः प्रापणमिति शब्दार्थस्तदाह *तेष्विति । व्यवस्था नियम इति श्रीधरस्वाम्युक्तं खण्डयति *रागत इति *फलति । फलिततां सूचयति *आसु—तेषां सेवासु । नन्वत्र पक्षे न तादृशोपदेश इति भाष्यविरोधो ऽत आह *भाष्येऽपीति । नन्वेवं दोषश्रवणमनर्थकं विधिवशादेवाकरणे प्रत्यवायलाभात्, अत आह *ऋतुस्नातामिति । *एवं च—प्राप्तस्य पुनः प्रापणेनेतरनिवृत्तौच । *अतएव—विनिगमनाविरहेण सर्वत्र तात्पर्यादेव । क्रमेणाद्ये आह *गृहस्थेति । द्वितीये आह *अविवाहितेति । तृतीये आह *ऋताविति । *चोक्तम्—उक्तश्च । स्मृतिष्वित्यस्योभयत्रान्वयात्समुच्चयः । एतेन ऋतावित्यत्र नियम एव युक्तो न परिसंख्येति न्यायविदां भारुचिविश्वरूपविज्ञानेश्वरादीनां चोक्तिः परास्तेति स्पष्टं मत्कृतमिताक्षराव्याख्यायां लक्ष्म्याख्यायाम् । नन्वेवं मीमांसकोक्तशाब्दतल्लक्षणानाक्रान्तत्वात्कथमस्यास्तत्त्वमत आह *तत्र चेति । उभयलक्षणमिदं न तस्या एवेति भावः । अत्र कैयटसंमतिमप्याह *इजादेरिति । इतरनिवृत्तिफलकसाम्यादत्र शास्त्रे परिसंख्याया अपि नियमपदेन व्यवहारादाह *नियमेति । कैयटान्तरमाह *यस्येति । कैयटः आहेत्यस्यानुषङ्गः । भाष्यसंमतिमप्याह *अनुपरेति । *तत्र—ततः । *कर्त्रभिप्राये क्रियाफले—हियतः इति शेषः । द्वयोरभेदोक्त्या एवमेवासमभिव्याहारे तत्त्वमुपपाद्य तत्समभिव्याहारेऽपि प्रागुक्तभाष्यात् तथैवेत्याह *एवकारोपीति । *तदर्थेति । ततः फलितान्तरनिवृत्तीत्यर्थः । एवव्यवच्छेद्यमेवाह *नत्विति । अपिस्तदभावसमुच्चये । नन्वेवं प्रागुक्तात्रिविधद्योतकत्वासम्भवात्कथं तथोक्तिरत आह *तदिति । एवेत्यर्थः । *मानत्वमिति । द्योतकत्वमिति पाठः । तस्यार्थस्य यतस्तथाऽत एव तत् द्योतकत्वमित्यर्थः । एवमन्यदप्यूह्यमित्यस्यैकं लक्ष्यमुक्तं द्वितीयमिदमिति भावः । नन्वेवं तदभावे तत्प्रतीतिर्न स्यादत आह *एवेति ।

अत एव स्फुटमिति तत्रोक्तम् । नन्वेवं शाब्दुच्छेदापत्तिरतः प्रागुक्तमेवाह *शाब्देति । अत्र बीजं प्रागुक्तमेवाह *युष्मदीति । नहिसूचितमिति पाठः । ननु परिसंख्यायां दोषत्रयमिति निर्विवादं तत्राद्यदोषौ पदनिष्ठौ अन्त्यो ऽर्थनिष्ठः । तच्च पदद्वयलक्षणावादिमते एव सम्भवति नात्रेतीदं पक्षद्वयमयुक्तमेवात आह *पक्षद्वयेऽपीति ।

नियमोदाहरणं प्रतिपादयन्नाह *नन्विति । *प्रतीतेरिति । एवसमभिव्याहारे क्षतस्तथैव बोधात् । आदिना–पादमर्दनादि । *स्वरसत इति । स्वभावत एवेत्यर्थः । *क्लृप्तबाधेति । बहुव्रीहिः । एवमग्रेऽपि । इदमेवाभिप्रेत्य न्यायविदादिभिस्तत्र नियम एवोक्त इति बोध्यम् । ननु अयं नखविदलनाद्यसम्भवे ऽपूर्वविधिरेवास्तामिति कथं नियामकत्वमत आह *क्लृप्तेति । "व्रीहीनवहन्ति" इत्यादाविति शेषः । यद्यप्येतत्क्लृप्तलाघवे ऽपि दोषत्रयकल्पनजगौरवमस्त्येव तथाऽप्यदृष्टानुरोधेन तत्र तथैवेति भावः । अत्र शास्त्रे तु तद्गौरवादेव 'विधिनियमसंभवे विधिरेव ज्यायानिति सिद्धान्त इति तद्विरोध इति बोध्यम् । तदेतद् ध्वनयन्नाह *अस्मादिति । यथाक्रममाह *प्रवृत्त्युपेति । *अत एव–इदमभिप्रेत्यैव । *समेइति । "दर्शपूर्णमासाभ्याम" इतिवाक्यविहितयागस्य देशं विना दुष्करत्वेनार्थाद्देशप्राप्तावपि समविषमयोर्युगपद् दुर्ग्रहत्वादिति भावः । *प्रत्ययेति । 'युष्मद्येव मध्यमः' इत्यादीत्यर्थः । *एतदिति । एतेन विधिनियम इत्यस्याप्युक्तरीत्या गतिरुक्तप्रायेति बोध्यम् । उपसंहरन्नाह *एवं चेति । उक्तपक्षद्वयस्य युक्तत्वेचेत्यर्थः । एतच्छास्त्रीयपरिसंख्योदाहरणान्तरमाह *पतिरिति । आद्यपक्षेणाह *अवधारणेति । द्वितीयपक्षेणाह *पुनरिति । अर्थतः प्राप्त्याशयेनेदम् । सामान्यप्रापकप्रमाणं यथायथं रागः शास्त्रं च । द्वितीये आह *नान्यत्रेति । अत एव वृद्धाः नियमशास्त्राणां विधिमुखेन प्रवृत्तिः सामान्यशास्त्रसंकोचकता चेति । एतेन तेषां निषेधमुखेनापि प्रवृत्तिरिति प्राचोक्तमपास्तम । पतिरित्यत्रैव विपरीतसंकोचवारणायापि सः । तस्य गतिस्तूक्तैव ।

ननु पञ्चेत्यत्र शशादिषु श्वादिषु च भक्षणस्य पक्षेण यौगपद्येन च प्राप्तेर्नियमपरिसंख्ययोर्मध्ये, आद्ये शशाद्यभक्षणे दोषप्रसङ्गाच्छ्वादिभक्षणे च दोषाप्रसङ्गात् प्रायश्चित्तस्मृतिविरोधाच्च, परिसंख्यायां च द्वितीयदोषाभावे ऽपि आद्यदोषः सिद्धान्तमते तदव-

स्थ इति चेन्न । नियमपक्षे तत्र तात्पर्यमिति तथा, अत्र तु न तत्र तात्पर्यमिति भेदात् ।

अन्ययोगव्यवच्छेदाद्येवकारार्थ इत्यस्यापि स एवकारोपादानस्य स्फुटं फलमित्येवार्थ इति न कोऽपि दोष इति बोध्यम् । तदाह *इत्यन्यत्रेति । गुरुमञ्जूषादावित्यर्थः ।

इति धात्वर्थनिपातार्थनिर्णयः ।

इति मञ्जूषा-कुञ्चिका-कलासु द्वितीयं प्रकरणं समाप्तम् ।

सूचीपत्रम्

		रु. आ. पा.
१	शुक्लयजुर्वेद संहिता मुलम्	२–०–०
२	" " पदपाठ स्थुलाक्षर	३–०–०
३	" " मध्यमाक्षर	२–०–०
४	" उव्वटमहीधरभास्य सहित (भाग १—२—३—४)	४–०–०
५	कात्यायनश्रौतसुत्र सभास्य संपूर्ण	३०–०–०
६	शतपथब्राह्मण काण्वः १ सभास्य	१५–०–०
७	" काण्वं ७ सभास्य	५–०–०
८	पारस्करगृहसुत्र ४ भास्य सहित	२५–०–०
९	" हरिहरभास्य सहित	१–४–०
१०	शुक्लयजुः प्रातिसाख्य संपूर्ण सभास्य	६–०–०
११	शुक्लयजुः सर्वानुक्रम् सभास्य संपूर्ण	४–०–०
१२	मंत्रार्थदीपीका	२–०–०
१३	शुक्लयजुः वेंदकाण्वसंहीता सायणाचार्य वीरचित भास्य सहित २० अध्यायपर्यन्त	६–०–०
१४	रीगवेद संहीता सभास्य	९०–०–०
१५	अथर्ववेदसंहीता सभास्य	४०–०–०
१६	सामवेद संहीता सभास्य	१०–०–०
१७	तैत्तिरिय संहिता सभास्य	४८-१०-०
१८	गोभिलगृहसुत्रसटीक	२–८–०
१९	तैत्तिरिय यारण्डक सभास्य	९–१–०
२०	ऐतरेय यारण्डक सभास्य	३–०–०
२१	ऐतरेय ब्राह्मण सभास्य	१०-१०-०
२२	तैत्तीरीय ब्राह्मण सभास्य	४–८–०
२३	दशोपनीषद सभास्य	२३–१–०
२४	तैत्तीरीयोपनीषदभास्यवार्तीक सटीक	२–२–०

☞ पत्रादिप्रेषणस्थानम्–हरिदासगुप्तः–

चौखम्बा संस्कृत पुस्तकालय—

बनारससिटी ।

अथ मंजूषायां तिङर्थनिरूपणम्।

धातुप्रकृतिकतिङां कर्तृकर्मरूप आश्रयोऽर्थः। तत्र कर्त्तरि व्यापाराश्रयः। कर्मणि फलाश्रयः। धात्वर्थमात्रानुवादकस्तु भावे तिङ्। "लः कर्मणि च भावे चाकर्मकेभ्यः" इतिसूत्रात्। चेन तत्र कर्त्तुरनुकर्षः। आश्रयत्वं चाखण्डं शक्यतावच्छेदकम्। तस्याश्रयनिरूपकसम्बन्धभेदाद्भेदेऽप्याश्रयतात्वेनानुगमान्न शक्त्यानन्त्यम्। नचाश्रयः प्रथमान्तपदलभ्यः। आश्रयत्वेनालाभात्।

वस्तुतः कर्तृत्वादिशक्तिमत्त्वेनैव स प्रत्ययार्थः।

सा शक्तिश्चाश्रयनिरूपकभेदेऽपि एकैवेति "गत्यर्थलोटा" इति सूत्रे कैयटः।

तन्न। "सप्तमीपञ्चम्यौ कारकमध्ये" इति सूत्रतद्भाष्यतत्रत्यस्वग्रन्थविरोधात्। तस्मात्तद्भेदाद्भिन्नैव सा, कर्तृत्वत्वेन चानुगम इत्येव तत्त्वम्।

यत्तु कृत्याश्रयस्य कर्तृत्वेन तत्र शक्तौ शक्यतावच्छेदकगौरवात् कृतिरेव शक्या। नच "कर्त्तरि कृद्" इत्यतोऽनुवर्त्तमानस्य कर्तृपदस्य कृतिपरत्वे वैषम्यम्। घञादौ सत्त्वभूतो भावोऽर्थः, भूयते इत्यादौ तिङन्तेऽसत्त्वभूतः स इति वैषम्यस्य तवापि सत्त्वेनास्य वैषम्यस्यादोषत्वात्। कृतित्वं च जातिरूपं शक्यतावच्छेदकम्। पचति पाकं करोतीति-

धात्वर्थात्पृथग्विवक्षियमाणत्वेन तस्या धात्ववाच्यत्वात् । तस्मात्तदतिरिक्तव्यापार एव धातुशक्यः । रथो गच्छति, जानाति, यतते इत्यादावाश्रयत्वे लक्षणा । वर्त्तमानत्वाद्यन्वयस्तु सर्वत्र धात्वर्थ एव । कर्माख्यातप्रत्ययस्याश्रयत्वे शक्तिः, फलं तु धात्वर्थ इत्याहुः ।

तन्न । लक्ष्यतावच्छेदकत्वस्येव शक्यतावच्छेदकत्वस्यापि गुरुणि स्वीकारे बाधकाभावात् । अन्यूनानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य गुरुण्यपि सत्त्वात् । अवच्छेदकत्वस्यातिरिक्तपदार्थत्वे मानाभावात् । स्वरूपसम्बन्धस्तत्तत्स्वरूपमेवेति गुरुधर्माणामपि सत्त्वान्न किञ्चित्कल्प्यम् ।

अस्तु वा सम्भवति लघौ गुरौ नावच्छेदकत्वमिति, परन्तु यत्र लघुगुरुरूपाभ्यां बोधो निर्विवादस्तत्रैव लघुधर्मावच्छिन्ने शक्तिर्गुर्ववच्छिन्ने लक्षणेति युक्तम् । प्रकृते च प्रत्ययात्कृतित्वेन बोधः सविवादः धातुत एव तद्बोधात् ।

किञ्चेदं गौरवं गुरुतरभारोद्वहनमिव शरीरस्य, चित्तस्य वा न खेदजनकम्, कर्तृपदादेस्तथाशक्तिग्रहेण तत्र तदननुभवात् । विशेष्यस्यानेकत्वेऽपि तदखेदवच्छक्यतावच्छेदकानेकत्वेऽपि तदखेदात् । अतादृशस्य तु न दुष्टत्वं बीजाभावात् ।

नच इत एवानुपपत्तेर्जातौ शक्तिः, तच्छक्तिज्ञानस्य जातिव्यक्त्युभयविषयकज्ञानत्वं कार्यतावच्छेदकमित्यङ्गीक्रियते इति न दोष इति वाच्यम् ।

सकलव्यक्तीनामानन्त्येन कार्यतावच्छेदककोटौ निवेशासम्भवात् । एवञ्च गोव्यक्त्यन्तरबोधानापत्तिः । ईदृशकारणताज्ञानस्यावश्यकत्वात् । अन्यथा गोत्वेनाश्वादिबोधस्याप्यापत्तेरित्यग्रे वक्ष्यामः ॥ १ ॥

अथ कुञ्चिकायां तिङर्थनिरूपणम् ।

(कुं०टी०) धात्वर्थनिरूपणानन्तरं तिङर्थनिरूपणे सङ्गतिं दर्शयितुमाह *धातुप्रकृतिकेति । *कर्त्तरीति । तिङि सति इति शेषः । *तस्याश्रयेति । त्रयाणां द्वन्द्वः । *न शक्त्यानन्त्यमिति ।

यत्तु स्वरूपसम्बन्धविशेषरूपस्याश्रयत्वस्य शक्यतावच्छेदकत्वमिति । तन्न । अनन्तस्वरूपाणां सम्बन्धत्वे गौरवात् । आधाराधेयभावानापत्तेश्च । अत एवाभावानामधिकरणात्मकत्वमुक्तयुक्त्यैव तार्किका अपि निराचक्षते । अत एव जातिपक्षे सरूपसूत्रं प्रत्याख्यातं भाष्ये । भवन्मते आश्रयौ पाचकौ इत्यादौ जातिवाचकत्वाभावात्तदसङ्गतेः ।
कैयटोक्तिं निराकरोति *साशक्तिश्चेति । *स्वग्रन्थेति । तत्र हि क्रियाभेदेन शक्तिभेदात् कारकमध्यत्वमुक्तम् ।

*तद्भेदात्—आश्रयादिभेदात् । *सा—शक्तिः । *कृतिरेव शक्येति ।

नन्वेवं पाकगोचरनिवृत्त्याख्ययत्नकाले पचतीति प्रयोगापत्तिरिति चेत् ।

अत्राहुः—तस्य पाकानुकूलत्वाभावाददोष इति ।

तन्न । अनुकूलत्वस्य संसर्गतया वाच्यत्वाभावेन विषयताख्यसंसर्गमादायोक्तदोषध्रौव्यात् । तस्मात्प्रवृत्त्यभावातिरिक्तानिवृत्त्याख्ययत्नसत्त्वे मानाभाव इत्येव तत्त्वम् ।

स्यादेतत् । 'आत्मा पचति' इति प्रयोगापत्तिः । नच पाकानुकूलकृतिमानात्मेति योग्यताज्ञानस्य तत्र हेतुत्वकल्पनाददोष इति वाच्यम् । चैत्रत्वादिधर्मितावच्छेदकभेदेन कार्यकारणभावकल्पने गौरवात् । कृतिप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दबोधं प्रति तादृशयोग्यताज्ञानस्य हेतुतया आत्मन्येतदापत्तेर्दुर्वारत्वादिति चेत् ।

अत्र केचित्—अवच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तादृशयोग्यताज्ञानं कारणम्, पचतीत्याद्यानुपूर्व्यास्तु पृथगेव हेतुत्वमिति वदन्ति ।

अत्रेदं चिन्त्यते—अवच्छेदकतासंबन्धेन तथोक्तौ 'चैत्रः स्वर्गं गतः' इत्यादावगतिः । किञ्च 'आत्मा पचति' इति वाक्यस्याव्यावर्त्तकतया न प्रयोगप्रसङ्गः । अत एव 'ईश्वरः पचति' इत्यपि न प्रयोगः, 'कार्यमात्रमीश्वरः करोति' इति च सिद्धम् ।

*जातिरूपमिति । कार्यमात्रं प्रति कृतेः कारणतया कारणतावच्छेदकत्वादिति भावः ।

इदं तु न युक्तम् । प्रागभावेऽपि ध्वंसप्रतियोगित्वरूपकार्यत्वसत्त्वेन तत्र कृतिजन्यत्वाभावेन व्यभिचारात् । ध्वंसस्य कृतिजन्यत्वास्वीकारेण तत्र व्यभिचाराच्च ।

किञ्च संयोगजनकतावच्छेदकक्रियात्वजातेः शक्यतावच्छेदकत्वमन्यत्र तु लक्षणेत्यपि विनिगमनाविरहादस्तु ।

वस्तुतः सर्वाख्यातशक्यतावच्छेदकतयाऽऽश्रयत्वं जातिः । कारणतावच्छेदकतयेत्यादितार्किकपरिभाषायां लाघवस्यैव बी-

जत्वात् । उत्पादादिव्यवहारस्तु निरूपकत्वाद्युत्पत्त्यैव ।

*तस्याः—कृतेः । *सर्वत्रेति । जानात्यादावित्यर्थः । पचतीत्यत्र तु यत्न एव । यत्नविगमे अग्निसंयोगादिरूपव्यापार-सत्त्वेऽपि 'न पचति' इति प्रयोगात् । नन्ववच्छेदकत्वं स्वरूप-सम्बन्धविशेषस्तत्राह *तत्तत्स्वरूपमेवेति । *नाकिञ्चित्कल्प्य-मिति । नातिरिक्तं कल्प्यमित्यर्थः । *किञ्चेदं गौरवमिति ।

अयं भावः-गौरवस्य कथं दूषकत्वं यावद्व्यक्तिज्ञानासम्भवो वा शक्यतावच्छेदकाननुगमो वा । व्यापारव्यापारत्वयोरुभयो-रप्यननुगतत्वेन धातोरपि शक्त्यनापत्तेः । *कर्त्तृपदादेरिति । भवन्मते कर्त्तृपदस्यापि कृत्याश्रये शक्तिर्न स्याद् गौरवादिति भावः । *अतादृशस्य-खेदाजनकस्य । *इत एवेति । व्यक्त्या-नेकत्वदोषादेवेत्यर्थः । ननु माऽस्तु सकलव्यक्तीनां निवेश इत्यत आह *एवं चेति । *अन्यथा-व्यक्तीनामनिवेशे ॥ १ ॥

अथ कलायां तिङर्थनिरूपणम् ।

(क० टी०) अथ तिङर्थं निरूपयन्ससंगतिकं सिद्धान्तार्थ-माह *धात्विति । *तत्र-तयोर्मध्ये । इदमपि प्रायिकमित्याह *धात्वर्थेति । भावे तङिति पाठः । सर्वत्र मानमाह *लः कर्मणिचे-ति । तत्रत्यन्यूनतां निराचष्टे *चेनेति । "कर्त्तरि कृत्" इत्यतः । तत्र फलव्यापारयोर्धातुलभ्यत्वादनन्यलभ्यस्य शब्दार्थत्वादाश्रय-मात्रं तदर्थ इति आश्रयत्वमेव शक्यतावच्छेदकमिति, कर्त्ता ना-ख्यातार्थः, कृतिमतो व्यापारवतो वा कर्त्तृत्वे तत्तद्व्यक्तावनन्त-कृत्यादौ शक्यतावच्छेदकत्वे गौरवादिति नैयायिकाद्युक्तदूषणा-नवकाश इत्याह *आश्रयत्वं चेति । तस्यापि सखण्डत्वे गौ-

रवतादवस्थ्यादाह *अखण्डमिति । उपाधिरूपं, जातिरूपं वेत्यर्थः । द्वितीयातृतीयासप्तमीनां पर्यायतापत्तिवारणायावश्यकमाह *तस्येति । आश्रयः, कर्त्रादिः । निरूपको–व्यापारादिः । सम्बन्धः–साक्षात्परंपरासाधारणः । *शक्त्यानन्त्यम्–शक्यतावच्छेदकानन्त्यप्रयुक्तम् । फलव्यापारवत्तत्राप्यन्यलभ्यत्वान्न शक्तिरित्याह *नचाश्रय इति । *पदेति–तेनैव । इदमपि दीक्षितभूषणादिरीत्योक्तमिति सूचयन् सिद्धान्तमाह *वस्तुतइति । कर्त्रादिषदात्तेनैव रूपेण बोधादाह *कर्तृत्वादीति । एवेनोक्तव्यवच्छेदः । तस्य तदप्रवृत्तिनिमित्तत्वात् । *सः–तदाश्रयः । एतावदेव वैलक्षण्यमन्यत्प्राग्वदेवेति सूचयन्नाह *सेति । *चो ऽप्यर्थे । अत्र सम्बन्धभेदासम्भवात्तत्यागः । जीर्णतदुक्तिं खण्डयति *यत्त्विति । *शक्यतेति । तदानन्त्यप्रयुक्तशक्त्यानन्त्यजगौरवादित्यर्थः । *शानजादाविति । आस्यमाने शय्यमाने गत इत्यादावित्यर्थः । अत्र पक्षे न तदानन्त्यप्रयुक्तं गौरवमित्याह *कृतित्वश्चेति । नन्वेवमपि तस्या धातुलभ्यत्वेनान्यलभ्यत्वात्कथं तत्र शक्तिरत आह *पचतीति । *तस्याः–कृतेः । उभयान्वयीदम् । नच घञादिसमभिव्याहृतधातोः फले एव शक्तिरिति वाच्यम् । 'ग्रामो गमनवान्' इति प्रतीत्यापत्तेः । 'काष्ठैः पाकः' इत्यादौ कारकान्वयानापत्तेश्च । तव भावनायां कारकान्वयनियमात् । तद् ध्वनयन्नाह *तस्मादिति । कृत्यन्य इत्यर्थः । एवेन कृतिफलव्यवच्छेदः । ननु 'रथो गच्छति' इत्यादौ कृतेर्बाधाद्धात्वर्थानुकूलव्यापार एवाख्यातार्थो वाच्यो ऽत आह *रथइति । आदिना करोति, द्वेष्टि, निद्रातीत्यादि । एवं 'घटो नश्यति' इत्यादौ प्रतियोगित्वे लक्षणेत्यपि बोध्यम् । नन्वेवमपि एकप्रत्ययोपात्तत्वात्कृतावेव कालान्वयापत्तिरत आह *वर्तमानेति । *सर्वत्र–आख्याततसामान्ये । एवेन कृत्यादिव्यवच्छेदवदाश्रयत्वव्यवच्छेदो ऽपि । ज्ञानाद्यसत्त्वे ऽपि स्वरूपसम्बन्धविशेषरूपस्यातिरिक्तस्य वा ऽऽश्रयत्वस्य सत्त्वेन जानातीत्यादिप्रयोगापत्तेः । ज्ञानादिविशिष्टे आश्रयत्वादौ तदन्वये तु विशेषणे ज्ञानादावपि तदन्वयस्यावश्यकत्वेन तस्यैव स्वीकारौचित्यादेति भावः । नन्वेवं कर्माख्याते ऽपि तस्यास्तत्वापत्तिरत आह *कर्मेति । आख्यातशब्दस्य "आख्यातमा-

ख्यातेन" इत्यादौ प्रत्ययान्ते प्रसिद्धेराह *प्रत्ययेति । एवंच कृति-व्यवच्छेदः । फलस्यान्यलभ्यत्वमाह *फलंत्विति । व्यापारावच्छि-न्नमित्यर्थः । एवं व्यापारो ऽपि फलावच्छिन्नो ग्राह्य इति बोध्यम् । ननु बाधकाभावे ऽपि सम्भव एव नात आह *अन्यूनेति । न-न्वतिरिक्तं तत् तत्र शक्यतावच्छेदकं तद् व्यावृत्तमेव स्वीक्रियते ऽत आह *अवच्छेदेति । स्वरूपसम्बन्धविशेष एवावच्छेदकत्वं ना-तिरिक्तम्, नापि तद्रूपमिति मते ऽप्याह *स्वरूपेति । ननु गुरुध-र्मस्यावच्छेदकत्वमेव नेति न ममाभिमतं किन्त्वन्यथेत्याह *अ-स्तुवेति । अन्यत्रेति शेषः । यथा घटत्वादेरेवावच्छेदकत्वं न कम्बु-ग्रीवादिमत्त्वादेः, प्रकृते तस्यापि न विषय इत्याह *परंत्विति । *गुर्विति । गुरुधर्मेत्यर्थः । *प्रत्ययात्—आख्यातप्रत्ययात् । *त-द्बोधात्—कृतित्वेन कृतिबोधात् । कष्टं कर्मेति न्यायादिना स्वत-स्तत्राप्रवृत्तेराह *भारोद्वहनमिति । शरीरे स्वारसिकखेदाभावादाह *चित्तस्येति । दृष्टान्ततयाऽऽह *कर्त्तृपदेति । *तथा—कर्त्तृत्वादिना विशिष्टे । *तत्रेति । अन्तःकरणे । *तदननुभवात्—दुःखानुभवाभा-वादित्यर्थः । ननु शक्यतावच्छेदकानेकत्वप्रयुक्तः कुतो न खेदो ऽत आह *विशेष्यस्येति । ननु तदजनकत्वे ऽपि दुष्टत्वमास्तामत आह *तादृशेति । चित्तखेदाजनकस्येत्यर्थः । ननु दृष्टान्ते ऽपि तत्प्रयुक्तखेदसत्त्वेन तदसङ्गतिरेवेति न तेनात्र तदभावसिद्धिरिति तत्प्रयुक्तखेदादेव दुष्टत्वमित्याह *नचेतएवेति । विशेष्यानेक-त्वप्रयुक्तखेदादेवेत्यर्थः । नन्वेवं शक्तिग्रहादेः समानविषयकत्वा-त्ततो व्यक्तिबोधो न स्याद्, अन्यथा व्यक्त्यन्तरबोधो ऽपि स्याद-त आह *तच्छक्तीति । *न दोषः—न व्यक्त्यन्तरबोधापत्तिः । किं तत्र सकलव्यक्तीनां निवेश उत कस्याश्चिदेव ? । तत्र नाद्य इत्या-ह *सकलेति । अन्त्ये आह *एवं चेति । कस्याश्चिद् बुद्धिस्था-या निवेशे चेत्यर्थः । *ईदृशेति । बुद्धिस्थव्यक्तिविशेषजात्युभयवि-षयकज्ञाननिष्ठकार्यतानिरूपितशक्तिज्ञाननिष्ठकारणताज्ञानेत्यर्थः । *अन्यथा—तदभावेऽपि सामान्यकारणताज्ञानमात्रेण बोधाङ्गीकारे । *अग्रे—प्रातिपदिकार्थनिरूपणावसरे ॥ १ ॥

विवरणे धातोः पृथग्विवरणं तु तवाख्यातप्रत्यया-

र्थसङ्ख्याकालकृतीनां मध्ये कृतेः कृधातुना सङ्ख्यादेस्तदुत्तरातिङा विवरणवत् धात्वर्थकृतेरप्युपपन्नमिति न तत्प्रत्ययार्थत्वसाधकम् । प्रत्युत प्रकृतिभूतकृञा विवरणात् पचतीत्यत्रापि तस्याः प्रकृत्यर्थत्वमेव युक्तम् । तथा विवरणं तु सति सम्भवे सर्वत्र तस्याः प्रकृतिवाच्यतां बोधयितुम् ।

किञ्च कृञ् व्यापारसामान्यार्थ एव न यत्नार्थः । वातरोगादिना कम्पमाने 'नाहं स्पन्दं करोमि' इति व्यवहारस्तु व्यापारमध्ये कृतेरपि प्रवेशात्तदभावेन समुदायाभावतात्पर्यकः । 'काष्ठानि पाकं कुर्वन्ति' इत्यादौ तद्रहितव्यापारस्यैवात्र तस्या एव धात्वर्थत्वाद्वा । एवमेव 'अङ्कुरो न कृतो, बीजादिना कृतः' इत्याद्युपपत्तिः ।

अत एव "कथं ज्ञायते क्रियावचनाः पचादयः इति यदेषां करोतिना सामानाधिकरण्यं किं करोति पचति" इति भूवादिसूत्रे भाष्ये उक्तम् ।

अनेन विवरणमपि धातोरेवेति, कृञ् व्यापारसामान्यवाचीति च स्पष्टमेवोक्तम् ।

नच तवाख्यातार्थाश्रयबोधं प्रति प्रथमान्तपदजन्यबोधो हेतुः, तदर्थसङ्ख्याप्रकारकबोधे तदर्थाश्रयज्ञानं हेतुः, तदर्थकालप्रकारकबोधे धातुजज्ञानं हेतुरिति कार्यकारणभावत्रयम्; मम तु कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधे प्रथमान्तपदजन्यं ज्ञानं हेतुरिति सङ्ख्याभावनयोरेक इति वाच्यम् । आख्यातत्वाद्यजानत ईदृशकार्यकारणभावग्रहासम्भवात् ।

किञ्चाख्यातेन क्वचित्कृतेः क्वचिदाश्रयत्वस्य बोधः। कृतेः क्वचिद्धातुना क्वचित्प्रत्ययेन बोध इत्यर्थस्य पर्यवसितत्वेन तव मते ऽनेकक्लिष्टकार्यकारणभावापत्तेः । तत्तद्व्युत्पत्त्यनुसारेण तथा तथा बोधस्य तेषां तेषां जायमानत्वेन तथा तथा कार्यकारणभावानां सर्वेषामावश्यकत्वेन तल्लाघवगौरवविचारस्यायुक्तत्वाच्च ।

किञ्च कृतौ शक्तिः, 'वृक्षो वर्धते' 'रथो गच्छति' इत्यादावाश्रयत्वे लक्षणंत्वयुक्तम् । वृद्धिगमननिरूपिताश्रयत्वेन वृक्षरथनिष्ठेन कृतेः सम्बन्धाभावात् । यथाकथञ्चित्परम्परासम्बन्धस्योपपादने ऽपि तज्ज्ञानपूर्वकं बोधस्याननुभवात् । परम्परासम्बन्धस्य लक्षणानियामकत्वाभावाच्च ।

अत एव काव्यप्रकाशकृता प्रयोजने न लक्षणा सम्बन्धाभावादित्युक्तम् । अर्थनिर्देशवैयर्थ्यापत्त्या ऽन्वयानुशासनादिवैयर्थ्यापत्त्या च विभक्तौ लक्षणानौचित्याच्च। अर्थनिर्देशस्यान्यार्थे ऽसाधुत्वबोधनफलकत्वेन लक्षणयाऽन्यार्थे ऽन्यशब्दमात्रस्यासाधुत्वाच्च ।

किञ्च "युष्मद्युपपदे" इतिसूत्रोक्तस्य ऋष्यनुभवसिद्धसामानाधिकरण्यस्य त्वन्मते ऽनुपपत्तिः । तिङर्थाभिन्नत्वं हि तिङ्सामानाधिकरण्यम् । तिङर्थसङ्ख्यान्वयिवाचकत्वादेर्यौगिकसामानाधिकरण्यशब्दावाच्यत्वात् ॥ २ ॥

(कुं०टी०) *तवेति । यथा तव मते आख्यातार्थविशेषस्य

कृत्वा विवरणं तथाऽस्मन्मते धात्वर्थविशेषस्येत्यर्थः । रथो गच्छतीत्यादौ कृतेरबोधात् । *व्यापारसामान्यार्थ एवेति । रथो गमनं करोतीति प्रयोगात् । *समुदायाभावेति । कृतिपर्यन्तस्य व्यापारस्याभावात् तथा प्रयोग इत्यर्थः । *काष्ठानीति । अत्र यथा यत्नभिन्नो व्यापारो ऽर्थः, तथा 'स्पन्दङ्करोमि' इत्यत्र यत्न एवार्थ इत्यर्थः । *एवमेवेति । व्यापारसामान्यार्थत्वादेवेत्यर्थः ।

*आख्यातार्थाश्रयेति । कर्मधारयः । *कालेष्टेति । लिङर्थस्येष्टसाधनत्वस्य धात्वर्थे ऽन्वयादतिरिक्तेति ।

*अयुक्तमिति । शक्यसम्बन्धाभावेन लक्षणाया अयुक्तत्वात् ॥ २ ॥

(क० टी०) एवं गौरवाख्यमाद्यदोषं संखण्ड्य कृतेर्धात्वर्थत्वे उक्तरूपविवरणविरोधरूपं द्वितीयदोषं खण्डयति *विवरणे इति । *धातोः-तदर्थात् । कृतेस्तदर्थत्वस्य नेष्टत्वेनानभ्यर्हितत्वं सूचयन्नाह *संख्येति । किञ्च त्वया साधकत्वे उपन्यस्तं बाधकत्वे एव पर्यवस्यतीति वैपरीत्यमेवेत्याह *प्रत्युतेति । नन्वेवं तथा विवरणमफलमेव । किञ्च धात्वन्तरेणापि विवरणापत्तिर्मम तु सफलत्वमुक्तरीत्या स्पष्टमेव । अन्यस्यातदर्थकत्वेनायोग्यत्वेन च नान्यथा विवरणमत आह *तथेति । तदर्थककृञेत्यर्थः । द्वितीयदोषस्तूक्तरीत्यैव नेति भावः । इदमपि सर्वमभ्युपेत्य, वस्तुतस्तदेव नेत्याह *किञ्चेति । इदं धात्वर्थनिरूपणे प्रतिपादितम् । अत्र सिद्धान्ते परोक्तदोषमुद्धरति *वातेति । *तदभावेति । कृत्यभावेत्यर्थः । एवमग्रेऽपि । विशेषणाद्यभावप्रयुक्तविशिष्टाभावन्यायेनेति भावः । एवञ्च कम्पसत्त्वे ऽपि न दोष इति तात्पर्यम् । तत्र तात्पर्ये विवादे आह *काष्ठानीति । धातूनामनेकार्थत्वेन लक्षणानुपयोगादाह *धात्वर्थत्वाद्धेति । व्यवहारेऽस्यान्वयः । इदं तवापि स्थलविशेषे आवश्यकमित्याह *एवमेवेति । तदर्थकव्यापारविशेषार्थकत्वेनेत्यर्थः । बीजेत्युभयान्वयि । उभयत्र भाष्यसंमतिमाह *अत एवेति । "क्रियावचनो धातुः" इति लक्षणमुपक्रम्ये-

दमुक्तम् । तत्र उत्तरमाह *यदिति । यत इत्यर्थः । अत एवे-त्यस्यार्थं स्पष्टयति *अनेनेति । भाष्येणेत्यर्थः ।

नव्यनैयायिकोक्तिं खण्डयितुमाह *नचेति । प्रकारतासंबन्धेनेति शेषः । आख्यातार्थाश्रयबोधं प्रतीति पाठः । तद्विशेष्यकबोधं प्रतीत्यर्थः । तत्प्रकारकबोधमित्यपपाठः । दीक्षितभूषणादिमतेनाह *तदर्थेति । आख्यातार्थेत्यर्थः । विशेष्यतासंबन्धेनेत्यादिः । एवमग्रेऽपि । आत्मनिष्ठप्रत्यासत्तेः सङ्ग्रहायात्र संबन्धविशेषानिवेशो बोध्यः । कालादेर्धात्वर्थेऽन्वयादाह *कालेष्वेति । आदिना कृतिसाध्यत्वं विशेष्यतासंबन्धेनेति भावः । अयं भावः जीर्णनैयायिकमते भावनाया इतराविशेषणीभूतप्रथमान्तपदोपस्थाप्ये एवान्वयः, तथैवाकाङ्क्षितत्वात् । संख्याभावनयोः समानपदोपात्तत्वेनैकान्वयित्वस्यौचित्येन भावनान्वयिन्येव संख्यान्वय इति । तत्र भावनान्वयिनि संख्यान्वय इत्ययुक्तम् । न पचतीत्यत्र भावनानन्वयिन्येव कर्त्तरि तदन्वयेन व्यभिचारात् । विशेष्यतया आख्यातजन्यसंख्याप्रकारकबोधं प्रति तेनैव सम्बन्धेन भावनाप्रकारकबोधसामग्रीत्वेन हेतुत्वपर्यवसानेन गौरवाच्च । समानपदोपात्तान्वयित्वमपेक्ष्य समानपदोपात्तत्वस्यैव लाघवेन संख्यान्वयनियामकत्वौचित्याच्च । भावनान्वयनियामकस्यैव तद्धेतोरिति विशेष्यतासम्बन्धेनाख्यातार्थसंख्याप्रकारकबोधं प्रति इतराविशेषणकप्रथमान्तपदजन्योपस्थितिर्विषयतया हेतुरिति लघुभूतः कार्यकारणभावः फलित इति । नारायण इव नरो हन्ति, चन्द्र इव मुखं दृश्यते इत्यादौ नारायणचन्द्रादौ संख्यान्वयवारणाय—इतराविशेषणेति । चैत्रेण सुप्यते इत्यादौ चैत्रनिष्ठः स्वाप इत्यादिबोधविशेष्यस्वापादौ तद्वारणाय प्रथमान्तेति । अत एव भावलकारे प्रथमान्तपदजन्योपस्थित्यभावादनन्वितैव संख्या । अत एव तत्रौत्सर्गिकमेकवचनमेव ।

तन्नव्याः—संख्याभिधानानभिधानाभ्यामप्युक्तानुक्तविभागे संख्यायाः कर्त्तृकर्मसाधारण्येनान्वये बाधकाभावेन कर्मादावपि द्वितीयाद्यनापत्तिः, अत एकपदोपात्तत्वेनाख्यातार्थकर्त्तृत्वाद्याश्रय एव तदाश्रय इति कर्त्तृत्वाद्याश्रयरूपे भावनाविशेष्ये संख्यान्वयनियमस्वीकारः । भावनायास्तत्रैवान्वयः । तत्र भावनापदेन च संख्या-

कालातिरिक्त आख्यातबोध्यो गृह्यते । तेन जानात्यादीनां संग्रहः ।

यत्तु घटो नित्य इत्यादितो ऽबोधादितरविशेषणत्वेनोपस्थितेः शाब्दमात्रे प्रतिबन्धकत्वादत्र विशिष्य तदनिवेशो ऽपि क्षत्यभाव इति ।

तन्न ।

नारायण इवेत्यत्र इतरविशेषणत्वेनोपस्थित्यभावात् ।

वस्तुतो यथा नारायणो हन्ति तथा नरो हन्तीति बोधादुभयत्रापि संख्यान्वयोऽस्त्येवेति व्यर्थमेव तत् । संख्याभेदे तु दुष्टोपमैव उपमानोपमेयभावाप्रतीतेः तत्रैव संख्यान्वय इति । एतद् ध्वनयितुमेव "लःकर्मणि" "शेषात्कर्त्तरि" इत्यादिसूत्रेषु धर्मिनिर्देशः ।

एवं हि वाक्यार्थः-लकाराः कर्तृत्वे कर्मत्वे च भवन्ति तत्स्थाने तदाश्रयगतसंख्यायामेकवचनं तिबादिकमिति ।

एवं च कालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलितः । एवं च 'न पचति' इत्यत्र भावनानन्वयिन्येव कर्त्तरि तदन्वयेऽपि न दोषः। भावना हि तत्र नञर्थान्वयिनी । चैत्राः पचतीति तु न, भिन्नसंख्यावरुद्धे प्रथमान्तार्थे एकत्वान्वयासम्भवात् । आख्यातोपात्तसंख्याऽन्वये तद्विरुद्धसंख्याराहित्येनोपस्थितेस्तन्त्रत्वात् । चैत्रो मैत्रश्च गच्छत इत्यत्रैकत्वद्वयस्य द्वित्वेनाविरोधान्न दोष इति ततो ऽपि तन्नव्या इति ।

उभयमतसाधारणदोषमाह सिद्धान्ती *आख्यातत्वेति । बोधस्तु तस्यापीति भावः । भावनांशेऽभ्युपेत्याप्याह *किञ्चेति । *क्वचित्-पचतीत्यादौ । *क्वचित्-रथो गच्छतीत्यादौ । *क्वचित—तत्कृञादौ । विशिष्य तत्तन्निवेशादाह *क्लिष्टेति । तत्र दोषान्तरमाह *तत्तदिति । एवं द्वितीयदोषं संखण्ड्य तन्मतोपपादिकां युक्तिं खण्डयति *किञ्चेति । *यथाकथञ्चिदिति । पुरुषद्वारेत्यर्थः । *अननुभवादिति । तथा च नात्र तस्य लक्षणात्वमिति भावः । लक्षणाप्रकरणोक्तं मूले कुठारमेवाह *परम्परेति । *अत एवेति । व्यञ्जनाप्रतिपादनार्थमिति भावः । सुब्विभक्तौ न लक्षणेति तदीयसिद्धान्ते न्यूनतां ध्वनयन्मूलसाम्येनाह *अर्थेति । त्वद्रीत्या लक्षणया सर्वत्र साधुत्वस्येष्ट-

त्वादिति भावः । आदिना-बहुलग्रहणादि । *विभक्तौ-तत्सामान्येन तु सुब्विभक्तावेव । अयमेव हि सिद्धान्तः । न केवलं विभक्तित्वावच्छिन्न एवेदं किन्तु प्रकृत्यादावपीत्याह *अर्थेति । मात्रं कार्त्स्न्ये । एवं तद्युक्तिजातं सङ्खण्ड्य कृतिर्वाच्येति तत्सर्वसिद्धान्तं खण्डयति *किञ्चेति । *तिङर्थाभिन्नत्वम्-तिङर्थाभिन्नार्थत्वम् । *हियतः । सामानाधिकरण्येनान्वय इत्यादौ तथा प्रसिद्धेर्न रूढिरित्याह *यौगिकेति ॥ २ ॥

यत्तु पचतीत्येतावन्मात्रोक्तावपि कर्तर्येकत्वसंशयानुत्पत्त्या तत्र लक्षणावश्यकत्वेन लक्षितेन सामानाधिकरण्यमिति ।

तन्न । शक्तेरेवोचितत्वात् । अन्यथा विशिष्टशक्त्युच्छेदः । कृतिमात्रबोधस्य काप्यभावाच ।

किञ्च 'एकः पचति' इतिवद् 'अनेकः पचति' इत्यस्यापि सत्त्वेन पचतीत्येतावन्मात्रोक्तौ तत्संशयस्येष्टत्वात् ।

किञ्च युष्मदस्मच्छेषरूपकर्तृकर्मणोस्तिङर्थसङ्ख्यान्वयिनोर्योग एव प्रथमादीनां तन्मते साधुत्वेन तत्र सङ्ख्यान्वयेनैव तत्सन्देहानुत्पत्तेः । अत एव पचतीत्येतावन्मात्रोक्तौ 'कः कीदृशः'? इति प्रश्नो 'देवदत्तः घनश्यामः' इत्युत्तरं च स्वरसतः सङ्गच्छते ।

किञ्च । पच, अजर्घाः, अचकादित्यादौ प्रत्ययस्य लोपेन तत्र यत्नकालसङ्ख्यानां धातुवाच्यत्वावश्यकत्वेन प्रत्ययशक्तिकल्पने गौरवम् । प्रत्ययद्योत्यत्वे तु यत्नस्य विशेषणतापत्तिः ।

किञ्च तव अभिधानानभिधानव्यवस्थानुपपत्तिः । सङ्ख्यानभिधाने इत्यर्थे चैत्रः पक्तेत्यादौ तृतीयाप-

त्तेः। नच कृतामपि सङ्ख्या वाच्या । अनुशासनाभावे ऽपि स्वभावात्तद्वाचकत्वाङ्गीकारे "कर्तरि कृत्" इत्यादेर्वैयर्थ्यम् । स्वभावेनैव तद्वाचकत्वस्यापि सम्भवात् । अर्थबोधकानुशासनानां नियमार्थत्वेन तस्यासाधुत्वापत्तेश्च । प्रत्ययशक्तिग्राहकतायाः, क्वचित् प्रकृतिशक्तिग्राहकतायाश्च व्याकरणमात्रे सत्त्वाच्च । शक्तिग्रहं व्याकरणोपेत्यादिना वृद्धोक्तशक्तिग्राहकेष्वत्र कस्यापि सम्भवाभावाच्चेति यत्किञ्चिदेतत् ।

सङ्ख्याकर्त्राद्यन्यतरानभिधाने इत्यर्थे गौरवं दुर्ज्ञेयत्वं च । तद्भिन्नभिन्नस्यैवान्यतररूपत्वात् ।

किञ्च तिङ्विधावुपस्थितस्य "द्व्येकयोः" इत्यस्य किं लकारार्थस्यैकत्वादावित्यर्थः, उत तिङुपात्तभावनान्वयिगतैकत्वादाविति ?।

आद्ये सिद्धं न इष्टम् । अन्त्ये एतद्विधेयतिङां तदर्थानां चैतद्वाक्ये उद्देश्यत्वानुपपत्तिः । अस्मदादीन्प्रति अस्यैव व्याकरणस्य तदर्थशक्तिग्राहकत्वात् ।

ननु तिङ्वाच्यकारकवाचिनीति त्वदीयानां व्याख्याने ऽपि कथं तस्योद्देश्यकोटौ निवेशः । सर्वैकवाक्यतया तिबादिसूत्रस्य विधायकत्वमिति सिद्धान्ते मानान्तरेणालाभात् ।

नच तिङ्पदेन स्वस्थानी लकारो लक्ष्यते लकारवाच्यकारकवाचिनीत्यर्थ इति न दोष इतिवाच्यम् ।

परमत्वं पचसि, त्वत्कल्पः पचसीत्याद्यसिद्ध्यापत्तेः । अत्र हि त्वत्कल्पशब्दस्य तद्वाचकत्वे ऽपि यु-

ष्मच्छब्दस्य तत्त्वाभावात्। युष्मदस्मदिति विशिष्टरूपपरिग्रहादस्य च शब्दान्तरत्वादिति कैयटोक्तेश्च।

नच युष्मदीत्येतत्सौत्र्या लक्षणया युष्मद्वतीत्येतदर्थकमिति वाच्यम्। अतित्वं भवतीत्यत्र मध्यमापत्तेः। स्पष्टश्चेदं भाष्ये इति चेन्न।

"युष्मदि साधने इत्येवं भविष्यति" इति भाष्ये एव समाधानात्। युष्मदर्थेन यत्र लान्तस्य सामानाधिकरण्यं तत्र मध्यम इति सूत्रार्थेन तल्लाभ इति कैयटः। एवञ्च लवाच्यसाधनसमानाधिकरणयुष्मदर्थप्रतिपादकशब्दे उपपदे मध्यम इति सूत्रार्थः। सामानाधिकरण्यञ्च तदर्थप्रवृत्तिनिमित्तयोर्बोध्यम्॥ ३॥

(कुं०टी०) *विशिष्टशक्त्युच्छेदइति। लक्षणयैव विशेष्यबोधात्। *इत्यस्यापि सत्त्वेनेति। पचतीत्युक्ते एकः अनेकः इत्युभयोः सम्भवादित्यर्थः। *कः कीदृश इति। कर्तृविषयकप्रश्नस्यानुभवसिद्धत्वात्कर्तुर्वाच्यत्वमित्यर्थः।

*व्याकरणमात्रे इति। व्याकरणे एवेत्यर्थः।

*अन्यतरानभिधाने इति। अन्यतरस्याप्यभिधानाभावे इत्यर्थः। उद्देश्यत्वासम्भवमुपपादयति *सर्वैकवाक्यतयेति। *युष्मदिसाधने इति। युष्मदर्थे आख्यातार्थसाधने इत्यर्थः। *बोध्यमिति।

यत्तु आख्यातस्य कर्तरि शक्तौ पाकानुकूलकृत्याश्रयत्वप्रकारकगुरुयोग्यताज्ञानस्य कारणत्वकल्पने गौरवमिति।

तन्न। तादृशसामग्रीकाले कृतिसंबन्धाभाववानाश्रय इति

प्रत्यक्षवारणाय प्रतिबन्धकत्वकल्पने गौरवात् । अत एव कारणीभूतज्ञानविषयस्य शरीरगौरवमेव लाघवसंवादकमिति तार्किकाः ॥ ३ ॥

तन्त्रऽयोक्तिं खण्डयति *यत्त्विति । *पचतीति । किंकरोतीति प्रश्ने इत्यादिः । मात्रपदेन प्रथमान्तपदव्यवच्छेदः । अपिना तत्सहिततत्समुच्चयः । *अनुत्पत्त्या–तददर्शनेन । *तत्र–केवलस्थले । कर्त्तरि आख्यातस्येति शेषः । सर्वत्राह *लक्षितेनेति । अनुपपत्तिप्रतिसन्धानं विनाऽपि बोधादाह *शक्तेरेवेति । *अन्यथा–स्वारसिकतदभावे ऽपि तदङ्गीकारे । तत एवाह *कृतीति । एवं च तत्रशक्तिकल्पनं मुधैवेति भावः । एतद्दोषाभावाय तन्मात्रोक्तौ तन्मात्रबोधाङ्गीकारे तु मूले एव कुठार इत्याह *किञ्चैक इति । इदमप्यभ्युपेत्य । वस्तुतस्तावन्मात्रोक्तावपि अन्यथा स नैवेति न ततस्ततिसिद्धिरिति तथा दुर्वचमेवेत्याह *किञ्चेति । सौत्रक्रमेणाह *युष्मदिति । *योगएवेति । प्रयोगाभावेऽपीति भावः । *तन्मते–पाणिन्यादिमते । *तत्र–कर्त्रादौ । इदं द्रढयति *अत एवेति । उक्तरीत्या तत्सन्देहाभावात्सामान्यज्ञानस्य सत्त्वाच्चैवेत्यर्थः । *क इति । विशेषविषयकः प्रश्नः । *कीदृशइति । स्वरूपविषयक इत्याह *देवेति । त्वन्मते द्वयोः संख्यापरतया तथा सामान्यज्ञानपरतया च योजने क्लेशादाह *स्वरसत इति । तत्र सिद्धान्ते दोषान्तरमाह *किञ्च पचेति । अनतिप्रसङ्गायाह *आवश्यकत्वेनेति । लुप्तस्मरणाद्बोध इत्यस्य प्राक् निरस्तत्वादिति भावः । *तत्र–श्रूयमाणस्थले यत्ने । ननु न तत्र मया तस्य शक्तिः कल्प्यते किन्तु तस्य द्योतकत्वमात्रं स्वीक्रियते इति नायं दोषोऽत आह *प्रत्ययेति । तत्र दोषान्तरमाह *किञ्चेति । कर्त्तरि तिङि तव मते कृतेः सर्वत्राभिधानं न कर्त्तुरिति तदन्यतरतदाश्रयणं दुर्वचमिति भावः । अत एवाह *संख्येति । तन्त्रऽयोक्तिं खण्डयति *नचेति । *अनुशासनेति । यत इत्यादिः । शङ्काशयमाह *स्वभावादिति । कृतः कर्तृवाचकत्वेत्यर्थः । ननु "नासूया" इति भाष्यनिरस्तमिदम् अत आह *अर्थेति । *तस्यकृतः । तत्रेति शेषः । ननु तेषामेव प्रकृते ऽभावोऽत आह

*प्रत्ययेति । *क्वचित्-संख्याशब्दस्थले । मात्रं कात्स्न्यें । नन्वत्र व्याकरणातिरिक्तं शक्तिग्राहकमत आह *शक्तिग्रहमिति । उक्तदोषाभावायाह *संख्याकर्त्रेति । आदिना कर्म । एतद्दोषाभावाय क्वचित्संख्यानभिधाने, क्वचित्कर्त्राद्यनभिधाने इत्यर्थे तु आवृत्तिलक्षणवाक्यभेदापत्तिरिति बोध्यम् । गौरवाद्यभ्युपेत्याप्याह *किञ्चेति । *इत्यस्य-इत्यादेः । लस्येत्यधिकारात् आह *लकारेति । *एकत्वादावितीति । अर्थ इत्यस्यानुषङ्गः । द्वयोरेकवाक्यतया विधिरिति भावः । *इष्टमिति । कर्त्तुर्वाच्यत्वमित्यर्थः । तेषां साक्षादनुद्देश्यत्वादाह *तदर्थानाञ्चेति । ननु तेऽपि तत्र तद्वच्छास्त्रान्तरेण विहिता इति नायं दोषोऽत आह *अस्मदादीनिति । अन्यथा व्याकरणस्य शक्तिग्राहकतोच्छेदः । तिङां तदर्थेति पाठः । तथा च तथाऽर्थासम्भव इति भावः । स्वमते परोक्तदोषमुद्धरति *नन्वित्यादिना । *तस्य-तिङादेः । ननु तिप्तस्झीतिसिद्धिरेवात आह *सर्वैकेति । द्व्येकयोरित्यादिवद्युष्मदीत्यादिनापीत्यर्थः । "लः कर्मणि" इति सिद्धाशयेनाह *नचेति । असिद्धिमेवोपपादयति *अत्रहीति । *शब्दस्य-तदादेः । तेनाद्यादिसंग्रहः । ननु घटकतया तस्यापि तत्त्वमस्त्येवात आह *युष्मदिति । असिद्धिमुदाहरति *न चेति । अन्यत्राप्रयोगादाह *सौश्येति । उभयसंग्रहायाह *युष्मद्वतीति । *भाष्ये इति । "युष्मदि" इति सूत्रे एवेति बोध्यम् । ननु युष्मच्छब्दस्य न साधनत्वं तदर्थस्य केवले तत्त्वेऽपि कैयटोक्तरीत्या न तत् तत्रेति कथं तावताऽपि निर्वाहोऽत आह *युष्मदर्थेनेति । सर्वैकवाक्यतयैवाह *लान्तस्येति । *तल्लाभः-युष्मदि साधने इत्यस्य लाभः । तस्यापि तात्पर्यमाह *एवं चेति । तथा कैयटोक्तौ चेत्यर्थः ॥ ननु सामानाधिकरण्यमुक्तरीत्या शब्दनिष्ठमिति कथं साधनसमानाधिकरणप्रवृत्तिनिमित्तकयुष्मदर्थे इत्यत आह *सामेति । तथा च नोक्तरूपमत्र सामानाधिकरण्यं किन्तु एकाधिकरणवृत्तित्वरूपमिति साधनप्रवृत्तिनिमित्तसमानाधिकरणप्रवृत्तिनिमित्तकस्य युष्मदर्थेत्यर्थेन तादृशशब्दोपपदत्वं त्वत्कल्पादावस्ति नातित्वमित्यादाविति न दोषः ॥ ३ ॥

परेतु "युष्मदि क्रियासमानाधिकरणे" इति व्याख्यानम् क्रियाक्रियावतोश्चाभेदात्तत्सुलभम्। इदमग्रे सङ्ख्याप्रकरणे स्फुटीभविष्यति। अत एव कैयटेन लान्तस्येत्युक्तम्। अन्यथा लस्येत्येव वदेदित्याहुः।

नच व्याकरणं साधुत्वमात्रतात्पर्यकं नार्थव्यवस्थापकमिति वाच्यम्। 'व्याकरणं शक्तिग्राहकम्' इति त्वदूवृद्धोक्त्यसङ्गतेः। अर्थविशेषपुरस्कारेणैव साधुत्वस्य भाष्यसम्मतत्वाच्च। 'पदसमयज्ञानार्थं व्याकरणम्' इति न्यायभाष्योक्तेश्च।

तदुक्तं हरिणा—

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।

साधुत्वं तदभावेऽपि बोधो नेह निवार्यते॥ इति।

किञ्चैवं कृतामपि कर्तृवाचकत्वानापत्तिः। नच 'मित्रा पक्त्री' इति विशेष्यसमानलिङ्गकत्वदर्शनात्कृतिकर्ता वाच्य इति वाच्यम्। 'वेदाः प्रमाणं' 'गावो धनम्' इत्यादौ सामानाधिकरण्ये भिन्नलिङ्गत्ववत् क्वचिद्वैयधिकरण्येऽपि समानलिङ्गत्वस्य स्वीकारे बाधकाभावात्।

अत एव भाष्ये पठ्यते "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इति। केवलकृतौ प्रयोगस्तु "पक्ता जातः" इत्यादिरस्त्येव।

नच कृति कृतेर्वाच्यत्वे चैत्रे गन्तेत्याद्यापत्तिः। आख्यातार्थकृतेः प्रथमान्तपदोपस्थाप्य इव कृदर्थकृतेः कृदन्तसमानविभक्तिकनामार्थे एवाश्रयतयाऽ

न्वयस्वीकारेणादोषात्। अन्यथा तव चैत्रे पचती-त्यादेरापत्तिः। विपरीतं केवलकृतौ तिङन्तप्रयोगा-भावेन तिङामपि तत्र शक्त्यसिद्धिः। कृत्यनभि-धानेनैव च तृतीयाव्यवस्था। भोक्ता तृप्यतीत्यादौ कृतः कर्तरि लक्षणा अस्तु। तस्मादभेदान्वयानुभव एव कृत्सु कर्तरि शक्तौ प्रमाणं वाच्यम्। एवं च ऋष्यनुभवसिद्धाभेदान्वयादाख्यातप्रत्ययस्यापि ध-र्मिवाचकत्वसिद्धिः।

किञ्च कर्माख्याते तव कृतेराख्यातार्थत्वाभावेन तृतीयान्तासमभिव्याहृते 'किं क्रियते' इति प्रश्ने 'प-च्यते' इत्युत्तरानापत्तेः। कृञस्तव यत्नार्थत्वात्। तत्र कृतेरप्याख्यातार्थत्वे तु कृत्यभिधानेनाभिधाना-पत्तौ कर्तरि तृतीयानापत्तेः। "कर्तृकरणयोः" इति सूत्रे कर्तृसंख्ययोरिव कृतेरप्युपस्थितत्वात्।

किञ्च करोतीत्यादौ कालान्वयस्य धात्वर्थेऽङ्गी-कारेण पचतीत्यादौ त्वाख्यातार्थे तदन्वयेन का-र्यकारणभावद्वयापत्तिः। मम तु सर्वत्र धात्वर्थे एवान्वय इति न दोषः।

किञ्च कृतौ कालान्वये पाकशालायां काष्ठज्व-लनाद्यनुकूले यत्ने नष्टे पच्यमानमोदनं पश्यति देवद-त्ते पचतीत्यनापत्तिः। मम तु पाक्यवस्तुनिष्ठवि-क्लित्तिविशेषानुकूलस्य पाकशालावस्थानरूपव्या-पारस्य धात्वर्थस्य विद्यमानत्वान्न दोषः।

अपिच पाचक इत्यादेः पचतीत्यादिविवरणादा-ख्यातस्यापि कर्त्रर्थकत्वमावश्यकम्। विशेष्यविशे-

षणव्यत्यासे ऽपि चित्रगुरित्यादेश्चित्रा गावो यस्येति विवरणवन्न दोषः ।

वस्तुतस्तु समान एव विशेष्य-विशेषणभावो वृत्त्यर्थोपदर्शके वाक्ये इत्यग्रे निरूपयिष्याम इति दिक् ।

एते न यत्नातिरिक्तः फलानुकूलो व्यापारो धात्वर्थः । यत्न आख्यातार्थः । सच लिङ्येव नान्यत्र । अप्रतीतेः । धात्वर्थे कारकान्वयः । काष्ठैः पाक इति त्विष्टमेवेति समन्वयसूत्रे वाचस्पत्युक्तं गुरुमतमप्यपास्तम् ॥ ४ ॥

(कुं०टी०) *भेद्यभेदकेति । भेद्यं विशेष्यं भेदकं विशेषणं तयोर्यः संबन्धः तन्निमित्तकं साधुत्वमित्यर्थः । *कृतामपीति । तत्राप्युक्तगौरवात् । *क्वचिदिति । कृतेश्चाश्रयतया मित्रायामन्वयः । *पक्वाजात इति । पाकयत्नो जात इत्यर्थो ऽस्त्विति भावः । *तव-तार्किकस्य । *कृत्यनभिधानेनैवेति । अनभिहिते कर्तृत्वे इत्यर्थः । अस्ति च पाचक इत्यादावपि विशेषणतया कृतेरभिधानम् । *धर्मीति । कर्त्रादीत्यर्थः । *किञ्चेति । किं क्रियते इति प्रश्ने किंविषयको यत्न इत्यर्थः । पच्यते इत्यत्र यत्नबोधाभावे तथोत्तरं न स्यादित्यर्थः । *कृतेरपीति । यथा कर्तृसंख्ययोरनुक्तयोरित्यर्थस्तथा कृतावनुक्तायामप्यर्थः । ननु पाचक इत्यत्र कर्तुः प्राधान्यं पचतीत्यत्र तु क्रियायाः प्राधान्यात्कथं विवरणत्वमत आह *व्यत्यासे ऽपीति । *लिङ्येवेति । तत्रैव प्रवृत्त्यादिप्रतीतेः । लिङ्ग्रहणं लोटो ऽप्युपलक्षणम् । तेन क्वचिदाश्रयत्वादिकमपि व्यापारः । केषांश्चिन्मीमांसकानां धा-

त्वर्थस्याक्रियात्वेन कारकान्वयासम्भवात्काष्ठैः पाक इति न भवति। तत्राह *त्विष्टमेवेति ॥ ४ ॥

(क०टी०)इत एवारुचेः सिद्धान्तमाह *परेत्विति। भाष्येण सूचितं सूत्रार्थमाह *युष्मदीति। क्रियाऽभिन्नसाधनार्थके युष्मदीत्यर्थः। ननु बाधितमिदमत आह *क्रियेति। कैयटस्यापीदमेव संमतं नतु प्राचीनवर्णितमुक्तमित्याह *अत एवेति। अत्र पक्षे सामानाधिकरण्यमुक्तरूपमेवेति न दोष इति भावः। अन्त्ये उक्तदोषे परिहारं परोक्तं खण्डयति *नचेति। मात्रऽव्यवच्छेद्यमेवाह *नार्थेति। अस्वाश्वादिप्रयोगव्यवस्थार्थमाह *अर्थविशेषेति। *तदुक्तम्–तदेतदभिप्रेत्योक्तम्। भेद्यम्–विशेष्यम्। भेदकम्–विशेषणम्, तयोर्यः सम्बन्धश्च तद्रूपा ये उपाधयस्तेषां यो भेदस्तन्निमित्तं साधुत्वमित्येकोऽर्थः। तज्ज्ञानस्य बोधे न हेतुत्वम्, न वा तदभावनिश्चयस्याबोधे प्रतिबन्धकतेत्याह *तदभावेऽपीति। प्रतिपादितमिदमधस्तात्। तत्र दोषान्तरमाह *किञ्चेत्यमिति। तिङां कृतिवाचकत्वे इत्यर्थः। तत्र लस्थानिककृतां साम्यं भूषणादावुपपादितमेवेत्यतस्तदन्यत्रापि तत्त्वं प्रतिपादयन्सामान्येनाह *कृतामपीति। तत्र परोक्तवैषम्यं खण्डयति *नचेति। आदिना क्षुदुपहन्तुं शक्यम्, शैत्यं हि यत्सा प्रकृतिर्जलस्येत्यादिपरिग्रहः। प्रयोगानुसारेणाह *क्वचिदिति। इदं समूलयति *अत एवेति। लिङ्गस्य प्रयोगानुसारित्वादेवेत्यर्थः। केवलकृतौ प्रयोगाभावरूपवैषम्यमपि खण्डयति *केवलेति। उत्पन्ने विद्यमाने एव देवदत्ते तथाप्रयोगासम्भवात्कृत्याश्रयस्यात्मनो जननासम्भवाच्च कृतिमात्रविषयक एवायं प्रयोग इति भावः। वैषम्यान्तरं खण्डयति *न चेति। *कृति–प्रत्यये। *अन्यथा–तथानियमानङ्गीकारे। आपत्तिप्रसङ्गेन प्रागुक्तसाधकं बाधकत्वे पर्यवस्यतीति सिंहावलोकनन्यायेनाह *विपरीतमिति। प्रथमासिद्धये तथेत्यपि नेदानीं वैषम्यमित्याह *कृत्यनभीति। साम्यादिति भावः। नन्वेवमपि भोक्ता तृप्यतीत्यादावगतिः; कृतिमान्देवदत्त इतिवत्कृतिमती कृतिरिति प्रतीत्यभावेन सामानाधिकरण्यस्यासम्बन्धत्वेन कृदर्थकृतावाख्यातार्थकृतेरन्वयासम्भवादत आह *भोक्तेति। उक्तैतद्दोषतात्पर्यमाह *तस्मादिति। उक्तसर्वसाम्येऽपि परैस्तथाङ्गीकारादि-

त्यर्थः । *एवं च-तस्य तत्र प्रमाणत्वे च । मानुषानुभवतो ऋष्यनुभवस्य प्राबल्यादाह *ऋष्यनुभवेति । तत्र दोषान्तरमाह *किञ्चेति । *तत्र-तत्प्राचीनमते । आश्रयत्वस्याख्यातार्थत्वादाह *तवेति । कर्माख्याते फलमेवार्थः कृतेस्तृतीयया लाभात् । फलानभिधानमेव कर्मानभिधानमिति तन्नव्यमतासाङ्गत्यायाह *तृतीयान्तेति । एतद्दोषाभावायाह *तत्रेति । कर्माख्याते इत्यर्थः । ननु तत्र कृतेर्नैवोपस्थितिरिति कथं तदभिधानेनाभिधानापत्तिरत आह *कर्तृकरणेति । कृञः सत्त्वात् । तत्र दोषान्तरमाह *किञ्चेति । एतेन कालस्य धात्वर्थे ऽन्वयात्पदद्वयघटितः कार्यकारणभावस्तव, मम तु आख्यातार्थे एवेति लाघवमित्यपि तदुक्तमपास्तम् । भूतं पक्वः जानातीत्यादौ कालान्वयाय तस्य तवाप्यावश्यकत्वाच्च । तत्र दोषान्तरमाह *किञ्चेति । *पश्यतीति । सप्तम्यन्तम् । व्यापारान्तरशून्यतया तिष्ठतीति यावत् । ततः पूर्वजातविक्लित्त्यनुकूलत्वाभावादाह *विशेषेति । दर्शनमात्रस्य कर्मत्वाद् आह *अवस्थानेति । तत्र दोषान्तरमाह *तस्यापि-तत्तिङोऽपि । ननु तयोर्विशेष्यविशेषणभावोऽन्यादृश इति कथं तवापि तत्त्वमतः दीक्षितादिमतेनाह *विशेष्येति । दृष्टान्ते चित्रगवीसंबन्धीति हि वृत्तौ बोधः । यत्संबन्धिन्यश्चित्रा गाव इति च विवरणवाक्ये तव तु तदर्थाश्रयस्य विवरणे ऽभानात्तत्त्वासङ्गतिरेव । सिद्धान्तमाह *वस्तुत इति । *अग्रेसमासप्रकरणे । स्वतन्त्रे वाक्ये तु क्रियाया एव विशेष्यत्वम् । एवं च तुल्यन्यायात् चित्रगुरित्येतद्विग्रहवाक्येऽपि प्रकृत्यर्थस्य विशेष्यत्वं तत् ध्वननार्थमेव तद्विग्रहवाक्ये तच्छब्दप्रयोगः । एतेन यः पचति स पाचक इति प्रथमान्तपदघटितं तस्य विवरणमित्यपास्तम् । तदघटितस्यापि विवरणस्य दर्शनात्सर्वसंमतत्वाच्च । तदाह *इतिदिगिति । *एतेन-उक्तदूषणजातेन । पूर्वतो वैलक्षण्यमात्रमाह *स चेति । नन्वेवं प्राधान्यात्तत्रैव कारकान्वयापत्तिरत आह *धात्वर्थेति । सम्भवत्यैकरूप्ये वैरूप्यस्यान्याय्यत्वात् । नचैवमनिष्टापत्तिरत आह *काष्ठैरिति । ईदृशगुरुमतस्य तद्ग्रन्थे ऽनुपलम्भादाह *समेति । "तत्तु समन्वयाद्" इति सूत्रे इत्यर्थः ॥ ४ ॥

यदपि कर्त्रधिकरणे नव्यमीमांसकाः फलावच्छि-

व्यापारानुकूलः कृत्यादिराख्यातार्थः । स च व्यापारत्वेनैव । कृत्यादिव्यापारस्तु विशेष्यत्वानुरोधात्तिङ्वाच्यः । 'रथो गच्छति' इत्यादावाश्रयत्वमेव तिङर्थव्यापारः । तस्याप्यसत्त्वभूतस्यैव तिङोक्त्या व्यापारत्वात् व्यापारान्तरस्याननुभवात् । कालान्वयो धात्वर्थव्यापारे । "अनभिहिते" इत्यस्याबोधितकर्त्रादावित्यर्थः । बोधश्च शक्त्या आक्षेपाद्वा लक्षणया वा । तत्र कृति शक्त्या तिङि भावनयाऽऽक्षेपेण लक्षणया वा । विपरीतं तु न । भावनायाः प्राधान्येन प्रतीयमानतया प्रत्ययवाच्यत्वात् । कृदन्ते ऽपि भावनया कर्तुराक्षेपे तिङीव तस्याः प्राधान्यापत्तिः । तत्र कर्तुरेव प्राधान्यात् । आक्षिप्तादिधर्मिणमादायैव च सामानाधिकरण्यम् । सङ्ख्यान्वयश्च तत्रैव । अनुशासनमपि आक्षिप्ताद्यर्थानुशासकमेव । कारकान्वयः प्रत्ययार्थे एव साक्षात्परम्परया वा । अन्यथा काष्ठैः पाक इति स्यात् । अत एव "नानृतं वदेद्" इतिनिषेधस्य दर्शपूर्णमासप्रकरणपठितस्य विनिगमनाविरहाच्छब्दानृतार्थानृतोभयपरस्य क्रत्वर्थत्वसिद्धिः । कर्तुर्वाच्यत्वे श्रुत्या पुरुषार्थत्वप्रसङ्गात् । प्रकरणाद्धि क्रत्वर्थत्वम् । तस्य च श्रुत्यपेक्षया दुर्बलत्वं स्पष्टमेव । प्राग् लिखितलाघवादितश्च नैयायिकोक्तात्कृतिर्वाच्येति ।

तदपि न । 'शाब्दयामि' इत्यनुभवविरोधेनाक्षेपस्यायुक्तत्वात् । आक्षिप्ते शाब्दोपस्थितसङ्ख्यान्वयायोगाच्च । किञ्च लक्ष्याया अपि व्यक्तेः

प्राधान्यस्य तव मते सत्त्वेन प्राधान्यानुरोधेन शक्तिकल्पना अयुक्ता । वाच्येन कर्त्रा लक्षितभावनाया अपि प्राधान्योपपत्तेः । अन्यथा व्यक्तेरपि वाच्यत्वापत्तावाकृत्यधिकरणोच्छेदः । परिच्छेद्यत्वं च व्यक्तेरिव कर्तुरपीति तस्यैवाख्याते विशेष्यत्वापत्तेश्च । पठति चैत्रः पचति चैत्र इत्यादौ स्पष्टं परिच्छेद्यताप्रतीतेः ।

किञ्च कृधातोर्भावनार्थत्वस्य दृष्टत्वेन सर्वत्र धातोरेव तदर्थत्वं युक्तम् । पूर्वोत्तरमीमांसयोरपि कृभ्वस्तीनां भावनासामान्यवाचकत्वोक्तेः ।

किञ्च कर्माख्याते पच्यते इत्यादौ पक्तेत्यादौ च पाकः क्रियते इत्यादि विवरणात्, "किं क्रियते" इति प्रश्ने "पच्यते" इत्युत्तराच्च, कारकान्वयानुरोधाच्च भावनालक्षणावश्यकत्वेन सर्वत्र भावनाया एव लक्ष्यत्वमुचितम् ।

किञ्चैवं कृत्स्वपि कर्तुर्वाच्यत्वानापत्तिः । वैषम्ये बीजाभावात । आक्षिप्तकर्तुर्व्यक्तेरिव प्राधान्योपपत्तेः । लिङ्गसङ्ख्यान्वयस्तु तिङन्ते सङ्ख्यान्वय इव लक्षिते एवोपपन्नः ।

किञ्च कोशव्याकरणयोर्लाक्षणिकार्थान्वाख्यायकत्वे तयोः शक्तिग्राहत्वोच्छेदः । तयोर्लाक्षणिकार्थान्वाख्यानस्यादर्शनाच्च । अत एव तटादिपर्यायेषु गङ्गादिपदानुल्लेखः कोशे। शुक्लादिशब्दानां गुणिष्वपि शक्तिरेव, विनापि बाधप्रतिसन्धानं बोधात् ।

किञ्च कृतौ शक्तस्य विशिष्टे कर्तरि लक्षणायां

तस्य विशेष्यत्वापत्तिः । कृतौ शक्तिराश्रये लक्षणा । तत्र लक्ष्यार्थस्य शक्यार्थे विशेषणतेति न क्वापि दृष्टचरम् । गङ्गादिपदशक्यस्य तल्लक्ष्ये विशेषणताया एव दर्शनात् । व्युत्पत्त्यन्तरकल्पने गौरवम् ।

किञ्च यथा "लः कर्मणि" इत्यादिभिः शत्रादिविध्येकवाक्यतया धर्मिणि शक्तिर्बोध्यते तथा तिबादिविध्येकवाक्यतया ऽपि युक्तम् । वैषम्ये बीजाभावात् ।

नच "लः कर्मणि"इत्यस्य "द्व्येकयोः"इत्यनेनैकवाक्यतया कर्त्रादिगतैकत्वादिविवक्षित्यर्थेन विशेषणत्वात्कर्त्रादिर्न प्रत्ययार्थ इति शबरस्वाम्युक्तं युक्तम् । तिबादिविधिना "द्व्येकयोः" इत्यस्यैकवाक्यत्वे ऽपि तत्र कर्मणीत्यादेरभावात् तथावाक्यार्थस्यायुक्तत्वात् । लकारेण द्विवचनादिसंज्ञाभावेन लविधिनैकवाक्यता दुर्लभा । तथैकवाक्यतायामपि सुप्स्विव तिङ्क्ष्वपि कर्त्रादीनां प्रत्ययार्थता सङ्ख्यायास्तद्विशेषणत्वं च दुर्वारम् ।

किञ्च संख्यायाः प्रत्ययार्थत्वे आख्यातजन्यबोधे तस्या विशेष्यत्वापत्तिः ।

अपिच कर्मांशेष्वेवमेवापत्तौ तस्याप्यप्रत्ययार्थत्वे भावनायाः कर्मव्यभिचारात्तदनाक्षेपे च पच्यते तण्डुल इत्यादौ कर्मप्रतीतिर्न स्यात् । नच संख्यया ऽऽक्षेपः । कर्मत्वशक्तिमत्त्वेन बोधार्थं शक्तेरावश्यकत्वात् । आक्षेपो ह्याश्रयत्वेन स्यादित्यूह्यम् ॥ ५ ॥

(कुं॰टी॰)*कृत्यादीति । मीमांसकैः कृतिरेव भावनाशब्देनोच्यते ।

अन्ये त्वाहुः। धातुना सिद्धो भावो यागदानादिरुच्यते तद्गतं साध्यत्वं त्वाख्यातेन ।

तदाहुः—

धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते ।
तथाऽपि सर्वसामान्यरूपेणैवाभिधीयते ॥ इति ।

*विशेष्यत्वेति । प्रत्ययार्थः प्रधानमिति न्यायात् । *आश्रयत्वमेवेति। तदेव चात्र भावनाशब्दवाच्यम्। व्यापारत्वं न क्रियात्वरूपमित्याह *तस्यापीति । ननु तिङि कर्तैव वाच्यो ऽस्तु भावनाया एवाक्षेपो ऽस्त्वित्यत आह *विपरीतं तु नेति । ननु तिङीव कृत्यपि भावना वाच्याऽस्तु माऽस्त्वाक्षेप इत्यत आह *प्राधान्यापत्तिरिति। ननु कर्तुरवाच्यत्वे युष्मदादिसामानाधिकरण्यं कथमत आह *आक्षिप्तेति । *धर्मिणम्–कर्त्रादिकम् । *अनुशासनम्–कर्तरि ल इत्यादि । *साक्षादिति। कर्तुः साक्षात्कर्मणः परम्परया । *अन्यथा–धात्वर्थे ऽपि कारकान्वये। शब्दानृतम्, अवाचकादिशब्दप्रयोगः । *पुरुषार्थत्वेति । वदनस्य पुरुषधर्मत्वेन निषेधस्यापि तद्धर्मत्वौचित्यात्। ननु स्मार्त एव निषेधो ऽस्तीति चेत्सत्यम्। तेन पुरुषस्य प्रत्यवायो बोध्यते, अनेन तु वैगुण्यम् । *परिच्छेद्यत्वमिति । परिच्छेदो विशेषावसायः । *आक्षिप्तकर्तुरिति। व्यक्तेरिव कर्तुरपि प्राधान्योपपत्तेरित्यन्वयः। *लिङ्गसंख्यान्वयस्त्विति। यथा तिङन्ते कर्तरि संख्यान्वय एवं कृदन्ते आक्षिप्तकर्तरि लिङ्गसंख्यान्वय इत्यर्थः। *कोशे इति। पूर्वान्वयि। कथं तर्हि शुक्लादिशब्दानां लाक्षणिकानां परिगणनमत आह *शक्तिरेवेति। अत्रैव हेतुमाह *विनापीति। *लक्ष्यार्थस्येति। लक्ष्यमाश्रयं प्रति शक्याया भावनायाः प्राधान्यमित्यर्थः।

लक्ष्यस्य प्राधान्ये दृष्टान्तमाह *गङ्गादीति । *विशेषणत्वादिति । किन्तु एकत्वादीनामेवैकवचनादिवाच्यता ॥ ५ ॥

(क०टी०) जीर्णानां युक्तत्वस्य वक्ष्यमाणत्वादाह *नव्येति । *स च–कृत्यादिश्च । नन्वेवं कुतो भिन्नशक्तिकल्पनाऽत आह *कृत्यादीति । *तिङ्वाच्यः–तिङ एव वाच्यः । कृत्यादीत्यादिसंग्राह्यमाह *रथइति । ननु तस्य स्वरूपत्वात्कथं व्यापारत्वमत आह *तस्यापीति । स्वभावात् विकल्पादिवदिति भावः । नन्वन्य एव स्वारसिकोऽस्त्वत आह *व्यापारान्तरेति । नन्वेवं समानपदोपात्तत्वप्रत्यासत्त्या तत्रैव कालान्वयापत्तिः, प्राधान्याच्चात आह *कालेति । व्युत्पत्तिवैचित्र्यात् । प्रत्ययार्थव्यापाराश्रयत्वमेव कर्तृत्वं धात्वर्थफलाश्रयत्वं च कर्मत्वमिति भावः । अभिधानानभिधानव्यवस्थामाह *अनभिहिते इति । *तत्र–त्रयाणां मध्ये । आक्षेपे ऽशाब्दत्वापत्तेराह *लक्षणयावेति ।

अत एव कर्त्रधिकरणे भट्टैरुक्तम्—

याद्दशस्तु गुणभूतः कर्त्तात्रावगम्यते न ताद्दशेन विना भावनोपपद्यते इत्यर्थापत्त्या ऽनुमानेन वा शक्या गमयितुम्—

इत्यादिना । ननु कृति आक्षेपादितः, आख्याते शक्त्येति वैपरीत्यं कुतो न भावनायास्तत्राक्षेपादिलभ्यत्वसंभवादत आह *विपरीतमिति । *प्रतीति । अन्यथा ताद्दश्या तया तदाक्षेपस्य युक्तत्वात्तस्या अन्यथात्वे प्राधान्यानुपपत्तेः । नन्वेवं कृदन्ते ऽप्येवमेवास्त्वत आह *कृदन्तेऽपीति । *तत्र—कृदन्ते । एवं च तत्र तस्या वाच्यत्वमावश्यकमिति युक्तस्तेन भावनाक्षेपः । अत एव तैरुक्तम्–"यदि कर्त्रा, धात्वर्थफलेन, वाऽऽख्यातेन भावनागम्यते ततः पाचकपाठकादिपदेष्विव तिरोहितस्वरूपा ऽवगम्येत प्राधान्यात्तु शब्दार्थत्वाध्यवसानम्" इति । पुरुषव्यवस्थामाह *आक्षिप्तादीति । चैत्रः पचतीत्यादाविति भावः । अत एव संख्यान्वयानुपपत्तिरपि नेत्याह *संख्येति । *तत्रैव—आक्षिप्तादिधर्मिण्येव । "लः कर्मणि" इत्याद्यनुशासनविरोधं परिहरति *अन्विति । प्राधान्यादाह *कारकेति । कृत्याद्यनाश्रयविषयाणां साक्षादन्वयासम्भवादाह *परंपरेति । विपक्षे दोषमप्याह *अन्यथेति । धात्वर्थे तदनङ्गीकारे इत्यर्थः । *इति स्यात्—इत्यपि स्यात् ।

*अत एव–कृत्यादेरेवाख्यातार्थत्वादेव । एतत्फलितविपक्षासिद्धौ हेतुमाह *कर्त्तुरिति । *लाघवादित इत्यादिना विवरणम् । तत्रादौ आद्ये पक्षे दोषद्वयमाह *शाब्देति । कर्त्तारमित्यादिः । *आक्षिप्तेइति । "शाब्दी हि" इति न्यायादिति भावः । संख्यान्वयेति पाठः । लक्षणायामेतद्दोषद्वयाभावाद्दोषान्तरमाह *किञ्चेति । यत इति शेषः । एवमग्रे । *सर्वत्र–गान्दोग्धीत्यादाविति भावः । *अन्यथा-आख्याते तथाऽनङ्गीकारे । व्यक्तेरविशेष्यत्वे तु वाहदोहाद्यनन्वयः स्पष्ट एव । ननु कर्त्रा स्वस्वरूपनिरूपकत्वेन भावनाया आक्षेपाद् गुणत्वं जात्या तु लोके परिच्छेद्यतया ऽवगतं द्रव्यं तथैवाक्षिप्यते इति नतु गुणत्वमतस्तत्र दोषान्तरमाह *परिच्छेद्यमिति । ननु तदेव न मानाभावादत आह *पठतीति । प्रागुक्तरीत्या भूवादिसूत्रभाष्यसिद्धान्तावलम्बेन तत्र दोषान्तरमाह *किञ्चेति । युक्तमित्यनेन कृधातौ भावनाया धातुलभ्यत्वादाख्यातस्य धात्वर्थभावनानुवादित्वमाश्रयत्वार्थकत्वमेव वेति तन्मतश्रद्धाजाड्यनिरासः । ननु तस्य तत्त्वं न ममाभिमतमत आह *पूर्वोक्तेति ।

कुर्यात् क्रियेत कर्त्तव्यं भवेत्स्यादिति पञ्चमम् ।
एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम् ॥ इति—

वार्त्तिकव्याख्यावसरे इति भावः । तत्र दोषान्तरमाह *किञ्चेति । एवमग्रेऽपि । क्रियते इत्यादीत्यादिना पाकं कृत्वेत्यादि । तत्रैवाह *कारकेति । *सर्वत्र–कर्त्तर्यपि । एवेन कर्तृव्यवच्छेदः । *एवम्-आख्याते भावनया कर्तुराक्षेपे । *वाच्यत्वानापत्तिः–तदभावापत्तिः । प्रागुक्तमभिसन्धायाह *वैषम्येइति । ननु प्राधान्यमेव बीजमतआह *आक्षिप्तेति । नन्वेवमपि लिङ्गाद्यन्वयानुपपत्तिरेव बीजमत आह *लिङ्गेति । आदिना क्रियाविशेषणादि । इष्टापत्तावाह *तयोरिति । अन्यत्र क्वापीति भावः । कोशोल्लेखफलमाह *अत एवेति । एवं च दृष्टान्तविधया कोशोक्तिसङ्गतिरिति बोध्यम् । नन्वन्यत्र शुक्लादिषु तद्दर्शनमस्तीतीदमप्ययुक्तमत आह *शुक्लादीति । नन्वाख्यातस्य कृतौ शक्तस्य किं कृत्याश्रयविशिष्टे लक्षणा, उत शुद्धाश्रये ? । तत्राद्ये आह *विशिष्टेति । कृतेस्तत्र प्रकारतया निवेशात् । अन्त्ये आह *कृताविति । *तत्र–तयोर्मध्ये । वैपरीत्यं तु दृष्टचरमित्याह *गङ्गादीति । ननु प्रकृते व्युत्पत्तिवैचित्र्यमत

आह *व्युत्पत्त्यन्तरेति । कर्मणीत्यादिना वर्तमाने लट् बहुवचने च लिडादि । आदिना कानजादि । पूर्वमीमांसाभाष्यकारोक्तं तद्बीजं खण्डयति *न चेति । *इत्यनेन—इत्यादिना । एवमग्रे ऽपि । ननु तद्वल्लविधिनाऽपि कुतो नैकवाक्यताऽत आह *लकाराणामिति । "द्व्येकयोः" इतिसूत्रक्रमादाह *द्विवचनादीति । अभावेनेति च्छेदः । ननु "लः कर्मणि" इत्यत्र ल इति ङसन्तमादेशविवक्षायां षष्ठी । लस्य य आदेशः स तद्वते तत्रेत्येकवाक्यतासम्भवः, ततश्च "वर्तमाने लड्" इत्यादिनैव विहित इति न दोषोऽत आह *तथेति । समुच्चये ऽयम्, किञ्चेत्यर्थः । अत एवाह *एकेति । *सुप्स्विवेति । तथा च न तथा ऽर्थः किं त्वेकत्वादिविशिष्टे कर्त्रादाविति । तदाह *कर्त्रादीनामिति । *अन्यथा सुबन्तेऽपि तदापत्तिरिति भावः । यथाश्रुते त्वयं ग्रन्थो ऽनुपपन्न एवेति बोध्यम् । ननूक्तरीत्या एकवाक्यता निर्विवादा, तत्रेष्टानुरोधेन सुबन्ते ऽन्यथा सत्त्वे ऽप्यत्रैवमेवाङ्गीक्रियते ऽत आह *किञ्चसंख्याया इति । तत्र तथाऽन्वयेऽतिप्रसङ्गमाह *अपिचेति । *एवमेवेति । कर्मगतैकत्वादावित्यर्थेन संख्याया एव प्रत्ययार्थत्वापत्तावित्यर्थः । *तस्यापि-कर्मणो ऽपि । अकर्मकस्थले कर्मणोऽभावे ऽपि भावनायास्सत्त्वादाह *भावेति । अत्र धातुवाच्याया इत्यर्थः । *तदिति । तयेत्यादिः । अत एवाह *कर्मेति । इमं दोषं परिहरति *न चेति । सिद्धान्तमतेनाह *कर्मत्वेति । यद्विना यदनुपपत्तिस्तावन्मात्रस्यैव तेनाक्षेप इति सिद्धान्तेनाह *आक्षेपो हीति । एवं च दीक्षितभूषणादिमतमप्ययुक्तम् । अनुपपादकस्याप्याक्षेपेऽतिप्रसङ्गापत्तिस्तदाह *ऊह्यमिति ॥ ५ ॥

लाघवात्कृतौ शक्तिरिति तूक्तरीत्या दूषणीयम् ।

किञ्चैवं दण्डिपिङ्गाक्ष्यादिपदानामपि सबन्धे एव शक्तिः स्यात् । लक्षितेन च सम्बन्धिना सामानाधिकरण्यं स्यादित्यरुणाधिकरणोच्छेद इति समासे निरूपयिष्यामः ।

किञ्चैवं "तप्ते पयसि दध्यानयति सा वैश्वदेव्या-

मिक्षा वाजिभ्यो वाजिनम्" इत्यत्र वाजेनान्नेनामिक्षारूपेण सम्बन्धाद्वाजिनो विश्वेदेवास्ताननूद्य वाजिनगुणो विधीयते । तेनोभयरूपं वैश्वदेवमेकमेव कर्मेति पूर्वपक्षे वैश्वदेव्यामिक्षेत्यत्र श्रौतः सम्बन्धः, वाजिभ्यो वाजिनमित्यत्र वाक्येन । सत्यपि पदान्तरापेक्षणे स्वाभिन्नार्थकपदान्तरापेक्षायामपि श्रौतत्वम् । यत्र तु भिन्नार्थकपदान्तरापेक्षा तत्र वाक्यं प्रमाणम् । एवं च "वैश्वदेव्यामिक्षा"इत्येतद्वाक्यविहितयागानुवादेन न वाजिनद्रव्यविधानम् श्रौतद्रव्येण निराकाङ्क्षत्वात् तस्मात्कर्मान्तरविधिः । वाजिभ्य इति चापूर्वदेवताविधानमिति गुणाधिकरणस्य सिद्धान्तस्य भङ्गः ।

नच लक्षितद्रव्यमादाय श्रौतत्वं वाजिनं तु न तथेति वाच्यम् । एवं हि "नानृतं वदेद्" इतिनिषेधस्यापि श्रुत्या पुरुषार्थताया एव प्राप्त्या कर्तुरवाच्यत्वसाधनस्य वैयर्थ्यापत्तेः । क्रत्वर्थत्वसिद्धान्तासिद्ध्या कर्त्रधिकरणोच्छेदाच्च ।

नचाकृत्यधिकरणन्यायेन दण्डादिपदानां सम्बन्धे शक्तिरिति वाच्यम् । तत्र शक्तावपि आनन्त्यादिदोषसत्त्वात् ।

नच तदनुगमकसम्बन्धत्वे शक्तिरस्तु । दण्डीत्यादिजन्यबोधे नियमतस्तदभानात् । तत्तत्सम्बन्धेन दण्डविशिष्ट इत्येव बोधात् । नीलादिभ्यश्च नीलत्वविशिष्टनीलवत्ताप्रतीतेरनुभवसिद्धत्वात्तेषां गुणगतजातावेव शक्तिरिति म-

तोपपत्तिः । एवं च यज्जन्यबोधे नियमेन प्रकारतया भानम्, अननुगतत्वं च तत्रैवाकृत्यधिकरणन्यायप्रवृत्तिरिति बोध्यम् ।

किञ्च प्रत्ययार्थस्य प्राधान्ये "क्रियाप्रधानमाख्यातम्" इति निरुक्तस्थस्य क्रियाशब्दस्य प्रत्ययार्थपरत्वे आख्यातसामान्यलक्षणस्य भावाख्याते ऽव्याप्तिः । चैत्रेण सुप्यते इत्यत्र धात्वर्थविशेष्यतायास्त्वयाऽप्यङ्गीकारात् । अन्यलभ्यस्य तस्य शास्त्रबलात्प्रत्ययार्थत्वस्याप्यङ्गीकारे कर्तृकर्मणोरपि शास्त्रबलात्तद्वाच्यता दुर्वारा ।

किञ्च "नानृतं वदेद्"इत्यत्र तवाऽपि प्रकरणोपस्थाप्यार्थापेक्षया श्रुत्युपस्थापितभावनालाक्षितकर्तुः प्रथमोपस्थितत्या क्रत्वर्थत्वासिद्धिः । प्रथमोपस्थितत्वमेव हि श्रुतेर्बलवत्त्वे बीजम् । मम श्रुतिप्रकरणाभ्यामस्य क्रतुयुक्तपुरुषधर्मता । अविरोधात् । विरोधे एव बलाबलचिन्ताप्रवृत्तेः । अन्यथा "जञ्जभ्यमानो ऽनुब्रूयान्मयि दक्षक्रतू" इत्यत्र क्रतावपि जञ्जभ्यमानपुरुषसत्वादविरुद्धाभ्यां वाक्यप्रकरणाभ्यां पुरुषसंस्कारमुखेन क्रत्वर्थत्वसिद्धान्तस्त्वदीय उच्छिद्येत ।

तदुक्तं भट्टैः—

स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः ।

प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥ इति ।

अनारभ्याधीतो "नानृतं वदेद्" इति स्मार्तनिषेधस्तु अर्थानृतपर एव । विदितवेदितव्याः परावरज्ञाः केचिदृषयो यद्वानस्तद्वानः इति प्रयोक्तव्ये यर्वाणस्त-

र्वाण इति प्रयुञ्जते याज्ञे कर्मणि पुनर्नापभाषन्ते तेन यर्वाणस्तर्वाणो नाम बभूवुरिति पस्पशास्थभाष्यस्वरसात् । तद्भाष्यादेव दर्शपूर्णमासप्रकरणपठित—स्योभयनिषेधकत्वम् । ते हेलयो हेलय इति कुर्वन्तः पराबभूवुरिति क्रतुप्रकरणपठितभाष्यलिखितश्रुत्यन्तराच्च ।

अत एव शिष्टा व्यवहारकाले स्वस्वदेशभाषया व्यवहरन्तो न प्रत्यवायं मन्यन्ते ।

अत एव कर्त्रधिकरणत्वेन तव सम्मते ऽधिकरणे "अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात्" इति पूर्वपक्षसूत्रम् । क्रतुसंयुक्तं क्रतुप्रकरणपठितम् न कर्मनिषेधकं "नानृतं वदेद्" इति वाक्यमनारभ्याधीतत्वेन 'नानृतं वदेद्' इति वाक्येन संयोगात्समानाकारत्वान्नित्यानुवादः स्यात् । एवं च क्रतावप्यनृतवदने स्मार्तमेव प्रायश्चित्तमिति तदर्थः । तदुत्तरं "विधिर्वा संयोगान्तराद्" इति सिद्धान्तसूत्रम् । अत्र संयोगपदं संयुज्यते कारणमनेनेतिव्युत्पत्त्या प्रयोजनपरम् । स्मार्तेन हि तेनानृतवदने पुरुषस्य प्रत्यवायः । वर्जने च तदभावः । नतु क्रतोः किञ्चित्तद्भावाभावयोर्वैगुण्यमवैगुण्यं वा ।

एवं च यः स्वस्य प्रत्यवायमङ्गीकृत्य क्रतुमविगुणमिच्छति तेन अनृतं न वर्ज्यं स्यात् । क्रतुप्रकरणस्थेन तेन क्रतोर्वैगुण्यमुच्यते इत्यतो नानुवादः, किन्तु विधिरेवेत्यर्थ इति ॥ ६ ॥

(कुं० टी०) *सम्बन्ध एवेति । आकृत्यधिकरणन्यायात् ।

*अरुणाधिकरणेति । तत्र हि पिङ्गाक्ष्यादियौगिकानां सामानाधिकरण्यं द्रव्यवाचित्वं सिद्धान्तितम् । *तप्ते पयसीति । घनीभूतं द्रव्यमामिक्षा जलं वाजिनम् । *उभयरूपमिति । विश्वदेवदेवताया आमिक्षाद्रव्यवाजिनद्रव्ययोः समुच्चयेन विकल्पेन वा सम्बन्ध इति पूर्वः पक्षः । *श्रौतइति । वैश्वदेवीशब्दलभ्यत्वात् । ननु केवलवैश्वदेवीशब्देन द्रव्यदेवतयोः सम्बन्धो न प्रतीयते किन्तु आमिक्षापदसम्बन्धेनैवेति वाक्यलभ्यत्वात् कथमस्य श्रौतत्वमत आह *सत्यपीति । *नद्रव्यविधानमिति । उत्पत्तिशिष्टमामिक्षाद्रव्यं वाजिनं तूत्पन्नशिष्टत्वादामिक्षावाक्ये प्रवेशं न लभते । तस्माद्वाजिदेवताकं कर्मान्तरमिति सिद्धान्तः । *सिद्धान्तस्यभङ्गइति । वैश्वदेवीत्यत्र द्रव्यस्य लक्ष्यत्वादामिक्षेत्यत्र श्रौतसम्बन्धासम्भवादिति भावः । *लक्षितेति । वैश्वदेवेनैव लक्षणया बोधितत्वात् श्रौतत्वमित्यर्थः । *श्रुत्येति । आख्यातार्थभावनया कर्तुराक्षेपेण पुरुषार्थताया एव प्राप्तेः । *क्रतुधर्मत्वमिति । तत्र हि कर्तुरवाच्यत्वं प्रकरणात्क्रत्वर्थत्वमिति सिद्धान्तः । क्रतुस्वरूपपौष्कल्याय यो विधीयते स क्रत्वर्थः । यथा प्रयाजादयः । नहि तैः पुरुषस्य प्रीतिर्भवति । पुरुषप्रीतये यो विधीयते स पुरुषार्थः । यथा दर्शपूर्णमासादयः । नहि तैः कस्य चिद्यागस्योपकारो भवति । *न्यायेनेति । सम्बन्धिनामनन्तत्वात् । *सत्त्वादिति । सम्बन्धानामप्यनन्तत्वात् । *अव्याप्तिरिति । भावाख्याते क्रियाया आख्यातार्थत्वाभावात्प्रत्ययार्थप्राधान्यभङ्गः इति भावः । ननु तत्रापि क्रिया प्रत्ययार्थो ऽस्तीत्यत आह *अन्यलभ्यस्येति । *स्त्र्युपायेति । "स्त्रियमुपेयात्" "नाहुतशेषं भक्ष-

९६

येत्" "न मांसं भुञ्जीत" इत्यादिर्निषेधः पुरुषार्थो ऽपि प्रकरणात्क्रत्वङ्गमपीत्यर्थः । *अर्थानृतपरएवेति । क्रतोरन्यत्र शब्दानृतस्यादोषत्वात् । अत्रैव दृष्टान्तमाह *विदितेति । ननु "विभाषा गमहनविदविशाम्" इति वेट्कृत्वाद् "यस्य विभाषा" इति निषेधः प्राप्नोति । सत्यम् । तौदादिकस्य विकल्पः । यदुपाधेर्विभाषा तदुपाधेर्निषेधः, "आदितश्च" इति "विभाषा भावादिकर्मणोः" इति योगविभागात् । ननु "उदितो वा" इति भावार्थे क्त्विविकल्पविधानात् भावार्थे निष्ठायामेव निषेधः स्यादिति चेत् । मैवम् । प्रत्ययार्थो नोपाधिः, "तेन निर्वृत्तम्" इति निर्देशात् । परः परमात्मा । अवराः, हिरण्यगर्भादयः । *पठितेति । "नानृतं वदेद्" इतीत्यर्थः । *श्रुत्यन्तराच्चेति । याज्ञे कर्मणि शब्दानृतस्यापि दोषत्वश्रवणादित्यर्थः ।

*नित्यानुवादइति । उपनयनप्रभृत्यामरणं स्मार्तो ऽनृतवदननिषेधस्तस्यैवायमनुवादः इत्यर्थः । *प्रयोजनपरमिति । स्मार्तेन निषेधेनानृतवदने पुरुषस्य प्रत्यवायो बोध्यते, न तु क्रतुवैगुण्यमित्यर्थः ॥ ६ ॥

(क० टी०) *एवम्—लाघवात्कृतौ शक्त्यङ्गीकारे । एवमग्रेऽपि । *पदानामपीति । यौगिकानामपीत्यर्थः । एवेन द्रव्यवाचित्वव्यवच्छेदः । ननु सामानाधिकरण्यानुरोधेन तत्र नैवमत आह *लक्षितेनेति । नन्वक्षरमर्यादया कथं तत्रैव शक्तिलाभो ऽत आह— *समासे इति । इदमपि पररीत्या । सिद्धान्तस्त्वनुपदमेव स्फुटीभविष्यति । अरुणाधिकरणोच्छेदवद् गुणाधिकरणोच्छेदो ऽपि तव मते इत्याह *किञ्चैवमिति । *इत्यत्रेति । किमामिक्षावाक्यविहितयागे वाजिनाख्यो गुणो विधीयते, अथवा द्रव्यदेवतासंयोगेन कर्मान्तरमिति संशये द्वितीयपक्षे गौरवात्तत्रेति शेषः । द्रव्यदेवतयोर्यागस्वरूपत्वादुभयरूपत्वादुभयरूपत्वं द्रव्यकृतम्, एकत्वं

देवताकृतमित्याह *तेनेति । *श्रौतः-द्रव्यदेवतयोः । एवमग्रे ऽपि । नन्वामिक्षाया अपि तत्पदसमभिव्याहारादेव देवतासम्बन्धावगमात्कथं तस्य श्रौतत्वमत आह *सत्यपीति । प्रकृते तत्कृतसाम्ये सत्यपीत्यर्थः । विशेषमाह *स्वाभिन्नेति । अभिधानपर्यवसानायेत्यादिः । अपिना तदनपेक्षासमुच्चयः । *भिन्नेति । पर्यवसिताभिधानस्येतरप्रत्यायनायेत्यादिः । अवधारणमुभयत्रापि बोध्यम् । *एवञ्च—उक्तरीत्या प्रमाणभेदेच । ननु देवतैक्ये कथं तत्त्वमत आह *वाजिभ्य इति । यौगिकानां द्रव्यानभिधायकत्वेन तदसङ्गतेराह *भङ्गइति । *एवं हि—लक्षणयाऽपि श्रौतत्वाङ्गीकारे हि । किञ्चेत्याद्युक्तदोषद्वयमुद्धरति *नचेति ।

अयम्भावः-आकृत्यधिकरणन्यायानङ्गीकारे ऽधिकरणद्वयमुक्ताशायकम्, तदङ्गीकारे तु तत्र सम्बन्धे एव शक्तिस्तत्राद्यसाध्यस्य लक्षितेन सामानाधिकरण्येन सिद्ध्या तदुच्छेदेन दोषः, द्वितीयस्य तु नचलक्षितेत्यादिरीत्योपपत्तिरिति न तदुच्छेदः । यद्यप्युक्तदोषद्वयात्तथा दुर्वचमिति तदुच्छेद एव, तथाऽप्युत्पत्तिशिष्टेन बलीयसा ऽवरोधाम्नोक्तकर्मानुवादेन तद्विधिरिति न तदुच्छेद इति सम्बन्धः । तत्रैव यद्वा स्वसिद्धान्ते तन्न्यायेनाशङ्कते *नचेति । *तत्र-सम्बन्धे । एवं च व्यक्तिपक्षादविशेष इति न्यायाश्रयणवैफल्यमिति भावः । तन्न्यायेनैवाह *नचतदन्वितेति । *दण्डीति । तदादिजन्यबोधे बुद्धिस्थत्वादिवदिति भावः । कादाचित्कत्वे ऽप्याह *नियमत इति । नन्वेवं कथं नीलादीनां गुणगतजातौ शक्तिरत आह *नीलादिभ्यश्चेति । 'नीलत्वविशिष्टनीलेति पाठः । एवं सति तद्विषयतामुपसंहरति *एवं चेति । नीलादौ भाने दण्ड्यादावभाने चेत्यर्थः । तत्रैव च लक्षितेन सामानाधिकरण्यनिर्वाहो नान्यत्रेति भावः । 'प्रकृतिप्रत्यययोः' इति न्यायेन भावनायास्तदनुरोधेन प्रत्ययवाच्यत्वमिति युक्तिं दृष-

---

(१) एतत्कलानुरोधान्मूले नीलत्वेन नीलवचेति पाठः प्रतीयते । उपलब्धकलापुस्तकान्तरे नीलत्वेनेति प्रतीकमादाय गुणगतैनैवेत्यर्थ इति व्याख्यानमपि दृश्यते परन्तु उपलब्धमूलपुस्तकत्रितये तदनुपलम्भान्मूलपुस्तकानुरोध्येव पाठो मूलेऽवस्थापितः ।

यति *किञ्चप्रत्ययेति । एकवाक्यत्वार्थमाह *क्रियेति । अन्यथा तद्विरोधापत्तिरिति भावः । *परत्वे—वाच्ये इति शेषः । *धात्वर्थेति । प्रत्ययार्थकालसंख्यानिष्ठप्रकारतानिरूपितेत्यादिः । त्वयापीत्यपिना सिद्धान्तिसमुच्चयः । ननु तत्र तस्य धातुलभ्यत्वे ऽपि तदर्थं तेनानुवाद इति तदर्थत्वमप्यङ्गीक्रियते इत्यत आह *अन्येति । धातुलभ्यस्य भावस्येत्यर्थः । *अपिः–स्थितधात्वर्थत्वसमुच्चायकः । *तद्वाच्यता-तिङ्वाच्यता । अभ्युपेत्यापि तन्मतमत एवेत्यादृयुक्तिं खण्डयति *किञ्च नानृतमिति । *प्रथमोपेति । श्रुतेः सर्वथा निरपेक्षत्वमुत्तरोत्तरस्य पूर्वपूर्वसापेक्षत्वमिति तत्सिद्धान्तादिति भावः । नन्वयं दोषः सिद्धान्ते ऽपि तदुक्त एवेति समत्वादचोद्य एवेति आह *ममात्विति । कर्त्रादेराख्यातार्थत्ववादिन इत्यर्थः । तुरुक्तवैलक्षण्ये । तथा च सिद्धान्ते न दोष इति न समत्वमिति भावः । तक्रकौण्डिन्यन्यायवन्नेत्याह *विरोध एवेति । *अन्यथा—तत्तुल्यत्वाङ्गीकारे । मदुक्तमेव त्वन्मूलभूतवार्त्तिककृत्संमतं न त्वदुक्तमित्याह *तदुक्तमिति । आदिना ऽनृतवदनादि ।*पुरुषार्थमित्यन्तमेकं पदम् । स्त्रीगमनमांसभक्षणादिरूपो यः पुरुषार्थस्तं समाश्रितो ऽपि प्रतिषेधः प्रकरणाश्रयात् क्रतोरप्यङ्गमिष्ट इत्यर्थः । अत एव पुरुषार्थोऽपीति वाच्ये 'तमपि श्रितः' इत्युक्तिः सफला । अत एव च "अकर्म" इति वक्ष्यमाणाधिकरणे—

वदेदिति श्रुतेरत्र पुरुषः सम्प्रतीयते ।
विधिरप्यर्थवानेवं क्रत्वर्थे ह्यन्यथा भवेद् ॥ इत्युक्त्वा,

तस्माद्विधयस्तावत्पुरुषार्थास्ततश्च प्रतिषेधानामपि तदनुसारित्वात्पुरुषार्थत्वसिद्धिः ।

अत आत्मोपकाराय पुरुषो नानृतं वदेदिति शास्त्रार्थो ऽवधार्यते इति तैरेवोक्तम् । एतेन भक्षादिरिति व्यस्तपाठः प्रत्युक्तः । तथा च तत्रान्निषेधस्यापि तत्त्वतस्तत्त्वं च । अन्यथा प्रकरणपाठासंगतिरेवेति भावः । यत्तु अनारभ्याधीतेन स्मार्त्तनिषेधेनैव सर्वत्र पुरुषप्रत्यवाये सिद्धे तत्प्रकरणपठितस्य क्रत्वर्थत्वमेव युक्तमिति, तन्नेति ध्वनयन्नाह *अनारभ्येति । क्रतुप्रकरणापठित इत्यर्थः । मनुयाज्ञवल्क्याद्युक्तत्वादाह *स्मार्तेति । गुणोपसंहारपादे "कार्याख्यानादपूर्वम्" इत्यधिकरणे (उ० मी० अ० ३ पा० ३

अ० ९ सू० १८) भामत्यां स्पष्टमिदम्। श्रुत्यनुवादकभाष्यस्यार्थतोऽल्पानुवादमाह *विदितेति। अनेन श्रवणमननिदिध्यासनसम्पदुक्ता। *परावरेति। विद्याऽविद्याप्रविभागज्ञा इत्यर्थः। *प्रयुञ्जते इति। वर्त्तमानसमीपे भूते लट्। एवमग्रेऽपि। अत एव बभूवुरित्याग्रिमसङ्गतिः। *याज्ञे इति। अनेन तत्त्वज्ञानिनामपि कर्माधिकारं सूचयति। *पुनस्त्वर्थे। *तेयर्वाणइति। योगिन एते विरक्त्यतिशयाल्लौकिकेष्वर्थेषु आग्रहविरहिणः यथा तथाऽस्माकं भवत्विति विवक्षवः, ते ऋषयस्तथा वक्तव्ये तथोक्त्या तन्नामानो बभूवुरित्यर्थः। सैव तेषां संज्ञा जातेति तात्पर्यम्। दोषसत्त्वे तु तथोक्तेरसम्भवेन श्रुतौ तथाऽऽख्यानासङ्गतिरिति भावः। नन्वेवं तस्यापि तत्त्वमेव कुतो नात आह *एतदिति। याज्ञे कर्मणि स्यादित्यर्थः। एवः प्रसिद्धाविति न पूर्वविरोधः। अप्यर्थो वा। अत एवाह *ते इति इति। *कुर्वन्तः—अपशब्दभाषणं कुर्वन्तस्ते ऽसुरा इत्यर्थः। *क्रत्विति। ज्योतिष्टोमेत्यर्थः। उभयाकाङ्क्षा प्रकरणम्।

शिष्टाचारसंवादो ऽप्यत्रेत्याह *अत एवेति। अयं भाष्यादिसंमतस्तयोर्भेदो जैमिन्यादिसंमतो ऽपीत्याह *अत एवेति। उक्तरीत्या तयोर्भेदादेवेत्यर्थः। सूत्रद्वयेऽन्वयः। गामश्वमितिवत्समुच्चयः। सङ्गच्छते इति शेषः। तत्र अन्यथाऽधिकरणार्थो वक्ष्यमाण इति तथा स्वस्यानिष्टत्वादाह *तवेति। भावार्थाधिकरणं त्वितो भिन्नमिति भावः। एतेन तन्मते मिथो विरोधो ऽपि सूचितः। कर्त्तुर्हि वाच्यत्वसाधकमेवेदं सूत्रमिति तृतीयतुर्यपादे इत्यर्थः। साकाङ्क्षत्वाच्छेषमाह *अनारभ्येति। संयोगादित्यस्य व्याख्या *समानेति। अनुवादत्वस्य सफलत्वनियतत्वात्पूर्वपक्षतात्पर्यमाह *एवं चेति। तस्य तदनुवादत्वेचेत्यर्थः। *स्मार्तमेवेति।

निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्।
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्॥

सङ्करापात्रक्रियासु मासः शोधनमैन्दवमिति—
मन्वाद्युक्तमेवेत्यर्थः।

एवेन यजुर्म्रेषप्रायश्चित्तादिनिरासः। फलभेदमेवाह *स्मार्ते-नहीत्यादिना । *तेन—निषेधेन । एवमग्रेऽपि । बोध्यते इत्यग्रे शेषः । तस्याग्रे ऽप्यनुषङ्गः । किञ्चिदर्थमेवाह *तदिति । *वा चार्थः । *एवं चेति । आत्मदोषपरिहाराय पुरुषेणानृतन्न वाच्यमिति तत्तात्पर्यं चेत्यर्थः । *अङ्गीकृत्य—अङ्गीकृत्यापि । तदुक्तं तैरेत्र यदा दर्शपूर्णमासस्थोऽपि तदतिक्रमं करोति तदा बाह्यातिक्रमवदस्य स्वयं प्रत्यवायमात्रं स्यान्न कर्मफलप्रतिबन्धः । नहि शुद्धपुरुषधर्मातिक्रमैः क्रतवः प्रत्यवयन्ति ।

तथाहि—

यो नामः क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत् ।
न क्रतोस्तत्र वैगुण्यं यथाचोदितसिद्धितः ॥ इति ।

क्रतवो हि स्वसम्बन्धिनौ विधिप्रतिषेधावपेक्षमाणास्तदतिक्रमे सति विगुणा भवन्ति । ये तु पुरुषगता विधिप्रतिषेधास्ते क्रत्वन्तरगता इवास्य सदसद्भावयोरविशिष्टाः । नहि तेषु गुणत्वबुद्धिरुत्पन्ना येनातिक्रमे वैगुण्यबुद्धिः स्यात् । तेन दर्शपूर्णमासयोरनृतं वदन्नरकं च प्राप्नुयाद्दर्शपूर्णमासफलञ्चाविकलमवाप्नुयादिति स्मृत्यर्थः । श्रौतस्तु प्रकरणयुक्तपुरुषधर्म इत्यत्रैषोऽर्थो विज्ञायते वर्जितानृतवदनकेन पुरुषेण कृतौ दर्शपूर्णमासौ फलं साधयत इति प्रकरणसामर्थ्यात् पुरुषगतापूर्वसाधनत्वं लक्षयित्वाऽनृतं प्रतिषिद्धम् । अतश्च तदतिक्रमे दर्शाद्यपूर्वमेव वैगुण्यान्न स्यान्न तु पुरुषस्य कश्चित्प्रत्यवायः । नहि तदानीं कल्प्यमानः प्रत्यवायः स्वतन्त्रपुरुषसम्बन्धित्वेन कल्पयितुं शक्यते इति । तदाह *क्रतुप्रकरणेति । *क्रतोः—तस्यैव । 'वा स्याद्' इति कोशाद्वाऽवधारणे सूत्रेइत्याह *विधिरेवेत्येति । *केचित्—भट्टप्रभृतयः ॥ ६ ॥

परेतु "अथ ब्रह्मचारिणो व्रतम्" इत्युपक्रम्य "नेक्षेतोद्यन्तमादित्यम्" इतिवदस्यापि पाठात् स्मार्ते "नानृतं

---

(१) वा स्याद्विकल्पोपमयोरेवार्थेच समुच्चये इति विश्वः ।

(२) केचिदित्युपलब्धमूलपुस्तकेष्वनुपलब्धमिति मूले नोपन्यस्तम् । फलानुरोधात्तद् 'विधिरेवेत्यर्थ' इति पतन्मूलोत्तरं ज्ञेयम् ।

यदेद्" इति तत्संकल्पपरम् । इदं तु संयोगान्तरात् क्रतुप्रकरणपाठाद् व्रतोपक्रमाभावाच्च, अनुवादफलाभावाच्च, प्रयोजनसम्भवाच्च प्रतिषेधविधायकमेवेत्यर्थ उचितः । नहि केवलप्रयोजनमात्रेण वाक्यार्थव्यवस्थितिः । नहि प्रयोजनानुवर्ति प्रमाणमिति न्यायात् ।

न्यायेन वाक्यार्थे निर्णीते प्रयोजनसिद्धिरित्यन्यत् ।

नच तादृशोपक्रमानुपलम्भ इति वाच्यम् ।

ब्रह्मचारिप्रकरणे—

ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ।

ब्राह्मणो ऽत्र ब्रह्मचारी । ततस्तद्व्रतप्रदर्शनपरम्—

मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम् ।

भास्करालोकनाश्लीलपरिवादादि वर्जयेद् ॥ इति—

याज्ञवल्क्योक्तेः । व्रतमपीडयन् मद्यादिपरिहारेण । अश्लीलमसभ्यभाषणमिति मिताक्षराव्याख्यातेनाश्लीलपदेनासभ्यानृतभाषणयोः संग्रह इति सूचितम् । भास्करालोक उदितादेरिति च मिताक्षरा । शुक्तं परुषवच इति च । आदिपदेन स्मृत्यन्तरोक्तगन्धमाल्यादिवदनृतस्यापि संग्रह इत्यन्ये ।

"नेक्षेतोद्यन्तम्" इत्यादिविषये—

उपक्रमे श्रुतं ब्रह्मचारिव्रतपदे यतः ।
तदन्वयबलात्कर्मविशेषो ह्यत्र बोध्यते ॥

इति मिश्रोक्तेश्च ।

प्रकृताधिकरणे शबरस्वाम्यपि । "संयोगान्तराद्" इति सूत्रैकदेशमुपादाय नियमानुष्ठानेन पुरुषस्य

संबन्धः स्मर्यते पदार्थप्रतिषेधेन संयोग इह पुरुषस्ये-त्ययमिह संयोग इत्याहेत्याहुः ।

नियमश्च सङ्कल्प एव । तदनन्तरं क्रतुसंयुक्ते पूर्वा-क्तनिषेधवाक्ये, "जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति विधिवाक्ये च साधारणतया पूर्वपक्षोपपादकम् "अहीनवत्पुरुषधर्मस्तदर्थत्वाद्" इति सूत्रम् । उभय-मपि पुरुषधर्मस्तदर्थत्वात् । आद्ये "वदेद्" इतिश्रुत्या, द्वितीये "जञ्जभ्यमानो ऽनुब्रूयाद्" इति वाक्येन पुरुषा-र्थत्वावगमात् । ज्योतिष्टोमप्रकरणपठितम् "द्वादशोप-सदास्तिस्र एवोपसदो द्वादशाहीनस्य" इत्यहीनसंयो-गात्प्रकरणादुत्कृष्यते तद्वत् । श्रुतिवाक्याभ्यां च प्रकरणं दुर्बलमिति तदर्थः ॥ ७ ॥

(कुं० टी०) *संकल्पपरमिति । "अथ व्रतम्" इत्युपक्रमा-दुदयकालिकादित्यानीक्षणसंकल्पवदनृतवदनाभावसंकल्प इत्य-र्थ इति भावः । संयोगान्तरादित्यस्यार्थमाह *क्रतुप्रकरणेत्या-दि । स्मार्ते ब्रह्मचारिव्रतोपक्रमः कथमिति शङ्कते *नचेति । अ-सभ्यं व्रीडादिदायकम् । *आदिपदेनेति । केचिदनृतवदने-ऽश्लीलं सगृह्णन्ति, अन्ये आदिपदेनेत्यर्थः । ब्रह्मचारिव्र-तविषयत्वं प्रकारान्तरेण द्रढयति *इत्यादिविषये इति । मिश्रोक्तेश्चेत्यत्रान्वयः । ब्रह्मचारिव्रतविशेषो ऽत्र बोध्यते इति कारिकार्थः । कर्मविशेषश्चानीक्षणसङ्कल्परूपः । *स्मर्य-ते इति । स्मार्तेन "नानृतम्" इत्यनेन नियमानुष्ठानसम्बन्धः

---

(१) परार्थेतिपाठं परिकल्प्य कुञ्चिकाकारो व्याख्यत् परन्तु कलाऽनुरोधेन मूलपुस्तकत्रितये उपलम्भाच्च पदार्थेति पाठ एवा-वस्थापितः ।

पुरुषे बोध्यते । *परार्थेति । इह क्रत्वर्थनिषेधेन पुरुषस्य संयोगो बोध्यते इत्यर्थः । *ज्योतिष्टोमेति । ज्योतिष्टोमप्रकरणे श्रूयते-"तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य" इति । एकेनाह्ना निष्पाद्यत्वात्साह्नो ज्योतिष्टोमः । दीक्षादिवसादूर्ध्वमभिषवदिवसात्पूर्वं कर्तव्या होमा उपसदः । चतुर्विधा हि सोमयागाः—एकाहाहीनसत्रायनात्मकाः । एकैकदिवससाध्या अग्निष्टोमादयः एकाहाः । द्विरात्रादयो ऽहीनाः द्वादशाहः सत्राहीनोभयात्मकः । त्रयोदशरात्रादीनि सत्राणि । संवत्सरादिसाध्यानि अयनात्मकानि । अत्र न हीन इति व्युत्पत्त्या ज्योतिष्टोम एवाहीनशब्देनोच्यते । स हि सर्वस्य यागस्य प्रकृतिः । तथा च प्रकरणाज्ज्योतिष्टोम एव द्वादशत्वत्रित्वयोर्विकल्पः इति पूर्वपक्षः । द्विरात्रादावहर्गणे अहीनशब्दो रूढः इति सवनप्रकरणादुत्कृष्य तत्रैव द्वादशत्वविधिरिति सिद्धान्तः ॥७॥

(क.टी.)केचिदितिसूचितामरुचिं वक्तुं सिद्धान्तसूत्रस्य सिद्धान्तार्थमाह *परेत्वित्यादिना आहुरित्यन्तेन । अस्यापीत्यस्यार्थं सूचयन्नाह *स्मार्त्तमिति । प्रजापतिव्रतान्तर्गतं मन्वाद्युक्तंचेत्यर्थः । *तदिति । यावद्ब्रह्मचर्यानृतवदनाभावेत्यर्थः । *इदन्त्विति । श्रौतन्त्वित्यर्थः । तच्च स्थलत्रितये । तत्र-द्वितीयाष्टके तैत्तिरीये "विश्वरूपो वै" इति प्रश्ने "नासोमयाजी" इत्यनुवाके दर्शपूर्णमासमहाप्रकरणावान्तरदाक्षायणयज्ञप्रकरणे "तस्यैतद् व्रतं नानृतं वदेन्न मांसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेन वासः पल्पूलयेयुरेताद्धि देवाः सर्वं न कुर्वन्ति" इत्येकम्, प्रथमाष्टकब्राह्मणे "ब्रह्मसन्धत्तम्" इतिप्रश्ने "द्वादशसु" इत्यनुवाके आधानप्रकरणोत्तरं "तस्मादाहिताग्निर्नानृतं वदेन्नास्य ब्राह्मणो ऽनाश्वान् गृहे वसेद्" इत्यादि द्वितीयम्, आरण्यके "सहवै" प्रश्ने कुष्माण्डहोमप्रकरणे "न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात्तपो ब्राह्मणस्य व्रतम्" इति तृतीयम् । तत्र आद्यतृतीययोः संयोगान्तरादित्यस्यार्थः—*क्र-

त्विति । आद्यद्वितीयतृतीयसाधारणम् अर्थान्तरमाह *व्रतोपक्रमेति । सर्वत्र तद्व्रतोपक्रमाभावाच्चेत्यर्थः । तथैवाह *अनुवादेति । अत्र सर्वत्र प्रायश्चित्तान्तरोक्तेस्तत्प्रायश्चित्ताप्राप्तिरिति भावः । आद्यतृतीयाशयेनाह *उक्तेति । क्रतुवैगुण्येत्यर्थः । *प्रतिषेधेति । तत्राद्यं "तस्यैतद् व्रतम्" इत्युपक्रमाद्यावत्क्रतुसंकल्पविषयप्रतिषेधविधायकम्, द्वितीयं श्रुतोपक्रमाभावेऽपि क्रतोर्ग्राह्यत्वादनन्तरम् 'आहिताग्निव्रतानि "नानृतं वदेद्" इत्याद्यापस्तम्बोक्तत्वात्तस्य यावज्जीवसंकल्पविषयप्रतिषेधविधायकत्वम् । अत एव प्रयोगकारैराधानप्रयोगोत्तरम् 'अथाहिताग्नेर्व्रतसङ्कल्पः—अनृतं न वदिष्यामि, अनाश्वासं ब्राह्मणं न वासयिष्ये, सूर्योढमतिथिं नापरोत्स्ये, ऋचीषपक्कं नाशिष्यामि, क्लिन्नं दारु नाग्नावाधास्यामि, अन्तर्नाव्यपो नाशिष्यामि, स्वकृते इरिणे जातं न खादिष्यामि, पुण्यो भविष्यामि, हिंकृत्य वाग्यतः स्त्रियमुपैष्यामि, हिंकृत्य स्त्रियमुपैष्यामीति वा, सायमुद्धरणानन्तरमाहुतावहुतायां नाशिष्यामि, नक्तमन्नादन्यन्न दास्ये नक्तमन्नादन्यदपि दास्ये इति वा, एतस्मिन्संवत्सरे पशुनाऽनिष्ट्वा मांसं न भक्षयिष्यामीत्याहिताग्नेर्व्रतसंकल्पा यावज्जीवमनुष्ठेयाः' इत्युक्तम् । तृतीयं तत्र पाठात्तदनुपक्रमाच्छुद्धक्रतुगतप्रतिषेधविधायकमित्यर्थः । *विधायकमेवेत्येवेन तन्मात्रव्यावृत्तिः । औचित्यमेव प्रतिपादयंस्तत्रारुचिमाह* नहीति । केवलशब्देन सजातीयव्यवच्छेदः । मात्रपदेन विजातीयस्य । सिद्धस्य गतिश्चिन्तनीया । दृष्टान्तसाधारण्येन शङ्कते *न च तादृशोपेति । "तस्यैतस्य स्नातकस्य व्रतानि" इत्युपक्रम्याश्वलायनेन, "अथ स्नातकव्रतानि" इत्युपक्रम्यापस्तम्बेन "व्रतानीमानि धारयेद्" इत्युपक्रम्य मनुना यथा स्नातकव्रतान्युक्तानि तद्वदत्र नोक्तमित्यर्थः । तथा च तस्य तत्परत्वं दुर्घटमिति भावः । शाब्दतदुपक्रमाभावे ऽप्यार्थस्तदुपक्रम इत्याह *ब्रह्मचारीति । 'ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि' इति पूर्वार्द्धादाह *ब्राह्मण इ-

---

१ अत्र कलापुस्तके ईरिणे नात्रसास्यामीत्युपलभ्यते परन्तु कात्यायनश्रौतसूत्रे ईरिणे उत्पन्नं न खादिष्यामीत्युक्तेः, तद्व्याख्याकारैश्च उत्पन्नं तिन्तिड्यादि न भक्षयिष्ये इति व्याख्यानात्तदेवात्राव-स्थापितम् ।

ति । तद्ग्रहणं क्षत्रादेः श्राद्धभोजनव्युदासार्थम् इति भावः । *ततः- अव्यवधानेन । *परामधुमांसेति पाठे परा इतिरूपा या याज्ञव- ल्क्योक्तिस्तस्या इत्यर्थः । *परस्येति पाठे परस्येत्यस्य याज्ञवल्क्यव- चनादित्यर्थः । नन्वेतावता दृष्टान्तसिद्धावप्यनृतवदननिषेधस्य तत्त्वं न लब्धं "नाहितं नानृतञ्चैव" इति याज्ञवल्क्योक्तं तु स्नातकप्र- करणस्थमतो मिताक्षरामाह *व्रतमिति । आदिना मांसादि । तामेवाह *अश्लीलमिति । नन्वेवमपि दृष्टान्तासङ्गतिः सामान्यतो रविदर्शनाभावस्यैव तत्त्वलाभादत आह *भास्करेति । पर्युषि- तस्याभक्ष्यप्रकरणे उक्तेराह *परुषमिति । मिताक्षरेत्यस्यानुषङ्गः । नन्वश्लीलमसभ्यभाषणमित्येव पाठ इति कथं तत्संग्रहो ऽतस्तदु- क्तयुक्त्यैवाह *आदीति । *स्मृत्यन्तरेति । तत्प्रकरणे द्यूतं च ज- नवादं च परिवादं तथा ऽनृतमित्यादि मन्वापस्तम्बाद्युक्तेरित्यर्थः । दृष्टान्ते उपक्रमः शाब्दोऽप्यस्तीति पार्थसारथिमिश्रसंमतिमप्याह *नेक्षेतोद्यन्तमिति । ब्रह्मचारिधर्मभूतप्रजापतिव्रतान्तर्गते इत्यर्थः । स्पष्टं चेदमादौ नञर्थवादे, लक्ष्म्यां च मिताक्षराव्याख्यायाम् । स्वोक्तभिन्नार्थे तद्भाष्यसंमतिमप्याह *प्रकृतेति । "अकर्म- क्रतुसंयुक्तम्" इत्यधिकरणे इत्यर्थः । *संयोगान्तरादिति सूत्रैकेति । "विधिर्वा संयोगान्तराद्" इति सूत्रस्य विधिर्वा संयोगादित्येकदेश- मित्यर्थः । तावदेव सूत्रमिति भ्रमनिरासायेदम् । *नियमेति । विधिर्वाऽयन्दर्शपूर्णमासयोर्नानृतंवदेदिति, नानुवादः, कुतः संयो- गान्तरादित्यादिः । संयोगभेदस्यैव प्रतिपादको नियमेत्यादिग्रन्थः । *स्मर्यते-स्मृत्या प्रतिपाद्यते । *पदार्थेति । क्रतुगतसङ्कल्पविषयानृ- तवदनपदार्थेत्यर्थः । *इह-श्रौतविशेषे । पुरुषस्येत्यग्रे इति कथम- न्यत्र श्रूयमाणोऽन्यस्यानुवादो भविष्यतीति तत्र शेषः । तत्फलितमाह *इत्ययमिहेति।नतु भट्टाद्युक्त इत्यर्थः।ननु तावताऽपि तस्य तत्सङ्कल्प- परत्वालाभ एव नियमानुष्ठानेनेत्युक्तेरत आह *नियमश्चेति । *स- ङ्कल्प एवेति । यावद्ब्रह्मचर्यानुष्ठीयमानानृतवदनाभावसङ्कल्पविशेष एवेत्यर्थः । तस्मादुक्ताधिकरणतस्तस्य क्रतुयुक्तपुरुषधर्मतैव न तदुक्तक्रत्वर्थतेति सिद्धम् । इदमेवैतदग्निमाधिकरणेन द्रढयति *तदनन्तरमित्यादिना । *क्रत्विति । दर्शपूर्णमासप्रकरणप- ठिते इत्यर्थः । यद्यपि पूर्वं निषेधपरम् अकर्मेत्युक्तेः

परिशेषादिदं विधिपरमिति भाष्ये उक्तम्, श्रुत्या सह प्रकरणं विरुध्यते नवेति पूर्वत्र विचारितम् इदानीं लिङ्गवाक्याभ्यां सह विचार्यते इति वार्त्तिके उक्तम्, तथापि सिद्धान्तमतेन तुल्यत्वेन अत्र विनिगमनाविरहादाह *पूर्वोक्तेति । तत्रैव "त्वष्टाहतपुत्रः" इत्यनुवाकपठितमाह *जञ्जभ्येति । *उभयम्-अनृतवदनाभावतदनुवचनरूपमित्यर्थः । पुरुषपदार्थमाह *पुरुषधर्मइति । तात्स्थात्ताच्छब्द्यमिति भावः । हेतोर्व्याख्या *आद्येइति । दृष्टान्तार्थमाह *यथेति । तिस्र एव साह्नस्योपसद इति पाठः । श्रुतेस्तैत्तिरीयायाः तथैव सत्त्वात् । साह्नः ऐकाहिको ज्योतिष्टोमः । अहीनः द्व्यहादिद्वादशाहान्ताहर्गणसाध्यः । उपसद इष्टिविशेषाः । तत्तात्पर्यमाह *श्रुतीति ॥ ७ ॥

तदनन्तरं "प्रकरणविशेषाद्वा तद्युक्तस्य तत्संस्कारो द्रव्यवद्" इति सिद्धान्तसूत्रम् । प्रकरणात्तद्युक्तस्य तत्क्रतुयुक्तस्य अनृतवदनाभावानुवचनादि संस्कार इति तदर्थः । विरोधे हि श्रुतिवाक्ये बलवती । प्रकृते च तयोरविरोधात् श्रुतिप्रकरणाभ्यां वाक्यप्रकरणाभ्यां क्रतुयुक्तपुरुषसंस्कारत्वम् । यथा क्रतुयुक्तव्रीह्यादीनामेव प्रोक्षणं संस्कारकम् । तेनोभयत्रापि वैपरीत्ये क्रतुवैगुण्यं सिद्धम् । अवैपरीत्ये तत्साद्गुण्यं च । याजुषभ्रेषनिमित्तं प्रायश्चित्तं च सिद्धम् ।

नच "नानृतं वदेद्" इत्यस्य क्रतुगतपुरुषधर्मत्वे यजमानस्य प्राधान्यात् प्रधानभूतकर्त्रा यजमानेनैव वर्ज्यं स्यात् । क्रत्वर्थत्वे प्रतिषेधस्य वर्जनीयतया कर्त्रनपेक्षत्वेन यज्ञप्रवृत्तेन यजमानेन ऋत्विग्भिश्च वर्जनं सिध्यतीति विशेष इति वाच्यम् । श्रुतिप्रकरणाभ्यां क्रतुसम्बद्धपुरुषकर्तृकानृतवदना-

भाव इति बोधेन तत्सम्भवात् । क्रतुकर्तृकर्तृकेति बोधे मानाभावात् ।

किञ्च वर्ज्यभावनायाः कर्त्रनपेक्षत्वे व्यभिचारेण भावनायाः कर्त्राक्षेपकत्वमेव भवदुक्तं भज्येत ।

किञ्च युष्मदस्मद्भिन्नसामानाधिकरण्ये प्रथम इत्यर्थकेन "शेषे प्रथमः" इत्यनेन तत्सामानाधिकरण्ये एव प्रथमस्य साधुत्वाद्वदेदित्यस्य साधुत्वाय पुरुष इतिपदस्य, तदर्थस्य वाऽध्याहारावश्यकत्वेन जञ्जभ्यमानवाक्यतो वैषम्यं दुरुपपादम् ।

नच तत्सामानाधिकरण्याभावे प्रथम इत्येव तदर्थः । "उपपदे समानाधिकरणे" इत्यधिकारेण शेषपदस्वारस्येन च तादृशार्थासम्भवात् ।

नचैवं 'त्वं च चैत्रश्च पचथः' इत्यत्र परत्वात् प्रथमापत्तिः । उपयुक्तासमभिव्याहृतस्य उपयुक्तादन्यस्य शेषपदार्थत्वात् । स्पष्टं चेदं भाष्ये ।

न्यायसुधाकारोऽपि क्रत्वर्थत्वे क्रतुफलसिद्ध्यर्थत्वात्पुरुषार्थत्वमप्यस्तीति वदन् क्रतुसम्बद्धपुरुषधर्मतापक्षमेव साधु मेने ।

एवञ्च जञ्जभ्यमानसंस्कारोऽपि क्रतुसम्बद्धपुरुषमात्रस्येति बोध्यम् । तव तु विपरीतम् यजमानस्यैव स स्यात् ।

एतेन प्राधानात् यजमानसंस्कार एवेति परास्तम् ।

यद्यपीदं द्वयमपि दर्शपूर्णमासप्रकरणे एव पठितं तथाऽपि तद्गतक्रतुत्वसामान्यापेक्षमेव, पूर्वोक्तमहाभाष्यात् । भगवान् शबरस्वामी तु "नानृतं वदेद्"

इत्यस्य पुरुषधर्मत्वमुत्सूत्रमेवाशङ्क्य उत्सूत्रमेव कर्तुराख्यातप्रत्ययार्थत्वनिरासेन प्रौढ्या समाहितवान् ।

तथा भावार्थाधिकरणे भगवन्तो भट्टपादाः प्रौढिवादेनैव प्राधान्यादियुक्तिभिर्भावनाया अप्रत्ययार्थत्वमुत्सूत्रमेवोक्तवन्तः ।

"भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते" इति हि तत्र सूत्रम् । कर्मशब्दा यजेत दद्याज्जुहुयादित्यादयस्ते भावार्थाः प्राधान्येन क्रियाऽर्थाः । "क्रियाप्रधानमाख्यातम्" "भावप्रधानमाख्यातम्" इत्युक्तेः, अतस्तेभ्यः क्रिया प्राधान्येन प्रतीयेत हि । प्रधान्यादेवैषोऽर्थः क्रियारूपः सर्वत्र विधीयते न नामार्थः । तस्याश्च शीघ्रनाशित्वाद्वारमपूर्वं स्वीकार्यमिति तदर्थः । नह्यनेन भावनायाः प्रत्ययार्थत्वं न धात्वर्थत्वमित्यर्थः स्पृश्यते । नव्यमीमांसकानां तु प्रौढिवादेनाप्युक्ते ऽर्थे मुख्यसिद्धान्तत्वभ्रम इति सुधियो विभावयन्तु ।

तस्माद्भावना धातुवाच्यैव ।

तदुक्तं "कारके" इति सूत्रे भाष्ये—"अधिश्रयणोदकासेचनैधोपकर्षणादिक्रियाः कुर्वन् देवदत्तो यदा पचतीत्युच्यते तदा तत्राधिश्रयणादिषु पचिर्वर्तते, ज्वलनक्रियां कुर्वन्ति काष्ठानि यदा पचन्तीत्युच्यन्ते तदा तत्र पचिर्वर्तते, सम्भवनं धारणं च कुर्वती स्थाली यदा पचतीत्युच्यते तदा तत्र पचिर्वर्तते" इति । सम्भवनं ग्रहणम्, धारणम् आसमाप्ति स्थापनमिति कैयटः ।

कर्तृकर्मरूपो धर्मी प्रत्ययार्थः । स्पष्टं चेदं "तिङ्भ्यामेकं द्रव्यमभिधीयते" इत्यादिना "गत्यर्थलोटा" इति सूत्रे भाष्ये । कर्त्रादिपदानां शक्तिपरत्वेऽपि शक्तिशक्तिमतोरभेदात्स एव प्रत्ययार्थः । कर्त्रादिविभक्त्या शक्तिमदभेदमापन्नाया एव शक्तेरुक्तिरिति "सार्वधातुके यक्" इत्यत्र कैयटोक्तेः । प्रत्ययार्थः प्रधानमित्युत्सर्गस्यापि भाष्यनिरुक्तकाराद्यनुभवबलेन त्याग इति । तदर्थकारकस्य धात्वर्थं प्रति विशेषणतेति केचित् ॥ ८ ॥

(कुं०टी०) *श्रुतिप्रकरणाभ्याम्—"नानृतं वदेद्" इत्यत्र । *उभयत्रापि—उक्तवाक्यद्वयेऽपि । *वैपरीत्ये—अनृतवदने, अनुवचनाभावेच । *भ्रेष इति । भ्रेषो भ्रंशो यथोचितादित्यमरः । *वैषम्यमिति । "नानृतम्" इत्यत्र पुरुषार्थत्वस्य त्यागो "जञ्जभ्यमान" इत्यत्र तत्स्वीकार इत्येतदित्यर्थः । *त्वंच चैत्रश्च पचथ इति । उपयुक्तादन्यः शेषः, इह चोपयुक्तस्य त्वंपदस्य सत्त्वान्न प्रथमः इत्यर्थः । *तद्गते—ज्योतिष्टोमगते इत्यर्थः । तेन क्रत्वन्तरेऽप्ययं विधिः । *महाभाष्यादिति । यर्वाणस्तर्वाणो नाम ऋषयो याज्ञे कर्मणि नापभाषन्ते इत्यादिकात् । *धातुवाच्यैवेति । व्यापारातिरिक्तभावनायां तु मानाभावः । शक्तिपरत्वेऽपि कर्तृत्वादीनामेव वाच्यताया वक्ष्यमाणत्वात् । *उत्सर्गस्यापीति । बहुशो व्यभिचारदर्शनात् ॥ ८ ॥

(क० टी०) *तदनन्तरम्–पूर्वपक्षानन्तरम् । प्रकरणविशेषादित्यत्र कर्मधारयो न तु षष्ठीतत्पुरुषो व्यावर्त्याभावात् । तथाचास्याविवक्षितत्वं फलितमित्याशयेनाह *प्रकरणादिति । *युक्तस्य–पु-

रुषस्य । तदर्थमाह *अनृतेति । तद्वतसङ्कल्पविषयेत्यादिः । अनुवचनादीति पाठः । अनुब्रवणादीति पाठे ब्राह्मणो ब्रवणादिति वद्वतिर्बोध्या । अत एव ब्रवणी वचनं वाचा जल्पितं गदितं गिरेति शब्दार्णवः । साच प्रागुक्तरीत्या कौस्तुभे स्पष्टा । आदिना ज्योतिष्टोमप्रकरणे "अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन् तेऽप्सु दीक्षातपसी प्रावेशयंस्तीर्थे स्नाति तीर्थमिव हि सजातानां भवति" इति श्रूयमाणतीर्थस्नानपरिग्रहः । निपातानामनेकार्थत्वाद्धेत्वर्थकवासूचितप्रागुक्ततुल्यत्वोपपादनायाह *विरोधेहीति । *तयोः–श्रुतिप्रकरणयोः,वाक्यप्रकरणयोश्च । तदेवाह *श्रुतीति । यद्यपि सिद्धान्ते द्वितीयेऽपि श्रुतिरस्ति तथा ऽपि ततस्तत्सामान्यसंस्कारत्वसिद्धिरत उक्तरीत्या तद्विशेषसंस्कारत्वायाह *वाक्येति । दृष्टान्तमाह *यथेति । विचारफलमाह *तेनोभेति । सिद्धान्ततात्पर्यमाह *याजुषेति । यजुर्वेदोक्तेत्यर्थः । भुवः स्वाहेत्यादिकमित्यर्थः । स्वसिद्धान्ते भट्टाद्युक्तदोषमुद्धरति *नचेति । *वर्ज्यम्–तत्रानृतवदनम् । प्रतिषेध्यस्येत्यस्य वर्जनमित्यत्राप्यन्वयः । *पुरुषेति । तत्सामान्येत्यर्थः । विशेषग्रहणे बीजाभावात्तदाह *क्त्विति । पत्नीग्रहणं तु उभयथा ऽपीष्टमेवेति भावः । *इतीति । इत्यादीत्यर्थः । ननु वर्ज्यतया तस्य तदनपेक्षत्वमुक्तमिति तथा बोधस्याप्यसम्भवेन कथं तत्सिद्धिरतस्तदुक्तौ दोषान्तरमाह *किञ्चेति । तत्रैव दोषान्तरमाह *किञ्चेति । तयोरेव प्रकृतत्वादाह* युष्मदिति । तस्यैव प्रकृतत्वादाह *भिन्नेति । *साधुत्वात्–साधुत्वबोधनात् । परमतेनाह *पुरुषइतीति । अर्थाध्याहारमतेनाह *तदर्थेति । *वैषम्यमिति । तत्र वाक्यमत्र श्रुतिः, सर्वं सर्वगतं तद्, अत्र यजमानगतमेवेत्येवं चेत्येवमित्यर्थः । अन्य एव शेषपदार्थ इत्याह *नचतदिति । युष्मदस्मादित्यर्थः । एवेनोक्तार्थव्यवच्छेदः । तदनङ्गीकारे आह *शेषेति । अन्यथा न प्रथम इत्येव ब्रूयात् । *एवम्–उक्तार्थाङ्गीकारे । उपयुक्तान्यसामानाधिकरण्यसत्त्वात् आद्यविशेषणेन व्यावृत्तिरित्याह *उपेति । अत्र मानमाह *स्पष्टंचेदमिति । तत्रैव सूत्रे इत्यर्थः । तत्रहि–'तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वाद्' इत्याद्युक्तम् । स्वोक्तसिद्धान्ते राणककारसंमतिमप्याह *न्यायेति । भट्टसोमेश्वरो ऽपीत्यर्थः ।

*क्रत्विति । क्रतुफलमपूर्वं तत्सिद्धिः । *पुरुषेति । तदर्थत्वमपी- त्यर्थः । तुल्यन्यायत्वादाह *एवञ्चेति । तत्र तथासिद्धान्तेचेत्यर्थः । *संस्कारोऽपीति । तस्य तदनुवचनरूपसंस्कारोऽपीत्यर्थः । मात्रं कार्त्स्न्ये । नव्यमीमांसकमते दोषमाह *तवात्विति । प्राधान्यादाह- *यजमानेति । शानचः कर्त्रर्थत्वात् । तन्मतं खण्डयति *ए- तेनेति । विशेषबोधे मानाभावेनेत्यर्थः । *द्वयमपि—विधिनिषे- धात्मकमपि । एवञ्च क्रत्वन्तरे न तथेति भावः । *पूर्वोक्तेति । याञ्ज- कर्मणीतीत्यर्थः । नन्वेवम् अत्रत्याग्रिमभाष्यविरोधोऽत आह *भग- वानिति । प्रौढिसाधकं हेतुगर्भविशेषणमिदम् । एवमग्रेऽपि । सूत्रा- भिमतस्योक्तत्वादाह *उत्सूत्रमिति । तदनारूढमेवेत्यर्थः । एव- मग्रे ऽपि । आहेत्यादिनेति भावः । *उत्सूत्रमेवेति । अत्र ब्रूम इत्या- दिनेति भावः । तथा च सूत्रविरोधान्न तस्यापि तद् अभिमतं सि- द्धान्तत्वेनेति न तद्विरोध इति तात्पर्यम् । एवम् अत्रत्यवार्त्तिक- कारविरोधोऽपि सिद्ध एवेति तमुपेक्ष्य स्थलान्तरस्थवार्तिक- विरोधमप्याह *तथेति । आदिना प्रागुक्तान्ययुक्तिसङ्ग्रहः । ननु त- दधिकरणसूत्रस्यैव सोऽर्थो न तु प्राग्वदिति कथमुत्सूत्रत्वमत आह *भावार्था इति । *हि—यतः । *तत्र—भावार्थाधिकरणे द्वितीयाध्यायादौ । सूत्रार्थमाह *कर्मेति । स्वसिद्धान्तैकवाक्य- तया आह *प्राधान्येति । भाष्यमाह *क्रियेति । निरुक्तमाह *भावेति । इदं हेतुगर्भमित्याह *अत इति । *एषोऽर्थः-एष एव । अत एवाह *ननामार्थइति । पराभिमतम् अधिकरणतात्पर्यमाह *तस्याश्चेति । ननु स एवार्थः सूत्रस्य कुतो नात आह *नह्यनेनेति । उक्तसूत्रेणेत्यर्थः । स्पर्शोऽपि न तस्य किमु वाच्यम् स इतीति सूचय- न्नाह *स्पृश्यते इति । नन्वेवं कथं नव्यमीमांसकैस्तथा सिद्धान्तित- मत आह *नव्येति । धात्वर्थवादोक्तसिद्धान्तं प्रत्ययार्थत्वनिरासेन विशेषं वक्तुमुपसंहरति *तस्मादिति । एवेन प्रत्ययवाच्यत्वनि- रासः । तत्र भाष्यसंमतिमप्याह *तदुक्तमिति । आदिना तण्डुलाव- पनादि । तत्रेत्यस्य भाष्यस्य व्याख्या *अधीति । एवमग्रेऽपि बो- ध्यम् । अत्रत्यप्रागुक्तसिद्धान्तं विशेषं वक्तुमुपसंहरति *कर्तृकर्मे- ति । तत्सिद्धमित्यादिः । अत्र भाष्यसंमतिमप्याह *स्पष्टमिति । आगच्छ चैत्र ग्राममोदनं भोक्ष्यसे इत्यादौ वारणायाह *तिङ्भ्या-

मिति । *इत्यादीत्यनेन यत्र तत्र निघात इत्यस्य परिग्रहः । लोट्लटोः सांनिध्यात्तद्वाच्यमेवात्र कारकं लोडन्तलडन्तयोश्चार्थ लक्षणो निमित्तनिमित्तीभाव इति कैयटः । ननु सप्तमीपञ्चम्याविति सूत्रे तथा स्पष्टत्वात्तत्रापि तथेति कथमेकद्रव्याभिधानमत आह *कर्त्रादीति। उक्ते क्वचित् सुबनियामकेषु तेषान्तत्परत्वेऽपीत्यर्थः । सर्वत्राह *श-क्तीति। *स एव-शक्तिमानेव। नन्वभेदे ऽपि नियमः कथं तिङन्ते ऽत आह *कर्त्रादीति । तत्र विहितविभक्त्येत्यर्थः । नहि शक्तिः साक्षात् क्रिया गता । अत एव शक्तिः कारकमिति पक्षे कर्तृकर्मादिजबोधे शक्तिरूपकर्तृत्वादेर्नियमतः प्रकारतया भानेन तत्रैव शक्तिसिद्धौ सामानाधिकरण्योपपत्तिरिति बोध्यम् । नन्वेवं प्रत्ययार्थः प्रधान-मिति न्यायविरोधो ऽतस्तावत्प्राचां मतेनाह *प्रत्ययार्थ इति । कृदादौ कल्पस्येत्यर्थः । *त्यागः-तिङन्ते । सर्वसङ्ग्रहायाह *धात्व-र्थमिति । *केचित्-दीक्षितभूषणकृदादयः ॥ ८ ॥

परे तु 'प्रत्ययार्थः प्रधानम्' इति यत्र प्रत्ययस्य वाचकता तद्विषयम् । "कर्तरि" इत्यादेः स्तद्विषया-द्धातोरित्यर्थेन तिङां तद्द्योतकत्वाद्विशेषणत्वमेव । भावे इत्यस्य तथाऽन्वयस्यैव युक्तत्वात् ।

अत एव "स्नुक्रमोः" इतिसूत्रे भाष्ये "भावकर्मणोः" इति सूत्रस्य "भावकर्मवृत्ताद्धातोः" इत्यर्थकथनं कृ-तम् । तस्य च भावकर्मविषयाद्धातोरित्यर्थं कैयट आह । तद्विषयत्वं च धातोः कर्मादिविशिष्टक्रियावा-चकत्वेन, कर्मादीनां स्वप्रकृतिकप्रत्ययवाच्यत्वेन वा । तत्र तिङ्विषयलकारस्थले आद्यम् । "क्रियाप्र-धानमाख्यातम्" इति स्मृत्यन्तरात् । शत्रादिविष-ये त्वन्त्यम् । "सत्त्वप्रधानानि नामानि" इति स्मृतेः । "लः कर्मणिच" इत्यादेरप्ययमेवार्थः भावकर्मादिवृत्तादिति । शानजादौ कारकप्राधा-

न्यमुक्करीत्यैव । अन्यथा शानजादिस्थानिलेन भावस्य सत्त्वभूतस्य बोधनम्, तिङ्स्थानिलेन स्वसत्त्वभूतस्य बोधनमिति तवापि न सिद्ध्येत् । तस्मादुभयत्राप्यर्थे तदंशे सूत्रतात्पर्यं चेदत्रापि तथैवास्तु । "वर्तमाने लट्" इत्यादिविहितलानुवादेन चैतद् अर्थनियामकम् ।

अत एव "कर्तरि कृद्" इत्यादिना कर्त्रादेः प्रत्ययार्थत्वबोधनमेव । भावबोधकादित्यस्य केवलक्रियामात्रबोधकादित्यर्थः ।

किञ्च "द्व्येकयोः" इत्यादीनां तिङ्विषयाणामपि नियमत्वमिति भाष्ये स्पष्टम् तद्विदाम् । सिद्धौ च नियमो भवति । धातुवाच्यत्वे च "अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति" इति सामान्यसूत्रेण सर्वत्र सिद्धौ नियमत्वं युज्यते नान्यथा । संख्यायाश्च कारकस्यैव क्रियायामेवान्वय इत्युपपादयिष्यते ।

स्पष्टं चेदं "बहुषु" इति सूत्रे भाष्ये ।

तत्राहि "तिङोऽविशेषेण धातुमात्राद्विधीयन्ते इति नियमार्थं द्व्येकयोः" इत्याद्युक्तम् । एकवाक्यतया विधानमिति पक्षेऽपि फलतो नियम एव, तद्विनाऽपि तत्र सिद्धेः ।

अत एव "अनुदात्तङितः" इति सूत्रे भाष्ये अत्र पक्षे तेषां सूत्राणां परिभाषात्वव्यवहारः ।

अत एव अजर्घाः, अचकादित्यादौ धातुमात्रात्सर्वबोधः सङ्गच्छते । लुप्तस्मरणाद्बोध इति तु

१ विषयादिति पाठः ।

एकशेषसूत्रे प्रत्ययलक्षणकार्यसिद्धेर्लोपफलत्वं वदता भाष्यकारेण तिरस्कृतम् । लोपमजानतां तथा बोधानापत्तेः ।

यत्तु कैयटेन तिङां स्वभावतः संख्यावाचकत्वाश्रयेण तिङ्विषयाणां तेषां नियमार्थत्वमुक्तम् ।

तन्न । एवं स्वभावाश्रयणे तेनैव तत्तत्तिङां तत्तत्संख्यावाचकत्वसम्भवेन नियमशास्त्राणामपि वैयर्थ्यापत्तेः । सुब्विषयाणामप्यनेन एकद्वित्र्यादिपक्षेष्वपि नियमार्थत्वसम्भवेन तत्र नियमोपपादनाय विशिष्य तत्र पञ्चकपक्षालम्बनवैयर्थ्यापत्तेश्च । शास्त्रमात्रस्यैव वैयर्थ्याचेत्यन्यत्र विस्तरः ।

"सार्वधातुके यक्" इति सूत्रस्थस्य "सार्वधातुकार्थाः कर्त्रादयः" इति भाष्यस्य तद्द्योत्या इत्येवार्थः । विकरणस्त्वत्र पक्षे साधुत्वार्थ एव । "विकरणार्थाः" इति पक्षे विकरणद्योत्या अपि । "भावकर्मवाचिनि" इत्यादेरपि तद्बोधके इत्यर्थः । तत्र 'सार्वधातुकार्थाः' इति पक्षे एकत्वादीनामपि तद्द्योत्यत्वान्नियमानुपपत्तिमाशङ्क्यार्थनियमाश्रयणेन परिहृतं भाष्ये ।

न च 'विकरणार्थाः' इति पक्षे लेनाभिधानाद्विकरणो न स्यादिति भाष्यदूषणानुपपत्तिः, द्योतकसमुच्चयस्य व्यतिलुनीते गार्ग्यायणीत्यादौ दर्शनादिति वाच्यम् । लिङ्लिटोर्विकरणरहितयोः,अदादौ च लकारमात्रेणापि तद्द्योतनेन तेनैव कृतकृत्यतया विकरणानुत्पत्त्यापत्तिरित्याशयात् । व्यतिलुनीते इत्यादौ नात्मनेपदमात्रेण तद्द्योतनम् । अन्यत्राप्यात्मनेपददर्शनात् ।

गार्ग्यायणीत्यादौ च न फमात्रेण तद्द्योतनम्। गार्ग्यायणे ऽप्यायनस्य दर्शनात्। तत्र शब्दशक्तिस्वभावात्क्वचिद्विकरणसहितस्य तद्द्योतकत्वम्, क्वचित्केवलसार्वधातुकस्यापीति तद्दूषणपरिहारः। विकरणानां नैरर्थक्यप्रवादस्तु तं विनाऽपि सार्वधातुकमात्रेणार्थद्योतनात्। क्वचित्तत्साहाय्येनार्थप्रतीतिरर्थवत्त्वव्यवहारो ऽपि।

अत एव "स्त्रियाम्" इति सूत्रे भाष्ये स्त्रीत्वस्य प्रत्ययार्थत्वपक्षे प्राधान्याद्द्विवचनाद्युत्पत्तिमाशङ्क्य प्रधानस्यापि द्रव्याभेदेन प्रतीत्या समाहितम्। न तु तस्य प्रकृत्यर्थं प्रति विशेषणत्वाश्रयेण द्योत्यत्वपक्षविशेषणतोक्ता।

एवं सुपामपि द्योतकतैव। पञ्चकं च प्रातिपदिकार्थः। एतन्मूलकमेव "सत्त्वप्रधानानि नामानि" इति। तत्र हि नामपदेन सुबन्तम् इत्यनुपदमेव स्फुटीभविष्यति।

स्त्रीप्रत्ययान्तस्य तु नामत्वम्। शास्त्रप्रक्रियायां ततो ऽपि अर्थबोधात्तत्र प्रत्ययार्थत्वपक्षे द्विवचनाद्यनुत्पत्तिराशङ्किता। तेन 'प्रत्ययार्थः प्रधानम्' इति व्युत्पत्तिरजेत्यादौ व्यभिचरितेति परास्तम्।

अत एव सूत्रकृता प्रधानप्रत्ययार्थवचनमशिष्यमर्थस्यान्यप्रमाणत्वादित्येवोक्तम्, न तु व्यभिचरितत्वादित्यप्युक्तमिति वदन्ति॥ ९॥

(कुं० टी०) *तथाऽन्वयस्यैवेति। धात्वर्थस्यैव प्रत्ययेन

द्योतनात् । *स्वप्रकृतिकेति । धातुप्रकृतिकेत्यर्थः । *उभयत्रापीति । सत्त्वभूते ऽसत्त्वभूते च । *तदंशे–भावांशे । *अत्रापि–"लः कर्मणि"इत्यादावपि । *तथैवेति । तेनैव प्रकारेण विशेष्यत्वं चेत्यर्थः । *अत एवेति । "कर्तरि कृद्"इत्यत्र कर्तृविषयाद्धातोरित्यर्थेनेत्यर्थः । *तिङ्विषयाणामपीति ।

अयं भावः–"तिङो ऽविशेषेण धातुमात्राद्विधीयन्ते" इतिभाष्यात्संख्याविशेषानुपादानेनेत्यर्थः ।एवं च प्रातिपदिकस्येव धातोरपि संख्याकारके अर्थः । "लः कर्मणि" इत्यस्यापि कर्माणि वृत्ताद्धातोर्ल इत्यादिरेवार्थः इति ।

*सामान्यसूत्रेणेति । "तिप्तस्झि" इत्यादिना, "स्वौजसमौट्" इत्यादिनाच । *क्रियायामेवेति । आरोपात् । ननु पञ्चकं प्रातिपदिकार्थ इति पक्षे संख्याकारकयोरपि प्रातिपदिकार्थत्वादस्तु नियमः, तिङि तु कथं नियमो ऽत आह *तिङो ऽविशेषेणेति । *एकवाक्यतयेति । अनभिहिते कर्मणि यदेकत्वं तत्र एकवचनमित्यादिकम् । *तद्विनाऽपीति । तादृशविधानं विनाऽपि सामान्यसूत्रेण सिद्धेरित्यर्थः । *परिभाषात्वेति । यत्रात्मनेपदं भवति तत्र "अनुदात्तङितः" इत्युपतिष्ठते। तेन प्रथमं लादेशा इति विकरणं न व्यवधायकमिति भावः । *तिरस्कृतमिति । लोपस्य प्रत्ययलक्षणमात्रफलकत्वोक्तेः । *यत्तुकैयटेनेति । कर्तृकर्मणोर्विधीयमानास्तिङः संख्यायुक्तयोरेव तयोर्बोधका भविष्यन्ति । संख्याविशेषश्च स्वभावतः प्रयोगदर्शनादेव गम्यते इति भावः । *नियमार्थत्वमुक्तमिति । भाष्यांशे ऽप्युक्त इत्यर्थः । *सार्वधातुकार्था इति । भावकर्मवाचिनि सार्वधातुके यक् कर्त्रर्थे सार्वधातुके शबित्यर्थात् । *साधुत्वार्थ एवेति । तिबादिभिरेव

द्योतितया पुनर्द्योतकार्थताया अभावात् । *विकरणार्था इति । भावकर्मणोर्यगित्याद्यर्थात् । *अर्थनियमेति । एकस्मिन्नेकवचनमेवेत्याकारकेत्यर्थः । तेन कर्त्रादिमात्रद्योतकत्वाभावे ऽपि भवत्येष नियम इति भावः । *विकरणो न स्यादिति । तथाच तच्छास्त्रवैयर्थ्यमिति भावः । *व्यतिलुनीते इति । अत्रात्मनेपद्व्यतिशब्दौ कर्मव्यतिहारद्योतकौ । *लिङ्लिटोरिति । तत्र विकरणाभावेऽपि कर्त्रादिबोधाल्लकारमात्रस्यैव द्योतकत्वावश्यकतया ऽन्यत्र विकरणो न स्यादेवेत्यर्थः । दृष्टान्तस्तु विषम इत्याह *व्यतिलुनीते इत्यादाविति । कारीषगन्ध्येत्यादौ ष्यङो ङित्त्वसामर्थ्यात्ष्यङ्ङीषौ । *व्यवहारोऽपीति । अत एव विकरणानामन्वर्था प्रत्ययसंज्ञा । *द्रव्याभेदेति । यद्यपि गुणमात्रे प्रत्ययः, तथाऽपि गुणगुणिनोरभेदाध्यवसायात्कुमारीशब्देन द्रव्यमेवाभिधीयते इति वचनसिद्धिरिति भावः । ननु द्रव्याभेदापन्नस्त्रीत्वस्य प्राधान्यात् "सत्त्वप्रधानानि" इत्यस्य व्यभिचारोऽत आह *न नामत्वमिति । ननु सुब्रहितस्य यान्तस्य लोके बोधकत्वाभावात्कथं तदर्थे द्वित्वाद्यनन्वयः शङ्कित इत्यत आह *ततोऽपीति । *व्यभिचरितेति । प्रत्ययार्थस्य स्त्रीत्वस्याप्राधान्यात् । *परास्तमिति । स्त्रीत्वस्यापि द्रव्याभेदेन प्रतीत्या न प्राधान्यविघात इति भावः । *ननु व्यभिचरितत्वादिति । अजेत्यादौ ॥ ९ ॥

(क० टी०) एतत्सूचितारुचिं कथयन् सिद्धान्तमाह *परेत्वित्यादिना वदन्तीत्यन्तेन । *विषयम्—विषयकम् । नैवं सति सूत्रासङ्गतिरित्याह *कर्तरीति । तत्राप्यस्यार्थस्यान्यांशे आवश्यकत्वेन सम्भवत्यैकरूप्ये इति न्यायेनात्रापि तथैवेति सूचयन्नाह *भावे इति । अन्यलभ्यत्वेनान्यार्थस्य तत्रासम्भवात् इति भावः । अत्र भाष्यसंमतिमप्याह *अत एवेति । उक्तहेतोरेवेत्यर्थः । ननु तस्यान्य ए-

वार्थो ऽत आह *तस्य चेति । तद्विषयत्वं च नैकरूपं सर्वत्रे-त्यत आह *तद्विषयत्वं चेति । इदमपि व्यवस्थितमित्याह *त-त्रेति । तयोर्मध्ये इत्यर्थः । तदेकवाक्यतया प्रकृते ऽप्याह *लः कर्मेति । "वर्त्तमाने लट्" इतिवत् । एवमेवेत्यस्यैवार्थो *भावेति । अत एव तस्य पूर्वनिपातः । कर्मादीत्यादिना-कर्ता । नन्वेवं शानजा-दिविषये लस्यापि द्योतकत्वापत्तौ तत्रापि कारकस्य विशेषणत्वाप-त्तिरिति महदनिष्टम । तिङनुरोधेनाद्यरीत्या तद्विषयत्वाङ्गीकारात्स-कृदुच्चरितादर्थद्वयप्रतीतेरसम्भवादत आह *शानजादाविति । *उक्तेति । द्वितीयेत्यर्थः । वक्तुस्तन्त्रं बोद्धुरावृत्तिः । इदमन्यांशे तवाप्यावश्यकमित्याह *अन्यथेति । शङ्कोक्तरीत्यङ्गीकारे इत्य-र्थः । आस्यमाने शय्यमाने च गत इत्यादौ सत्त्वभूतभाव-प्रतीत्या तत्स्थानिलस्यापि तदर्थत्वावश्यकत्वात् । तङो ऽसत्त्व-भूतभावार्थकत्वेन तत्स्थानिलस्य तत्त्वमेवावश्यकमित्याह *तिङि-ति । तङित्यर्थः । क्वचित्तथैव पाठः । *तदंशे-भावांशे । *अत्रापि-क-र्त्राद्यंशेऽपि । भाव इत्यस्यावृत्त्याऽर्थद्वयबोधकत्ववत्कर्त्राद्यंशे ऽप्या-वृत्त्या कर्त्रादौ वर्त्तमानात्कर्त्राद्यावर्थे च लविधिरिति भावः । ननु लविधावेव तत्सूत्रतात्पर्यम् अन्याविहितत्वान्नार्थ एवेति कथमुभय-त्रार्थे इत्यत आह *वर्तमाने इति । *इत्यादीत्यादिना । स्वार्थवि-हितेत्यर्थः । *नियामकम्-नियामकमेव । करणादि च व्यावर्त्यम्, पाकेन कृतं वैरमित्यादौ तत्प्रतीतेः । तिङ्नियमे द्योतकाभावा-त्तदप्रतीतिरित्यन्यत् । *अत एव—शत्रादावुक्तरीत्या कारकप्रधा-न्यादेव । नन्वेवमपि भावविषयत्वं नोक्तरीतिद्वयेन सम्भवति । तद्बो-धकत्वमात्रं त्वतिप्रसक्तम् अत आह *भावेति । मात्रम्-कात्स्न्र्ये । ननु कृतिरेव विवक्षिता । तथाचानिर्दिष्टार्थाः प्रत्यया इति न्यायेन स्वार्थे स इति तस्यानुवादकत्वं तत्फलं च तस्य प्राधान्यसिद्धिरिति भावः । द्योतकत्वे युक्त्यन्तरमाह *किञ्चेति । सुब्विषयाणां तत्त्व-स्यैव सर्वाप्रसिद्धत्वादाह *तद्विदामिति । भाष्यविदामित्यर्थः । *सामान्येति । लस्य तिप्तसझीत्यनेनेत्यर्थः । ननु ति-ङन्ते संख्यायाः कारके ऽन्वयस्य परप्राचीनोभयसंमतत्वात्कथ-मुक्तरीत्या नियामकत्वं तेषामत आह *संख्यायाश्चेति । एवेन मतान्तरव्यवच्छेदः । अत्रैव ऽप्रकरणे तुपदमेवेति भावः । तदे-

व भाष्यमाह *स्पष्टं चेदमिति । "किमर्थं पुनरिदमुच्यते" इति प्रश्ने आह *तिङ इति । *अविशेषेण–संख्याविशेषाद्यनुपादानेन । एवं च प्रातिपदिकस्येव धातोरपि संख्याकारके अर्थ इति भावः । नन्वेवमपि एकवाक्यतया विधिरिति भाष्योक्तपक्षान्तरे न द्योतकत्वसम्भवो ऽत आह *एकेति । साच वाक्यैकवाक्यता । इत्थं च लस्थाने तिबादयो भवन्ति ते चानुदात्तङितः परस्य लस्य स्थाने तादृशा भवन्ति येषां जातानामात्मनेपदसंज्ञा भवतीति । इयञ्च मन्दमतिना दुर्ज्ञानेति वाक्यभेदेन नियम उक्त इति तात्पर्यम् । *तद्भिनाऽपि–एकवाक्यतया विधानं विनाऽपि । उक्तरीत्येति भावः । अत्र भाष्यसंमतिमाह *अत एवेति । तत्र फलतो नियमादेवेत्यर्थः । *अत्रपक्षे–तथाविधिपक्षे । *तेषाम्–"अनुदात्तङितः" इत्यादीनाम् । *परिभाषेति । "यदि पुनरियं परिभाषा विज्ञायेत" इत्यनेनेति शेषः । अनियमे नियमकारिणीत्वात्तस्या इति भावः । द्योतकत्वमेव युक्तमित्याह *अत एवेति । तिङां द्योतकत्वादेवेत्यर्थः । मात्रमवधारणे । व्यतिसे इत्याद्यसाध्वेवेति भावः । ननु तत्र लुप्तस्मरणाद्बोधो भविष्यत्यत आह *लुप्तेति । *एकेति । सरूपसूत्रे इत्यर्थः । अग्निचिदित्यतो लोकत एव कर्त्रर्थप्रतीत्या लोपशास्त्रं प्रकृतसूत्रवत्किमर्थमिति शङ्कायामाह *प्रत्ययेति । तेन लोपेनानुत्पत्तेरेवान्वाख्यानमित्युक्तम् । तदाशयमाह *लोपमिति । तत्रत्यकैयटं दूषयति *यत्त्विति । *तेनैव–स्वभावेनैव । एवमग्रे ऽपि । *नियमेति । "द्व्येकयोः" इत्यादीत्यर्थः । सामान्यवद्विशेषलाभो ऽपि तत एवेति भावः । स्वोक्तिविरोधमप्याह *सुबिति । पञ्चकं प्रातिपदिकार्थ इति पक्षवत्तन्मतेनैवाह *एकेति । आदिना चतुष्कम् । *तत्र–सुब्विषये । "तस्यापत्यम्" इत्यादेर्वैयर्थ्यमप्याह *शास्त्रेति । *एवम्–एवं सति । शास्त्रारम्भवैयर्थ्यमपीत्याह *अन्यत्रेति । उद्द्योतादावित्यर्थः । नन्वेवं "सार्वधातुके यक्" इति सूत्रभाष्यविरोधो ऽत आह *सार्वेति । एतेनाभिधीयते इति प्रागुक्तभाष्यस्यापि द्योत्यते इत्येवार्थः सूचितः । ननु तस्यैव द्योतकत्वे किमर्थं विकरणो ऽत आह *विकेति । नन्वेवमपि पक्षान्तरासङ्गतिरेवात आह *विकरण इति । तत्रत्याग्रिमभाष्याविरोधमप्याह *भावेति । *इत्यर्थः—इत्येवार्थः । दोषपराग्रिमभाष्यानुपपत्तिरपि नेत्याह *त-

त्रेति । तयोः पक्षयोर्मध्ये इत्यर्थः । *नियमेति । "द्व्येकयोः" इत्यादीत्यर्थः । अर्थान्तरस्यापि सत्त्वात्प्रत्ययनियमानुपपत्तेरिति भावः । आदिना प्रकृतार्थापेक्षप्रत्ययनियमः । "सुपां कर्मादयः" इत्यादिनेति भावः । एवमपि तदाग्रिमाविरोधमाह *नचेति । *व्यतिलुनीत इति । छान्दसम् । *तेनेति । तं विना तदसम्भवात् वैपरीत्यं न । दृष्टान्ते तु नैवं सुवचमित्याह *व्यतीति । न केवलेति निषेधाद्वैपरीत्यं नेत्याह *आत्मनेपदेति । तं विना तस्यैवासम्भवाद्वैपरीत्यं नेत्याह *नष्फेति । तस्य तत्राप्यश्रवणादाह *आयनस्येति । नन्वेवं तद्दोषोपपत्तावपि कथं तत्परिहारोऽत आह *तत्रेति । विकरणार्था इति पक्षे इत्यर्थः । एतन्मूलिकयैवोपपत्त्याऽन्यविरोधोऽपि नेत्याह *विकरणेति । *अत एव-प्रत्ययार्थः प्रधानमित्यस्य वाचकविषये ऽव्यभिचरितत्वं द्योतकविषये त्वप्रवृत्तिरेवेत्यस्मादेव । उभयत्रास्यान्वयः । तत्रैकत्वसत्त्वादाह *द्विवचनेति । प्रसङ्गादाह *एवमिति । ननु कथं तस्य तन्मूलकत्वं तत्र तेन प्रातिपदिकग्रहणस्य परप्राचीनसंमतत्वादत आह *तत्रहीति । निरुक्ते यत इत्यर्थः । क्वचित्सुपो ऽश्रवणेनान्यत्रापि तत्त्वसत्त्वात्कथं सुबन्तमेवेति भ्रमनिरासायाह *स्त्रीप्रत्ययेति । तन्मात्रस्येत्यर्थः । सुप्संस्कारं विनेति यावत् । *प्रक्रियायाम्-सत्यामेव । अनेनान्यथा तन्निरास इति तत्त्वव्यवच्छेदः । *ततः-स्त्रीप्रत्ययान्तात् । अपिर्दध्यादिसमुच्चायकः । नन्वेवं स्त्रीत्वस्य प्रत्ययार्थत्वपक्षे तन्न्यायव्यभिचार एवात आह *तत्रेति । स्त्रीप्रत्ययान्ते इत्यर्थः । न्यायस्य तत्र व्यभिचरितत्वे तु तदाशङ्कैवायुक्तेति भावः । भूषणोक्तिं खण्डयति *तेनेति । तदाशङ्कनेनेत्यर्थः । एतेनेति पाठान्तरम् । *अजादौ । अजाएडकेत्यादौ । *अतएव-तन्न्यायस्य तत्र नियतत्वादेव । अन्यथा तदपि वदेत् ॥ ९ ॥

तत्र कर्तृत्वशक्त्याश्रयस्य व्यापारे ऽन्वयः । योग्यत्वात् । परस्मैपदशानमादिस्वयमेवेत्येतत्समभिव्याहृतयकृतङादिरूपतात्पर्यग्राहकवशाच्च । कर्मत्व-

शक्तिमतश्च फले ऽन्वयः । योग्यत्वात् । तङ्यक्चिणादिसमभिव्याहाराच्च । ननु कारकविशेष्यकबोध एव कुतोऽस्वीक्रियते इति चेन्न । "रमते ब्राह्मणकुलम्" इति "क्रियाप्रधानम्" इति "ह्रस्वो नपुंसके" इति सूत्रस्थभाष्यविरोधात् । तत्रैतन्नामाख्यातयोर्लक्षणं "सत्त्वप्रधानानि नामानि भावप्रधानमाख्यातम्" इति निरुक्तविरोधाच्च । तत्राख्यातशब्देन नियमतो जनकाकाङ्क्षं विभक्त्यन्तम् । पाचक इत्यादावेकदेशार्थस्य तदाकाङ्क्षत्वेऽपि विभक्त्यन्तार्थस्य न तदाकाङ्क्षत्वम् । "आख्यातमाख्यातेन" इत्यादौ तथैव प्रतीतेः । "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः" इत्युपक्रमाच्च । "भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य तत्र भावः प्रधानम्" इति भाष्याच्च । निष्कौशाम्बिरित्याद्युदाहरणविषये "लुप्ताख्यातेषु च" इति समर्थसूत्रस्थवार्त्तिके कृति आख्यातपदप्रयोग उपचारादिति बोध्यम् । भवतीति संबुद्ध्यन्तस्य तिङन्तस्य च समत्वात्तल्लक्षणापेक्षा बोध्या ।

एतेनाख्यातपदेन धातुः, आख्यायते सर्वप्रधानीभूतो ऽर्थो ऽनेनेति व्युत्पत्तेरित्यपास्तम् ।

शिश्ये इति तिङन्ते ऽतिव्याप्तेश्च । कृत्प्रकृतिभूतधातावव्याप्तेश्च । क्रियावाचकत्वमात्रे वक्तव्ये प्राधान्यनिवेशस्य व्यर्थत्वाच्च । एतदेवाभिप्रेत्य निपातवादोक्तप्रातिशाख्ये "तद् आख्यातं येन भावं स धातुः" इत्यत्र "तृतीयार्थे प्रथमा" इति तद्भाष्ये व्याख्यातम् । अत एव "प्रशंसायां रूपप्" इति सूत्रे भाष्ये पचति-

रूपं पचतोरूपमित्यादेरसिद्धिमाशङ्क्य "क्रियाप्रधानमाख्यातं द्रव्यप्रधानं नाम, यतः क्रियां पृष्टः तिङाऽऽचष्टे किं देवदत्तः करोति, पचतीति । द्रव्यं पृष्टः कृताऽऽचष्टे कतरो देवदत्तः यः पाचकः", इत्युक्तम् । "नामान्याख्यातजानि" इत्यत्र तु आख्यातपदं तदवयवधातुपरम् । "सर्वं नाम धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति "उणादयः" इति सूत्रे भाष्योक्तेः । नाम्नस्तिङन्तजन्यत्वाभावाच्च । कृतेत्यस्य तत्प्रकृतिकसुबन्तेनेत्यर्थः । भाष्ये नामपदेन च सुबन्तमेव, उक्तयुक्तेः । प्रकृतिः प्रत्ययो विभक्तिरित्येतावन्नाम, सत्ता द्रव्यं लिङ्गं संख्येति नामार्थः । तेषु द्रव्यं प्रधानमिति निरुक्तभाष्योक्तेः । 'नमत्याख्यातार्थं प्रति विशेषणीभवतीति नाम' इति च निरुक्तभाष्यम् । इदम्–अव्ययातिरिक्तनामलक्षणम् । उपसर्गनिपाता इत्यत्र निपातपदमव्ययमात्रोपलक्षणमिति तद्भावः । तत्र द्रव्यस्य सत्तालिङ्गसंख्यानिरूपितप्राधान्ये ऽपि तस्य क्रियाकारकभावसंबन्धं प्रति विशेषणत्वेन काण्डे इत्यादेर्विभक्त्यर्थप्रधानत्वोक्तिर्न विरुद्धा । "क्रियाप्रधानम्" इत्यत्र क्रियात्वं साध्यत्वरूपम् । तेन हिरुगादिषु नाख्यातलक्षणातिव्याप्तिः । हिरुगादीनां क्रियाप्रधानत्वं तु क्रियामात्रविशेषणत्वरूपम् । अत एव तदर्थे न कारकान्वयः । तदन्वययोग्यस्य साध्यत्वस्य तत्राभानात् ।

वस्तुतो हिरुगाद्यर्थस्य सिद्धत्वेनाभानमात्रेण गौणः क्रियात्वव्यवहारः ।

ये तु क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्यस्य कारकान्वये नियामकत्वं वदन्ति तेषामोदनं भुक्त्वा ग्रामं गच्छतीत्यादौ क्त्वाप्रकृत्यर्थे कारकान्वयो न स्यात्। तत्प्रतिद्वन्द्वितया नामलक्षणे सिद्धत्वापरपर्यायसत्त्वत्वस्य निवेशः। एधितव्यं भुक्त्वा कर्तुं पचतिरूपमेधां पाचयामित्यादि नामरूपमाख्यातमेव। किं कर्तव्यमित्यादिक्रियाप्रश्ने वक्तव्यमित्याद्युत्तरात्।

नियमतो जन्यतया क्रियाकाङ्क्षं यत्तदत्र नाम। भाष्ये "तिङा ऽऽचष्टे" इत्युपलक्षणम्। कृताऽऽचष्टे इति च तद्धितादेरुपलक्षणम्। धात्वर्थफलस्याप्युक्तक्रियात्वसत्त्वान्न कर्माख्याते एतल्लक्षणाव्याप्तिः। द्योतकत्वात् क्रियासमभिव्याहारनियमाच्च निपातादुपसर्गस्य पृथगुक्तिः। एवं च "क्रियाप्रधानम्" इत्यस्य प्रत्ययार्थापेक्षया यत्र धात्वर्थः प्रधानं तदाख्यातमित्यर्थः।

नच धात्वर्थापेक्षया कृतिः प्रधानमिति तदर्थः, भावशब्देनापि कृतिरेवेति वाच्यम्। प्रत्ययार्थः प्रधानमित्येव सिद्धेः। भावाख्याते ऽव्याप्तेश्च।

नन्वेवं प्रथमान्तसमभिव्याहारे एककर्तृविशिष्टक्रियाश्रयो देवदत्त इति प्रथमान्तविशेष्यकबोध एवास्त्विति चेन्न।

तथाबोधाननुभवात्। "यत्रोभे भावप्रधाने भवतः" इत्युत्तरनिरुक्तविरोधाच्च। तदर्थस्तु तद्भाष्ये एवमुक्तः नामाख्यातयोः परस्परविनाभूतयोः स्वस्वपदार्थोक्तावेकस्य भावप्राधान्यमेकस्य सत्त्वप्राधान्यम्। अथ पुनर्यत्र ते उभे भवतो वाक्ये तत्र भावप्रधाने आ-

ख्यातार्थप्रधाने । वाक्ये ह्याख्यातं प्रधानं तदर्थत्वाद् गुणभूतं नाम । तदर्थस्य भावनिष्पत्तावङ्गत्वात् । एवं तावद्वाक्ये आख्यातं प्रधानमिति । अत्र नामपदेन निपाताद्यतिरिक्तस्य ग्रहणमुक्तम् । तेन क्रियाया नञर्थविशेषणत्वेऽपि न क्षतिः ।

अत एव हरिर्वसन्ददर्शेत्यादौ "धातुसंबन्धे प्रत्ययाः" इत्यनेन प्रधानतिङन्तवाच्यक्रियानुरोधेन गुणभूतक्रियावाचिभ्यः कालान्तरे प्रत्ययाः, नतु तिङ् कालान्तरे इति व्यवस्थासिद्धिः ॥ १० ॥

(कुं०टी०) *स्वयमेवेत्येतदिति । पच्यते तण्डुलः स्वयमेवेत्यादौ । *क्रियाप्रधानमिति । नन्वेवं "व्रीहीनवहन्ति" इत्यत्र ईप्सिततमे कर्मणि द्वितीयाविधानाद् व्रीहीणां प्राधान्यमिति सिद्धान्तासङ्गतिरिति चेत् । सत्यम् । तत्रावघातेनैव तुषविमोकः कार्य इति नियमादृष्टबोधनार्थमेव वाक्यम्, प्राधान्यं तु व्रीहीणामेव । *नामाख्यातयोर्लक्षणमिति । अयं भावः—पदवाक्ययोरंशांशिभावकल्पनायां कारकात्मा क्रियात्मा चेति सिद्धसाध्यलक्षणो नामाख्यातरूपो द्विविध एव पदार्थविभागो न्याय्यः । निपातोपसर्गकर्मप्रवचनीयलक्षणस्तु पदविशेषोऽत्रैवान्तर्भवति । तथाहि सिद्धार्थाभिधायि नामपदमिति तदर्थगतं विशेषं द्योतयन्निपातो ऽत्रैवान्तर्भवति । सिद्धं ह्यर्थं साक्षादभिदधातु तद्गतं विशेषं वा द्योतयतु नैतावता भेदो न्याय्यः । स्वरादयस्तु ये सत्त्वप्रधानाः ते नामस्वेवान्तर्भवन्ति । ये तु हिरुगादयः क्रियाप्रधानास्तेषामाख्यातेऽन्तर्भावः । क्रियाप्रधानं यत् तदेव ह्याख्यातम् । अत एवोपसर्गनिपातपदा-

न्यापि आख्यातमेव । साध्यार्थविशेषद्योतनात् । *जनकाका-ङ्क्षमिति । पचतीत्याद्युक्ते नियमतः पाकादिजनकाकाङ्क्षोदया-त् । *एकदेशेति । विभक्तिप्राग्भागेत्यर्थः । *तथैवेति । ति-ङन्तस्यैव । तस्मादाख्यातशब्दो ऽत्र तिङन्तवाचीति भावः । *चत्वारीति । अयं भावः—निपातोपसर्गौ न साक्षादर्थं वदतः, किन्तु नामाख्यातार्थगतविशेषं द्योतयत इति वाचकाभ्यां ताभ्यां भिन्नावेव । उपसर्गाणां साध्यैकविषयत्वान्निपाततो ऽपि भेदः । कर्मप्रवचनीयास्तु संबन्धविशेषद्योतनद्वारेण क्रियाविशेषप्रका-शकत्वाभावात्तदपि पञ्चमं पदमिति कैश्चिदुक्तम् । *तद्व्याप्या-चेति । तत्र तिङन्तार्थे एव भावनायाः प्राधान्यमुपपद्यते इति भावः । *निष्कौशाम्बिरिति । उपसर्गाणां क्रियाविषयत्वेन पूर्वोत्तरपदयोरसामर्थ्यात्समासो न प्राप्त उपसंख्यायते । *लु-प्ताख्यातेषु चेति । आख्यातपदेन क्रियाप्रधानं क्तान्ताद्यपि गृह्य-ते । *अपास्तमिति । "चत्वारि पदजातानि"इति निरुक्तादिब-लादाख्यातशब्देन तिङन्तस्यैव ग्रहीतुमौचित्यात् । *अति-व्याप्तेरिति । तत्र तिङन्तेन प्रधानार्थप्रतिपादनात् । *अव्या-प्तेश्चेति । तत्र धात्वर्थस्य प्राधान्याभावात् । *वक्तव्ये इति । आख्यातलक्षणे इति शेषः । *असिद्धिमाशङ्क्येति । अयं भावः—"प्रशंसायाम्" इति यदि प्रत्ययार्थविशेषणं स्यात्तदा वैया-करणस्य प्रशंसा वैयाकरणरूपा इति प्राप्नोति, तस्मात्प्रकृत्यर्थ-विशेषणमेतत् प्रशंसाविशिष्टात्स्वार्थेरूपबिति । एवं च प-चतिरूपामित्यत्र प्रकृतेरलिङ्गसंख्यत्वाल्लिङ्गवचने न सिध्यतः । पचतोरूपमित्यत्र रूपबन्तात् द्विवचनापत्तिश्चेति । *क्रियाप्र-धानमिति । एवं च क्रियाया एकत्वात् रूपबन्तादेकवचनं सि-द्धम् । "क्रियाप्रधानमाख्यातम्" इत्यत्र हेतुमाह *क्रियां पृष्ट

इति । *तिङा-तिङन्तेन । *कृता-कृदन्तेन । शकटस्य तोकमपत्यम् । *सुबन्तमेवेति । तेन नामार्थेषु जातिद्रव्यलिङ्गसंख्यासु द्रव्यं प्रधानमित्यर्थः । ननु अव्ययानां नामार्थविशेषणत्वाभावान्नामत्वानापत्तिरत आह *प्रकृतिरिति । एतत्समुदायो नामेत्यर्थः । ननु अव्ययानां नामार्थविशेषणत्वाभावान्नामत्वानापत्तिरत आह *अव्ययातिरिक्तेति । नन्वेवमप्यव्ययानां भिन्नत्वापत्तौ नामाख्यातोपसर्गनिपाताश्चेति चातुर्विध्यासङ्गतिरत आह *उपलक्षणमिति । ननु काण्डे इत्यादौ काण्डादिशब्देन जात्याद्याश्रयप्रतिपादनाद् द्रव्यस्यैव प्राधान्यमुचितमत आह *तत्रेति । क्रियाकारकभावसम्बन्धस्य सर्वथा प्रतिपादनाद्विभक्त्यर्थस्यैव प्राधान्यमित्यर्थः । *क्रियात्वमिति । क्रियाशब्देन साध्यरूपैव गृह्यते इत्यर्थः । *नाख्यातेति । साध्यरूपक्रियाऽभिधायित्वाभावात् । कथं तर्हि एषां क्रियाप्रधानत्वव्यवहारस्तत्राह *क्रियामात्रेति । *तदर्थे-हिरुगाद्यर्थे । *सिद्धत्वेनाभानेति । सिद्धत्वेन भानं न भवतीत्येतावतैव क्रियात्वमित्यर्थः । *एधितव्यमिति । तव्यत्क्वातुमुन्णमुलादिसमभिव्याहारे सुबन्तत्वेन नामत्वेऽपि क्रियाप्रधानत्वादाख्यातत्वमेव । एधांचक्रे इत्येकदेश एधामित्यपि । *उपलक्षणमिति । कृदन्तस्यापीति शेषः । *उक्तक्रियात्वेति । साध्यत्वरूपक्रियात्वेत्यर्थः । ननु उपसर्गनिपातयोः पार्थक्यानुपपत्तिरत आह *द्योतकत्वादिति । निपातानामपि द्योतकत्वस्वीकारादाह *क्रियासमभिव्याहारेति । क्रियायोगेत्यर्थः । ननु हिरुगादीनामपि क्रियाप्रधानत्वात्तत्रातिव्याप्तिरत आह *एवं चेति । *अव्याप्तेश्चेति । तत्र कृत्यभावात् । *अनुभवादिति । अत एव किङ्करोतीति प्रश्ने क्रियामेव निर्दिशति न त्वोदना-

दिकमिति क्रियायाः प्राधान्यम् । *तदर्थस्य–नामार्थस्य । *व्यवस्थासिद्धिरिति । गौणत्वात्कृदुपस्थाप्यकालस्यैव बाधः न तु तिङुपस्थाप्यस्येति व्यवस्था क्रियाविशेष्यकबोधस्वीकारे एव निर्वहतीत्यर्थः ॥ १० ॥

(क०टी०) नन्वेतावता धर्मी तिङर्थस्तस्यच कारकस्य विशेषणत्वाद्धात्वर्थे ऽन्वय इति सिद्धं परन्तु फले कुत्रान्वयः कुत्रच व्यापारे इत्यतः फलव्यापारयोस्तत्रेत्याद्यनुरोधेनैवाह *तत्रेति । कर्त्तृकर्मणोर्मध्ये इत्यर्थः । सिद्धान्तमतेनाह *कर्तृत्वेति । तच्छक्तेस्तदाश्रये एवाङ्गीकारादाह *योग्यत्वादिति । एवमग्रेऽपि । अभ्यर्हितत्वात्परेत्यस्य पूर्वनिपातः । श्नमादीत्यादिना श्यनादि । अनतिप्रसङ्गायाह *स्वयमिति । प्राक् संक्षेपेणोक्तसिद्धान्ते श्रद्धालुः प्रत्ययार्थः प्रधानमिति व्युत्पत्त्यनुरोधेन शङ्कते *नन्विति । *तत्र–चतुर्णां मध्ये । जातावेकवचनम् । आख्यातशब्देन तिङितिपरभ्रमनिरासपूर्वकं भाष्यैकवाक्यत्वायाह *तत्रेहीति । निरुक्ते यत इत्यर्थः । नामव्युदासायाह *नियमेति । तदाकाङ्क्षायाः क्वचिदन्यत्रापि सत्त्वात्तद्वारणाय तसन्तमिति भावः । विभक्त्यन्तमित्यस्य कृत्यमाह *पाँचकइति । *तदिति । नियमतो जनकेत्यर्थः । निर्मूलत्वमत्र निराचष्टे *आख्यातमिति । मयूरव्यंसकाद्यन्तर्गणसूत्रम् । पाणिनीयमिदम् । *तत्र–चतुर्णां मध्ये । तदग्रे अयमुत्सर्गो बोध्य इत्यपाठः । फलव्यापारयोर्भावशब्देन ग्रहणात् । नन्वेवं वार्त्तिकविरोधो ऽत आह *निष्कौशाम्बिरिति । बहुव्रीहिः । *क्रान्ति–कृदन्ते । क्रान्तादौ । ननु एवं लौकत एव तज्ज्ञाने किमर्थं पृथग् लक्षणमत आह *भवतीति । यत्तु भूषणे उक्तं निरुक्ते आख्यातपदेन धातुर्वक्ष्यमाणव्युत्पत्त्या नामादिप्रकृतीनामेवोद्देशात् । अग्रे ऽपि तत्र नामान्याख्यातजानीत्युक्तमिति मतं तद् खण्डयति *एतेनेति । उक्तदोषगणेनेत्यर्थः । अव्याप्तिवारणायैवाह *क्रियेति । अत्रान्यदपि साधकमाह *एतदेवेति । विशिष्टस्याख्यातत्वं न धातोरित्येतदेवेत्यर्थः । अन्यथा तस्यैवार्थकथनेन सामानाधिकरण्येन निर्वाहे तु तथा

१ हिशब्दाघटितः पाठ उपलब्धेष्वादर्शभूतेषु सर्वेषु मूलपुस्तकेषु ।

व्याख्याऽसङ्गतिः स्पष्टैव । अत्र भाष्यसंमतिमप्याह *अत एवेति । तस्य विशिष्टनिष्ठत्वादेवेत्यर्थः । प्रकृतेर्लिङ्गवचनाभावात्तिङ्प्रकृतेरस्भाववचनमित्यनेनाह *असिद्धिमिति । प्रसङ्गादाह *द्रव्येति । भाष्यीययदर्थमाह *यत इति । *तिङेति । तृतीयान्तच्छेदः । एवमग्रे ऽपि । तदन्तेनेति तदर्थः । अन्यथा एतदसंगतिः स्पष्टैवेति भावः । नन्वेवं "नामान्याख्यातजानि" इत्यस्य का गतिरत आह *नामानीति । समुदाये दृष्टा इति न्यायेनेति भावः । तत्रैव बीजमाह *सर्वमिति । ननु यथाश्रुतार्थ एव कुतो न तत्रैव तद्घटितसमुदायपरत्वमस्त्वत आह *नाम्नइति । अविरोधायाह *भाष्ये इति । *तदिति । कृदन्तेत्यर्थः । ननु यथाश्रुत एवार्थः कुतो नात आह *नामेति । *उक्तेति । चत्वारीत्युपक्रमोक्तेरित्यर्थः । अन्यत्रैवं सत्त्वेऽपि प्रकृते विवक्षितं कथयितुमाह *प्रकृतिरिति । साधकान्तरमाह *नमतीति । तदेवाह *इदञ्चेति । नन्वेवं न्यूनता तत्राह *उपेति ।*अव्ययेति। उपसर्गान्येत्यादिः । *तद्भावः-तद्भाष्याशयः । नन्वेवं "ह्रस्वो नपुंसके" इति सूत्रभाष्यविरोधो ऽत आह *तत्रेति । उक्तनामार्थेष्वित्यर्थः। *तस्य-द्रव्यस्य । *सम्बन्धम्-विभक्त्यर्थसम्बन्धम । विशेषं वक्तुमुक्तमाह *क्रियेति । *साध्यत्वेति । निष्पाद्यत्वेत्यर्थः । *तेन-शब्दशक्तिस्वभावेन तदर्थस्यातत्त्वेन । नन्वेवं तेषां कथं क्रियाप्रधानत्वं भाष्ये उक्तमत आह *हिरुगादीति। यथाश्रुते दोषमाह *अत एवेति । अस्यार्थमाह *तदन्वयेति । ननु तत्र क्रियामात्रविशेषणत्वेन तत्स्वाङ्गीकारे कारकादावतिप्रसङ्गो ऽत आह *वस्तुत इति । सादृश्यप्रयोजकधर्ममाह *सिद्धत्वेनेति । मात्रपदेनोक्तक्रियात्वव्यवच्छेदः । भूषणकारादिमतं खण्डयति *येत्विति। साध्यत्वस्वरूपमाह *क्रियान्तरेति । ओदनं भुङ्क्ते इत्यादौ विशेषस्य वक्ष्यमाणत्वादाह *ओदनमिति । *तत्प्रतीति । क्रियात्वं प्रतीत्यर्थः । प्राचां ग्रन्थासाङ्गत्यमाह *सिद्धत्वेति । तत्त्वं च निष्पन्नत्वम् । सत्त्वत्वेति पाठः। नन्वेवमेधितव्यादौ नामलक्षणाव्याप्तिराख्यातलक्षणातिव्याप्तिश्चात आह *एधीति । तत्र हेतुमाह *किंकर्तव्यमिति । ननु सुबन्तत्वरूपनामत्वस्य,क्तादेर्घञादिवैषम्ये ऽपि तत्र लिङ्गाद्यन्वय-

१ ननु नामान्याख्यातजानीत्यादौ नामपदेन सुबन्तमित्यस्या-

दर्शनात् सत्त्वप्राधान्यस्य च सत्त्वादुभयधर्माक्रान्तत्वेन कथं नामस्वरूपत्वमतस्तत्प्रतिद्वन्द्वितयैवाह *नियमत इति । *अत्र—नामलक्षणे । एधितव्यमित्यादौ कादाचित्कक्रियाकाङ्क्षत्वे ऽपि न नियमत इति न दोषः। भुक्त्वेत्यादौ नियमतस्तदाकाङ्क्षत्वे ऽपि दोषाभावाय *जन्येति । तत्त्वस्य तत्रैव सत्त्वेन अनतिप्रसङ्गात्प्राग्वदत्र विभक्त्यन्तत्वस्यानिवेशः। तत्त्वस्य तत्रैवोक्तत्वाच्च। इदमेव तत्रैवव्यावर्त्यम्। नामस्वरूपमित्यत्र सारूप्यं सुबन्तत्वमात्रेणेति भावः। नन्वेषामप्याख्यातत्वे प्रागुक्तभाष्यविरोधो ऽत आह *भाष्येइति । ईदृशसुबन्तस्यापीति भावः। अस्यावश्यकतां ध्वनयन्प्रसङ्गात्तत्र न्यूनतां निराचष्टे *कृतेति। विजातीयकृतेत्यर्थः। तदर्थः प्रागुक्त एव। *तद्धितादेः—तस्यापि। आदिना ?। ननु कर्माख्याते तल्लक्षणाव्याप्तिस्तत्र फलस्यातत्त्वादत आह *धात्वर्थेति । अनेन परमतनिरासः सूचितः। *एतदिति । आख्यातेत्यर्थः । ननु नामाख्येत्यत्र निपातपदस्योपलक्षणत्वावश्यकत्वस्य तद्भाष्याभिमतत्वस्योक्तत्वेन तत्रापि निपातत्वस्य सत्त्वेन च तेनैवोपसर्गसंग्रहोऽपि सिद्ध इति पृथक् तदुक्तिर्व्यर्थाऽत आह तावत्परमतेन *द्योतेति । सिद्धान्तमतेनाह *क्रियेति। एतेन वैपरीत्यशङ्काऽपि निरस्ता । विशेषं वक्तुं क्रियाप्रधानमित्यस्य सिद्धान्तार्थमाह *एवञ्चेति। तथा भाष्याद्युक्तौ चेत्यर्थः। अत एवेत्यस्य परमतसाधारण्येनाह *प्रत्ययेति। कर्माख्यातसंग्रहायाह *धात्वर्थ इति । नैयायिकमीमांसकाद्युक्तिं खण्डयति *नचेति । *तदर्थः—भाष्यार्थः । तस्याः कृतेः अन्यत्र विशेषणत्वेऽपि धात्वर्थापेक्षया प्राधान्यमस्त्येवेति भावः। निरुक्तार्थमाह *भावेति। भावयतीति व्युत्पत्तेः। पूर्वं च तदविरोध एव तेषामिति भावः। ननु विशेषोक्तेस्तस्यैवात्र विवरणमत आह *अभावेति । तदुक्तिमेव खण्डयति *नन्विति। एवमप्युक्तरीत्या तदसमभिव्याहारे तथा बोधेऽपि सिद्धान्तमतेनाह *एककर्त्रिति। *प्रथमान्तेति। तदर्थस्य विशेष्यत्वात्तस्यापि तत्त्वमिति भावः। एवमग्रेऽपि। परमात्रानुभवे ऋष्यनुभवविरोधमाह *यत्रोभे इति । ननु कथं तद्विरोधो

नुपदमेव प्रतिपादितत्वेन सुबन्तत्वस्यात्रापि सत्त्वेन तत्त्वस्यैव कथं नामस्वरूपत्वमत आहेति पाठः कलायाः २ पुस्तके ।

ऽत आह *तदर्थस्त्विति । *एकस्य-आख्यातस्य प्रधानस्य । *एकस्य-अन्यस्य नाम्नः । *पुनस्तु । *उभे ते-नामाख्याते । यत्रेत्यस्यार्थो *वाक्येइति, तदुपपादयति *वाक्येतीति । हेतोर्व्याख्या *तदर्थेति । उपसंहरति *एवमिति । प्राचीनमते ऽपि स्वरीत्या अविरोधमाह *अत्रेति। निरुक्तादावित्यर्थः। आदिना स्वरादीनामुपसर्गाणां च ग्रहणम् । *पक्षेऽपि-प्राचोक्ते । *उक्तम्-अनुपदमेव । अपिना सिद्धान्तसमुच्चयः । *अत एव-वाक्ये क्रियाप्राधान्यादेव । तन्मते उभयोरपि तत्र विशेषणत्वात्तदसिद्धिः स्पष्टैव ॥ १० ॥

किञ्च सर्वत्र प्रथमान्तार्थं प्रत्येव क्रियाया विशेषणत्वमिति पक्षे पाकक्रिया भवतीत्यर्थे पचति भवतीत्यस्य तवासिद्धिः ।

तदुक्तं भूवादिसूत्रे भाष्ये "का तर्हीयं वाचोयुक्तिः पचति भवति, त्वं पचसि भवति, पक्ष्यति भवति" इति प्रश्ने उत्तरं "पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति । पक्ष्यति भवतीत्यस्य भविष्यन्ती पाकक्रिया सत्कार्यवादाङ्गीकारात्सूक्ष्मरूपेण भवतीत्यर्थान्न दोषः ।

न च सत्कार्यवादे कार्यस्य नित्यतया सामग्रीवैयर्थ्यमिति वाच्यम् । तस्य अभिव्यक्त्यर्थत्वात् ।

नचाभिव्यक्तेर्जन्यत्वे सत्कार्यवादबाधः । नित्यत्वे सर्वदाभिव्यक्त्यापत्तौ व्यवहारापत्तिः, अभिव्यक्त्यन्तरापेक्षायां त्वनवस्थेति वाच्यम् । अभिव्यक्त्यभिव्यक्तेस्तदनतिरेकात् तवोत्पत्तेरुत्पत्तिवत् ।

परेतु सूक्ष्मतया विद्यमानस्यैव स्थूलरूपस्य विद्यमानाया एव चाभिव्यक्तेस्तमसा प्रतिबद्धतया व्यवहाराक्षमत्वेन सामग्र्या तस्य प्रतिबन्धकतमसो

निवृत्तौ व्यवहारक्षमतेत्यदोषात् । एवं व्यवहारादिविषये ऽपि सत्कार्यवादाबाधो बोध्य इत्याहुः ।

युक्तश्च सत्कार्यवादः । असदुत्पत्तिवादे मालतीकुसुमादौ विकासस्य गन्धोत्पादकत्वं वाच्यम् । एवं च निर्गन्धे ऽपि विकासेन गन्धोत्पत्त्यापत्तिः । वैजात्यनिवेशादिना तद्वारणे तु सत्कार्यवादाभ्युपगम एव युक्तः । विषयनिष्ठतमसा प्रतिबन्धाद्व्यवहाराक्षमत्वं च सूक्ष्मत्वम् ।

केचित्तु कारणात्मना स्थितसूक्ष्मरूपेण सत् स्थूलरूपेण त्वसदेव कार्यमिति सदसत्कार्यवादः । सूक्ष्मत्वं च कारणाभेदेन स्थितत्वात्ततः पृथग्ज्ञानायोग्यत्वम् । तत्र सूक्ष्मरूपमादाय सत्कार्यवादः सांख्यादीनाम् । स्थूलरूपमादायासत्कार्यवादो गोतमीयानामित्याहुः ।

वस्तुतो ऽनिर्वचनीयमेव जन्यत्वमित्युक्तम् ।

अत एव "किंकिलास्त्यर्थेषु" इति सूत्रे "अस्ति भवति विद्यते वा त्वं शद्रीं गमिष्यसि" इति वृत्त्यादावुदाहृतम् ।

अपि च "कर्मणा यमभिप्रैति" इतिसूत्रे "क्रियाऽपि कृत्रिमं कर्म, क्रियाऽपि हि क्रियया ईप्सिता भवति । कया क्रियया, संदर्शनादिक्रियया" इति भाष्ये उक्तम् । त्वद्रीत्या धावनकर्मकं दर्शनम् इत्यर्थे भाष्यकृदिष्टं पश्य मृगो धावतीति वाक्यं न स्यात् । कर्मत्वस्य चात्राकाङ्क्षावशात्संसर्गतया भानम् । मृगस्य तु कर्मत्वेन न तत्रान्वयसम्भवः । विभक्त्यर्थमद्वारीकृत्य नामधात्वर्थयोर्भेदेनान्वयायोगात् ।

मृगाद् द्वितीयायां तु प्रागुक्तवाक्यासिद्धिः । अप्रथमासामानाधिकरण्येन तिङो बाधित्वा शत्राद्यापत्तेश्च । वासरूपन्यायेन तु न तिङः । लादेशेषु तदभावस्य भाष्ये स्पष्टत्वात् । यो धावति मृगस्तं पश्येत्यध्याहारेणान्वयेऽपि भाष्यसंमतस्य पदैकवाक्यतयाऽन्वयस्य भङ्गः ।

एतेन विशिष्टवाक्यार्थस्य कर्मतया दर्शने ऽन्वयः, एवं च न व्युत्पत्तिविरोधः । व्युत्पत्तेर्नामार्थविषयकत्वात् । विशिष्टबोधकस्याप्रातिपदिकत्वाच्च न द्वितीयापत्तिः । श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभा इतिवदित्यपास्तम् ।

नीलविशिष्टघटस्य दर्शनकर्मत्वे प्रतिपिपादयिषिते नीलं घटं जानामीत्यादौ द्वितीयानापत्तेश्च । न च तवापि मृगीयधावनस्य विशिष्टस्य दर्शनकर्मत्वे ऽपि विशेषणस्य मृगस्यापि कर्मत्वात्प्रातिपदिकत्वाच्च तद्वाचकाद् द्वितीयापत्तिरिति वाच्यम् । मृगस्य धावनविशेषणत्वेन तत्प्रयुक्तस्यान्तरङ्गसंस्कारस्य प्रथमारूपस्यानिवृत्तेः । तव तु तस्य धावनविशेष्यत्वाद् दृशौ साक्षाद्विशेषणत्वात्प्रधानकार्यस्यान्तरङ्गादपि बलवत्ताया "हेतुमतिच" इति सूत्रभाष्यसंमतत्वेन द्वितीया दुर्वारा । उत्पत्तयः शुभा इति त्वार्षमित्यलम् ।

किञ्च चैत्रः पचतीत्यादौ कृतिप्रकारकः प्रथमान्तार्थविशेष्यको बोध इति न युक्तम् । एकविशेषणवैशिष्ट्येनोपस्थिते विशेष्ये तत्सजातीयसम्बन्धेन विशेषणान्तरसम्बन्धस्याव्युत्पत्तेः ।

अत एव राजपुरुषो भार्यायाश्चेति न । घटो द्रव्यमित्यर्थे घटो द्रव्यत्वस्येति च नेति समर्थसूत्रे भाष्ये स्पष्टम् ।

किञ्च तव पचाति व्रजतीत्यस्य साधुतापत्तिः । स्व-स्वव्युत्पत्त्यनुसारेण बोधस्य दुर्वारत्वेऽपि तत्र साधुत्वस्यापाद्यत्वात् । साधुत्वं च तत्तदर्थनिरूपणाभियुक्तवैयाकरणसंमते एवार्थे नान्यत्रेति भेद्यभेदकसंबधेत्यादिना स्पष्टमेव हरिणोक्तम् ॥ ११ ॥

(कुं० टी०) *त्वं पचसि भवतीति । त्वत्कर्तृकपाकक्रिया भवतीत्यर्थः। ननु भविष्यत्क्रियायां वर्तमानत्वमसम्भवीत्यत आह *सत्कार्यवादेति । *तस्या इति । सामग्र्या अभिव्यक्तिर्भवतीत्यर्थः । *लादेशेष्विति । "हशश्वतोर्लङ्च" इत्यस्यारम्भात् । *साधुतापत्तिरिति । पाकानुकूलकृतिमांश्चैत्रो गमनानुकूलकृतिमानिति बोधसम्भवात् । दण्डी पुरुषः सुन्दरइति विशेषणद्वययोगादुक्तं *सजातीयेति । *आपाद्यत्वादिति । साधुत्वापत्तिरेव दोष इत्यर्थः । *साधुत्वमिति । तत्तदर्थनिरूपणे अभियुक्तो वैयाकरण इत्यर्थः । *सांख्यादीनामिति । पूर्वान्वयि । वस्तुतः सत्कार्यवादः परिभाषामात्रं नतु लौकिकः । अत एव विकारे "कोशाड्ढञ्" "संभूते" इत्यर्थानुपपत्तिरित्युक्तं वार्तिककृता । आविर्भाव एवोत्पत्तिरिति तु न युक्तम् । गेहान्निस्सरति देवदत्ते उत्पत्तिप्रत्ययापत्तेः । कूर्माङ्गानां तु विद्यमानानामेव प्रवेशनिर्गमौ । तस्मादुपादानानां योग्यत्वात्तत्र सूक्ष्मरूपेण व्यवहारः । निर्गन्धे सौरभं सूक्ष्मरूपेण नास्तीत्यत्र स्वभावस्यैव त्वयाऽपि वक्तव्यत्वात् । *अनिर्वचनीयमेवेति । नहि सर्वथा कार्यस्य सत्त्वं नापि सर्व-

था असत्त्वं द्वैविध्यस्योपपादितत्वात् । *वृत्त्यादाविति । तत्र भविष्यतोऽपि वर्तमानत्वबोधात् । *संदर्शनमिति । पत्ये शेते इत्यत्र दर्शनादिपूर्वकारम्भकर्म पत्युद्देश्यकं शयनं करोतीत्यर्थः । *वाक्यं न स्यादिति । क्रिययोः परस्परं तार्किकैरन्वयानभ्युपगमात् । ननु कर्मत्वबोधकं किमत आह *संसर्गतयेति । ननु तार्किकमतेऽपि मृगस्यैव कर्मतासम्बन्धेनान्वयोऽस्तु कर्मत्वस्य संसर्गत्वाच्च न द्वितीयापत्तिरत आह *मृगस्यात्विति ॥ ११ ॥

(क० टी०) शङ्कोक्तपक्षे न दीक्षितभूषणाद्युक्तदोषावसर इति ध्वनयन्नाह *किञ्चेति । *सर्वत्र—तत्समभिव्याहारासमभिव्याहारयोः । अर्थान्तरे तत्सिद्धेरनिष्टत्वादाह *[illegible]केति । तदेव ध्वनयन्नाह *तदुक्तमिति । *कातर्हीति । भाववचनो धातुरिति लक्षणे पच्यादीनां भावावाचकत्वाद्धातुत्वं न प्राप्नोतीति पूर्वपक्षे इत्यादिः । तत्पक्षे कथं सम्बन्ध इति तदर्थः । *त्वं पचेति । एतदभावापत्त्या पूर्वत्र पाकानुकूलव्यापारवानस्तीत्येव बोधः । *पचेति । घञर्थे के साधुः । ननु भाष्ये पक्ष्यति भवतीति विरुद्धमत आह *पक्ष्यतीति । अर्थादित्यत्रान्वयः । प्रसङ्गादाह *नचेति । इष्टापत्तावाह *व्यवहारेति । द्वितीये प्रोक्तदोषाभावायाह *अभिव्यक्त्यन्तरेति । इदमुद्धरति *अभिव्यक्तीति । इदं तवाप्यावश्यकमित्याह *तवोत्पेति । नन्वेतावताऽनवस्थापरिहारेऽपि पूर्वदोष एवात आह *परेत्त्विति । *तस्य-घटादेः । *एवम्-उक्तप्रकारेण । अभिव्यक्तिविषयोक्तशङ्कानिरासायाह *व्यवहारेति । आदिना अभिव्यक्तिः । न्यायमते दोषमाह *असदिति । आदिना ऽदृष्टादि । *युक्त इति । लाघवात् । अत एव सुश्रुते उक्तं यथा हि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव वा नास्तीति. अथ चास्ति सतां भावानामभिव्यक्तिरिति कृत्वा केवलं सौक्ष्म्यान्नाभिव्यज्यते स एव विवृतपत्रकेसरैः कालान्तरेणाभिव्यक्तिं गच्छति । अन्यथा पुष्पान्तराणामपि विकासे उत्पद्येत, एवं बालानामपि वयःपरिणामाच्छु-

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) ३

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि-मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्राशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं संपूर्णम् (वेदान्तः) ३

) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् । ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्योः प्रत्यक्षानुमानमाथुर्यो व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकेश्च ... ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ५

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्यो।-प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ... ५

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद. शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता । ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । १